टीकापञ्चकैरवचूरिषष्ठेन च ग्रथिता

शोभनस्तुति वृत्तिमाला

द्वितीयः खण्डः

: सम्पादयिता :

मुनिर्हितवर्धनविजयः

: प्रकाशकश्च :

कुसुम–अमृत ट्रस्ट – वापी



॥ प्रातः सन्तु शिवाय ते जिनेन्द्राः ॥

टीकापञ्चकैरवचूरिषष्ठेन च ग्रथिता

शोभनस्तुति - वृत्तिमाला

श्रीविमलनाथतो महावीरजिनाऽवधिस्तुतीनां सञ्चयाऽऽत्मकोऽयं

द्वितीयः खण्डः

सम्पादयिता

तपागच्छाधीशानां, संविग्नमुनिनाथानां,
पू.आ.दे. श्री वि. **रामचन्द्रसूरीश्वराणां** प्रशिष्यावतंस-
पू. गुरुवर्य श्री **भव्यवर्धनविजयमहाराज्ञां** शिष्योत्तम-
पू. गुरुदेव श्री **मङ्गलवर्धनविजयमहाराज्ञां** शिष्याणुः
मुनिर्हितवर्धनविजयः

प्रकाशकः प्राप्तिसूत्रञ्च

कुसुम-अमृत ट्रस्ट

शान्तिनगर - अलकापुरी, वापी (वे.)-३९६ १९१.

ग्रन्थसंस्तवः ।

✦	ग्रन्थाऽभिधानम्	: शोभनस्तुति - वृत्तिमाला
✦	स्तुतिरचयितारः	: सुगृहीतनामधेयाः पूज्याः शोभनमुनीश्वराः ।
✦	स्तुतिनिर्मितसमयः	: विक्रमनृपस्यैकादशतमशताब्द्या उत्तरार्धः ।
✦	भाषाऽऽविष्कारः	: संस्कृतम्पद्यबद्धम् ।
✦	श्लोकमानम्	: षण्णवतिकच्छन्दोबद्धम् । ९६ ।
✦	तत्र वैशिष्ट्यम्	: श्लोकमात्रं 'यमक' अलङ्काराऽवस्थितम् ।

टीकाकर्तारः कालनिर्णितिश्च ।

(१)	टीकाकर्तारः	: पूज्या महर्षयः श्रीजयविजयाः ।
	टीकाप्रमाणम्	: पञ्चाशदधिकत्रिविंशतिशतमनुष्टुपः (२३५०) ।
	रचनाकालः	: सम्भवत वि.सं. १६७१ तमेऽब्दे ।
(२)	टीकाकर्तारः	: पूज्याः श्रीसिद्धिचन्द्रगणिनः ।
	टीकाप्रमाणम्	: २२०० श्लोका अनुष्टुपः ।
	रचनाकालः	: विक्रमार्कस्य सप्तदशतमशताब्द्याः पूर्वार्धः ।
(३)	टीकाकर्तारः	: पूज्या श्रीसौभाग्यसागरसूरयः ।
	टीकाप्रमाणम्	: नैतन्निर्णीयतेऽक्षरगणनाया अवशिष्टत्वाद् ।
	रचनाकालः	: सम्भवतः वि.सं. १७७८ तमेऽब्दे ।
(४)	टीकाकर्तारः	: पूज्याः श्रीदेवचन्द्रगणिनः ।
	टीकाप्रमाणम्	: नैतन्निर्णीयतेऽक्षरगणनाया अवशिष्टत्वाद् ।
	रचनाकालः	: विक्रमार्कस्य सप्तदशतमशताब्द्याम् ।
(५)	टीकाकर्तारः	: विद्वन्मार्तण्डा धनपालकवयः ।
	टीकाप्रमाणम्	: १००० श्लोका अनुष्टुपः ।
	रचनाकालः	: विक्रमस्य एकादश्यां शताब्द्याम् ।
(६)	अवचूरिकर्तारः	: पू. चिरन्तनाचार्याः ।
	अवचूरिमानम्	: } नैते निर्णीयेते साधनाऽभावात् ।
	रचनाकालः	: }

॥ वंदु जिण सव्वे वि ॥

પાંચ ટીકાઓ તદુપરાંત અવચૂરિને એકી સાથે પ્રસ્તુત કરતો

મહાન ગ્રંથ

શોભન સ્તુતિ - વૃત્તિમાલા

તેરમાંથી ચોવીસમાં તીર્થંકર સુધીની

સ્તુતિઓ તેમજ તેની ટીકાઓને સમાવતો

દ્વિતીય ખંડ

◎ સંપાદક ◎

તપાગચ્છાધિપતિ, વ્યાખ્યાનવાચસ્પતિ,

પૂ.આ.દે. શ્રી વિ. **રામચન્દ્રસૂરીશ્વરજી** મહારાજના પ્રશિષ્ય,

પૂ. ગુરુદેવ શ્રી **ભવ્યવર્ધનવિજયજી** મહારાજના શિષ્ય,

પૂ. ગુરુદેવ શ્રી **મંગલવર્ધનવિજયજી** મહારાજના શિષ્ય,

મુનિ હિતવર્ધનવિજય

◎ પ્રકાશક + પ્રાપ્તિસ્થાન ◎

કુસુમ-અમૃત ટ્રસ્ટ

શાંતિનગર, અલકાપુરી, વાપી (વે.)-૩૯૬ ૧૯૧.

ગ્રંથ પરિચય

✦	ગ્રંથનું નામ	: શોભનસ્તુતિ - વૃત્તિમાલા
✦	સ્તુતિના રચયિતા	: સ્વનામધન્ય શ્રી શોભન મુનિરાજ
✦	સ્તુતિ રચનાનો સમય	: વિક્રમની અગ્યારમી શતાબ્દીનો ઉત્તરાર્ધ
✦	ભાષા	: સંસ્કૃત / પદ્ય
✦	શ્લોકમાન	: ૯૬ છન્દોબદ્ધ
✦	વિશેષતા	: દરેક શ્લોકો 'યમક' અલંકારથી પરિમંડિત છે.

ટીકાકારો અને કાળનિર્ણય

(૧)	ટીકાકાર	: પૂ. શ્રી જયવિજયજી ગણી
	ટીકાનું શ્લોકપ્રમાણ	: ૨૩૫૦ (અનુષ્ટુપ્)
	ટીકા રચનાનો સમય	: પ્રાયઃ વિ.સં. ૧૬૭૧
(૨)	ટીકાકાર	: પૂ. શ્રી સિદ્ધિચન્દ્ર ગણિવર
	ટીકાનું શ્લોકપ્રમાણ	: ૨૨૦૦ (અનુષ્ટુપ્)
	ટીકા રચનાનો સમય	: વિક્રમની સત્તરમી શતાબ્દીનો પૂર્વાર્ધ
(૩)	ટીકાકાર	: પૂ. શ્રી સૌભાગ્યસાગરસૂરિ મ.
	ટીકાનું શ્લોકપ્રમાણ	: નિર્ણય થઇ શક્યો નથી.
	ટીકા રચનાનો સમય	: પ્રાયઃ વિ.સં. ૧૭૭૮
(૪)	ટીકાકાર	: પૂ. શ્રી દેવચન્દ્ર ગણિવર
	ટીકાનું શ્લોકપ્રમાણ	: નિર્ણય થઇ શક્યો નથી.
	ટીકા રચનાનો સમય	: વિક્રમની સત્તરમી શતાબ્દી
(૫)	ટીકાકાર	: ધનપાલકવિ
	ટીકાનું શ્લોકપ્રમાણ	: ૧૦૦૦ (અનુષ્ટુપ્)
	ટીકા રચનાનો સમય	: વિક્રમની અગ્યારમી શતાબ્દી
(૬)	અવચૂરિકર્તા	: પૂ. ચિરન્તનાચાર્ય
	અવચૂરિનું શ્લોકમાન	: } સામગ્રીના અભાવે નિર્ણય કરી શકાય તેમ નથી.
	કાળનિર્ણય	: }

આર્થિક સહયોગ

પૂ. ગુરુભગવંત **શ્રી મંગલવર્ધનવિજયજી મ.**ની પ્રેરણાથી **કુસુમ-અમૃત ટ્રસ્ટ** દ્વારા ટ્રસ્ટની જ્ઞાનદ્રવ્યની રાશિનો સદ્વ્યય કરીને **शोभनस्तुति - वृत्तिमाला** ના બન્ને ભાગના પ્રકાશનનો સંપૂર્ણ લાભ લેવામાં આવ્યો છે.

✦ આવૃત્તિ : પ્રથમ

✦ પ્રતિ : ૫૦૦ સેટ (ભાગ : ૧+૨)

✦ પ્રકાશન : વિ.સં. ૨૦૬૬, અષાઢ સુદ-૮,
રવિવાર, તા. ૧૮-૦૭-૨૦૧૦

✦ પ્રકાશન સ્થળ : છાપરીયા શેરી - સુરત જૈન સંઘ-ઉપાશ્રય
મહીધરપુરા, છાપરીયા શેરી, સુરત.

✦ નોંધ : (૧) પ્રસ્તુત ગ્રંથરત્ન મહદંશે જ્ઞાનદ્રવ્યના વિનિયોગ દ્વારા પ્રકાશિત થયો છે તેથી ગૃહસ્થોએ આ ગ્રંથનો સ્વાધ્યાય કરતાં પહેલાં યોગ્ય નકરો જ્ઞાનદ્રવ્યમાં ભરવો તેમજ ગ્રંથ વસાવવો હોય તો રૂા. ૪૦૦/- જ્ઞાનદ્રવ્યમાં નોંધાવવાનું ભૂલવું નહિ.

(૨) પૂ. સાધુ-સાધ્વીજી ભગવંતોને તેમજ જ્ઞાનભંડારોને આ ગ્રંથ સંપુટ સવિનય અર્પણ કરવામાં આવશે.

✦ મુદ્રક : *Tejas Printers*
F/5, Parijat Complex, Swaminarayan Mandir Road, Kalupur,
AHMEDABAD-380 001. **(M) 98253 47620 • PH. (O) (079) 22172271**



શાસન પ્રભાવક, શાસનસંરક્ષક, શાસનસૂર્ય,

પૂ.આ.દે.શ્રી.વિ. રામચન્દ્રસૂરીશ્વરજી મહારાજ

सौभाग्यमौक्तिकविलोल-महासमुद्रं, स्याद्‌वादनादनयगर्भित-तत्त्वमुद्रम् ।
विस्मृत्य वा गुरुपरं गुरुरामचन्द्रमन्यः क इच्छति जनः सहसा ग्रहीतुम् ।।

- भक्तामरपादपूर्तिकाव्यम्-३ ।।

સંયમ, સમતા અને સરળતાના સ્વામી,
પૂ. ગુરુદેવ શ્રી ભવ્યવર્ધનવિજયજી મહારાજ

બે ચાર ભવમાં મોક્ષના સ્વામી થનારાં આપ છો
બે ચાર ભવમાં મોક્ષનું વરદાન અમને આપજો !
ઉજ્જ્વળ યશોગાથા તમારી નાથ ! અજરામર રહો !
શ્રી ભવ્યવર્ધનવિજયજી ચિરકાળ જયવંતા રહો ! ॥

પ્રકાશકીય

અંતર આનંદથી તરબતર છે કેમ કે અમને જૈન સાહિત્યના એક અપ્રતીમ ગ્રંથ સમૂહનું પ્રકાશન કરવાનો લાભ મળી રહ્યો છે. शोभनस्तुति - वृत्तिमाला નામના આ ગ્રંથને ગ્રંથ કહેવો તે કરતાં ગ્રંથ સમૂહ કહેવો વધુ ઉચિત છે. એક જ વિષય ઉપર અલગ અલગ સમયે અલગ અલગ શાસ્ત્રકારો દ્વારા ઉદ્‌ભવેલાં સાત સંસ્કૃત ગ્રંથોને અહીં સંકલિત કરવામાં આવ્યાં છે. સાત પૈકી એક મૂળ ગ્રંથ છે અને શેષ છ ગ્રંથો તેની ઉપર રચાયેલાં વૃત્તિગ્રંથો છે.

વિક્રમની અગ્યારમી શતાબ્દીમાં થયેલાં પૂ. પૂર્વાચાર્ય શ્રીમદ્ મહેન્દ્રસૂરીશ્વરજી મહારાજાના પનોતા શિષ્યરત્ન, પૂ. શોભન મુનિરાજે વર્તમાનચોવીશીના ચોવીશ તીર્થંકરોની જે स्तुतिचतुर्विंशिका રચી તે शोभनस्तुति ના નામે જૈન સંઘમાં સુપ્રસિદ્ધ છે.

અત્રે મૂળ ગ્રંથનું સ્થાન शोभनस्तुति એ શોભાવ્યું છે અને शोभनस्तुति ઉપર ભિન્ન-ભિન્ન પૂર્વાચાર્યોએ ભિન્ન-ભિન્ન સમયે રચેલાં પાંચ ટીકા ગ્રંથો તેમજ એક અવચૂરિ ગ્રંથ સંલગ્ન છ ગ્રંથો તરીકે સંમીલિત છે. આમ, મૂળ સ્તુતિઓ, પાંચ ટીકાઓ અને એક અવચૂરિ મળીને ગ્રંથ સંખ્યા સાત સુધી પહોંચી છે જે અહીં આવિર્ભાવ પામી રહી છે.

शोभनस्तुति ઉપર આટલી ટીકાઓ અને અવચૂરિને એકી સાથે પ્રગટ કરતો આ પહેલ વહેલો ગ્રંથ છે. કદાચ જૈન સાહિત્યના ભક્તિ ગ્રંથોમાં એવો ગ્રંથ અદ્યાવધિ પ્રગટ થયો નથી જેમાં એક જ સ્થળે સાત ગ્રંથોને એકત્ર કરવામાં આવ્યાં હોય.

આ ગ્રંથનું સંપૂર્ણ સંપાદન પૂ. મુનિરાજ શ્રી હિતવર્ધનવિજયજી મહારાજે કર્યું છે. તેઓશ્રીના ગુરુ ભગવંત પૂ. મુનિરાજ શ્રી મંગલવર્ધનવિજયજી મહારાજના પાવન ઉપદેશથી પ્રસ્તુત ગ્રંથના બન્નેય ખંડના પ્રકાશનનો લાભ અમને મળ્યો છે જેને અમે અમારું સદ્‌ભાગ્ય ગણીએ છીએ.

વાચકો / પાઠકોની અનુકૂળતાને અનુલક્ષીને પ્રસ્તુત ગ્રંથરત્નને બે ભાગમાં પ્રકાશિત કરવાનું યોગ્ય ગણ્યું છે. પૂર્વે અમારાં દ્વારા પ્રકાશિત થયેલાં कादम्बरी વિગેરે ગ્રંથના અનુભવ પરથી એ સમજાયું છે કે ખૂબ મોટું કદ ધરાવતાં ગ્રંથોનું વિતરણ, પોસ્ટીંગ, બાઇન્ડીંગની સુરુક્ષા બધું જ મુશ્કેલ બની જાય છે.

સંપાદક પૂ. ગુરુભગવંતે પ્રસ્તુત ગ્રંથમાં પચાસ જેટલી નવી ટિપ્પણો ઉમેરી છે અને એ ટિપ્પણો દ્વારા જુદી-જુદી ટીકાઓમાં અલગ અલગ સ્થળે રહેલાં મહદંશે વ્યાકરણ દોષોનું અને ક્યાંક આગમિક દોષોનું શુદ્ધિકરણ કર્યું છે. આ તેઓશ્રીજીનો વિશેષ ઉપકાર છે. પૂર્વના સંપાદકે शोभनस्तुति નું વ્યાપક સંશોધન હાથ ધર્યું હોવા છતાં મૂળ ગ્રંથોમાં રહેલી અશુદ્ધિઓનું શુદ્ધ અને સાપેક્ષ પરિમાર્જન કરવામાં તેઓ પાછા પડ્યાં છે એવું પ્રસ્તુત શુદ્ધિકરણને જોતાં માનવું પડે તેમ છે.

પ્રાંતે શ્રમણ પ્રધાન ચતુર્વિધ સંઘના કરકમળમાં शोभनस्तुति - वृत्तिमाला ને સમર્પિત કરતાં સુરુચિભાવ અનુભવીએ છીએ.

કુસુમ-અમૃત ટ્રસ્ટ
વાપી

विषय निर्दर्शनम् ।

(१३) श्रीविमलनाथस्तुतयः २०३

(१४) श्रीअनन्तनाथस्तुतयः...................................... २२१

(१५) श्रीधर्मनाथस्तुतयः २३५

(१६) श्रीशान्तिनाथस्तुलयः २४६

(१७) श्रीकुन्थुनाथस्तुतयः २६६

(१८) श्रीअरनाथस्तुतयः २८२

(१९) श्रीमल्लिनाथस्तुतयः ३०२

(२०) श्रीमुनिसुव्रतजिनस्तुतयः ३१६

(२१) श्रीनमिनाथस्तुतयः ३३३

(२२) श्रीनेमिनाथस्तुतयः ३५०

(२३) श्रीपार्श्वनाथस्तुतयः ३६९

(२४) श्रीमहावीरजिनस्तुतयः...................................... ३९१

१३. श्रीविमलजिनस्तुतयः

अथ श्रीविमलनाथाय प्रणामः—

अपापदमलं घनं शमितमानमामो हितं
नतामरसभासुरं विमलमालया[1]ऽऽमोदितम् ।
अपापदमलङ्घनं शमितमानमामोहितं
न तामरसभासुरं विमलमालयामोदितम् ॥ १ ॥ ४९ ॥

- पृथ्वी (८, ९)

(१)

ज० वि०—अपापदमलमिति । वयं विमलं-विमलनामानं भगवन्तं आनमामः-प्रणमामः इति क्रियाकारकसंटङ्कः । अत्र 'आनमामः' इति क्रियापदम् । के कर्तारः ? 'वयम्' । कं कर्मतापन्नम् ? 'विमलम्' । कथंभूतं विमलम् ? 'अपापदं' न पापं ददातीत्यपापदस्तम् । कथम् ? 'अलं' अत्यर्थम् । अथवा अपापदमलमित्यक्षतमेव विशेषणम् । तथा चायमर्थः-अपापो निष्पङ्को यो दम-उपशमस्तं लाति-आदत्ते इत्यपापदमलस्तम् । पुनः कथं० ? 'इतं' प्राप्तम् । किं कर्मतापन्नम् ? 'शं' सुखम् । शं कथंभूतम् ? 'घनं' अच्छिद्रम् । अशेषमलक्षयोत्थमित्यर्थः । पुनः कथं० विमलम् ? 'हितं' हितकारिणम् । पुनः कथं० ? 'नतामरसभासुरं' नता-नम्रीभूता अमरसभा-देवपर्षत् असुरा-भुवनपतिदेवविशेषा यस्य,

१. 'या मोदितम्' इत्यपि पाठः ।

अथवा नता अमरा-देवाः सभा-भासहिताः असुरा यस्य स तथा तम् । पुनः कथं० ? 'आमोदितं' सुरभीकृतम् । कया ? 'विमलमालया' विमला-विगतमला या माला-स्रक् तया । पुनः कथं० ? 'अपापदं' अपगता आपदो यस्मात् स तथा तम् । पुनः कथं० ? 'अलङ्घनं' न विद्यते लङ्घनम्-अधःकरणं कुतोऽपि यस्य स तथा तम् । पुनः कथं० ? 'शमितमानं' शमितः-शमं नीतो मानो येन स तथा तम् । पुनः कथं० ? 'आमोहितं न' आ-समन्तात् मोहितं न । नेति निषेधपदम् । पुनः कथं ? 'तामरसभासुरं' तामरसं-महोत्पलं तद्वद् भासुरं-भासनशीलम् । पुनः कथं० ? 'आलयामोदितं' आलयैः-आवासैरमोदितं-न मोदं नीतम् । यद्वा आलयेऽमोदितं-न मुदमापन्नम्, त्यक्तगृहवासत्वात् ।।

अथ समासः—पापं ददातीति पापदः 'तत्पुरुषः' । (न पापदः अपापदः 'तत्पुरुषः') । तं अपापदम् । अथवा अपगतं पापं यस्मात् सः अपापः 'बहुव्रीहिः' । अपापश्चासौ दमश्च अपापदमः 'कर्मधारयः' । अपापदमं लातीत्यपापदमलः 'तत्पुरुषः' । तमपाप० । अमराणां सभा अमरसभा 'तत्पुरुषः' । अमरसभा च असुराश्च अमर० 'इतरेतरद्वन्द्वः' । नता अमरसभासुरा यस्य स नतामर० 'बहुव्रीहिः' । तं नतामर० । यदिवा सह भान्ति वर्तन्ते ये ते सभाः 'तत्पुरुषः' । सभाश्च ते असुराश्च सभासुराः 'कर्मधारयाः' । अमराश्च सभासुराश्च अमर० 'इतरेतरद्वन्द्वः' । नता अमरसभासुरा यस्य स नताम० 'बहुव्रीहिः' । तं नतामर० । विमला चासौ माला च विमलमाला 'कर्मधारयः' । तया विमल० । अपगता आपदो यस्मात् सः अपापद् 'बहुव्रीहिः' तमपापदम् । न विद्यते लङ्घनं यस्य सोऽलङ्घनः 'बहुव्रीहिः' । तमलङ्घनम् । शमितो मानो येन स शमितमानः 'बहुव्रीहिः' । तं शमि० । तामरसवद् भासुरस्ताम० 'तत्पुरुषः' । तं ताम० । न मोदितः अमोदितः 'तत्पुरुषः' । आलयैरमोदितः आलया० । यद्वा आलये अमोदित आलयामोदितः, उभयथाऽपि 'तत्पुरुषः' । तं आलया० ।। इति काव्यार्थः ।। ४९ ।।

(२)

सि० वृ०—अपापदमलमिति । विमलानि ज्ञानानि अस्य विमलः, विगतो मलः-पापं अस्येति वा विमलः । "मलं किट्टे पुरीषे च, पापे च कृपणे मलः" **इति विश्वः** । गर्भस्थेऽस्मिन् मातुर्मतिस्तनुश्च विमला जातेति वा विमलः, तं विमलं-विमलनामानमर्हन्तं वयमानमामः-प्रणमाम इत्यर्थः । आङ्पूर्वक 'णम प्रह्वीभावे' धातोर्वर्तमाने कर्तरि परस्मैपदे उत्तमपुरुषबहुवचनं मस् । 'अप् कर्तरि' (सा० सू० ६९१) इत्यप् । '०व्मोरा' (सा० सू० ६९६) इत्यात्वम् । 'स्रोर्विसर्गः' (सा० सू० १२४) । तथा च 'आनमामः' इति सिद्धम् । अत्र 'आनमामः' इति क्रियापदम् । के कर्तारः ? वयम् । कं कर्मतापन्नम् ? । विमलम् । कथंभूतं विमलम् ? ।'अपापदं' न पापं ददातीत्यपापदस्तम् । कथम् ? । अलम्-अत्यर्थम् । "अलं

1. अत्र 'प्रथम' इति पदयोजनमप्राकरणिकम् ।

भूषणपर्याप्ति-वारणेषु निरर्थके । अलं शक्तौ च निर्दिष्टं" **इति विश्वः** । यद्वा अपापदमलमित्यक्षतमेव विशेषणे । तथा च अपापः-निष्पङ्को यो दमः-उपशमः तं लाति-गृह्णातीति अपापदमलस्तं अपापद-मलमित्यर्थः । पुनः कथंभूतम् ? । इतं-प्राप्तम् । किम् ? । शं-सुखम् । "शं सुखेऽपि च कल्याणे" **इति विश्वः** । कथंभूतं शम् ? । घनं-निरन्तरम्, निखिलकर्मक्षयोत्थमित्यर्थः । "घनो मेघे मूर्तिगुणे, त्रिषु मूर्ते निरन्तरे" इत्यमर (?) । पुनः कथंभूतं विमलम् ? । हितं-हितकारकम् । 'दधातेर्हिः' (सा० सू० १३०५) । पुनः कथंभूतम् ? । 'नतामरसभासुरं' नता-नम्रीभूता अमरसभा अमराणां-देवानां सभा-पर्षत् असुराः-भुवनपतिदेवविशेषाश्च यस्य, यद्वा अमरदेवाः सभाः-भासहिताः असुराश्च यस्य स तथा तम् । पुनः कथंभूतम् ? । आमोदितं-सुरभीकृतम् । कया ? । 'विमलमालया' विमला-विगतमला माला-स्रक् तया । पुनः कथंभूतम् ? । 'अपापदं' अपगता आपदो यस्मात् स तथा तम् । पुनः कथंभूतम् ? । 'अलङ्घनं' न विद्यते लङ्घनं-अधःकरणं कुतोऽपि यस्य स तथा तम् । पुनः कथंभूतम् ? । 'शमितमानं' शमितः-शमं-क्षयं नीतः मानः-अभिमानो येन स तम् । पुनः कथं० ? । 'न आमोहितं' आ-समन्तात् मोहितम् । नेति निषेधपदम् । पुनः कथंभूतम् ? । 'तामरसभासुरं' तामरसं-कुशेशयं तद्वद् भासुरं-भासनशीलम् । पुनः कथंभूतम् ? । 'आलयामोदितं' आलयैः-आवासैः अमोदितं-न मोदं नीतम्, आलये-गृहे अमोदितं-न मुदमापन्नमित्यर्थो वा । त्यक्तगृहवासत्वादिति भावः ॥ ४९ ॥

(३)

सौ० वृ०—यो वासवानां पूज्यो भवति स विगतमलो भवति । अनेन संबन्धेनायातस्य त्रयोदश-श्रीविमलजिनस्य स्तुतिव्याख्यानं व्याख्यायते-अपापदमलमिति ।

वयं विमलनामानं त्रयोदशं (जिनं) आनमाम इत्यन्वयः । 'आनमामः' इति क्रियापदम् । के कर्तारः ? । 'वयम्' । 'आनमामः' प्रणमामः । कं कर्मतापन्नम् ? । 'विमलं' विमलजिनम् । किंवि० विमलम् ? । 'अपापदं' न पापदायकम् । धर्मदातारमित्यर्थः । यद्वा अपापः-पवित्रः दमः-इन्द्रियादिजयो यस्य सः अपापदमः तं 'अपापदमम्' । कथम् ? । 'अलं' अत्यर्थम् । पुनः किं० विमलम् ? । 'घनं' सान्द्रं निबिडितं (डं) निच्छिद्रम् । पुनः किं० विमलम् ? । शं-सुखम् इतं-प्राप्तं 'शमितम्' । पुनः किं० विमलम् ? । 'हितं' लोकस्य हितकारिणम् । पुनः किं० विमलम् ? । नताः-प्रणता ये अमरा-देवास्तेषां सभा-पर्षत् तादृशास्तथा (?) असुरा-नाग(असुर?)कुमारादयस्तैर्भासुरं-देदीप्यमानं तं 'नतामरस-भासुरम्' । पुनः किं विमलम् ? । 'अपापदं' अपगतापदं-गतविपदम् । यद्वा अपापो-निर्मलो दमः तं लाति-गृह्णातीति अपापदमलम् । पुनः किं० विमलम् ? । 'अलङ्घनं' अनुल्लङ्घनीयवचनम् । पुनः किं० विमलम् ? । 'शमितमानं' गताहङ्कारम् । पुनः किं० विमलम् ? । आ-समन्तात् मोहितं व्यामोहितम् ।

---

१. अयमर्थो विचारणीयः ।

कथम् ? । 'न' निषेधे । अमोहितमित्यर्थः । पुनः किं० विमलम् ? । तामरसं-महोत्पलं तद्वद् भासुरः-देदीप्यमानः तं 'तामरसभासुरम्' । पुनः किं० विमलम् ? । विमला-निर्मला या माला-पुष्पस्रक् तया विमलमालया आमोदितं-सुरभीकृतम् । पुनः किं० विमलम् ? । आलयं-गृहं तैः अमोदितः-न मोदं गतः तं 'आलयामोदितम्' । एवंविधं विमलं प्रणमामः । इति पदार्थः ।।

अथ समासः—पापं ददातीति पापदः, न पापदः अपापदः, तं अपापदम् । यद्वा न विद्यते पापं यस्मिन् सः अपापः । अपापो दमो यस्य सः अपापदमः तं अपापदमम् । लङ्घ्यते-उल्लङ्घ्यते-अधःक्रियते इति लङ्घनम्, नास्ति लङ्घनं यस्य सः अलङ्घनः, तं अलङ्घनम् । शं-सुखं इतः-प्राप्तः शमितः, तं शमितम् । यद्वा शमः-उपशमः सञ्जातो यस्य स शमितः, तं शमितम् । अमराणां सभा अमरसभा, अमरसभा च असुराश्च अमरसभासुराः, नता अमरसभासुरा यस्य स नतामरसभासुरः, तं नतामरसभासुरम् । विगतो मलो यस्य स विमलः, तं विमलम् । आलयैः-गृहैः गृहाणां वा न मोदितः आल०, तं आलयामोदितम् । नास्ति गृहममकार इत्यर्थः । अपगताः आपदो यस्य स अपापदः, तं अपापदम् । शमितः-क्षयं नीतो मानः-अहङ्कारो येन स शमितमानः, तं शमितमानम् । आ-समन्तात् मोहितः आमोहितः, तं आमोहितम् । कथम् ? । 'न' निषेधे । विमला चासौ माला च विमलमाला, तया विमलमालया । तामरसवद् भासुरः तामरसभासुरः, तं तामरसभासुरम् । मोहः संजातोऽस्य इति मोहितः, न मोहितः अमोहितः, तं अमोहितम् । इति प्रथमवृत्तार्थः । पृथ्वीच्छन्दसा स्तुतिरियम् अर्धपादयमकेन ।। ४९ ।।

(४)

दे० व्या०—अपापदमलमिति । विमलं-विमलनाथं वयं अलं-अत्यर्थं यथा स्यात् तथा आनमामः इत्यन्वयः । 'णम प्रह्वीभावे' धातुः । 'आनमामः' इति क्रियापदम् । के कर्तारः ? । वयम् । कं कर्मतापन्नम् ? । विमलम् । किंविशिष्टं विमलम् ? । 'अपापदम्' न पापं ददातीत्यपापदः तम् । अपापः-पापरहितो यो दमस्तं लाति गृह्णातीत्यपापदमलः तं इति एकपदमेव वा । पुनः किंविशिष्टम् ? । 'शमितम्' शं-सुखं (इतं-) प्राप्तं येन स तम् । पुनः किंविशिष्टम् ? । हितं-हितकारकम्, मोक्षमार्गप्रदर्शनात् । पुनः किंविशिष्टम् ? । 'नतामरसभासुरम्' नता-प्रह्वीभूता अमरसभा-देवपर्षत् असुरा-भुवनपतयश्च यस्य स तम्, अथवा नता-नम्रीभूता अमरा-देवाः (सभा-भासहिताः) असुराश्च यस्य स तम् । पुनः किंविशिष्टम् ? । मोदितं-सुरभीकृतम् । कया ? । 'विमलमालया' विमला-निर्मला या माला-पुष्पस्रक् तया । पुनः किंविशिष्टम् ? । 'अपापदम्' । अपगता आपद्-विपत्तिर्यस्य स तम् । पुनः किंविशिष्टम् । 'अलङ्घनम्' नातिक्रमणीयं, सर्वेषामपि पूज्यत्वात् । पुनः किंविशिष्टम् ? । 'शमितमानम्' शमितः-शान्तिं नीतः मानः-स्मयो येन स तम् । पुनः किंविशिष्टम् ? । 'नामोहितम्' मोहेन आ-समन्तान्न

वशीकृतम् । पुनः किंविशिष्टम् ? । 'तामरसभासुरम्' तामरसं-कमलं तद्वद् भासुरं-दीप्तम् । पुनः किंविशिष्टम् ? । 'आलयामोदितम्' आलये-गृहे अमोदितं-अहर्षितम् ।। इति प्रथमवृत्तार्थः ।। ४९ ।।

(५)

ध० टीका—अपापदेति । 'अपापदं' न पापं ददातीति यत् तत् । 'अलं' अत्यर्थम् । अथवा पापहेतुत्वात् पापं, न पापं अपापं, न विद्यते वा यत् तद् अपापम्, दमं लातीति दमलं, अपापं च तत् दमलं चेति अपापदमलम् । 'घनं' अच्छिद्रं-अशेषमलक्षयोत्थमित्यर्थः, तत् तथाभूतम् । 'शं' सुखम् । 'इतं' प्राप्तम् । 'आनमामः' प्रणमामः । 'हितं' हितकारणम् । 'नतामरसभासुरं' नता अमरसभा सुराश्च यस्य तम्, अथवा नता अमराः सभाः-सदीप्तिका असुराश्च यस्य तम् । 'विमलमालया' विगतमला या माला-स्रक् तया । 'आमोदितं' सुरभीकृतम् । 'अपापदं' अपगता आपदो यस्य तम् । 'अलङ्घनं' न विद्यते लङ्घनं-अधःकरणं कुतोऽपि यस्य तम् । 'शमितमानं' शमितः-शमं नीतो मानो येन तम् । 'आमोहितं' आ-समन्तात् मोहं नीतम् । 'न' इति प्रतिषेधपदं अस्य सम्बध्यते । 'तामरसभासुरं' तामरसवद् भासुरं-उज्ज्वलम् । 'विमलं' विमलाभिधानं जिनम् । 'आलयामोदितं' आलया-आवासास्तैरमोदितं-न मोदं नीतम् । विमलं आनमाम इत्यन्वयः ।। ४९ ।।

(६)

अवचूरिः

विमलं जिनं वयमानमामः । पापं ददातीति पापदः, न पापदमपापदम्, पुण्यप्रदमित्यर्थः । अलं-अत्यर्थम् । यद्वा अपापो यो दमः-उपशमस्तं लातीति अपापदमलम् । घनं-निश्छिद्रं अशेषमलक्षयोत्थं शं-सुखमितं-प्राप्तम् । हितं प्राणिगणस्य । नता-नम्रीभूता अमरसभा-देवपर्षदसुराश्च यस्य । विमला या माला-पुष्पस्रक् तयाऽऽमोदितं-सुरभीकृतम् । अपगता आपदो यस्मात् तम् । अलङ्घनं-केनाप्यपराभूतम् । शमितो मानो येन तम् । आमोहितं न, मोहेन समन्तान्न वशीकृतम् । तामरसं-कमलं तद्वद् भासुरं-दीप्यमानम् । आलये-गृहविषये अमोदितं-अहृष्टम् ।। ४९ ।।

समस्तजिनेश्वराणां नुतिः—

सदानवसुराजिता असमरा जिना भीरदाः

क्रियासु रुचितासु ते[1] सकलभारतीरा यताः ।

---

१. 'तेऽसकल०' इति पाठान्तरम् ।

सदानवसुराजिता असमराजिनाभीरदाः
क्रियासुरुचितासु ते सकलभा[1] रतीरायताः ॥ २ ॥ ५० ॥

- पृथ्वी

(१)

ज० वि०—सदानवेति । भो भव्यात्मन् ! ते-तव ते जिनाः-तीर्थकराः क्रियासु-कर्तव्येषु आयता-दीर्घा रतीः-मुदः क्रियासुः-विधेयासुः इति क्रियाकारकान्वयः । अत्र 'क्रियासुः' इति क्रियापदम् । के कर्तारः ? 'जिनाः' । काः कर्मतापन्नाः ? 'रतीः' । कस्य ? 'ते' । कासु ? 'क्रियासु' । रतीः कथंभूताः ? 'आयताः' । क्रियासु कथंभूतासु ? 'रुचितासु' अभिप्रेतासु । पुनः कथं० ? 'उचितासु' योग्यासु । जिनाः कथंभूताः ? 'सदानवसुराजिताः' दानवसहिता ये सुरा-देवाः तैः अजिता-उपसर्गादिभिः कृत्वा अक्षोभिताः । पुनः कथं० ? 'असमराः' समरः-संग्रामः तेन रहिताः । पुनः कथं० ? 'भीरदाः' भियं-भयं रदन्ति-भिन्दन्तीति भीरदाः-भयच्छिदः । पुनः कथं० ? 'सकलभारतीराः' सकलाः-सदोषाः सांसारिककृत्यरूपा ये भारास्तेषां पर्यन्तत्वात् तीराः-तीरभूताः । अथवा अकारप्रश्लेषविधानेन असकलां-अदोषां भारतीं-सरस्वतीं ईरयन्ति रान्तीति वा ते तथा । पुनः कथं० ? 'यताः' यत्नं कुर्वाणाः । निगृहीतेन्द्रिया इत्यर्थः । पुनः कथं० ? । 'सदानवसुराजिताः' सदानं-दानसहितं यद् वसुद्रव्यं तेन राजिताः-शोभिताः । इदं च विशेषणं गृहस्थावस्थामाश्रित्य ज्ञेयम् । पुनः कथं० ? 'असमराजिनाभीरदाः' असमं राजन्त इत्येवंशीला असमराजिनः, अथवा असमाश्च ते राजिनश्च असमराजिनः, एवंविधा नाभीरदा-नाभिदशना येषां ते तथा । पुनः कथं० । 'सकलभाः' सकला-सम्पूर्णा भा-दीप्तिर्येषां ते तथा ॥

अथ समासः—सह दानवैर्वर्तमाना इति सदानवाः 'तत्पुरुषः' । सदानवाश्च ते सुराश्च सदानव० 'कर्मधारयः' । न जिता अजिताः 'तत्पुरुषः' । सदानवसुरैरजिताः सदानव० 'तत्पुरुषः' । न विद्यते समरो येषां ते असमराः 'बहुव्रीहिः' । भियं रदन्तीति भीरदाः 'तत्पुरुषः' । सह कलाभिर्वर्तमाना इति सकलाः 'तत्पुरुषः' । सकलाश्च ते भाराश्च सक० 'कर्मधारयः' । सकलभाराणां तीराः सक० 'तत्पुरुषः' । अथवा न सकला असकला 'तत्पुरुषः' । असकला चासौ भारती च असक० 'कर्मधारयः' । असकलभारतीमीरयन्ति रान्तीति वा असक० 'तत्पुरुषः' । सह दानेन वर्तते यत् तत् सदानं 'तत्पुरुषः' । सदानं च तद् वसु च सदा० 'कर्मधारयः' । सदानवसुभी राजिना सदान० 'तत्पुरुषः' । न समं असमं 'तत्पुरुषः' । असमं राजन्त इत्यसमराजिनः 'तत्पुरुषः' । यद्वा न समा असमाः 'तत्पुरुषः' । असमाश्च ते राजिनश्च असम० 'तत्पुरुषः' । नाभी च रदाश्च नाभीरदाः 'इतरेतरद्वन्द्वः' । असमराजिनो नाभीरदा येषां ते असम० 'बहुव्रीहिः' । सकला भा येषां ते सकलभाः 'बहुव्रीहिः' ॥ इति काव्यार्थः ॥ ५० ॥

---

१. '०भारतीरायताः' इत्यपि पाठः ।

(२)

सि० वृ०—सदानवेति । भो भव्यात्मन् ! ते-तव ते जिनाः-तीर्थकराः क्रियासु-कर्तव्येषु आयता-दीर्घा रतीः-मुदः क्रियासुः-विधेयासुरित्यर्थः । 'डुकृञ् करणे' धातोराशिषि कर्तरि परस्मैपदे प्रथमपुरुषबहुवचनं यासुस् । 'यादादौ' (सा० सू० ८१४) इत्यनेन ऋकारस्य रिङादेशः । 'स्रोर्विसर्गः' (सा० सू० १२४) । तथा च 'क्रियासुः' इति सिद्धम् । अत्र 'क्रियासुः' इति क्रियापदम् । के कर्तारः ? । जिनाः । काः कर्मतापन्नाः ? । रतीः । कस्य ? । ते । कासु ? । क्रियासु ।

"क्रिया कर्मणि चेष्टायां, करणं संप्रधावने ।
आरम्भोपायशिष्यार्थ-श्चिकित्साविकृतिष्वपि ॥"

इति विश्वः । रतीः कथंभूताः ? । आयताः । कथंभूतासु क्रियासु ? । रुचितासु । पुनः कथं० ? । उचितासु-योग्यासु । कथंभूता जिनाः ? । 'सदानवसुराजिताः' सदानवा-दानवैः सह वर्तमाना ये सुरा-देवाः तैरजिताः-उपसर्गादिभिरक्षोभिताः । पुनः कथंभूताः ? । 'असमराः' समरः-सङ्ग्रामस्तेन रहिताः । पुनः कथंभूताः ? । 'भीरदाः' रदन्ति-भिन्दन्ति इति रदाः, पचादित्वादच्, ततः भियं-भयं रदन्ति ते भीरदाः । भियं रदन्तीति विग्रहे । 'कर्मण्यण्' (पा० अ० ३, पा० २, सू० १) इति वृद्धौ भिरदा इत्यनिष्टं स्यादिति । पुनः कथंभूताः ? । 'सकलभारतीराः' सकलाः-सदोषाः सांसारिककृत्यरूपा ये भारास्तेषां पर्यन्तत्वात् तीराः-तीरभूताः, यद्वा असकला-अदोषा भारतीं-गिरमीरयन्ति रान्तीति वा असकलभारतीरा इत्यर्थः । पुनः कथंभूताः ? । यताः-यत्नं कुर्वाणाः, निगृहीतेन्द्रिया इत्यर्थः । पुनः कथंभूताः ? । 'सदानवसुराजिताः' सदानं-दानसहितं यद् वसु-द्रव्यं तेन राजिताः-शोभिताः । इदं च विशेषणं गृहस्थावस्थामाश्रित्य ज्ञेयम् । "देवभेदेऽनले रश्मौ, वसू रत्ने धने वसु" इत्यमरः (श्लो० २७९१) । पुनः कथंभूताः ? । 'असमराजिनाभीरदाः' असमं राजन्त इत्येवंशीलाः असमराजिनः, असमाश्च ते राजिनश्चेति वा नाभीरदाः-नाभीदशना येषां ते तथा । नाभी च रदाश्च नाभीरदाः 'इतरेतरद्वन्द्वः' । पुनः कथंभूताः ? । 'सकलभाः' सकला-सम्पूर्णा भा-दीप्तिर्येषां ते तथा । "स्युः प्रभारुक्रुचिस्त्विड्भा०" इत्यमरः (श्लो० २१२) । "भा मयूखमहसी छविर्विभा" इति हैमः (का० २, श्लो० १४) ॥ ५० ॥

(३)

सौ० वृ०—सदानवेति । ते जिनाः-तीर्थंकरा उचितासु-योग्यासु मुक्तिप्राप्तिलक्षणासु क्रियासु ते - तव रतीः क्रियासुः इत्यन्वयः । 'क्रियासुः' इति क्रियापदम् । के कर्तारः ? । 'जिनाः' । काः कर्मतापन्नाः ? । 'रतीः' परमप्रीतीः । कासु ? । 'क्रियासु' आवश्यकाद्यनुष्ठानेषु । किंवि० क्रियासु ? । 'उचितासु' योगक्षेमावाप्तियोग्यासु । कस्य ? । 'ते' तव । किंविशिष्टा जिनाः ? । दानवैः सहिता ये सुरा-अमरा

तैः अजिताः-अपराजिताः 'सदानवसुराजिताः' । पुनः किंवि० जिनाः ? । 'असमराः' असङ्ग्रामाः । पुनः किं० जिनाः ? । भीः-भयं तद् रदन्ति-दारयन्ति 'भीरदाः' । पुनः किं० जिनाः ? । सकला-सम्पूर्णा भा-प्रभा येषां ते 'सकलभाः' । यद्वा सकला-समस्ता भारती-सरस्वती तामीरयन्ति-प्रेरयन्ति ते 'सकलभारतीराः', यद्वा सकलभारतीं रान्ति-ददति ते 'सकलभारतीराः' । पुन० किं० जिनाः ? । 'यताः' यत्नं कुर्वाणा धर्मोपदेशादिषु । पुनः किं० जिनाः ? । दानेन सहितं यद् वसु-धनं तेन राजिताः-शोभमानाः 'सदानवसुराजिताः' । एतद् विशेषणं गृहस्थावस्थामाश्रित्य ज्ञेयम् । यद्वा सदा-निरन्तरं नवसु-नवपद्मेषु राजिताः-शोभिताः 'सदानवसुराजिताः । पुनः किं० जिनाः ? । असमाः-अनन्यसदृशा राजन्ते-शोभन्ते इत्येवंशीलाः असमराजिनः तादृशा नाभी-तुन्दकक्रूपिका रदा-दशना येषां ते 'असमराजिनाभीरदाः' । पुनः किं० जिनाः ? । सुष्ठु-प्रधाना रुचिता-परमानन्दहेतुता येषां ते सुरुचिताः । कासु ? । क्रियासु । पुनः किं० जिनाः ? । सकलः-समस्तो यो भारः-संसारभ्रमणरूपः तस्य तीरं-तटं तं प्रति आयताः-प्राप्ताः 'सकलभारतीरायताः', संसारसमुद्रपारं प्राप्ताः । इति पदार्थः ॥

अथ समासः—दानवैः सहिताः सदानवाः, सदानवाश्च ते सुराश्च सदानवसुराः, सदानवसुरैः अजिताः सदानवसुराजिताः । न विद्यते समरः-सङ्ग्रामो येषां त असमराः । जयन्ति रागादीन् इति जिनाः । भियं रदन्ति-कर्षन्ति ते भीरदाः । क्रिया सुष्ठु-शोभना रुचिता च येषां ते क्रियासुरुचिताः । 'उ' इति प्रकाशनार्थे । "उसंभायुव (?) प्रकाशे स्यात्" इत्यनेकार्थः । सकला भा-कान्तिः येषां ते सकलभाः । दानेन सहितं सदानम्, सदानं च तद् वसु च सदानवसु, सदानवसुना राजिताः सदानवसुराजिताः । यद्वा नवेति नवसंख्याका सुष्ठु राः-स्वर्णं हेमपङ्कजं तैः जिताः-शोभमाना नवसुराजिताः, सुरसंचारित-स्वर्णकमलोपरि गमनत्वात् । इदं कैवल्यावस्थामाश्रित्य ज्ञेयम् । न समाः असमाः, असमा राजन्ते इत्येवंशीलाः असमराजिनः, नाभ्यश्च रदाश्च नाभीरदाः, असमराजिनः नाभीरदा येषां ते असमराजिनाभीरदाः । सकलश्चासौ भारश्च सकलभारः, सकलभारस्य तीरं सकलभारतीरं, आ-समन्तात् यता-प्राप्ता सकल-भारतीरायताः । यद्वा सकला चासौ भारती च सकलभारती, सकलभारतीं रान्तीति ते सकलभारतीराः । एवंविधा जिनाः ते-तव क्रियासु रतीः क्रियासुः ॥ इति द्वितीयवृत्तार्थः ॥ ५० ॥

(४)

दे० व्या०—सदानवेति । ते जिनाः-तीर्थंकराः ते-तव रुचितासु क्रियासु-कार्येषु रतीः क्रियासुः-विधेयासुः इत्यन्वयः । 'डुकृञ् करणे' धातुः । 'क्रियासुः' इति क्रियापदम् । के कर्तारः ? । जिनाः । काः कर्मतापन्नाः ? । रतीः । कस्य ? । ते-तव । कासु ? । क्रियासु । किंविशिष्टा जिनाः ? । 'सदानवसुराजिताः' दानवैः-असुरैः सह वर्तमाना ये सुरा-वैमानिकाः तैः अजिता-अवशीकृता

उपसर्गादिभिरजिता । पुनः किंविशिष्टाः । 'असमराः' नास्ति समरः-संग्रामो येषां ते तथा, सकलकर्मविपक्षपक्षक्षयात् । पुनः किंविशिष्टाः ? । भीरदाः-भीविलेखकाः ('रद विलेखने' भियं रदन्ति-भिन्दन्तीति), भयनाशका इति निष्कर्षः । पुनः किंविशिष्टाः ? । ('सकलभारतीराः' सकलां-कृत्स्नां भारतीं-विद्यां रान्ति-ददतीति तथा) । पुनः किंविशिष्टाः ? । यताः-प्रयत्नवन्तः । पुनः किंविशिष्टाः ? । 'सदानवसुराजिताः' सदानं-दानसहितं यद् वसु-द्रव्यं तेन राजिताः-शोभिताः [यावत्], सदा दानदायकत्वात् । पुनः किंविशिष्टाः ? । 'असमराजिनाभीरदाः' नाभिश्च रदाश्चेति पूर्वं 'द्वन्द्वः', ततः असमा-निरुपमा राजिनः-शोभमाना नाभीरदा येषामिति विग्रहः । पुनः किंविशिष्टाः ? 'सकलभाः' सकला-समग्रा भा-कान्तिः येषां ते तथा । पुनः किंविशिष्टाः ? आयताः । किंविशिष्टासु क्रियासु ? । रुचितासु-मनोज्ञासु । पुनः किंविशिष्टासु ? । उचितासु-योग्यासु पुण्यरूपासु । इति द्वितीयवृत्तार्थः ॥ ५० ॥

(५)

ध० टीका—सदानवेति । 'सदानवसुराजिताः' सह दानवैर्वर्तन्त इति सदानवाश्च ते सुराश्च तैः अजिता-उपसर्गादिभिः अक्षोभिताः । 'असमराः' न विद्यते समरः-सङ्ग्रामो येषां ते । 'जिनाः' तीर्थकृतः । 'भीरदाः' भियं रदन्तीति भीरदाः-भयभिदः । 'क्रियासु' कर्तव्यासु । 'रुचितासु' अभिप्रेतासु । 'ते' तव । 'सकलभारतीराः' सकलाः-सदोषाः सांसारिककृत्यरूपा ये भारास्तेषां पर्यन्तस्थितत्वात् तीराः-तीरभूताः, अथवा असकला-असदोषा भारतीः ईरयन्ति रान्ति वा ये ते तथा । 'यताः' निगृहीतेन्द्रियाः । 'सदानवसुराजिताः' सदानं-सविसर्जनं यद् वसु-द्रव्यं तेन पृथ्वीपालावस्थायां राजिताः-शोभिताः । 'असमराजिनाभीरदाः' असमं राजन्त एवंशीला नाभी-नाभिः रदाश्च-दशनाश्च येषां ते । 'क्रियासुः' विधेयासुः । 'उचितासु' योग्यासु । 'ते' । 'सकलभाः' सकला-सम्पूर्णा भा-दीप्तिर्येषां ते । 'रतीः' मुदः । आयताः दीर्घाः । ते जिनाः उचितासु क्रियासु ते भारतीरायताः क्रियासुरिति योगः ॥ ५० ॥

(६)

अवचूरिः

ते जिनास्ते-तव आयता-विपुला रतीः-मुदः क्रियासु-कर्तव्यासु क्रियासुः-देयासुः । किंभूतासु ? । रुचितासु-इष्टासु । उचितासु-योग्यासु, पुण्यरूपास्वित्यर्थः । जिनाः किंविशिष्टाः ? । सदानवैः-सासुरैः सुरैरुपसर्गादिभिरजिताः । असमरा-अरणाः । भियं-भीतिं रदन्ति-भिन्दन्तीति भीरदाः । 'रद विलेखने' । सकलाः-सदोषाः संसारकृत्यरूपा ये भारास्तेषां पर्यन्ते स्थितत्वात् तीराः । यद्वा असदोषा भारतीरीरयन्ति रान्ति वा। यताः-प्रयत्नवन्तः । सदानं-सत्यागं यद् वसु-सुवर्णं तेन राजिताः-शोभिताः । असमाः

शोभमानाश्च नाभीरदा येषां ते । सकला-समस्ता भा-दीप्तिर्येषां येषु वा । यद्वा सह कलभया-रुचिररुचा वर्तन्ते ॥ ५० ॥

❀ ❀ ❀

जिनप्रवचनप्रणामः—

सदा यतिगुरोरहो ! नमत मानवैरञ्चितं
मतं वरदमेनसा रहितमायताभावतः ।
सदायति गुरोरहो न मतमानवैरं चितं
मतं वरदमेन सारहितमायता भावतः ॥ ३ ॥ ५१ ॥

- पृथ्वी

(१)

ज० वि०—सदेति । 'अहो' इत्यामन्त्रणे । भो भव्याः ! यूयं 'यतिगुरोः' यतीनां साधूनां गुरुः-तत्त्वोपदेष्टा तस्य यतिगुरोः अर्हत इत्यर्थः, मतं-शासनं सदा-सर्व [दा] कालं भावतः-भक्तितः अनुरागतो वा नमत-प्रणमत इति क्रियाकारकयोजना । अत्र 'नमत' इति क्रियापदम् । के कर्तारः ? 'यूयम्' । किं कर्मतापन्नम् ? 'मतम्' । कस्य ? 'यतिगुरोः' । कथम् ? 'सदा' । कुतः ? 'भावतः' । मतं कथंभूतम् ? 'अञ्चितं' पूजितम् । कैः कर्तृभिः ? 'मानवैः' नरैः । पुनः कथं० ? 'वरदं' अभीष्टप्रदम् । पुनः कथं० ? 'रहितं' त्यक्तम् । केन ? 'एनसा' पापेन । पुनः कथं० ? 'सदायति' सती-शोभना आयतिः-प्रभुता उत्तरकालो वा यस्य तत् तथा । पुन कथं० ? 'रहः' रहस्यभूतम् । पुनः कथं० ? 'न मतमानवैरं' मते-अभिप्रेते मानवैरे-अहङ्कारविरोधौ यस्य तद् मतमानवैरम्, न इति निषेधे, तादृक् न भवतीति भावः । पुनः कथं० ? 'चितं' व्याप्तं सम्बद्धं वा । केन ? 'वरदमेन' प्रधानप्रशमेन । किं कुर्वता ? 'आयता' गच्छता । पुनः कथं० ? 'सारहितं' सारं च तद् हितं च, यद्वा सारं हितं यस्मिन् तत् तथा । यतिगुरोः कथंभूतस्य ? 'आयताभावतः' आयता-विस्तारिणी आभा-छाया सा विद्यते यस्य स आयताभावान् तस्य । पुनः कथंभूतस्य ? 'गुरोः' महतः ॥

अथ समासः—यतीनां यतिनां वा गुरुः यतिगुरुः 'तत्पुरुषः' । तस्य यति० । वरं ददातीति वरदं 'तत्पुरुषः' । तद् वरदम् । आयता चासौ आभा च आयताभा 'कर्मधारयः' । आयताभा वर्तते यस्य स आय० । तस्य आयता० । सती आयतिर्यस्य तत् सदायति 'बहुव्रीहिः' । तत् सदा० । मानं च वैरं च मानवैरे 'इतरेतरद्वन्द्वः' । मते मानवैरे यस्य तत् मत० 'बहुव्रीहिः' । तत् मत० । वरश्चासौ दमश्च वरदमः

'कर्मधारयः' । तेन वर० । सारं च तद् हितं च सारहितं 'कर्मधारयः' । यद्वा सारं हितं यस्मिन् तत् सार० 'बहुव्रीहिः' । तत् सार० ।। इति काव्यार्थः ।। ५१ ।।

(२)

सि० वृ०—सदेति । अहो इत्यामन्त्रणे । हे भव्याः ! यूयं यतिगुरोः-अर्हतः मतं-शासनं सदा-सर्वकालं भावतः-भक्तितः अनुरागतो वा नमत-प्रणमतेत्यर्थः । 'णम प्रह्वीभावे' धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि परस्मैपदे मध्यमपुरुषबहुवचनं णम् अग्रे त । 'आदेः ष्णः स्नः' (सा० सू० ७४८) इति णस्य नकारः । 'अप् कर्तरि' (सा० सू० ६९१) इत्यप् । 'स्वरहीनं०' (सा० सू० ३६) । तथा च 'नमत' इति सिद्धम् । अत्र 'नमत' इति क्रियापदम् । के कर्तारः ? । 'यूयम्' । किं कर्मतापन्नम् ? । 'मतम्' । कस्य ? । 'यतिगुरोः' यतीनां-साधूनां गृणाति धर्मोपदेशं यथार्थोपदेष्टा वा यतिगुरुः, तस्य यतिगुरोः । कथम् ? । 'सदा' । कुतः ? । 'भावतः' भावादिति भावतः सार्वविभक्तिकस्तस् । कथंभूतं मतम् ? । अञ्चितं-'पूजितम्' । 'नाञ्चेः पूजायां'(सा० सू० २८७) इति नकारस्य लोपः । कैः कर्तृभिः ? । 'मानवैः'-मनुष्यैः । पुनः कथंभूतम् ? । 'वरदं' वरं-वाञ्छितं ददातीति वरदम् । पुनः कथंभूतम् ? । 'रहितं'-वर्जितम् । केन ? । 'एनसा'-पापेन । पुनः कथंभूतम् ? सती-शोभना आयतिः-प्रभावः उत्तरकालो वा यस्य तत् तथा। "आयतिस्तूत्तरः कालः" (अभि० का० २, श्लो० ७६), "स्यात् प्रभावेऽपि चायतिः" इत्यमरः । पुनः कथंभूतम् ? । 'रहः'-रहस्यभूतं तत्त्वमिति यावत् । "रहोऽपि गुह्ये भवने च तत्त्वे" इति विश्वः । पुनः कथंभूतम् ? । 'न मतमानवैरं' न इति निषेधवाचकम्, तेन न मते-न अभिप्रेते मानवैरे-अहङ्कारविरोधौ यस्य तत् । मानं च वैरं च मानवैरे 'इतरेतरद्वन्द्वः' । "वैरं विरोधो विद्वेषः" इत्यमरः (श्लो० ४११) । पुनः कथंभूतम् ? । 'चितं'-व्याप्तम् । केन ? । 'वरदमेन' वरः-प्रधानो यो दमो-दमनं तेन । वरदमेन किं कुर्वता ? । 'आयता'-आगच्छता । पुनः कथंभूतम् ? । 'सारहितं' सारं हितं यस्मिन् तत्, सारं च तद्धितं चेति वा । कथंभूतस्य यतिगुरोः ? । 'आयताभावतः' आयता-विस्तारिणी आभा-छाया सा विद्यते यस्य स आयताभावान् तस्य । कथंभूतस्य ? । 'गुरोः'-महतः ।। ५१ ।।

(३)

सौ० वृ०—सदेति । अहो इत्यामन्त्रणे । भो भव्याः यूयं यतीनां-साधूनां गुरुः-धर्मोपदेष्टा तस्य यतिगुरोः-तीर्थकृतः मतं-शासनं प्रवचनं वा सदा-सर्वदा भावतो-रागतः भक्तितो वा नमत इत्यन्वयः । 'नमत' इति क्रियापदम् । के कर्तारः ? । 'यूयं' भवन्तः । 'नमत' प्रणमत । किं कर्मतापन्नम् ? । 'मतम्' कथम् ? । 'सदा' सर्वदा । किंवि० मतम् ? । 'अर्चितं' पूजितम् । कैः ? । 'मानवैः' मनुष्यैः । पुनः

१. इदं सूत्रं पाणिनीयेऽपि ।

२. अत्र 'अञ्चित' मित्यावश्यकं श्लोके तथाविधपाठात् ।

किं० मतम् ? । 'वरदं' इष्टवरदम्-इष्टवरदायकम् । पुनः किं० मतम् ? । 'रहितं' विरहितम् । केन ? 'एनसा' पापेन । किंविशिष्टस्य यतिगुरोः ? । आयता-महती या आभा-शोभा तद्वान् आयताभावान् तस्य 'आयताभावतः' । पुनः किं० मतम् ? । सत्-शोभना आयतिः-उत्तरकालः पूजाप्राप्तिर्वा यस्य तत् 'सदायति' । पुनः किं० मतम् ? । 'रहः' रहस्यभूतम् । कस्य ? । 'गुरोः' पूज्यस्य । पुनः किं० मतम् ? । मतं-संमतं मानं च वैरं च यस्य तत् 'मतमानवैरम्' । कथम् ? । 'न' निषेधे । रागद्वेषरहितमित्यर्थः । पुनः किं० मतम् ? । 'चितं' व्याप्तम् । केन ? । वरः-प्रधानो दमः-इन्द्रियविषयदमलक्षणः तेन 'वरदमेन' । वरदमेन किंविशिष्टेन ? । 'आयता' विस्तीर्णेन । पुनः किं० मतम् ? । सारं-प्रधानं हितं यस्मिन् तत् 'सारहितम्' । इति पदार्थः ।।

अथ समासः—यतीनां गुरुः यतिगुरुः, तस्य यतिगुरोः । वरं ददातीति वरदः, तं वरदम् । आयता भा यस्यासौ आयताभावान्, तस्य आयताभावतः । सती-शोभना आयतिः यस्य तत् सदायति । गृणाति-वदति तत्त्वं-हिताहितम् इति गुरुः, तस्य गुरोः । मानं च वैरं च मानवैरे, मते मानवैरे यस्य तत् मतमानवैरम् । वरश्चासौ दमश्च वरदमः, तेन वरदमेन । सारं च तत् हितं च सारहितम्, यद्वा सारं हितं यस्मिन् तत् सारहितम् । एवंविधं जिनमतं नमत ।। इति तृतीयवृत्तार्थः ।। ५१ ।।

(४)

दे० व्या०—सदेति । अहो इत्याश्चर्ये । यतिगुरोः-जिनवरस्य मतं-प्रवचनं यूयं भावतः-भक्तितः नमत इत्यन्वयः । 'णम प्रह्वीभावे' धातुः । 'नमत' इति क्रियापदम् । के कर्तारः ? । 'यूयम्' । किं कर्मतापन्नम् ? । 'मतम्' । मतं कस्य ? । 'यतिगुरोः' यतीनां गुरुः यतिगुरुः इति विग्रहः, तस्य । कस्मात् ? । 'भावतः' । किंविशिष्टा यूयम् ? । 'आयताः' आ-समन्तात् यताः-यत्नं कुर्वाणाः । किंविशिष्टस्य 'यतिगुरोः ? । 'आयताभावतः' आयता-विपुला भा-कान्तिर्यस्य स तस्य । अस्त्यर्थे वतुप्प्रत्ययः । किंविशिष्टं मतम् ? । 'अञ्चितं'-पूजितम् । कैः ? । 'मानवैः' मनुष्यैः । पुनः किंविशिष्टम् ? । 'वरदं'-वाञ्छितप्रदम् । पुनः किंविशिष्टम् ? । 'रहितं'-वर्जितम् । केन ? । 'एनसा'-पापेन । "एनः पाप्मा च पातकम्" इत्यभिधानचिन्तामणिः (का० ६, श्लो० १६) । पुनः किंविशिष्टम् ? । 'सदायति' सती-शोभना आयतिः-उत्तरकालो यस्य तत् । "आयतिस्तूत्तरः कालः" इत्यभिधानचिन्तामणिः (का० २, श्लो० ७६) । भगवत्प्रवचनस्य कदापि केनापि खण्डयितुमशक्यत्वात् । "आयतिः प्रभुता" इति प्राञ्चः । पुनः किंविशिष्टम् ? । 'रहः'-रहस्यभूतम् । कस्य ? । 'गुरोः' अर्हत इत्यर्थः । पुनः किंविशिष्टम् ? । 'न मतमानवैरम्' मानश्च वैरं चेति पूर्वं 'द्वन्द्वः', ततो न मते-नाभिप्रेते मानवैरे-गर्वविरोधौ यस्य इति विग्रहः । पुनः किंविशिष्टम् ? । 'चितं'-व्याप्तम् । केन ? । 'वरदमेन'-प्रधानोपशमेन । वरश्चासौ दमश्चेति समासः ।

उपशमस्यैवात्र प्रधानत्वेन ख्यापनात् । पुनः किंविशिष्टम् ? । 'सारहितं' सारं प्रधानं हितं-पथ्यं यस्मिन् तत् । पुनः किंविशिष्टम् ? । मतं-वाञ्छितम् । सतामिति शेषः ।। इति तृतीयवृत्तार्थः ।। ५१ ।।

(५)

ध० टीका—सदेति । 'सदा' सर्वकालम् । 'यतिगुरोः' गुरुः-तत्त्वोपदेष्टा यतीनां गुरुर्जिन(स्त)स्य । 'अहो' इत्यामन्त्रणे । 'नमत' प्रणमत । 'मानवैः' नृभिः । 'अञ्चितं' पूजितम् । 'मतं' शासनम् । 'वरदं' अभीष्टप्रदम् । 'एनसा' पापेन । 'रहितं' त्यक्तम् । 'आयताभावतः' आयता-विस्तीर्णा भा-छाया विद्यते यस्य तस्य । 'सदायति' सती-शोभना आयतिः-प्रभुता यस्य तत् । 'गुरोः' महतः । 'रहः' रहस्यभूतम् । 'न' इति प्रतिषेधे उत्तरेण सम्बध्यते । 'मतमानवैरं' मानश्च वैरं च मानवैरे, ते मते यस्य तत् यन्न भवति । 'चितं' सम्बद्धम् । 'मतं' सर्वस्याभिप्रेतम् । 'वरदमेन' प्रधानप्रशमेन । 'सारहितं' सारं च तत् हितं च । 'आयता' आगच्छता । 'भावतः' अनुरागात् । यतिगुरोर्मतमायता वरदमेन चितं सदा भावतो नमतेति सम्बन्धः ।। ५१ ।।

(६)

अवचूरिः

अहो लोकाः ! यतिगुरोः-सर्वज्ञस्य भावतो-भक्त्या मतं-शासनं नमत । सदा-सर्वकालम् । कथंभूतम् ? । मानवैः-मानुषैरञ्चितं-पूजितम् । वरं-अभीष्टार्थं ददाति वरदम् । एनसा-पापेन रहितं-त्यक्तम् । यतिगुरोः किंभूतस्य ? । आयताभावतः आयता-विपुला भा अस्यास्तीति मतुप् । मतं किंभूतम् ? । सदायति सती-शोभना आयतिः-आगामिकालः प्रभुता वा यस्य तत् । गुरोरर्हतो रहो-रहस्यभूतम् । न मते-अभीष्टे मानवैरे यस्य । चितं-व्याप्तम् । केन ? । वरदमेन-प्रधानोपशमेन । किंभूतेन ? । आयता-आगच्छता । मतं कथंभूतम् ? । मतं सर्वस्याभिप्रेतम् । सारं च तद्धितं च । यद्वा सारं हितं यस्मिन् ।। ५१ ।।

❀ ❀ ❀

श्रीरोहिण्यै विनतिः—

प्रभाजि तनुतामलं परमचापला रोहिणी
सुधावसुरभीमना मयि सभाक्षमालेहितम् ।
प्रभाजितनुताऽमलं परमचापलाऽऽरोहिणी
सुधावसुरभीमनामयिसभा क्षमाले हितम् ।। ४ ।। ५२ ।।

- पृथ्वी

(१)

ज० वि०—प्रभाजीति । रोहिणी-रोहिण्याख्या देवी मयि-मद्विषये अलम्-अत्यर्थं परं-प्रकृष्टम् अमलम्-अनवद्यम् ईहितं-वाञ्छितं हितं-सुखानुकूलं वस्तु तनुतां-विस्तारयतु इति क्रियाकारकयोजना । अत्र 'तनुताम्' इति क्रियापदम् । का कर्त्री ? 'रोहिणी' । किं कर्मतापन्नम् ? 'हितम्' । कथं० 'अमलं' गतमलम् । कस्मिन् ? 'मयि' । कथंभूते मयि ? 'प्रभाजि' प्रकर्षेण भजते-सेवत इति प्रभाक् तस्मिन्, अत्यन्तसेवावर्तिनीत्यर्थः । पुनः कथंभूते ? 'क्षमाले' क्षमा-क्षान्तिस्तां लातीति क्षमालस्तस्मिन् । रोहिणी कथंभूता ? 'अचापला' चापलं-चपलत्वं न विद्यते यस्याः सा तथा । पुनः कथं० ? 'सुधावसुः' सुधा-प्रासादादीनां लेपद्रव्यं छोहेति प्रसिद्धा तद्वद् वसुः-तेजो यस्याः सा तथा, अथवा सुधा-पीयूषं सैव वसु-द्रव्यं यस्याः सा तथा । पुन कथं० ? 'अभीमनाः' न भीः-भयं मनसि यस्याः सा तथा । पुनः कथं० ? 'सभाक्षमाला' भा-प्रभा तया सह वर्तमाना सभा, एतादृशी अक्षमाला यस्याः सा तथा । पुनः कथं० ? 'प्रभाजितनुता' प्रभाजितैः-तेजस्तिरस्कृतैः नुता-स्तुता । पुनः कथं० ? 'परमचापला' परमं-प्रधानं चापं-धनुः लातीति तथा । पुनः कथं० ? 'आरोहिणी' । अयं आवश्यके णिनिः । कां कर्मतापन्नाम् ? 'सुधावसुरभीं' धावनं धावो-वेगः, शोभनो धावो यस्याः सा सुधावा या सुरभी-गौस्ताम् । णिनिसम्बन्धादत्र 'न निष्ठादिषु' इति षष्ठीप्रतिषेधः । पुनः कथं० ? 'अनामयिसभा' अनामयिनी-अरोगिणी सभा-संसद् यस्याः सा तथा॥

अथ समासः-चपलस्य भावः चापलं 'तत्पुरुषः' । न विद्यते चापलं यस्याः सा अचापला 'बहुव्रीहिः' । सुधावद् वसुर्यस्याः सा सुधावसुः 'बहुव्रीहिः' । अथवा सुधैव वसु यस्याः सा सुधावसुः 'बहुव्रीहिः' । भीः मनसि यस्याः सा भीमनाः 'बहुव्रीहिः' । न भीमनाः अभीमनाः 'तत्पुरुषः' । सह भया वर्तत इति सभा 'तत्पुरुषः' । सभा अक्षमाला यस्याः सा सभा० 'बहुव्रीहिः' । प्रभया जिताः प्रभाजिताः 'तत्पुरुषः' । प्रभाजितैर्नुता प्रभाजि० 'तत्पुरुषः' । न विद्यते मलो यत्र तदमलं 'बहुव्रीहिः' । परमं च तत् चापं च परमचापं 'कर्मधारयः' । परमचापं लातीति परम० 'तत्पुरुषः' । शोभनो धावो यस्याः सा सुधावा 'बहुव्रीहिः' । सुधावा चासौ सुरभी च सुधा० 'कर्मधारयः' । तां सुधाव० । आमयोऽस्याऽस्तीति आमयिनी ('बहुव्रीहिः') । न आमयिनी अनामयिनी 'तत्पुरुषः' । अनामयिनी सभा यस्याः सा अनामयिसभा 'बहुव्रीहिः' । क्षमां लातीति क्षमालः 'तत्पुरुषः' । तस्मिन् क्षमाले ॥ इति काव्यार्थः ॥ ५२ ॥

॥ इति श्रीशोभनस्तुतिवृत्तौ श्रीविमलजिनेश्वरस्तुतेर्व्याख्या ॥ ४ । १३ । ५२ ॥

(२)

सि० वृ०—प्रभाजीति । रोहिणी-रोहिणीनाम्नी देवी मयि-मद्विषये अलम्-अत्यर्थं परं-प्रकृष्टम्

अमलम्-अनवद्यम् ईहितं-वाञ्छितं हितं-सुखाद्यनुकूलं वस्तु तनुतां-विस्तारयत्वित्यर्थः । 'तनु विस्तारे' धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि आत्मनेपदे प्रथमपुरुषैकवचनं तन् अग्रे ताम् 'तनादेरुप्' (सा० सू० ९९७) अपोपवादः । 'स्वरहीनं०' (सा० सू० ३६) । तथा च 'तनुताम्' इति सिद्धम् । अत्र 'तनुताम्' इति क्रियापदम् । का कर्त्री ? । 'रोहिणी' । रोहन्ति कार्याण्यस्यामिति रोहिणी । रुहेरिनन् । 'गौरादित्वात् ङीष्'[1] । किं कर्मतापन्नम् ? । 'हितम्' । कथंभूतं हितम् ? । 'परम्' । पुनः कथं० । 'अमलम्' । कथम् ? । 'अलम्' । कस्मिन् ? । 'मयि' । कथंभूते मयि ? । 'प्रभाजि' प्रकर्षेण भजते-सेवत इति प्रभाक्, तस्मिन् प्रभाजि, अनवरतं सेवातत्पर इत्यर्थः । पुनः कथंभूते ? । 'क्षमाले' क्षमा-क्षान्तिस्तां लाति-गृह्णातीति क्षमालस्तस्मिन् । कथंभूता रोहिणी ? ।'अचापला' चापलं-चपलत्वं न विद्यते यस्या यस्माद् वा सा तथा । पुनः कथंभूता ? । 'सुधावसुः' सुधा-प्रासादादीनां लेपनद्रव्यं छोह इति प्रसिद्धा तदिव वसुः-तेजो यस्याः सा तथा । अथवा सुधा-पीयूषं सैव वसु-द्रव्यं यस्याः सा तथेत्यर्थः । पुनः कथंभूता ? । 'अभीमनाः' न भीः-भयं मनसि यस्याः सा तथा । पुनः कथं० ? । 'सभाक्षमाला' भा-प्रभा तया सह वर्तमाना सभा, एतादृशी अक्षमाला यस्याः सा । पुनः कथंभूता ? । 'प्रभाजितनुता' प्रभया-तेजसा जितैः-तिरस्कृतैः नुता-स्तुता । "स्तवः स्तोत्रं स्तुतिर्नुतिः" इति हैमः (का० २, श्लो० १८३) । पुनः कथंभूता ? । 'परमचापला' परमं-प्रकृष्टं च तत् चापं-धनुः लाति गृह्णातीति परमचापला । पुनः कथंभूता ? । 'आरोहिणी' अवश्यमारोक्ष्यत्यारोहिणी । अयमावश्यके णिनिः । 'ऋन्नेभ्यो ङीप्' (पा० अ० ४, पा० १, सू० ५) इति ङीप् । काम् ? । 'सुधावसुरभीं' धावनं धावः-वेगः सुष्ठु-शोभनो वेगो यस्याः सा सुधावा, 'सृ गतौ' इत्यस्य धावादेशः, सा चासौ सुरभी-गौस्ताम् । पुनः कथंभूता ? । 'अनामयिसभा' आमयो-रोगः सोऽस्याऽस्तीति आमयिनी, न आमयिनी-निरोगिणी सभा-संसद् यस्याः सा । 'गोस्त्रियोरुपसर्जनस्य' (पा० अ० १, पा० २, सू० ४८) इति ह्रस्वः । "आम आमय आकल्यम्" इति हैमः (का० ३, श्लो० १२७) पृथ्वीच्छन्दः । "यतिर्वसुकृता जसौ जसयलाश्च पृथ्वी गुरुः" इति तल्लक्षणम् ॥ ५२ ॥

॥ इति महोपाध्याय० विमलस्तुतिवृतिः ॥ ४ । १३ । ५२ ॥

(३)

सौ० वृ०—प्रभाजीति । रोहिणीनाम्नी देवी मयि-अस्मिन् (मद्?) विषये ईहितं-वाञ्छितं अमलं-अनवद्यं हितं-पथ्यं तनुतामित्यन्वयः । 'तनुताम्' इति क्रियापदम् । का कर्त्री ? । 'रोहिणी' देवी । 'तनुतां' विस्तारयतु । किं कर्मतापन्नम् ? । 'ईहितम्' । कस्मिन् ? । 'मयि' । कथम् ? । 'अलं' अत्यर्थम् । किंवि०

---

१. **'गौरादिभ्यो मुख्यान् ङीः' इति सिद्धहेमे (२।४।१९) ।**

ईहितम् ? । 'अमलम्' । पुनः किं० ईहितम् ? । 'परं' प्रकृष्टं प्रधानं वा । पुनः किं० ईहितम् ? । 'हितं' हितकृत् । किंविशिष्टे मयि ? । प्रकर्षेण भजतीति प्रभाक् तस्मिन् 'प्रभाजि' समीपवर्तिनीत्यर्थः । पुनः किं० मयि ? । क्षमां लातीति क्षमालस्तस्मिन् 'क्षमाले' उपशमवति । किंवि० रोहिणी ? । प्रभया-कान्त्या जिता ये अमराः तैः नुता-स्तुता 'प्रभाजितनुता' । पुनः किं० रोहिणी ? । 'अचापला' चापल्यरहिता । पुनः किं० रोहिणी ? । परमं-प्रधानं चापं-धनुः लाति-गृह्णाति इति 'परमचापला' । पुनः किं० रोहिणी ? । सुधा प्रसादलेपद्रव्यम्, "छो' इति भाषायाम्, तद्वद् वसुः-तेजो यस्याः सा 'सुधावसुः" गौरवर्णा इत्यर्थः । यद्वा सुधा-अमृतं तदेव वसु-द्रव्यं यस्याः सा 'सुधावसुः' । पुनः किं० रोहिणी ? । नास्ति भीः-भयं मनसि यस्याः (सा) 'अभीमनाः' । पुनः० किं० रोहिणी ? । 'आरोहिणी' आरूढा । कां कर्मतापन्नाम् ? । सु-शोभनो धावः-वेगो यस्याः सा तादृशी सुरभीः तां 'सुधावसुरभीम्' । पुनः किं० रोहिणी ? । आमयो-रोगो नास्तीति अनामयी, अनामयी सभा यस्याः सा 'अनामयिसभा' । पुनः किं० रोहिणी ? । भा-कान्तिस्तया सहिता अक्षमाला-जाप्यमाला यस्याः सा 'सभाक्षमाला' । एतादृशी रोहिणी देवी मयि विषये ईहितं तनुताम् । इति पदार्थः ॥

अथ समासः—प्रकर्षेण भजते इति प्रभाक्, तस्मिन् प्रभाजि। चपलस्य भावः चापलम्, न विद्यते चापलं यस्याः सा अचापला । सुधावद् वसुर्यस्याः सा सुधावसुः, यद्वा सुधा एव वसु यस्याः सा सुधावसुः । न विद्यते भीः-भयं मनसि यस्याः सा अभीमनाः । भया-कान्त्या सहिता सभा, (सभा) अक्षमाला यस्याः सा सभाक्षमाला । प्रभया जिताः प्रभाजिताः, प्रभाजितैः नुता प्रभाजितनुता । न विद्यते मलो यस्मिन् तद् अमलम् । परमश्चासौ चापश्च परमचापः, परमचापं लातीति परमचापला । आरुह्यते सा आरोहिणी । सु-शोभनो धावो-वेगो यस्याः सा सुधावा, सुधावा चासौ सुरभी च सुधावसुरभी, तां सुधावसुरभीम् । नास्ति आमयो-रोगो यस्यां सा अनामयिनी, अनामयिनी सभा यस्यां(स्याः) सा अनामयिसभा । क्षमां लातीति क्षमालः, तस्मिन् क्षमाले ॥

"अक्षो विभीतके कर्षे, रावणे शकटात्मनोः ।
पाशके मणिके चाक्षः, इन्द्रिये खण्डमोक्षयोः ॥"

इत्यनेकार्थतिलके । इति चतुर्थवृत्तार्थः ॥ ४ ॥

श्रीविमलजिनेन्द्रस्य, स्तुतेरर्थो लिपीकृतः ।
सौभाग्यसागराख्येण, सूरिणा ज्ञानसेविना ॥

इति त्रयोदशविमलजिनस्तुतिः ॥ ४।१३।५२ ॥

(४)

दे० व्या०—प्रभाजीति । रोहिणी देवी मयि-मद्विषये हितं-पथ्यं तनुतां-विस्तारयतां इत्यन्वयः । 'तनु विस्तारे' धातुः । 'तनुताम्' इति क्रियापदम् । का कर्त्री ? । 'रोहिणी' । किं कर्मतापन्नम् ? । 'हितम् '। कथम् ? । 'अलम्'-अत्यर्थम् । कस्मिन् ? । 'मयि' । किंविशिष्टे मयि ? । 'प्रभाजि'-प्रकर्षेण भजमाने । पुनः किंविशिष्टे ? । 'क्षमाले' क्षमां लाति-गृह्णाति इति क्षमालः तस्मिन् । किंविशिष्टं हितम् ? । 'अमलम्'-अनवद्यम् । पुनः किंविशिष्टम् ? । 'परं'-प्रकृष्टम् । पुनः किंविशिष्टम् ? । 'ईहितं'-वाञ्छितम् । किंविशिष्टा रोहिणी ? । 'अचापला'-चापल्यरहिता । पुनः किंविशिष्टा ? । 'सुधावसुः' सुधा-अमृतं तद्वद् वसुः-प्रभा यस्याः सा तथा । पुनः किंविशिष्टा ? । 'अभीमनाः' अभीः-निर्भयं मनो-मानसं यस्याः सा । पुनः किंविशिष्टा ? । 'सभाक्षमाला' भया-कान्त्या सह वर्तमाना अक्षमाला यस्याः सा । पुनः किंविशिष्टा ? । 'प्रभाजितनुता' प्रभया-तेजसा जिताः पराभूताः तैः नुता-स्तुता । कथम् ? । 'अलम्' । पुनः किंविशिष्टा ? । 'परमचापला' परमम्-उत्कृष्टं चापं-धनुः लाति-गृह्णातीति तथा । "धनुश्चापोऽस्त्रमिष्वासः" इत्यभिधानचिन्तामणिः (का० ३, श्लो० ४३९) । पुनः किंविशिष्टा ? । 'आरोहिणी'-आरोहणशीला । काम् ? । 'सुधावसुरभीं' सुधावा-सुवेगा या सुरभी-गौः ताम् । पुनः किंविशिष्टा ? । 'अनामयिसभा' न विद्यते आमयो-रुग् यस्यां एवंविधा सभा-पर्षद् यस्याः सा तथा ।। इति चतुर्थवृत्तार्थः ।। ४ ।। पृथ्वीच्छन्दः ।। "यतिर्वसुकृता जसौ जसयलाश्च पृथ्वी गुरुः" इति च तल्लक्षणम् ।। ४ । १३ । ५२ ।।

(५)

ध० टीका—प्रभाजीति । 'प्रभाजि' प्रभजत इति प्रभाक् तस्मिन् । 'तनुताम्' तनोतु । 'अलं' अत्यर्थम् । 'परं' प्रकृष्टम् । 'अचापला' चपलत्वेन हीना । 'रोहिणी' रोहिण्याख्या । 'सुधावसुः' सुधा-प्रासादानां लेपद्रव्यं तद्वद् वसुः-तेजो यस्याः सा, अथवा सुधा-अमृतं सैव वसु-द्रव्यं यस्याः सा । 'अभीमनाः' भीः-भयं तत्र मनो यस्याः सा, न भीमनाः अभीमनाः । 'मयि' मद्विषये । 'सभाक्षमाला' सह भया-प्रभया सभा-सदीप्तिः अक्षमाला यस्याः सा । 'ईहितं' समीहितम् । 'प्रभाजितनुता' प्रभाजितैः-तेजस्तिरस्कृतैर्नुता-स्तुता । 'अमलं' अनवद्यम् । 'परमचापला' परमं-प्रधानं चापं-धनुर्लाति या सा । 'आरोहिणी' अवश्यमारोक्ष्यति या सा । अयमावश्यके णिनिः । 'सुधावसुरभीं' सुधावा-सद्वेगा या सुरभी-गौस्ताम् । णिनिसम्बन्धादत्र 'न निष्ठादिषु' इति षष्ठीप्रतिषेधः । 'अनामयिसभा' न आमयिनी-रोगिणी सभा-संसद् यस्याः सा 'क्षमाले' क्षमा-क्षान्तिस्तां लाति यः स तस्मिन् । 'हितं' सुखोदर्कम् । सुधावसुरभीमारोहिणी रोहिणी प्रभाजि क्षमाले मयि परं हितं तनुतामलमित्यन्वयः ।। ४ । १३ । ५२ ।।

(६)

अवचूरिः

रोहिणी देवी मयि विषये ईहितममलं-अनवद्यं हितं-शुभोदर्कं तनुतां-कुरुताम् । मयि कथंभूते ? । प्रभाजि-प्रकर्षेण भजत इति तच्छीले । अलं-अत्यर्थम् । परं-प्रकृष्टम् । देवी किंविशिष्टा ? । अचापला-चापल्यमुक्ता । सुधा-प्रासादलेपनद्रव्यं तद्वद् वसु-तेजो यस्याः । यद्वा अमृतमेव द्रव्यं यस्याः । न भीः-भयं मनसि यस्याः सा अभीमनाः । सभा-सकान्तिका अक्षमाला यस्याः । प्रभाजितैः-तेजस्तिरस्कृतैः नुता-स्तुता । परमं चापं-धनुर्लातीति । आरोहणशीला । काम् ? । सुष्ठु धावतीति सुधावा-सुवेगा या सुरभी-गौस्ताम् । अनामयिनी-नीरोगा सभा यस्याः सा । क्षमां लातीति क्षमाले मयि ॥ ४ । १३ । ५२ ॥

१४. श्रीअनन्तजिनस्तुतयः ।

अथ श्रीअनन्तनाथस्य स्तुतिः—

सकलधौतसहासनमेरव—
स्तव दिशन्त्वभिषेकजलप्लवाः ।
मतमनन्तजितः स्नपितोल्लसत्—
सकलधौतसहासनमेरवः ॥ १ ॥ ५३ ॥

- द्रुतविलम्बितम्

(१)

ज० वि०—सकलधौतेति । भो भव्यात्मन् ! 'अनन्तजितः' अनन्तजिन्नाम्नो जिनस्य अनन्तजित् इत्यपि नामास्ति, "स्यादनन्तजिदनन्तः" इत्यभिधानचिन्तामणि (का० १, श्लो० २९)-वचनात्, 'अभिषेकजलप्लवाः' अभिषेकस्य-जन्माभिषेकस्य जलप्लवाः-जलप्रवाहाः तव-भवतः मतं-अभिप्रेतं दिशन्तु-ददतु इति क्रियाकारकान्वयः । अत्र 'दिशन्तु' इति क्रियापदम् । के कर्तारः ? 'अभिषेकजलप्लवाः' । किं कर्मतापन्नम् ? 'मतम्' । कस्य ? 'तव' । अभिषेकजलप्लवाः कस्य ? 'अनन्तजितः' । कथंभूता अभिषेकजलप्लवाः ? 'सकलधौतसहासनमेरवः' सकलाः-समस्ता धौताः-क्षालिताः सहासाः-सविकासा नमेरवो-देववृक्षविशेषा यैस्ते तथा । पुनः कथं० ? 'स्नपितोल्लसत्सकलधौतसहासनमेरवः' उल्लसन्-शोभमानः सकलधौतः कलधौतं-सुवर्णं तेन सह वर्तमानः सहासनेन-

स्नानपीठेन असनैः-वृक्षविशेषैर्वा सह वर्तमान एवंविधो यो मेरुः-मेरुपर्वतः, ततः स्नपितः-स्नानं कारित उल्लसत्सकलधौतसहासनमेरुर्यैस्ते तथा । यदिवा उल्लसत्सकलधौतं सहं-क्षमं दृढमित्यर्थः,एतादृशमासनं यत्र स उल्लसत्सकलधौतसहासन एवंविधो मेरुः स्नपितो यैस्ते तथा ॥

अथ समासः—सकलाश्च ते धौताश्च सकलधौताः 'कर्मधारयः' । सह हासेन वर्तन्त इति सहासाः 'तत्पुरुषः' । सहासाश्च ते नमेरवश्च सहा० 'कर्मधारयः' । सकलधौताः सहासनमेरवो यैस्ते सकल० 'बहुव्रीहिः' । जलानां प्लवा जलप्लवाः 'तत्पुरुषः' । अभिषेकस्य जलप्लवा अभिषेकजलप्लवाः 'तत्पुरुषः' । सह कलधौतेन वर्तत इति सकल० 'तत्पुरुषः' । उल्लसंश्चासौ सकलधौतश्च उल्लस० 'कर्मधारयः' । सह आसनेन असनैर्वा वर्तत इति सहासनः 'तत्पुरुषः' । सहासनश्चासौ मेरुश्च सहा० 'कर्मधारयः' । उल्लसत्सकलधौतश्चासौ सहासनमेरुश्च उल्लसत्सकल० 'कर्मधारयः' । स्नपित उल्लसत्सकलधौतसहासनमेरुर्यैस्ते स्नपितोल्लस० 'बहुव्रीहिः' । अथवा उल्लसच्च तत् सकलधौतं च उल्लस० 'कर्मधारयः' । सहं च तदासनं च सहासनं 'कर्मधारयः' । उल्लसत्सकलधौतं सहासनं यस्मिन् स उल्लस० 'बहुव्रीहिः' । उल्लसत्सकलधौतसहासनश्चासौ मेरुश्च उल्लस० 'कर्मधारयः' । स्नपित उल्लसत्सकलधौतसहासनमेरुर्यैस्ते स्नपितोल्ल० 'बहुव्रीहिः' ॥ इति काव्यार्थः ॥ ५३ ॥

(२)

सि० वृ०—सकलधौतेति । भो भव्यात्मन् ! अनन्तानि ज्ञानादीनि अस्य, नास्ति गुणानामन्तो वाऽस्येति अनन्तः, स चासौ जिच्च अनन्तजित् तस्य अनन्तजितः-अनन्तजिन्नाम्नो जिनस्य । अनन्तनाथस्य अनन्तजित् इत्यपि नामान्तरमस्ति । यदाहुः (अभि० का० १, श्लो० २९)—

"ऋषभो वृषभः श्रेयान्, श्रेयांसः स्यादनन्तजिदनन्तः ।
सुविधिः सुपुष्पदन्तो, मुनिसुव्रत-सुव्रतौ तुल्यौ ॥" —आर्या

इति हेमसूरिपादाः । 'अभिषेकजलप्लवाः' अभिषेकः-जन्माभिषेकः तस्य जलप्लवाः-जलप्रवाहाः तव-भवतः मतं-अभिप्रेतं दिशन्तु-ददत्वित्यर्थः । 'दिश अतिसर्जने' धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि परस्मैपदे प्रथमपुरुषबहुवचनं अन्तु । 'तुदादेरः' (सा० सू० १००७), 'स्वरहीनं०' (सा० सू० ३६) । तथा च 'दिशन्तु' इति सिद्धम् । अत्र 'दिशन्तु' इति क्रियापदम् । के कर्तारः ? । 'अभिषेकजलप्लवाः' । "अम्बुवृद्धौ पुरः प्लवश्च सः (प्लवोऽपि च)" इति हैमः (अभि० का० ४, श्लो० १५३) । किं कर्मतापन्नम् ? । 'मतम्' । कस्य ? । 'तव' । अभिषेकजलप्लवाः कस्य ? । 'अनन्तजितः' अनन्तान् कर्मांशान् जयति, अनन्तैर्ज्ञानादिभिर्वा जयति-राजते इत्यनन्तजित् तस्य । किंविशिष्टा अभिषेकजलप्लवाः ? । 'सकलधौतसहासनमेरवः' सकलाः-सर्वे धौताः-क्षालिताः सहासाः-सविकासा नमेरवः-

देववृक्षविशेषा यैस्ते तथा । सहासाश्च ते नमेरवश्च सहासनमेरवः इति 'कर्मधारयः' । "नमेरुः सुरपुन्नागः" इत्यमरः (?) । (पुनः कथं० ?) 'स्नपितोल्लसत्सकलधौतसहासनमेरवः' उल्लसन्-शोभमानः सकलधौतं कलधौतं-सुवर्णं तेन सह वर्तमानः सहासनः आसनेन-स्नानपीठेन असनैः-वृक्षविशेषैर्वा सह वर्तमानः, एवंविधो यो मेरुः-मेरुपर्वतः स उल्लसत्सकलधौतसहासनमेरुः, ततः स्नपितः-स्नानं कारित उल्लसत्सकलधौतसहासनमेरुः यैस्ते तथा । यदि वा उल्लसत्सकलधौतं सहं-क्षमं दृढमित्यर्थः, एतादृशं आसनं यत्र स सकलधौतसहासनः, एतादृशो मेरुः स्नपितो यैस्ते तथेत्यर्थः । उल्लसच्च तत् सकलधौतं च उल्लसत्सकलधौतं इति 'कर्मधारयः', सहं च तदासनं च सहासनं (इति) 'कर्मधारयः', उल्लसत्सकलधौतं सहासनं यस्मिन् स तथेति 'बहुव्रीहिः', उल्लसत्सकलधौत(सहासन)श्चासौ मेरुश्च उल्लसत्सकलधौतसहासनमेरुः इति 'कर्मधारयः', स्नपित उल्लसत्सकलधौतसहासनमेरुर्यैस्ते स्नपितोल्लसत्सकलधौतसहासनमेरवः इति 'बहुव्रीहिः' । "कलधौतं रूप्यहेम्नोः, कलधौतः कलध्वनौ" इति विश्वः ।। ५३ ।।

(३)

सौ० वृ०—यो विगतमलो भवति सोऽनन्तगुणवानेव भवति । अनेन संबन्धेनायातस्य चतुर्दशश्रीअनन्तजितः स्तुतिः प्रारभ्यते-सकलधौतेति । भो भव्याः ! अनन्तजितः-अनन्ततीर्थकृतः अभिषेको-जन्ममहोत्सवस्नात्रं तस्य जलं-वारि तस्य प्लवाः-प्रवाहाः अभिषेकजलप्लवाः तव-भवतः मतम्-अभिमतं दिशन्तु इत्यन्वयः । 'दिशन्तु' इति क्रियापदम् । के कर्तारः ? । 'अभिषेकजलप्लवाः' । 'दिशन्तु' ददतु । किं कर्मतापन्नम् । 'मतं' अभीष्टम् । कस्य ? । 'तव' । अभिषेकजलप्लवाः कस्य ? । 'अनन्तजितः' । अनन्तजिनेशस्य द्वे नाम्नी, "अनन्तजित् अनन्तः" इत्यभिधानचिन्तामणिः (का० १, श्लो० २९) । किंवि० अभिषेकजलप्लवाः ? । सकलाः-समस्ताः धौताः-क्षालिताः सहासा-विकसिता नमेरवो-देववृक्षविशेषा यैः ते 'सकलधौतसहासनमेरवः' । पुनः किं० अभिषेकजलप्लवाः ? । स्नपितं-स्नापितम् उल्लसत्-दीप्यमानं कलधौतं-सुवर्णं तेन सहितं सकलधौतं सहं-समर्थम् आसनं-सिंहासनम्, यद्वा असनः-शालवृक्षविशेषो यस्मिन् तादृशो मेरुर्यैस्ते 'स्नपितोल्लसत्सकलधौतसहासनमेरवः' । इति पदार्थः ।।

अथ समासः—सकलाश्च ते धौताश्च सकलधौताः, हासेन सहिताः सहासाः, सकलधौताश्च ते सहासाश्च सकलधौतसहासाः, सकलधौतसहासा नमेरवो यैः ते सकलधौतसहासनमेरवः । अभिषेकस्य जलम् अभिषेकजलम्, अभिषेकजलस्य प्लवा अभिषेकजलप्लवाः । अनन्तकर्मादिपक्षं जयतीति अनन्तजित्, तस्य अनन्तजितः । कलधौतेन सहितं सकलधौतम्, उल्लसत् च तत् सकलधौतं च उल्लसत्सकलधौतम्, सह्यते इति सहम्, सहं च तद् आसनं च सहासनम्, उल्लसत्सकलधौतं च तत् सहासनं

च उल्लसत्सकलधौतसहासनम्, स्नपितेन उल्लसत्० स्नपित०सकलधौतसहासनम्, यद्वा असनाः-शालवृक्षविशेषा यस्मिन् स स्नपितोल्लसत्सकलधौतसहासनः । स्नपितोल्लसत्सकलधौतसहासनो मेरुर्यैस्ते स्नपितोल्लसत्सकलधौतसहासनमेरवः । एतादृशा अनन्तजितः अभिषेकजलप्लवाः तव मतं-अभिमतं दिशन्तु । द्रुतविलम्बितच्छन्दसा स्तुतिरियम् ।। इति प्रथमवृत्तार्थः ।। ५३ ।।

(४)

दे० व्या०—सकलधौतेति । अनन्तजितः-अनन्तजिनस्य अभिषेकजलप्लवाः ते-तव मतं-वाञ्छितं दिशन्तु-ददतु इत्यन्वयः । 'दिश अतिसर्जने' धातुः । 'दिशन्तु' इति क्रियापदम् । के कर्तारः ? । 'अभिषेकजलप्लवाः' । "अम्बु वृद्धौ पूरः प्लवश्च सः (प्लवोऽपि च)" इत्यभिधानचिन्तामणिः (का० ४, श्लो० १५३) । किं कर्मतापन्नम् ? । 'मतम्' । कस्य ? । 'अनन्तजितः' । किंविशिष्टा अभिषेक-जलप्लवाः ? । 'सकलधौतसहासनमेरवः' सकलाः-समस्ताः ते च ते धौताः-प्रक्षालिताः सहासा-विकसितपुष्पा नमेरवो-वृक्षविशेषा यैस्ते तथा । पुनः किंविशिष्टाः ? । 'स्नपितोल्लसत्सकल-धौतसहासनमेरवः' स्नपितः-स्नानं कारितः उल्लसन्-शोभमानः सकलधौतसहासनमेरुर्यैस्ते तथा ।। इति प्रथमवृत्तार्थः ।। ५३ ।।

(५)

ध० टीका—सकलेति । 'सकलधौतसहासनमेरवः' सकलाः-समस्ताः धौताः-क्षालिताः सहासाः-सविकासाः नमेरवो-वृक्षविशेषाः यैस्ते । 'तव' भवतः । 'दिशन्तु' ददतु । 'अभिषेकजलप्लवाः' स्नानसलिलौघाः । 'मतं' अभिप्रेतम् । 'अनन्तजितः' अनन्तजिन्नाम्नः । 'स्नपितोल्लसत्सकलधौत-सहासनमेरवः' सहासनेन स्नात्रपीठेन-असनैर्वा-वृक्षविशेषैर्वर्तत इति सहासनः, स्नपितः-प्लावितः उल्लसन्-शोभमानः सकलधौतः-सहेमा सहासनो मेरुर्यैस्ते, अथवा उल्लसत् सकलधौतं-सहेम (सहं-) आरोहक्षमम् आसनं यस्मिन् स तथा स चासौ मेरुश्च स्नपित उल्लसन् सकलधौतसहासनो मेरुर्यैस्ते । अनन्तजितो-ऽभिषेकजलप्लवाः तव मतं दिशन्तु इति सम्बन्धः ।। ५३ ।।

(६)

अवचूरिः

सकलाः-समस्ता धौताः-क्षालिताः सहासाः-सविकासा नमेरवो-वृक्षविशेषा यैस्ते । मतम्-अभिप्रेतम् । हे अनन्तजिन ! । चतुर्दशस्य तीर्थकृतो द्वे नाम्नी-अनन्तः अनन्तजिच्च । सहासनेन-स्नानपीठेन असनैर्वा वृक्षविशेषैर्वर्तते ततः स्नपितः-स्नानं कारितः उल्लसन्-शोभमानः सकलधौतः-सहेमा

सहासनो मेरुर्यैस्ते। यद्वा सकलधौतं-ससुवर्णं सहं-समर्थं दृढमासनं यस्मिन् । ततः स्नपित उल्लसन् सकलधौतसंहासनमेरुर्यैस्ते । हे अनन्तजित् । तव स्नानजलप्रवाहा मतं-हितं दिशन्त्विति संबन्धः ॥ ५३ ॥

❈ ❈ ❈

जिनसमुदायस्य विज्ञप्तिः-

मम रतामरसेवित ! ते क्षण-
प्रद ! निहन्तु जिनेन्द्रकदम्बक ! ।
वरद ! पादयुगं गतमज्ञता-
ममरतामरसे विततेक्षण ! ॥ २ ॥ ५४ ॥

- द्रुत०

(१)

ज० वि०-मम रतामरेति । हे जिनेन्द्रकदम्बक !-तीर्थकरसमूह ! ते-तव पादयुगं-चरणद्वयं मम अज्ञतां-मूढतां निहन्तु-विनाशयतु इति क्रियाकारकसंटङ्कः । अत्र 'निहन्तु' इति क्रियापदम् । किं कर्तृ ? 'पादयुगम्' । कां कर्मतापन्नाम् ? 'अज्ञताम्' । कस्य ? 'मम' । पादयुगं कस्य ? 'ते' । कथंभूतं पादयुगम् ? 'गतं' प्राप्तम् । कस्मिन् ? 'अमरतामरसे' अमरसम्बन्धिनि तामरसे-कमले । अत्रैकवचननिर्देशस्तु जात्या पर्यवसेयः । अपराणि सर्वाण्यपि जिनकदम्बकस्य सम्बोधनानि, तेषां व्याख्या त्वेवम्-हे 'रतामरसेवित !' रता-भक्तिप्राग्भारवशादासक्तचित्ता ये अमरा-देवाः तैः सेवित !-पर्युपासित ! । हे 'क्षणप्रद !' उत्सवप्रदायिन् ! । हे 'वरद !' वाञ्छितदायक ! । हे 'विततेक्षण !' विशाललोचन ! ॥

अथ समासः-रताश्च ते अमराश्च रतामराः 'कर्मधारयः' । रतामरैः सेवितो रता० 'तत्पुरुषः । तत्सम्बो० हे रता० । क्षणान् प्रददातीति क्षणप्रदः 'तत्पुरुषः' । तत्सम्बो० हे क्षण० । जिनानां जिनेषु वा इन्द्रा जिनेन्द्रः 'तत्पुरुषः' जिनेन्द्राणां कदम्बकं जिनेन्द्रकदम्बकं 'तत्पुरुषः' । तत्सम्बो० हे जिनेन्द्र० । वरं ददातीति वरदः 'तत्पुरुषः' । तत्सम्बो० हे वरद ! । पादयोर्युगं पादयुगं 'तत्पुरुषः' । न ज्ञः अज्ञः 'तत्पुरुषः' । अज्ञस्य भावोऽज्ञता । तां अज्ञताम् । अमराणां तामरसं अमर० 'तत्पुरुषः' । तस्मिन्नमर० । वितते ईक्षणे यस्य स वितते० 'बहुव्रीहिः' । तत्सम्बो० हे वितत० ॥ इति काव्यार्थः ॥ ५४ ॥

(२)

सि० वृ०—मम रतामरेति । हे जिनेन्द्रकदम्बक !-तीर्थकरसमूह ! ते-तव पादयुगं-चरणद्वयं मम अज्ञतां निहन्तु-नाशयतु इति क्रियाकारकसण्टङ्कः । अत्र 'निहन्तु' इति क्रियापदम् । किं कर्तृ ? । 'पादयुगम्' । कां कर्मतापन्नाम् ? । अज्ञताम् । कस्य ? । 'मम' । पादयुगं कस्य ? । 'ते' । कथंभूतं पादयुगम् ? । 'गतं'-प्राप्तम् । कस्मिन् ? । 'अमरतामरसे' अमरसम्बन्धिनि तामरसे-कमले । "तामरसं महोत्पलं" इति अभिधानचिन्तामणौ (का० ४, श्लो० २२७) । अत्रैकवचननिर्देशस्तु जात्यपेक्षयाऽवसेयः । अपराणि सर्वाण्यपि जिनेन्द्रकदम्बकस्य सम्बोधनानि, तेषां व्याख्या त्वेवम्-हे 'रतामरसेवित!' रता-भक्तिप्राग्भारवशात् आसक्तचित्ता ये अमरा-देवाः तैः सेवित!-पर्युपासित! । हे क्षणप्रद!-उत्सवप्रदायिन्! । हे वरद!-वाञ्छितदायक! । हे विततेक्षण!-विशाललोचन! ।।

अथ समासानाह—रताश्च ते अमराश्च रतामराः 'कर्मधारयः', रतामरैः सेवितो रता० 'तत्पुरुषः', (तस्य सं०) हे रतामरसेवित ! । क्षणान् प्रददातीति क्षणप्रदः 'तत्पुरुषः', तत्सम्बोधनं हे क्षणप्रद ! । जिनानां जिनेषु वा इन्द्रा जिनेन्द्राः 'तत्पुरुषः', जिनेन्द्राणां कदम्बकं जिनेन्द्र० 'तत्पुरुषः', तत्सम्बोधनं हे जिनेन्द्र० । वरं ददातीति वरदः 'तत्पुरुषः', तत्सम्बोधनं हे वरद ! । पादयोर्युगं पादयुगं 'तत्पुरुषः' । न ज्ञः अज्ञः 'तत्पुरुषः' अज्ञस्य भावोऽज्ञता, तां अज्ञताम्, अमराणां तामरसं अमर० 'तत्पुरुषः', तस्मिन् अमर० । वितते ईक्षणे यस्य स वितते० 'बहुव्रीहिः', तत्सम्बोधनं हे विततेक्षण ! । इति काव्यार्थः ।। ५४ ।।

(३)

सौ० वृ०—मम रतामरेति । जिनाः-सामान्यकेवलिनः तेषामिन्द्राः-स्वामिनः तेषां कदम्बकं-वृन्दं तस्य सं० हे जिनेन्द्रकदम्बक !-तीर्थकरसमूह ! । पुनः रता-भक्तिमन्तो ये अमरा-देवास्तैः सेवितः-पूजितः, तस्य सं० रतामरसेवित ! । पुनः क्षणः-उत्सवः तं प्रकर्षेण ददातीति, तस्य सं० हे क्षणप्रद ! । पुनः वरम्-ईप्सितं दानं ददातीति वरदः, तस्य स० हे वरद ! । पुनः विततानि-विस्तीर्णानि-प्रकाशमयानि नेत्राणि[1] यस्य स विततेक्षणः, तस्य सं० हे विततेक्षण ! । ते-तव पादयुगं-चरणयुगं मम-अस्मत्सत्कां अज्ञतां-जाड्यं निहन्तु इत्यन्वयः । 'निहन्तु' इति क्रियापदम् । किं कर्तृ ? । 'पादयुगम्' । 'निहन्तु' विनाशयतु । कां कर्मतापन्नाम् ? । 'अज्ञतां' अज्ञानत्वम् । कस्य ? । 'मम' मदीयम् । किंवि० पादयुगम् ? । 'गतं' प्राप्तम् । कस्मिन् ? । अमराणां-देवानां तामरसं-कमलं तस्मिन् 'अमरतामरसे', सुरनिर्मितानि कमलानि बहूनि सन्ति, परं जातावेकवचनत्वात् । इति पदार्थः ।।

अथ समासः—रताश्च ते अमराश्च रतामराः, रतामरैः सेवितः रतामरसेवितः, तस्य सं० हे रतामरसेवित ! । क्षणं प्रकर्षेण ददातीति क्षणप्रदः, तस्य सं० हे क्षणप्रद ! । जिनानां इन्द्रा जिनेन्द्राः,

---

१. अत्र द्विवाच्यमावश्यकन्नेत्रयोर्द्विसङ्ख्याकत्वात् ।

जिनेन्द्राणां कदम्बकं जिने०, तस्य सं० हे जिनेन्द्रकदम्बक ! । वरं ददातीति वरदः, तस्य सं० हे वरद ! । पादयोर्युगं पादयुगम् । जानातीति ज्ञः, न ज्ञः अज्ञः, अज्ञस्य भावः अज्ञता, तां अज्ञताम् । अमराणां तामरसं अमरतामरसं, तस्मिन् अमरतामरसे । विततानि ईक्षणानि[1] यस्य स विततेक्षणः, तस्य सं० हे विततेक्षण ! ॥ इति द्वितीयवृत्तार्थः ॥ ५४ ॥

(४)

दे० व्या०—मम रतामरेति । हे 'जिनेन्द्रकदम्बक' ! जिनेन्द्राणां कदम्बकः-समूहः तस्यामन्त्रणं ते-तव पादयुगं-चरणयुगलं मम अज्ञतां-मूढतां निहन्तु-विनाशयतु इत्यन्वयः । 'हन हिंसागत्योः' इति धातुः । 'निहन्तु' इति क्रियापदम् । किं कर्तृ ? । 'पादयुगम्' । पादयोः युगं पादयुगमिति विग्रहः । कस्य ? । 'ते'-तव । कां कर्मतापन्नाम् ? । 'अज्ञतां' अज्ञस्य भावः अज्ञता ताम् । कस्य ? । 'मम' । किंविशिष्टं पादयुगम् ? । 'गतं'-न्यस्तम् । कस्मिन् ? । 'अमरतामरसे' अमरसम्बन्धि यत् तामरसं-कमलं तस्मिन् । जातिनिर्देशादत्रैकवचनम् । 'रतामरसेवित' ! इति । रताः-आसक्तचित्ताः ये अमरा-देवाः तैः सेवितः-पर्युपासितः यः स तस्यामन्त्रणम् । 'क्षणप्रद ! इति । क्षणं-उत्सवं प्रकर्षेण ददातीति क्षणप्रदः तस्यामन्त्रणम् । 'वरद !' इति । वरं-वाञ्छितं ददातीति वरदः तस्यामन्त्रणम् । 'विततेक्षण !' इति । वितते-विशाले ईक्षणे यस्य स तस्यामन्त्रणम् । एतानि सर्वाणि भगवतः संबोधनपदानि । इति द्वितीयवृत्तार्थः ॥ ५४ ॥

(५)

ध० टीका—ममेति । 'मम' इति मम सम्बन्धिनीम् । 'रतामरसेवित !' रताः-सक्तचित्ता ये अमरास्तैः सेवित ! । 'ते' तव । 'क्षणप्रद !' उत्सवदायिन् ! । 'निहन्तु' नाशयतु । 'जिनेन्द्रकदम्बक !' तीर्थवृन्द ! । 'वरद !' वाञ्छितप्रद ! । 'पादयुगं' चरणद्वयम् । 'गतं' यातम् । 'अज्ञतां' मूढत्वम्। 'अमरतामरसे' अमराणां सम्बन्धिनि तामरसे । जातिनिर्देशात् बहुष्वपि एकत्वम् । 'विततेक्षण !' विशाललोचन ! । हे जिनेन्द्रकदम्बक ! अमरतामरसे गतं ते पादयुगं अज्ञतां मम निहन्तु इति योगः ॥ ५४ ॥

(६)

अवचूरिः

हे जिनेन्द्रपटल ! ते-तव पादयुगं ममाज्ञतां-जाड्यं निहन्तु । रताः-सक्तचित्ता येऽमरास्तैः सेवित ! । हे क्षणप्रद ! उत्सवदायक ! । वरं ददातीति वरद ! । पादयुगं किंभूतम् ? । 'गतं'-प्राप्तम् । क्व ? । अमरतामरसे-सुरकृतनवकमलेषु । जातित्वादेकवचनम् । वितते-विस्तीर्णे लोचने यस्य तस्य संबोधनम् ॥ ५४ ॥

१. 'वितते ईक्षणे यस्य स विततेक्षणः' इत्यत्रोचितम् ।

आगमस्तुतिः—

परमतापदमानसजन्मनः—
प्रियपदं भवतो भवतोऽवतात् ।
जिनपतेर्मतमस्तजगत्त्रयी—
परमतापदमानसजन्मनः ॥ ३ ॥ ५५ ॥

- द्रुत०

(१)

ज० वि०—परमतेति । भो भव्याः ! जिनपतेः-भगवतः मतं-सिद्धान्तं भवतः-युष्मान् भवतः-संसारतः अवतात्-रक्षतु इति क्रियाकारकप्रयोगः । अत्र 'अवतात्' इति क्रियापदम् । किं कर्तृ ? 'मतम्' । कान् कर्मतापन्नान् ? 'भवतः' । कुतः ? 'भवतः' संसारतः । मतं कस्य ? 'जिनपतेः' । कथंभूतं मतम् ? 'परमतापत्' परमतानां-विपक्षागमानां आपद्धेतुत्वादापत् । पुनः कथं० ? 'अमानसजन्मनःप्रियपदम्' अमानानि-अप्रमाणानि सजन्ति-बध्यमानानि मनः-प्रियाणि-हृदयाह्लादीनि पदानि-स्यादित्यादिविभक्त्यन्तरूपाणि यत्र तत् तथा । जिनपतेः कथंभूतस्य ? 'अस्तजगत्त्रयीपरमतापदमानसजन्मनः' जगत्त्रय्याः-त्रिभुवनस्य । परमतापदः-प्रकृष्टसन्तापदायी यो मानसजन्मा-कामः सः अस्तः-क्षिप्तः येन स तथा तस्य ॥

अथ समासः—परेषां मतानि पर० 'तत्पुरुषः' । परमतानामापत् परमतापत् 'तत्पुरुषः' । मनसः प्रियाणि मनःप्रियाणि 'तत्पुरुषः' । सजन्ति च तानि मनःप्रियाणि च सजन्म० 'कर्मधारयः' । सजन्मनः प्रियाणि च तानि पदानि सजन्म० 'कर्मधारयः' । न विद्यते मानं येषां तान्यमानानि 'बहुव्रीहिः' । अमानानि सजन्मनःप्रियपदानि यस्मिंस्तत् अमानसजन्म० 'बहुव्रीहिः' । जिनानां जिनेषु वा पतिर्जिन० 'तत्पुरुषः' । तस्य जिन० । जगतां त्रयी जगत्त्रयी 'तत्पुरुषः' । परमश्चासौ तापश्च परमतापः 'कर्मधारयः' । परमतापं ददातीति परमतापदः 'तत्पुरुषः' । जगत्त्रय्याः परमतापदो जगत्त्र० 'तत्पुरुषः' । मानसाज्जन्म यस्य स मानसजन्मा 'बहुव्रीहिः' । जगत्त्रयीपरमतापदश्चासौ मानसजन्मा च जग० 'कर्मधारयः' । अस्तो जगत्त्रयीपरमतापदमानसजन्मा येन सोऽस्तजगत्त्र० 'बहुव्रीहिः' । तस्य अस्तजगत्त्र० ॥ इति काव्यार्थः ॥ ५५ ॥

(२)

सि० वृ०—परमतेति । भो भव्याः ! जिनपतेः-भगवतः मतं-सिद्धान्तः भवतः-युष्मान् भवतः-संसारतः अवतात्-रक्षत्वित्यर्थः । 'अव रक्षणे' धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि

परस्मैपदे प्रथमपुरुषैकवचनं तुप् । 'तुदादेः' (सा० सू० १००७) तुह्योस्तातङादेशः । तथा च 'अवतात्' इति सिद्धम् । अत्र 'अवतात्' इति क्रियापदम् । किं कर्तृ ? । 'मतम्' । कान् कर्मतापन्नान् ? । 'भवतः' । कुतः ? । 'भवतः' । मतं कस्य ? । 'जिनपतेः' । कथंभूतं मतम् ? । 'परमतापत्' विपक्षागमानामापद्धेतुत्वाद् आपत् । पुनः कथंभूतम् ? । 'अमानसजन्मनःप्रियपदं' अमानानि-अप्रमाणानि सजन्ति-सम्बध्यमानानि मनःप्रियाणि-हृदयाह्लादीनि पदानि-स्यादित्यविभक्त्यन्तरूपाणि यत्र तत् तथा । अर्थसमाप्तिः पदमित्येके स्याद्यन्तं त्याद्यन्तं च तत् इत्यन्ये ॥

"एकाधिकपञ्चाशत्कोट्योष्टौ लक्षकाः ते द्वे (हे?) स्राश्च ।
षडशीतिचत्वारिंशदधिकशताष्टौ शतानि पुनः ॥
वर्णाष्टकमेकपदे श्लोकानां मानमागमस्योक्तम् ।
जिनभाषितस्य सैकादशाङ्गपूर्वस्य विद्वद्भिः ॥"

इत्यपरे । कथंभूतस्य जिनपतेः ? । 'अस्तजगत्त्रयीपरमतापदमानसजन्मनः' जगतां-लोकानां स्वर्गमर्त्यपाताललक्षणानां त्रयी जगत्त्रयी तस्याः परमं-प्रकृष्टं तापं ददातीति परमतापदायी यो मानसजन्मा-कामः सः अस्तः-अस्तं नीतो येन स तस्य, परमश्चासौ तापश्च परमतापः इति 'कर्मधारयः' ॥ ५५ ॥

(३)

सौ० वृ०—परमतेति । भो भव्याः ! जिनपतेः-भगवतः मतं-सिद्धान्तो भवतो-युष्मान् भवतः-संसारात् अवतादित्यन्वयः । 'अवतात्' इति क्रियापदम् । किं कर्तृ ? । 'मतम्' । 'अवतात्' रक्षतात् । कान् कर्मतापन्नान् ? । 'भवतः' । कस्मात् ? । 'भवतः' संसारात् । मतं कस्य । 'जिनपतेः' । किंवि० मतम् ? । परेषां मतानि सौगतादीनि तेषां आपदिव आपद् 'परमतापत्' । पुनः किं० मतम् ? । अमानानि-अप्रमाणानि सजन्ति-सङ्गं कुर्वन्ति मनसः-चेतसः प्रियाणि-आह्लादकारकाणि पदानि-अर्हदादीनि यस्मिन् तत् 'अमानसजन्मनःप्रियपदम्' । किंवि० जिनपतेः ? । अस्तो-निराकृतो जगत्त्रय्या-विष्टपत्रयस्य परमः-प्रकृष्टः तापदः-तापदायको मानसजन्मा-कामो येन सः अस्तजगत्त्रयीपरमतापदमानसजन्मा तस्य 'अस्तजगत्त्रयीपरमतापदमानसजन्मनः' । एवंविधस्य जिनपतेर्मतं भवतः-संसारात् भवतो-युष्मान् अवतादिति पदार्थः ॥

अथ समासः-परेषां मतानि परमतानि, यद्वा पराणि च तानि मतानि च परमतानि, परमतेषु परमतानां वा आपदिव आपद् परमतापत् । मनसः प्रियाणि मनःप्रियाणि, संजन्ति च तानि मनःप्रियाणि च सजन्मनःप्रियाणि, न मानानि अमानानि, अमानानि च तानि सज० अमान०, अमानसजन्मनःप्रियाणि पदानि यस्मिन् यस्मै वा तद् अमानसजन्मनःप्रियपदम् । जिनानां पतिः जिनपतिः, तस्य

जिनपतेः । तापं ददातीति तापदः, परमश्चासौ तापदश्च परमतापदः, जगतां त्रयी जगत्त्रयी, जगत्त्रय्याः परमतापदः जगत्त्रयीपरमतापदः, मानसात् जन्म यस्य स मानसजन्मा, अस्तो-ध्वस्तो जगत्त्रयीपरमतापदो मानसजन्मा येन सः अस्तजगत्त्रयीपरमतापदमानसजन्मा, तस्य अस्तजगत्त्रयीपरमतापदमानसजन्मनः । "मनः शृङ्गारसंकल्पात्मानो योनिः" इत्यभिधानचिन्तामणिः (का० २, श्लो० १४३) । इति तृतीयवृत्तार्थः ॥ ५५ ॥

(४)

दे० व्या०—परमतेति । जिनपतेः-तीर्थङ्करस्य मतं-प्रवचनं भवतो-युष्मान् भवतः-संसारात् अवतात्-रक्षतात् इत्यन्वयः । 'अव रक्षणे' धातुः । 'अवतात्' इति क्रियापदम् । किं कर्तृ ? । 'मतम्' । कान् कर्मतापन्नान् ? । 'भवतः' । कस्य ? । 'जिनपतेः' जिनानां पतिः जिनपतिः इति विग्रहः तस्य । कस्मात् ? । 'भवतः' । किंविशिष्टं मतम् ? । 'परमतापत्' परेषां मतं परमतमिति षष्ठीतत्पुरुषः तस्य आपत्-आपदाभूतं तन्न्यक्कृतिहेतुत्वात् । पुनः किंविशिष्टम् ? । 'अमानसजन्मनःप्रियपदम्' अमानानि-अप्रमाणानि सजन्ति-संबध्यमानानि मनःप्रियाणि-हृदयाह्लादीनि पदानि-सुप्तिङन्तानि यत्र तत् । किंविशिष्टस्य जिनपतेः ? । 'अस्तजगत्त्रयीपरमतापदमानसजन्मनः' अस्तो-विध्वस्तो जगत्त्रय्याः परमतापदो-महासन्तापकारी मानसजन्मा-कामो येन तस्य । इति तृतीयवृत्तार्थः ॥ ५५ ॥

(५)

ध० टीका—परमतेति । 'परमतापत्' परमतानां-विपक्षागमानां आपद्धेतुत्वात् आपत्-व्यसनम् । 'अमानसजन्मनःप्रियपदं' अमानानि-अप्रमाणानि सजन्ति-सम्बध्यमानानि मनःप्रियाणि-हृदयाह्लादीनि पदानि-सुप्तिङन्तानि यत्र तत् । 'भवतः' युष्मान् । 'भवतः' संसारात् । 'अवतात्' रक्षतु । 'जिनपतेः' अर्हतः । 'मतम्' आगमः । 'अस्तजगत्त्रयीपरमतापदमानसजन्मनः' अस्तः-क्षिप्तो जगत्त्रय्याः-जगत्त्रितयस्य परमतापदः-प्रकृष्टसन्तापदायी मानसजन्मा-मनोभवो येन तस्य ॥ ५५ ॥

(६)

अवचूरिः

हे भव्यलोकाः ! जिनेन्द्रमतं भवतो-युष्मान् भवतः-संसारात् अवतात्-रक्षतात् । किंविशिष्टम् ? परमतानां-बौद्धादिशासनानामापदां हेतुत्वादापद्-व्यसनम् । अमानानि-असंख्यानि सजन्ति-संबध्यमानानि मनःप्रियाणि-चित्तप्रीतिकराणि पदानि-स्याद्यन्तानि यस्मिंस्तत् । जिनपतेः कथंभूतस्य ? । अस्तो-ध्वस्तो जगत्त्रय्याः परमतापदो-महासंतापकारी मानसजन्मा-कामो येन तस्य ॥ ५५ ॥

श्रीअच्युतायाः स्तुतिः—

रसितमुच्चतुरं गमनाय कं
दिशतु काञ्चनकान्तिरिताऽच्युता ।
धृतधनुःफणकासिशरा करै—
रसितमुच्चतुरङ्गमनायकम् ॥ ४ ॥ ५६ ॥

- द्रुत०

(१)

ज० वि०—रसितमिति । अच्युता-अच्युताख्या अच्छुप्तापरनाम्नी देवी कं-सुखं दिशतु-ददातु इति क्रियाकारकसम्बन्धः । अत्र 'दिशतु' इति क्रियापदम् ? । का कर्त्री 'अच्युता' । किं कर्मतापन्नम् ? 'कम्' । कथंभूता अच्युता ? 'इता' प्राप्ता, समारूढेति भावः । कं कर्मतापन्नम् ? 'उच्चतुरङ्गमनायकम्' उच्चः-प्रांशुः तुरङ्गमनायकः-तुरङ्गमप्रकाण्डो-घोटकोत्तमस्तं उच्चतुरङ्गमनायकम् । कथंभूतम् ? 'रसितं' शब्दायितं, हेषारवसंयुतमित्यर्थः । पुनः कथं० ? 'उच्चतुरम्' उत्-प्राबल्येन चतुरं-गृहीतशिक्षम् । अथवा रसितमुच्चतुरमिति अखण्डमेवेदं विशेषणम् । तथा चायमर्थः-रसितं-ध्वनिते मुत्-प्रमोदो यस्य स रसितमुत् स चासौ चतुरश्च रसितमुच्चतुरस्तम् । पुनः कथं० ? 'असितं' नीलम् । कस्मै तमिता ? 'गमनाय' गत्यर्थम् । पुनः कथं० अच्युता ? 'काञ्चनकान्तिः' काञ्चनवत् कान्तिर्यस्याः सा काञ्चन० । पुनः कथं० ? 'धृतधनुःफलकासिशराः' धनुः-कार्मुकं फलकं-खेटकं असिः-तरवारिः शरः-बाणः, ततो धृता धनुःफलकासिशरा यया सा तथा । कैः कृत्वा ? 'करैः' पाणिभिः । चत्वार्यपि प्रहरणानि चतुर्भिः करैर्धृतानीत्यर्थः ॥

अथ समासः—उत्-प्राबल्येन चतुरः उच्चतुरः 'तत्पुरुषः' । तं उच्चतुरम् । अथवा रसिते मुद् यस्य स रसितमुत् 'बहुव्रीहिः' । रसितमुत् चासौ चतुरश्च रसित० 'कर्मधारयः' । तं रसित० । काञ्चनस्येव कान्तिर्यस्याः सा काञ्चन० 'बहुव्रीहिः' । धनुश्च फलकं च असिश्च शरश्च धनुःफलकासिशराः 'इतरेतर-द्वन्द्वः' । धृता धनुःफलकासिशरा यया सा धृत० 'बहुव्रीहिः' । न सितः असितः 'तत्पुरुषः' । तं असितम् तुरङ्गमानां तुरङ्गमेषु वा नायकः तुरङ्ग० 'तत्पुरुषः' । उच्चश्चासौ तुरङ्गमनायकश्च उच्चतु० 'कर्म-धारयः' । तं उच्चतुरङ्गम० । इति काव्यार्थः ॥ ५६ ॥

॥ इति श्रीशोभनस्तुतिवृत्तौ अनन्तजिनपतिस्तुतेर्व्याख्या ॥ ४ । १४ । ५६ ॥

(२)

सि० वृ०—रसितमिति । अच्युता-अच्युताख्या अच्छुप्तापरनाम्नी देवी कं-सुखं दिशतु ददात्विति

सम्बन्धः । 'दिश अतिसर्जने' धातोः आशीःप्रेरणयोः (सा० सू० ७०३) कर्तरि परस्मैपदे प्रथमपुरुषैकवचनं तुप् । 'तुदादेरः' (सा० सू० १००७), 'स्वरहीनं०' (सा० सू० ३६) । तथा च 'दिशतु' इति सिद्धम् । अत्र 'दिशतु' इति क्रियापदम् । का कर्त्री ? । 'अच्युता' । किं कर्मतापन्नम् ? । 'कम्' । "कं शिरो जलमाख्यातं, कं सुखं परिकीर्तितं" इति केशवः । "कं शीर्षेऽप्सु सुखं" इत्यनेकार्थः । कीदृशी अच्युता ? । 'इता'-प्राप्ता, समारूढेत्यर्थः । कम् ? । 'उच्चः'-प्रांशुः यः तुरङ्गमनायकः-तुरङ्गमप्रकाण्डः-घोटकश्रेष्ठस्तं उच्चतुरङ्गमनायकम् । कीदृशम् ? । 'रसितं'-शब्दायितं, हेषारवसंयुतमित्यर्थः । "हेषा ह्रेषा तुरङ्गाणां" (अभि० का० ६, श्लो० ४१), "स्तनितं गर्जितं मेघनिर्घोषे रषितादि च" इत्यमरः (श्लो० १६१) । विशेषोऽत्र न विविक्तः । पुनः कीदृशम् ? । 'उच्चतुरं' उत्-प्राबल्येन चतुरं-गृहीतशिक्षम् । अथवा रसितमुच्चतुरं इत्यखण्डमेवेदं विशेषणम् । तथा चायमर्थः-रसिते-ध्वनिते मुत्-प्रमोदो यस्य (स) रसितमुत्, स चासौ चतुरश्च रसितमुच्चतुरस्तम् । पुनः कथंभूतम् ? । 'असितं'-नीलम् । कस्मै ? । 'गमनाय'-गत्यर्थम् । पुनः कथंभूता अच्युता ? । 'काञ्चनकान्तिः' काञ्चनं-कनकं तदिव कान्तिर्यस्याः सा । पुनः कथंभूता ? । 'धृतधनुःफलकासिशरा' धनुः-कार्मुकं फलकं-खेटकं असिः-करवालः शरः-बाणः, धनुश्च फलकं च असिश्च शरश्च धनुःफलकासिशराः 'इतरेतरद्वन्द्वः', ततः धृता धनुःफलकासिशरा यया सा ततः ? 'नित्यबहुव्रीहिः' । कैः कृत्वा ? । 'करैः'-हस्तैः । देव्याश्चतुर्भुजत्वेन प्रतिकरं एकैकायुधग्रहणादिति भावः । "धनुश्चापोऽस्त्रमिष्वासं(सः), कोदण्डं धन्व कार्मुकं" इति हैमः (का० ३, श्लो० ४३९) । द्रुतविलम्बितं छन्दः । "द्रुतविलम्बितमत्र नभौ भरौ" इति च तल्लक्षणम् ॥ ५६ ॥

॥ इति महोपाध्यायश्रीभानुचन्द्र० श्रीअनन्तजिनस्तुतिवृत्तिः ॥ ४ । १४ । ५६ ॥

(३)

सौ० वृ०—रसितमिति । अच्युता-अच्छुप्तानाम्नी देवी कं-सुखं दिशत्वित्यन्वयः । 'दिशतु' इति क्रियापदम् । का कर्त्री ? । 'अच्युता' । 'दिशतु' ददातु । किं कर्मतापन्नम् ? । 'कं' सुखम् । किंविशिष्टा अच्युता ? । 'काञ्चनकान्तिः' सुवर्णप्रभा, पीतवर्णेत्यर्थः । पुनः किं० अच्युता ? । 'इता' प्राप्ता । कं कर्मतापन्नम् ? । 'उच्च०' उच्चम्-उन्नतं तुरङ्गमनायकम्-अश्वरत्नप्रधानम् । कस्मै ? । 'गमनाय' गत्यर्थम्, अश्ववाहनप्राप्त्यर्थम् । किंवि० (उच्च) तुरङ्गमनायकम् ? । 'असितं' श्यामवर्णमित्यर्थः । पुनः किं० (उच्च) तुरङ्गमनायकम् ? । रसितेन-शब्देन कृत्वा या मुत्-हर्षः तेन चतुरः-कुशलः तं 'रसितमुच्चतुरम्', यद्वा रसितमुद् इति भिन्नं पदं देवीविशेषणम्, चतुरमिति अश्वविशेषणम् । पुनः किं० अच्युता ? । धृतं-गृहीतं धनुः-कोदण्डं फलकं-खेटकं असिः-खड्गः शरो-बाणो यया सा 'धृतधनुःफलकासिशरा' । कैः कृत्वा ? । 'करैः' हस्तैः कृत्वा । चतुर्ष्वपि हस्तेषु चत्वारि शस्त्राणि धृतानि । इति पदार्थः ॥

अथ समासः—रसितेन-हर्षारवेण-अश्वशब्देन मुद्-यस्याः सा रसितमुद्, यद्वा रसितस्य मुद् रसितमुद्, रसितमुदा चतुरः रसितमुच्चतुरः, तं रसितमुच्चतुरम् । गम्यते-ईप्सितदेशः प्राप्यते येन कृत्वा तद् गमनम्, तस्मै गमनाय । काञ्चनवत् कान्तिः यस्याः सा काञ्चनकान्तिः । धनुश्च फलकं च असिश्च शरश्च धनुःफलकासिशराः, धृता धनुःफलकासिशरा यया सा धृतधनुःफलकासिशरा । न सितः असितः, तम् असितम् । उच्चाश्च ते तुरङ्गमाश्च उच्चतुरङ्गमाः, उच्चतुरङ्गमेषु-अष्टादशजातीयाश्वेषु नायकः-श्रेष्ठः उच्चतुरङ्गमनायकः, तं उच्चतुरङ्गमनायकम् । आद्यन्तपदयमका स्तुतिरियम् ।। इति चतुर्थवृत्तार्थः ।। ५६ ।।

श्रीअनन्तजिनेशस्य, स्तुतेरर्थः स्फुटीकृतः ।
सौभाग्यसागराख्येण, सूरिणा ज्ञानसेविना ।।

।। इति अनन्तजिनस्तुतिः ।। ४ । १४ । ५६ ।।

(४)

दे० व्या०—रसितमिति । अच्युता देवी-अच्छुप्ता देवी कं-सुखं दिशतु-देयादित्यन्वयः । 'दिश अतिसर्जने' धातुः । 'दिशतु' इति क्रियापदम्। का कर्त्री ? । 'अच्युता' । किं कर्मतापन्नम् ? । 'कं'-सुखम् । "कं शिरो जलमाख्यातं, कं सुखं परिकीर्तितम्" इत्यनेकार्थः । किंविशिष्टा अच्युता देवी ? । 'इता'-प्राप्ता । कम् ? । 'तुरङ्गमनायकं'-तुरङ्गमप्रकाण्डम् । किंविशिष्टम् ? । 'रसितं'-शब्दायमानम् । पुनः किंविशिष्टम् ? । 'उच्चतुरं' उत्-प्राबल्येन चतुरं-दक्षम् । यद्वा रसिते मुद्-प्रमोदो यस्य स चासौ चतुरश्च तम् । गमनाय-गत्यर्थम् । पुनः किंविशिष्टम् ? । 'असितं'-नीलवर्णम् । किंविशिष्टा देवी ? । 'काञ्चनकान्तिः' काञ्चनवत् कान्तिः-दीप्तिः यस्याः सा । पुनः किंविशिष्टा ? । 'धृतधनुःफलकासिशरा' धृताः चापावरणखड्गबाणा यया सा । कैः ? । 'करैः'-शयैः । "पञ्चशाखः शयः शमः । हस्तः पाणिः करः" इत्यभिधानचिन्तामणिः (का० ३, श्लो० २५५) । इति तुरीयवृत्तार्थः ।। ४ । १४ । ५६ ।।

(५)

ध० टीका—रसितेति । 'रसितं' शब्दायितम् । 'उत्' प्राबल्येन । 'चतुरं' गृहीतशिक्षम् । अथवा रसिते मुद् यस्य स रसितमुद् स चासौ चतुरश्च तम् । 'गमनाय' गत्यर्थम् । 'कं' सुखम् । 'दिशतु' प्रयच्छतु । 'काञ्चनकान्तिः' कार्तस्वरद्युतिः । 'इता' गता । 'अच्युता' अच्छुप्ता । 'धृतधनुःफलकासिशरा' धनुश्च फलकं च असिश्च शरश्च ते धृता यया सा । 'करैः' पाणिभिः । 'असितं' नीलम् । 'उच्चतुरङ्गमनायकं' उच्चः-प्रांशुः यस्तुरङ्गमनायकः-तुरङ्गमप्रकाण्डः तम् । उच्चतुरङ्गमनायकं इता अच्युता कं दिशतु इति सम्बन्धः ।। ४ । १४ । ५६ ।।

(६)

अवचूरिः

अच्युता-अलु(च्छु)प्ता देवी कं-सुखं देयात् । कथंभूता ? । 'इता'-प्राप्ता । कम् ? । 'उच्चतुरङ्गम-नायकं'-तुङ्गाश्वप्रकाण्डम्[1] । किंविशिष्टम् । 'रसितं'-शब्दायमानम् । उत्-प्राबल्येन चतुरं-दक्षम् । असितं-नीलवर्णम् । यद्वा रसिते-मुत्-प्रमोदो यस्य स चासौ चतुरश्च तम् । गमनाय-गत्यर्थम् । देवी कथंभूता ? । काञ्चनवत् कान्तिर्यस्याः सा । करैः-शयैर्धृता चापावरणखड्गबाणा यया सा ॥ ४ । १४ । ५६ ॥

१. अत्र 'तुरङ्गमप्रकाण्डम्' एवं सम्भाव्यते, प्रकृतपदरचना तु अस्तव्यस्ता ।

१५. श्रीधर्मजिनस्तुतयः

अथ श्रीधर्मनाथाय प्रणामः—

नमः श्रीधर्म ! निष्कर्मो-दयाय महितायते ! ।
मर्त्यामरेन्द्रनागेन्द्रै-र्दयायमहिताय ते ॥ १ ॥ ५७ ॥

- अनुष्टुप्

(१)

ज० वि०—नम इति । हे श्रीधर्म !-श्रिया-चतुस्त्रिंशदतिशयसमृद्धिरूपयोपलक्षितधर्माभिध-तीर्थपते ! ते तुभ्यं नमः-नमस्कारः । अस्तु इति क्रियाऽध्याह्रियते । अत्र 'अस्तु' इति क्रियापदम् । किं कर्तृ ? 'नमः' । कस्मै ? 'ते' । कथंभूताय ते ? 'निष्कर्मोदयाय' निर्गतः कर्मोदयः-मलोत्पादो यस्मात् स तथा तस्मै । पुनः कथं० ? 'दयायमहिताय' दया-कारुण्यं यमा-अहिंसासूनृतादयः तेषां हिताय, वृद्धिजनकत्वात् । अवशिष्टं चैकं श्रीधर्मनाथस्य सम्बोधनं, तद्व्याख्या यथा-हे 'महितायते !' महिता-पूजिता आयतिः-प्रभुता उत्तरः कालो वा आ-समन्ताद् यतयः-साधवो वा यस्य स तथा तत्सम्बो० हे महि० । कैः ? 'मर्त्यामरेन्द्रनागेन्द्रैः' मर्त्या-नराः अमरा-देवाः तेषामिन्द्राः-प्रभवः नागा-भवनविशेषा-स्तेषामिन्द्राश्च तैः ॥

अथ समासः—श्रियोपलक्षितो धर्मः श्रीधर्मः 'तत्पुरुषः' । तत्सम्बो० हे श्रीधर्म ! । कर्मणामुदयः कर्मोदयः 'तत्पुरुषः' । निर्गतः कर्मोदयो यस्मात् स निष्क० 'बहुव्रीहिः' । तस्मै निष्क० । महिता आयतिर्यस्य स महि० 'बहुव्रीहिः' । यद्वा आ-समन्ताद् यतय आयतयः 'तत्पुरुषः' । महिता आयतयो

यस्य स महि० 'बहुव्रीहिः' । तत्सम्बो० हे महि० । मर्त्याश्च अमराश्च मर्त्यामराः 'इतरेतरद्वन्द्वः' । मर्त्यामराणां इन्द्रा मर्त्या० 'तत्पुरुषः' । नागानामिन्द्राः नागेन्द्राः 'तत्पुरुषः' । मर्त्यामरेन्द्राश्च नागेन्द्राश्च मर्त्या० 'इतरेतरद्वन्द्वः' । तैः मर्त्या० । दया च यमाश्च दयायमाः 'इतरेतरद्वन्द्वः' । दयायमानां हितो दया० 'तत्पुरुषः' । तस्मै दया० ।। इति काव्यार्थः ।। ५७ ।।

(२)

सि० वृ०—नम इति । दुर्गतौ प्रपतन्तं सत्त्वसङ्घातं धारयतीति धर्मः, गर्भस्थेऽस्मिन् माता दानादिधर्मपरा जातेति वा धर्मः, तस्य सम्बोधनं हे श्रीधर्म ! श्रिया-चतुस्त्रिंशदतिशयसमृद्धिरूपयोपलक्षित ! धर्माभिधतीर्थपते ! ते-तुभ्यं नमः-नमस्कारं अस्तु इत्यर्थः । तत्र नमः इति नैपातिकं पदं द्रव्यभावसङ्कोचार्थमाह च-'नेवाईयं[1] पयं दव्वभावसंकोयणपयत्थो' । नमः-करचरणमस्तकसुप्रणिधानरूपो नमस्कारो भवत्वित्यर्थः । अत्र 'अस्तु' इति क्रियापदम् । किं कर्तृ ? । 'नमः' । कस्मै ? । 'ते' । कथंभूताय ते ? । 'निष्कर्मोदयाय' निर्गतः कर्मणां ज्ञानावरणादीनां उदय-उत्पादो यस्मात् स तथा तस्मै । पुनः कथंभूताय ? । 'दयायमहिताय' दया-कारुण्यं यमाः-पञ्चमहाव्रतानि, "अहिंसासत्यमस्तेयब्रह्माकिञ्चनता यमाः" इति चिन्तामणि (का० १, श्लो० ८१) नाममालाया वचनात्, दया च यमाश्च दयायमाः 'इतरेतरद्वन्द्वः', तेषां हिताय-हितकारकाय, वृद्धिजनकत्वात् । अवशिष्टं चैकं श्रीधर्मस्य सम्बोधनम् । तद्व्याख्या चैवं-हे 'महितायते !' महिता-पूजिता आयतिः-प्रभावः-उत्तरकालो वा यस्य स तथा तस्य सम्बोधनं हे महि० । "आयतिः संयमे दैर्घ्ये, प्रभावागामिकालयोः" इति विश्वः । कैः ? । 'मर्त्यामरेन्द्रनागेन्द्रैः' मर्त्या-मनुष्याः अमरा-गीर्वाणाः मर्त्याश्च अमराश्च मर्त्यामराः 'इतरेतरद्वन्द्वः' ।। ५७ ।।

(३)

सौ० वृ०—योऽनन्तदोषजित् अनन्तगुणवान् भवति स साक्षात् मूर्तिमान् धर्म एव भवति । अनेन सम्बन्धेनायातस्य पञ्चदशश्रीधर्मजिनस्य स्तुतेरर्थो लिख्यते नम इति । श्रीशब्दः पूज्यार्थे । हे श्रीधर्म !-पञ्चदशजिन ! (ते) तुभ्यं नमः अस्तु इत्यन्वयः । 'अस्तु' इति क्रियापदम् । किं कर्तृ ? । 'नमः' । 'अस्तु' भवतु । कस्मै ? । 'ते' तुभ्यम् । किंविशिष्टाय ते ? । निर्गतः कर्मणां-ज्ञानावरणीयादीनाम् उदयो यस्मात् स निष्कर्मोदयः तस्मै 'निष्कर्मोदयाय' । महितः-पूजितः आयतिः-उत्तरकालो यस्य स महितायतिः तस्मै[2] 'महितायते' । पुनः किंविशिष्टाय ते [तुभ्यं] ? । 'महिताय' पूजिताय । कैः ? । 'मर्त्या'-मनुष्याः अमरा-देवाः तेषामिन्द्राः-स्वामिनः नागेन्द्राः-असुरकुमारेन्द्रादयः तैः 'मर्त्यामरेन्द्रनागेन्द्रैः' । पुनः किं० ते

---

१. **नैपातिकं पदं द्रव्यभावसंकोचनपदार्थः ।**

२. **व्याकरणविपरीतमेतद्, चतुर्थीविभक्त्यां 'महितायतये' भवति तदप्यत्राऽनपेक्षितं सम्बोधनस्य प्रक्रमादतः 'तत्सम्बोधने' एवमत्रोचितम् ।**

[तुभ्यम्] ? । दया-सकलप्राणिनाम् अवनं यमा-महाव्रतानि तेषां हिताय-हितकारिणे 'दयायमहिताय' । यद्वा आङ् मर्यादया यतयो यस्य स आयतिः तस्य सं० हे आयते । महिता-पूजिता आयतयो यस्य स महितायतिः । तस्य सं० हे महितायते ! । ते-तुभ्यम् नमोऽस्तु । इति पदार्थः ॥

अथ समासः—दुर्गतौ प्रपतत्प्राणिधारणाद् धर्मः । यद्वा स्वस्वभावं निर्मलतया धारणाद् धर्मः । यद्वा भगवति गर्भस्थे मातुर्धर्मकरणे दोहदानुमानेन नाम्ना धर्मः । श्रिया युक्तो धर्मः (श्रीधर्मः), तस्य सं० हे श्रीधर्म ! । कर्मणां उदयः कर्मोदयः, निर्गतः कर्मोदयो यस्माद् यस्य वा तस्मै निष्कर्मोदयाय । महिता आयतिः उत्तरकालो यस्य स महितायतिः, तस्य सं० हे महितायते ! । यद्वा आङ् मर्यादया यतयः आयतयः, महिताः-पूजिता [वन्तो वा] आयतयो यस्य स महितायतिः, तस्य सं० महितायते ! । मर्त्याश्च अमराश्च मर्त्यामराः, मर्त्यामराणां इन्द्रा-मर्त्यामरेन्द्राः, नागानां इन्द्राः नागेन्द्राः, मर्त्यामरेन्द्राश्च नागेन्द्राश्च मर्त्यामरेन्द्रनागेन्द्राः, तैः मर्त्यामरेन्द्रनागेन्द्रैः । दया च यमाश्च दयायमाः, दयायमानां दयायमेषु वा हितं यस्य स दयायमहितः, तस्मै दयायमहिताय । अनुष्टुपृछन्दसा स्तुतिरियम् । मध्यान्तपदयमकाः ।

"पञ्चमं लघु सर्वत्र, सप्तमं द्विचतुर्थयोः ।
षष्ठं गुरु विजानीया-देतत् पद्यस्य लक्षणम् ॥"

इति प्रथमपद्यार्थः ॥ ५७ ॥

(४)

दे० व्या०—नम इति । हे श्रीधर्मनाथ ! ते-तुभ्यं नमः अस्तु इत्यन्वयः । 'नमः' इत्यव्ययम् । धर्मशब्देनात्र धर्मनाथ एव गृह्यते । पदैकदेशे पदसमुदायोपचाराद् भीमो भीमसेन इतिवत् । किंविशिष्टाय तुभ्यम् ? । 'निष्कर्मोदयाय' निर्गतः कर्मणां-ज्ञानावरणादीनां उदयः-उत्पत्तिर्यस्मात् स तस्मै, अकर्मका -येत्यर्थः । पुनः किंविशिष्टाय ? । 'दयायमहिताय' दया-कृपा यमा-महाव्रतानि (अनयोः) पूर्वं 'द्वन्द्वः', तेषु हितं आनुकूल्यं यस्य स तस्मै । "अहिंसासत्यमस्तेयब्रह्माकिञ्चनता यमाः" इत्यभिधानचिन्तामणिः (का० १, श्लो० ८१) । 'महितायते !' इति । महिताः-पूजिता आ-समन्तात् यतयो-मुनयो यस्य स तस्यामन्त्रणं हे महितायते ! । भगवत्सम्बोधनम् । कैः ? । 'मर्त्यामरेन्द्रनागेन्द्रैः' मर्त्या-मनुष्याः अमरेन्द्राः-शक्रा(दयः) नागेन्द्रा-धरणेन्द्रादयः एतेषां द्वन्द्वः तैः ॥ इति प्रथमवृत्तार्थः ॥ ५७ ॥

(५)

ध० टीका—नम इति । 'नमः' इति स्तुत्यर्थे । 'श्रीधर्म !' श्रीधर्माभिधान ! जिन ! । 'निष्कर्मोदयाय' निर्गतः कर्मोदयो-मलोत्पादो यस्य तस्मै । 'महितायते !' महिता-पूजिता आयतिः-महिमा-प्रभुता यस्य तस्यामन्त्रणम् । 'मर्त्यामरेन्द्रनागेन्द्रैः' मर्त्याश्च अमराश्च तेषामिन्द्राः मर्त्यामरेन्द्राः ते च नागेन्द्राश्च तैः ।

'दयायमहिताय' दया च यमाश्च तेषां हिताय । 'ते' तुभ्यम् । हे श्रीधर्म ! मर्त्यामरेन्द्रनागेन्द्रैर्महितायते ! (ते) नमः इत्यन्वयः ।। ५७ ।।

(६)

अवचूरिः

हे धर्मनाथ ! जिन ! ते-तुभ्यं नमोऽस्तु । कथंभूताय ! । निर्गतः कर्मोदयो-मलोत्पादो यस्य स तस्मै निर्गतकर्मोदयाय । 'महिता'-पूजिता आयतिः-उत्तरकालः प्रभुता वा यस्य । यद्वा महिता आ-समन्ताद् यतयः-साधवो यस्य तत्संबोधनम् । कैः ? । मर्त्यामरेन्द्रनागेन्द्रैर्मर्त्याश्चामराश्च तेषामिन्द्रा नागेन्द्रा नागेन्द्रस्योपलक्षणात् पातालवासिदेवैः । दया च यमाश्च-व्रतानि तेषां हिताय। ते-तुभ्यम् ।। ५७ ।।

जिनसमूहस्य स्तुतिः—

जीयाज्जिनौघो ध्वान्तान्तं, ततान लसमानया ।
भामण्डलत्विषा यः स, ततानलसमानया ।। २ ।। ५८ ।।

- अनु०

(१)

ज० वि०—जीयादिति । स जिनौघो-जिनसमूहः जीयाद्-जयतादिति क्रियाकारकसण्टङ्कः । अत्र 'जीयात्' इति क्रियापदम् । कः कर्ता ? 'जिनौघः' । स इति तच्छब्दसम्बन्धाद् यच्छब्दघटनामाह-यो जिनौघो भामण्डलत्विषा-भामण्डलकान्त्या ध्वान्तान्तं-तमोविनाशं ततान-विस्तारितवान् । अत्रापि 'ततान' इति क्रियापदम् । कं कर्मतापन्नम् ? 'ध्वान्तान्तम्' । कया ? 'भामण्डलत्विषा' । कथंभूतया ? 'लसमानया' विलसन्त्या वर्धमानया वा । पुनः कथंभूतया ? 'ततानलसमानया' ततः-प्रसृतो योऽनलो-वह्निस्तेन समानया-सदृश्या ।।

अथ समासः—जिनानामोघो जिनौघः 'तत्पुरुषः' । ध्वान्तस्यान्तो ध्वान्तान्तः 'तत्पुरुषः' । तं ध्वान्तान्तम् । भाया मण्डलं भामण्डलं 'तत्पुरुषः' । भामण्डलस्य त्विट् भामण्डल० 'तत्पुरुषः' । तया भामण्डल० । 'ततश्चासावनलश्च ततानलः 'कर्मधारयः' । ततानलेन समाना तता० 'तत्पुरुषः' । तया तत० ।। इति काव्यार्थः ।। ५८ ।।

(२)

सि० वृ०—जीयादिति । स जिनौघः-जिनसमूहः जीयाद्-जयतादित्यर्थः । 'जि जये' धातोः

आशिषि कर्तरि परस्मैपदे प्रथमपुरुषैकवचनं यात् । 'ये' (सा० सू० ७७९) इति दीर्घः । तथा च 'जीयात्' इति सिद्धम् । अत्र 'जीयात्' इति क्रियापदम् । कः कर्ता ? । 'जिनौघः' जिनानां ओघो जिनौघः । उह्यते वहति वा ओघः न्यङ्क्वादौ साधुः । "ओघो वृन्देऽम्भसां रये" इत्यमरः (श्लो० २३८८) । यत्तदोर्नित्य-संबन्धात् सः कः ? । यो जिनौघो भामण्डलत्विषा-भामण्डलकान्त्या ध्वान्तस्य-तमसः अन्तं-विनाशं ततान-विस्तारितवान् । 'तनु विस्तारे' धातोः परोक्षे कर्तरि परस्मैपदे प्रथमपुरुषैकवचनं णप् । 'द्विश्च' (सा० सू० ७१०) इति धातोर्द्वित्वम् । 'अत उपधायाः' (सा० सू० ७५७) इति वृद्धिः, 'स्वरहीनं०' (सा० सू० ३६) । तथा च 'ततान' इति सिद्धम् । अत्रापि 'ततान' इति क्रियापदम् । कः कर्ता ? । 'यः' । कं कर्मतापन्नम् ? । 'ध्वान्तान्तम्' । "अन्तः प्रान्तान्तिके नाशे, स्वरूपेऽतिमनोहरे" इति विश्वः । कया ? । 'भामण्डलत्विषा' भामण्डलो[1] देवनिर्मितो भगवत्पृष्ठे प्रभामण्डलस्तस्य त्विट्-कान्तिः तया । कथंभूतया ? । 'लसमानया'-लसन्त्या वर्धमानया वा । पुनः कथंभूतया ? । 'ततानलसमानया' ततो-विस्तृतो यः अनलः-वह्निः तेन समानया-सदृश्या ॥ ५८ ॥

(३)

सौ० वृ०—जीयादिति । स जिनौघः-तीर्थकरसमूहः जीयादित्यन्वयः । 'जीयात्' इति क्रियापदम् । कः कर्ता ? । 'जिनौघः' । 'जीयात्' जयतात् । किंवि० जिनौघः ? । 'सः' प्रसिद्धः । प्रसिद्धार्थः तच्छब्दो यच्छब्दमपेक्षते । सः कः ? । यो जिनौघः ध्वान्तान्तं ततान इत्यन्वयः । 'ततान' इति क्रियापदम् । कः कर्ता ? । 'यो जिनौघः' । 'ततान' । विस्तारयामास । कं कर्मतापन्नम् ? । 'ध्वान्तान्तं' ध्वान्तं-अज्ञानतमः तस्य अन्तो-विनाशस्तं ध्वान्तान्तम् । कया ? । भा-प्रभा तस्या मण्डलम् यद्वा भामण्डलं-सुरकृतप्रातिहार्यरूपं तस्य त्विट्-कान्तिः तया 'भामण्डलत्विषा' । किंविशिष्टया भामण्डलत्विषा ? । 'लसमानया' देदीप्यमानया। पुनः किं० भामण्डलत्विषा ? । ततो-विस्तीर्णो यः अनलः-वह्निः तत्सदृश्या 'ततानलसमानया । यद्वा ततो-विस्तृतः अत एव अनलसः-अमदः मानः-प्रमाणं यस्याः सा ततानलसमाना तया ततानलसमानया । इति पदार्थः ॥

अथ समासः—जिनानां ओघः जिनौघः । ध्वान्तस्य अन्तो ध्वान्तान्तः, तं ध्वान्तान्तम् । लसति-दीप्यतीति लसमाना, तया लसमानया । भाया मण्डलं भामण्डलं, भामण्डलस्य त्विट् भामण्डलत्विट्, तया भामण्डलत्विषा । ततश्चासौ अनलश्च ततानलः, ततानलवत्(लेन) समाना ततानलसमाना, तया ततानलसमानया । न अलसः अनलसः, अनलसश्चासौ मानश्च अनलसमानः, ततोऽनलसमानो यस्याः सा ततानलसमाना, तया ततानलसमानया । इति द्वितीयवृत्तार्थः ॥ ५८ ॥

१. मण्डलशब्दस्य पुंल्लिगे प्रयोगो विचारणीयः ।

(४)

दे० व्या०—जीयादिति । स 'जिनौघः' जिनानामोघः-समूहः जीयाद्-जयतादित्यन्वयः । 'जि जये' धातुः । 'जीयात्' इति क्रियापदम् । कः कर्ता ? । 'जिनौघः' । किंविशिष्टो जिनौघः ? । यत्त-दोर्नित्याभिसम्बन्धाद् यो जिनौघः भामण्डलत्विषा ध्वान्तान्तं ततान इति सम्बन्धः । 'तनु विस्तारे' धातुः । 'ततान' इति क्रियापदम् । कः कर्ता ? । 'यः' । कं कर्मतापन्नम् ? । 'ध्वान्तान्तं' अज्ञानमन्धकारं वा तस्य अन्तं-नाशम् । "ध्वान्तं भूच्छायान्धकारम्" इत्यभिधानचिन्तामणिः (का० २, श्लो० ६०) । कया ? । 'भामण्डलत्विषा' । (किंविशिष्टया ?) । लसमानया-विलसन्त्या । पुनः किंविशिष्टया ? । 'ततानलसमानया' ततो-विस्तारं प्राप्तः यः अनलः-वह्निः तेन समानया-सदृश्या । इति द्वितीयवृत्तार्थः ॥ ५८ ॥

(५)

ध० टीका—जीयादिति । 'जीयात्' जयतात् । 'जिनौघः' जिनसमूहः । 'ध्वान्तान्तं' तमोविनाशम् । 'ततान' विस्तारितवान् । 'लसमानया' विलसन्त्या । 'भामण्डलश्रिया(त्विषा)' प्रभावलयसम्पदा । 'यः' । 'सः' । 'ततानलसमानया' ततः-प्रसृतो योऽनलः-शिखी तेन समानया-सदृश्या । स जिनौघो जीयाद् भामण्डलश्रिया(त्विषा) ध्वान्तान्तं यस्ततानेति योगः ॥ ५८ ॥

(६)

अवचूरिः

स जिनौघो जीयात् । भामण्डलकान्त्या यो ध्वान्तध्वंसं ततान-अकृत । किंभूतया ? । ततो-विपुलो योऽनलो-वह्निस्तत्सदृश्या लसमानया-वर्धमानया ॥ ५८ ॥

भारत्याः संकीर्तना—

भारति ! द्राग् जिनेन्द्राणां, नवनौरक्षतारिके ।
संसाराम्भोनिधावस्मा-नवनौ रक्ष तारिके ! ॥ ३ ॥ ५९ ॥

- अनु०

(१)

ज० वि०—भारतीति ! हे जिनेन्द्राणां भारति !-तीर्थकृतां वाणि ! हे तारिके-निर्वाहिके ! त्वं अस्मान्-

नः अवनौ-भुवि द्राक्-शीघ्रं रक्ष-त्रायस्वेति क्रियाकारकसम्बन्धः । अत्र 'रक्ष' इति क्रियापदम् । का कर्त्री ? 'त्वम्' । कान् कर्मतापन्नान् ? 'अस्मान्' । कथम् ? 'द्राक्' । कस्याम् ? 'अवनौ' । त्वं कथंभूता ? 'नवनौः' नवा-प्रत्यग्रा नौः-नाविका । कस्मिन् ? 'संसाराम्भोधौ' भवसागरे । कथंभूते संसाराम्भोनिधौ ? 'अक्षतारिके' अक्षता-अनुपहता ये अरयः-शत्रवः तद्रूपं कं-जलं यस्मिन् स तथा तस्मिन् । संसारो ह्यम्भोनिधेरुपमया वर्णितः, तत्र तु जलं भवति तेनात्र अक्षताररूपं जलमस्तीति तात्पर्यम् । इदं विशेषणं सम्बोधनत्वेन व्याख्येयम् ॥

अथ समासः—जिनानां जिनेषु वा इन्द्रा जिनेन्द्राः 'तत्पुरुषः' । तेषां जिनेन्द्राणाम् । नवा चासौ नौश्च नवनौः 'कर्मधारयः' । न क्षता अक्षताः 'तत्पुरुषः' । अक्षताश्च तेऽरयश्च अक्षतारयः 'कर्मधारयः' । अक्षतारय एव कं यस्मिन् सोऽक्षतारिकः 'बहुव्रीहिः' । तस्मिन् अक्षतारिके । अम्भसां निधिः अम्भोनिधिः 'तत्पुरुषः' । [अम्भोनिधिरिवाम्भोनिधिः ।] संसारश्चासावम्भोनिधिश्च संसाराम्भोनिधिः 'कर्मधारयः' । तस्मिन् संसा० ॥ इति काव्यार्थः ॥ ५९ ॥

(२)

सि० वृ०—भारतीति । जिनेन्द्राणां भारति !-तीर्थकृतां वाणि ! हे तारिके-निर्वाहिके । त्वं अस्मान्-नः अवनौ-भुवि द्राक्-शीघ्रं रक्ष-त्रायस्वेत्यर्थः । 'रक्ष रक्षणे' धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि परस्मैपदे मध्यमपुरुषैकवचनं हिः । 'अप्०' (सा० सू० ६९१), 'अतः' (सा० सू० ७०५) इति हेर्लुक् । अत्र 'रक्ष' इति क्रियापदम् । का कर्त्री ? । 'त्वम्' । कान् कर्मतापन्नान् ? । 'अस्मान्' । कथम् ? । 'द्राक्' । कस्याम् ? । 'अवनौ' । कथंभूता त्वम् ? । 'नवनौः' नवा-प्रत्यग्रा चासौ नौश्च नवनौः इति 'कर्मधारयः' । "स्त्रियां नौस्तरणिस्तरिः" इत्यमरः (श्लो० ४८७) । कस्मिन् ? । 'संसाराम्भोनिधौ' संसरणं संसारः स एव अम्भो निधीयतेऽस्मिन् इत्यम्भोनिधिः-समुद्रस्तस्मिन् । 'कर्मण्यधिकरणे च' (पा० अ० ३, पा ३, सू० ९३) इति किः । कथंभूते संसाराम्भोनिधौ ? । 'अक्षतारिके' अक्षता-अनुपहता ये अरयः-शत्रवः त एव कं-जलं यस्मिन् स तस्मिन् ॥ ५९ ॥

(३)

सौ० वृ०—भारतीति । हे भारति !-जिनेन्द्राणां वाणि ! हे तारिके ! द्राक्-शीघ्रं अवनौ-पृथिव्यां अस्मान् रक्षेत्यन्वयः । 'रक्ष' इति क्रियापदम् । का कर्त्री ? । 'त्वम्' । 'रक्ष' अव । कान् कर्मतापन्नान् ? । 'अस्मान्' । कथम् ? । 'द्राक्' शीघ्रम् । कस्याम् ? । 'अवनौ' पृथिव्याम् । किंविशिष्टा त्वम् ? । नवा-नूतना नौरिव नौः-तरणिः 'नवनौः' । कस्मिन् ? । संसारः-चतुर्गतिभ्रमणलक्षणः स एवाम्भोनिधिः-समुद्रस्तस्मिन् (संसाराम्भोनिधौ । कथंभूते संसा० ? अक्षता-अनुपहता अरयः-शत्रवस्त

एव कं-जलं यस्मिन् सः) अक्षतारिकस्तस्मिन् अक्षतारिके । यद्वा नवनौरिति भारत्या आमन्त्रणम् । इति पदार्थः ॥

अथ समासः—जिनानां इन्द्रा जिनेन्द्राः, तेषां जिनेन्द्राणाम् । नवा नौरिव नौर्नवनौः । न क्षता अक्षताः, अक्षताश्च ते अरयश्च अक्षतारयः, अक्षतारय एव कं-जलं यस्मिन् सः अक्षतारिकः, तस्मिन् अक्षतारिके । संसरणं संसारः, अम्भांसि निधीयन्ते अस्मिन्निति अम्भोनिधिः, संसार एव अम्भोनिधिः संसाराम्भोनिधिः, तस्मिन् संसाराम्भोनिधौ । तारा एव तारिका तस्याः सं० हे तारिके !-निर्मले ! त्वं प्रधाना (?) । इति तृतीयवृत्तार्थः ॥ ५९ ॥

(४)

दे० व्या०—भारतीति । हे जिनेन्द्राणां भारति ! त्वं अवनौ-पृथिव्यां अस्मान् अव-रक्ष-पालयेत्यन्वयः । 'रक्ष रक्षणे' धातुः । 'रक्ष' इति क्रियापदम् । का कर्त्री ? । 'त्वम्' । कान् कर्मतापन्नान् ? । 'अस्मान्' । कस्याम् ? । 'अवनौ' । कथम् ? । 'द्राक्'-शीघ्रं यथा स्यात् तथेति क्रियाविशेषणम् । किंविशिष्टा त्वम् ? । 'नवनौः' नवा-नूतना नौः-नौका । भारत्याः संबोधनपदं वा । कस्मिन् ? । 'संसाराम्भोनिधौ' । (किंविशिष्टे ? ।) 'अक्षतारिके' अक्षता-अनुपहता ये अरयः-शत्रवः त एव कं-जलं यत्र स तस्मिन् । "कं शिरो जलमाख्यातम्" इत्यनेकार्थः । 'तारिके !' इति । तारयतीति तारिका, तस्याः सम्बोधनं हे तारिके ! इदमपि भारत्या एव सम्बोधनपदम् । इति तृतीयवृत्तार्थः ॥ ५९ ॥

(५)

ध० टीका—भारतीति ! 'भारति !' वाणि ! । 'द्राक्' शीघ्रम् । 'जिनेन्द्राणां' वीतरागाणाम् । 'नवनौः' नूतना द्रोणी । 'अक्षतारिके' अक्षतं-अनुपहतं अरय एव-शत्रव एव कं-सलिलं यत्र तस्मिन् । 'संसाराम्भोनिधौ' भवोदधौ । 'अस्मान्' नः । 'अवनौ' पृथिव्याम् । 'रक्ष' त्रायस्व । 'तारिके !' निर्वाहिके ! । जिनेन्द्राणां भारति ! संसाराम्भोनिधौ तारिके ! नवनौः ! द्राक् अस्मान् रक्षेति सम्बन्धः ॥ ५९ ॥

(६)

अवचूरिः

हे जिनवराणां वाणि ! अस्मानवनौ-पृथिव्यां रक्ष । किंविशिष्टा ? । नवा-प्रत्यग्रा नौः-मङ्गिनी संबोधनं वा । कस्मिन् ? । संसाराम्भोनिधौ-भवसागरे । अक्षता-अनुपहता अरयः-शत्रवः कं-जलं यत्र । हे तारिके !-निर्वाहिके ! ॥ ५९ ॥

श्रीप्रज्ञप्तिदेव्याः स्तुतिः—

केकिस्था वः क्रियाच्छक्ति-करा लाभानयाचिता ।
प्रज्ञप्तिर्नूतनाम्भोज-करालाभा[1] नयाचिता ।। ४ ।। ६० ।।

- अनु०

(१)

ज० वि०—केकिस्थेति । प्रज्ञप्तिः-प्रज्ञप्तिनाम्नी देवी वः-युष्माकं लाभान्-अभीष्टार्थागमान् क्रियाद्-विधेयादिति क्रियाकारकसंयोगः । अत्र 'क्रियात्' इति क्रियापदम् । का कर्त्री ? 'प्रज्ञप्तिः' । कान् कर्मतापन्नान् ? 'लाभान्' । केषाम् ? 'वः' । प्रज्ञप्तिः कथंभूता ? 'केकिस्था' मयूरे स्थिता, मयूर-वाहनेत्यर्थः । पुनः कथं० ? 'शक्तिकरा' शक्तिः-प्रहरणविशेषः करे-हस्ते यस्याः सा तथा । यद्वा शक्तौ करो यस्याः सा तथा । पुनः कथं० ? 'अयाचिता' अप्रार्थिता, कस्यापि पुरतोऽयाचनेत्यर्थः । पुनः कथं० ? 'नूतनाम्भोजकरालाभा' नूतनं-नवीनं यदम्भोजं-कमलं तद्वत् कराला-अत्युल्बणा भा-दीप्तिर्यस्याः सा तथा । पुनः कथं० ? 'नयाचिता' नयेन-नीत्या आ-समन्तात् चिता-व्याप्ता ।।

अथ समासः—केकिनि तिष्ठतीति केकिस्था 'तत्पुरुषः' । शक्तिः करे यस्याः सा शक्तिकरा 'बहुव्रीहिः' । यद्वा शक्तौ करो यस्याः सा शक्तिकरा 'बहुव्रीहिः' । न विद्यते याचितं यस्याः सा अयाचिता 'बहुव्रीहिः' । नूतनं च तदम्भोजं च नूतनाम्भोजं 'कर्मधारयः' । नूतनाम्भोजवत् कराला नूत० 'तत्पुरुषः' । नूतनाम्भोजकराला आभा यस्याः सा नूत० 'बहुव्रीहिः' । नयेनाचिता नयाचिता 'तत्पुरुषः' इति काव्यार्थः ।। ६० ।।

।। इति श्रीशोभनस्तुतिवृत्तौ श्रीधर्मनाम्नो जिनस्य स्तुतेर्व्याख्या ।। ४ । १५ । ६० ।।

(२)

सि० वृ०—केकिस्थेति । प्रज्ञप्तिः-प्रज्ञप्तिनाम्नी देवी वो-युष्माकं लाभान्-वाञ्छितार्थान् क्रियाद्-विधेयादित्यर्थः । 'डुकृञ् करणे' धातोः आशिषि परस्मैपदे प्रथमपुरुषैकवचनं यात् । 'यादादौ' (सा० सू० ८१४) इति रिङादेशः । तथा च 'क्रियात्' इति सिद्धम् । अत्र 'क्रियात्' इति क्रियापदम् । का कर्त्री ? । 'प्रज्ञप्तिः' प्रकृष्टा ज्ञप्तिः-बुद्धिरस्याः (सा) प्रज्ञप्तिः, क्तिच् । न च प्रज्ञप्ती तिङ्यन्तो नदीवदिति ज्ञेयम् । कथंभूता प्रज्ञप्तिः ? । 'केकिस्था' केकिनि-मयूरे तिष्ठतीति केकिस्था, मयूरवाहिनीत्यर्थः । तस्यास्तद्वाहनत्वादिति भावः । पुनः कथंभूता ? । 'शक्तिकरा' शक्तिः-प्रहरणविशेषः करे-हस्ते यस्याः सा तथा। "शक्तिरस्त्रान्तरे गौर्या-मुत्साहादौ बले स्त्रियाम्" इति मेदिनी । पुनः कथंभूता ? ।

१. 'राऽलाभा' इत्यपि पाठः ।

'नूतनाम्भोजकरालाभा' नूतनं-नवीनं यदम्भोजं-कमलं तद्वत् कराला-अत्युल्बणा भा दीप्तिर्यस्याः सा तथा । पुनः कथंभूता ? । 'अयाचिता' न विद्यते याचितं यस्याः सा अयाचिता । पुनः कथंभूता ? । 'नयाचिता' नयेन-नीत्या आ-समन्तात् चिता-व्याप्ता ।। अनुष्टुप्छन्दः । तल्लक्षणं चेदम्—

"श्लोके षष्ठं गुरु ज्ञेयं, सर्वत्र लघु पञ्चमम् ।
द्विचतुःपादयोर्हस्व-मेतच्छ्लोकस्य लक्षणम् ।।"

।। इति श्रीमहामहोपाध्यायभानुचन्द्र० श्रीधर्मनाथस्य स्तुतिवृत्तिः ।। ४ । १५ । ६० ।।

(३)

सौ० वृ०—केकिस्थेति । प्रज्ञप्तिर्देवी वो-युष्माकं लाभान्-वाञ्छितार्थान् क्रियादित्यन्वयः । 'क्रियात्' इति क्रियापदम् । का कर्त्री ? । 'प्रज्ञप्तिः' । 'क्रियात्' कुर्यात् । कान् कर्मतापन्नान् । 'लाभान्' बोधिलाभलक्षणान् । केषाम् ? । 'वः' युष्माकम् । किंविशिष्टा प्रज्ञप्तिः ? । 'अयाचिता' अप्रार्थिता । पुनः किंविशिष्टा ? । केकी-मयूरस्तत्र तिष्ठतीति 'केकिस्था' । पुनः किंविशिष्टा ? । शक्तिः-शस्त्रविशेषः सा करे यस्याः सा 'शक्तिकरा' । पुनः किंविशिष्टा प्रज्ञप्तिः ? । नूतनं-नवीनं यदम्भोजं-कमलं तद्वत् कराला-उग्रा दीप्ता वा कान्तिर्यस्याः सा, अलाभा इत्यप्यर्थः । पुनः किंविशिष्टा प्रज्ञप्तिः ? । नयैः-व्यवहारादिभिरा-समन्तात् चिता-व्याप्ता 'नयाचिता' । इति पदार्थः ।।

अथ समासः—केकावागस्यास्तीति केकी, केकिनि तिष्ठतीति केकिस्था । शक्तिः करे यस्याः सा शक्तिकरा । लभ्यन्ते प्राप्यन्ते इति लाभास्तान् लाभान् । न याचिता अयाचिता । प्रकृष्टा ज्ञप्तिर्यस्याः सा प्रज्ञप्तिः । अम्भसि जायते तदम्भोजं, नूतनं च तदम्भोजं च नूतनाम्भोजं, नूतनाम्भोजं करे यस्याः सा नूतनाम्भोजकरा । नयैः आ-समन्तात् आत्मधिया वा चिता-व्याप्ता नयाचिता । इति चतुर्थवृत्तार्थः ।। ६० ।।

श्रीमद्धर्मजिनेन्द्रस्य, स्तुतेरर्थो लिवीकृतः ।
सौभाग्यसागराख्येण, सूरिणा सौख्यकारिणा ।। १ ।।

।। इति पञ्चदशधर्मजिनस्य स्तुतेरर्थः समाप्तः ।। ४ । १५ । ६० ।।

(४)

दे० व्या०—केकिस्थेति । प्रज्ञप्तिनाम्नीदेवी वो-युष्माकं लाभान्-वाञ्छितार्थान् क्रियात्-कुर्यादित्यन्वयः । 'डुकृञ् करणे' धातुः । 'क्रियात्' इति क्रियापदम् । का कर्त्री ? । 'प्रज्ञप्तिः' । कान् कर्मतापन्नान् ? । 'लाभान्' । केषाम् ? । 'वः' । किंविशिष्टा प्रज्ञप्तिः ? । 'अयाचिता' न याचितं यस्याः सा तथा, सर्वेषां प्रार्थितार्थपूरकत्वेन स्वस्या अयाचकत्वात् । पुनः किंविशिष्टा ? । 'शक्तिकरा' शक्तिः-

शस्त्रविशेषः करे-हस्ते यस्याः सा तथा । पुनः किंविशिष्टा ? । 'केकिस्था' केकिनि-मयूरे तिष्ठतीति केकिस्था, केकिवाहनत्वात् । पुनः किंविशिष्टा ? । 'नूतनाम्भोजकरालाभा' नूतनं-प्रत्यग्रं यद् अम्भोजं-कमलं तद्वत् कराला-उत्कटा भा-कान्तिः यस्याः सा तथा। पुनः किंविशिष्टा ? । 'नयाचिता' नयो-नीतिपन्थाः तेन आ-समन्तात् चिता-व्याप्ता । इति तुरीयवृत्तार्थः ॥ ४ । १५ । ६० ॥

(५)

ध० टीका—केकिस्थेति । 'केकिस्था' मयूरस्थिता । 'वः' युष्माकम् । 'क्रियात्' विधेयात् । 'शक्तिकरा' शक्तिः-आयुधविशेषस्तत्र करो यस्याः सा । 'लाभान्' अभीष्टार्थागमान् । 'अयाचिता' अप्रार्थिता । 'प्रज्ञप्तिः' प्रज्ञप्ती देवी । 'नूतनाम्भोजकरालाभा' नूतनं यदम्भोजं तद्वत् कराला-अत्युल्बणा आभा-दीप्तिर्यस्याः सा । 'नयाचिता' नीतियुक्ता ॥ ४ । १५ । ६० ॥

(६)

अवचूरिः

प्रज्ञप्तिर्देवी वो-युष्माकमयाचिता-अप्रार्थिता लाभान् दद्यात् । किंभूता ? । केकिनि-मयूरे तिष्ठतीति केकिस्था । शक्तिः-प्रहरणविशेषः करे यस्याः । नवकमलवत् कराला-अत्युल्बणा भा यस्याः सा । नयेन-नीत्या आचिता-व्याप्ता ॥ ४ । १५ । ६० ॥

१६. श्रीशान्तिजिनस्तुतयः

अथ श्रीशान्तिनाथस्य स्तुतिः—

राजन्त्या नवपद्मरागरुचिरैः पादैर्जिताष्टापदा—
द्रेऽकोप ! द्रुतजातरूपविभया तन्वाऽऽर्य ! धीर ! क्षमाम् ।
बिभ्रत्याऽमरसेव्यया जिनपते ! श्रीशान्तिनाथास्मरो—
द्रेकोपद्रुत ! जातरूप ! विभयातन्वार्यधी ! रक्ष माम् ॥ १ ॥ ६१ ॥

- शार्दूल०

(१)

ज० वि०—राजन्त्येति । हे श्रीशान्तिनाथ ! श्रियोपलक्षितशान्तिनाथ ! श्रीशान्तिनाथ जिन ! त्वं मां रक्ष-त्रायस्वेति क्रियाकारकसम्बन्धः । अत्र 'रक्ष' इति क्रियापदम् । कः कर्ता ? 'त्वम्' । कं कर्मतापन्नम् ? 'माम्' । अवशिष्टानि श्रीशान्तिनाथस्य सम्बोधनानि, तेषां व्याख्या यथा-हे 'जिताष्टापदाद्रे !' जितः-तुलितोऽष्टापदाद्रिः-कनकशैलो येन स तथा, तत्सम्बो० हे जिता० । कया ? 'तन्वा' मूर्त्या करणभूतया । किं कुर्वन्त्या तन्वा ? 'राजन्त्या' विराजमानया । कैः कृत्वा 'पादैः' अङ्घ्रिभिः । कथंभूतैः पादैः ? 'नवपद्मरागरुचिरैः' नवस्य पद्मस्य यो रागः-रक्तिमा तद्वद् रुचिरैः-चारुभिः । पुनः किं कुर्वन्त्या तन्वा ? 'बिभ्रत्या' दधत्या । कां कर्मतापन्नाम् ? 'क्षमां' क्षान्तिम् । कथंभूतया तन्वा ? 'द्रुतजातरूपविभया' द्रुतम्-उत्तप्तं यत् जातरूपं-कनकं तद्वद् विभा-प्रभा यस्याः सा तया । पुनः कथं०

'अमरसेव्यया' अमरैः-देवैः सेव्यया-सेवनीयया । तन्वा जिताष्टापदाद्रे ! इत्यनेन तनुमेर्वोः साधर्म्यमूचे, तेन तनुविशेषणानि मेरोरपि मिलन्ति । तथाहि-मेरुरपि नवपद्मरागरुचिरैः नवाः-प्रत्यग्रा ये पद्मरागा-लोहिताख्या मणिविशेषास्तै रुचिरैः-चारुभिः पादैः-प्रत्यन्तपर्वतै राजमानो भवति, तथा क्षमां-पृथिवीं च बिभ्रद् भवति, तथा अमरसेव्योऽपि भवति, तथा द्रुतजातरूपविभोऽपि च स्यादिति । हे 'अकोप !' कोपरहित ! । हे 'आर्य !' स्वामिन् ! । हे 'धीर !' धैर्ययुक्त ! यद्वा हे 'धीर !' मेधाविन् ! । हे 'जिनपते !' जिनेन्द्र ! । हे 'अस्मरोद्रेकोपद्रुत !' स्मरस्य-कन्दर्पस्य उद्रेकः-वेगः तेनोपद्रुतः-खलीकृतः, न स्मरोद्रेकोपद्रुतस्तस्यामन्त्रणं हे अस्मरोद्रेकोपद्रुत ! । हे 'जातरूप !' प्रादुर्भूतसौन्दर्य ! । हे 'विभय !' विगतत्रास ! । हे 'अतन्वार्यधीः !' अतनुः-अकृशा आर्या-प्रशस्या धीः-बुद्धिर्यस्य स तथा, तत्संबो० हे अतन्वार्यधीः । इदं प्रथमान्तविशेषणमपि ॥

अथ समासः—नवं च तत् पद्मं च नवपद्मं 'कर्मधारयः' । नवपद्मस्य रागो नवपद्मरागः 'तत्पुरुषः' । नवपद्मरागवद् रुचिरा नव० 'तत्पुरुषः' । तैर्नवपद्म० । मेरुपक्षे तु नवाश्च ते पद्मरागाश्च नव० 'कर्मधारयः' । नवपद्मरागैः रुचिरा नव० 'तत्पुरुषः' । तैर्नव० । अष्टापदस्याद्रिः अष्टापदाद्रिः 'तत्पुरुषः' । जितोऽष्टापदाद्रिर्येन स जिताष्टा० 'बहुव्रीहिः' । तत्सम्बो० हे जिताष्टा० । न विद्यते कोपो यस्य सः अकोपः 'बहुव्रीहिः' । द्रुतं च तद् जातरूपं च द्रुतजात० 'कर्मधारयः' । द्रुतजातरूपस्येव विभा यस्याः सा द्रुतजा० 'बहुव्रीहिः' । तया द्रुतजा० । अमरैः सेव्या अमरसेव्या 'तत्पुरुषः' । तया अमरसेव्यया । जिनानां पतिः जिनपतिः 'तत्पुरुषः' । तत्सम्बो० हे जिनपते ! । शान्तिश्चासौ नाथश्च शान्तिनाथः 'कर्मधारयः' । श्रियोपलक्षितः शान्तिनाथः श्रीशान्ति० 'तत्पुरुषः' । तत्सम्बो० हे श्रीशान्ति० । स्मरस्योद्रेकः स्मरोद्रेकः 'तत्पुरुषः' । स्मरोद्रेकेणोपद्रुतः स्मरोद्रे० 'तत्पुरुषः' । न स्मरोद्रेकोपद्रुतोऽस्मरोद्रे० तत्पुरुषः । तत्सम्बो० हे अस्मरो० । जातं रूपं यस्मिन् स जातरूपः 'बहुव्रीहिः' । तत्सम्बो० हे जातरूप० । विगतं भयं यस्मात् स विभयः 'बहुव्रीहिः' । तत्सम्बो० हे विभय ! । न तनुः अतनुः 'तत्पुरुषः' । अतनुश्चासौ आर्या च अतन्वार्या 'कर्मधारयः' । अतन्वार्या धीर्यस्य सः अतन्वार्यधीः 'बहुव्रीहिः' । तत्सम्बो० हे अत० ॥ इति काव्यार्थः ॥ ६१ ॥

(२)

सि० वृ०—राजन्त्येति । शान्त्यात्मकत्वात् शान्तिकर्तृकत्वाद् वा गर्भस्थेऽस्मिन् पूर्वोत्पन्नाशिवस्य शान्तिर्जातेति वा शान्तिः, स चासौ श्रियोपलक्षितो नाथः श्रीशान्तिनाथः, तस्य संबोधनं हे श्रीशान्तिनाथ ! त्वं मां रक्ष-त्रायस्वेत्यर्थः । 'रक्ष रक्षणे' धातोः 'आशीःप्रेरणयो' (सा० सू० ७०३) कर्तरि परस्मैपदे मध्यमपुरुषैकवचनम् । अत्र 'रक्ष' इति क्रियापदम् । कः कर्ता ? । 'त्वम्' । कं कर्मतापन्नम् ? ।

'माम्' । अवशिष्टानि श्रीशान्तिनाथस्य संबोधनानि, तेषां व्याख्या यथा-हे 'जिताष्टापदाद्रे !' जितः-अवगणितः अष्टापदाद्रिः-कनकशैलो येन स तस्य संबोधनम् ।

"अष्टापदं स्यात् कनके, सारीणां फलकेऽपि च ।
अष्टापदश्च शरभे चन्द्रमल्ल्यां च मर्कटे ॥"

इति विश्वः । कया ? । 'तन्वा'-मूर्त्या करणभूतया । किं कुर्वत्या तन्वा ? । 'राजन्त्या'-विराजमानया । कैः कृत्वा ? । 'पादैः'-चरणैः प्रत्यन्तपर्वतैश्च । "पादा रश्म्यङ्घ्रितुर्यांशाः", "पादाः प्रत्यन्तपर्वताः" इत्यमरः (श्लो० ६४६) । 'नवपद्मरागरुचिरैः' नवं-नवीनं यत् पद्मं-कमलं शोणरत्नं वा, "शोणरत्नं लोहितकं (कः), पद्मरागोऽथ मौक्तिकम्" इत्यमरः (श्लो० १८९१), तस्य रागो-रक्तिमा तद्वद् रुचिरैः-चारुभिः, पादयोः रक्तवर्णत्वादिति भावः । भगवत्पक्षे पादैरित्यत्र बहुवचनं विचारणीयमिव प्रतिभाति । पुनः किं कुर्वत्या तन्वा ? । 'विभ्रत्या'-दधता । काम् ? । 'क्षमां'-शान्तिम् । कथंभूतया तन्वा ? । 'द्रुतजातरूपविभया' द्रुतं-विलीनं यज्जातरूपं-सुवर्णं तद्वद् विभा-प्रभा यस्याः सा तथा तया । "चामीकरं जातरूपं, महारजतकाञ्चने" इत्यमरः (श्लो० १८९६) । पुनः कथंभूतया ? । 'अमरसेव्यया' अमरैः-देवैः सेव्यया-सेवनीयया । तन्वा जिताष्टापदाद्रे ! इत्यनेन तनुमेर्वोः साधर्म्यमूचे, तेन तनुविशेषणानि मेरोरपि संभवन्ति । तथाहि-मेरुरपि 'नवपद्मरागरुचिरैः' नवाः-प्रत्यग्रा ये पद्मरागा-लोहितमणयस्तैः रुचिरैः-चारुभिः पादैः-प्रत्यन्तपर्वतैः राजमानो भवति, तथा क्षमां-पृथिवीं च बिभ्रद् भवति, अमरसेव्योऽपि भवति, तथा द्रुतजातरूपविभोऽपि च स्यात् इति । हे 'अकोप!' नास्ति कोपः-क्रोधो यस्य सः अकोपः, तस्य संबोधनम् । हे आर्य !-स्वामिन् ! अमरस्तु "अर्यः स्वामिवैश्ययोः" (श्लो० २६२८) इत्याह । हे धीर !-धैर्ययुक्त ! यद्वा हे धीर !-मेधाविन् । दधाति धियं इति धीरः । 'डुधाञ् धारणपोषणयोः' 'सुसूधागृधिभ्यः क्रन्' (उणा० सू०), 'घुमास्था०' (पा० अ० ६, पा० ४, सू० ६६) इतीत्वम् । धियं ईरयति प्रेरयति वा । 'ईर गतिप्रेरणयोः' 'कर्मण्यण्' (पा० अ० ३, पा० २, सू० १) । संशयविपर्ययरहिता धियं राति-आदत्त इति वा । 'रा दाने' 'आतोऽनुपसर्गे कः' (पा० अ० ३, पा० २, सू० ३), 'आतो लोपः०' (पा० अ० ६, पा० ४, सू० ६४) इत्यालोपः । हे 'जिनपते !' पाति-रक्षति इति पतिः 'पातेर्डतिः' (उणा० सू०) इति डतिप्रत्ययः । डित्त्वाट्टिलोपः । जिनानां पतिः जिनपतिः, तस्य संबोधनं क्रियते । हे 'अस्मरोद्रेकोपद्रुत !' स्मरस्य-कामस्य उद्रेक-आधिक्यं तेन उपद्रुतः-खलीकृतः, न स्मरोद्रेकोपद्रुतः अस्मरोद्रेकोपद्रुतः, तस्य संबो० । हे 'जातरूप !' जातं-प्रादुर्भूतं रूपं-सौन्दर्यं यस्य स तथा तस्य संबोधनम् । हे 'विभय !' विगतं भयं यस्य यस्माद् वा स तथा तस्य संबोधनं हे विभय ! । हे 'अतन्वार्यधीः !' अतनुः-अकृशा सा चासौ आर्या-प्रशस्या धीः-बुद्धिः यस्य स तथा तस्य संबो० ।

ध्यायतीति धीः 'ध्यै चिन्तायाम्' 'ध्यायतेः (क्विपि) संप्रसारणं (दीर्घता) च वक्तव्या' (सा० सू० १२५५) इति क्विप् संप्रसारणं च ।। ६१ ।।

(३)

सौ० वृ०—यो मूर्तिमान् धर्मो भवति स सर्वप्राणिनां शान्तिकृदेव भवति । अनेन सम्बन्धेनायातस्य षोडशमश्रीशान्तिनाथस्य स्तुतेरर्थो व्याख्यायते-राजन्त्येति । श्रीशब्दः पूज्यार्थे । श्रिया-चतुस्त्रिंशदतिशयलक्ष्म्या युक्त ! हे श्रीशान्तिनाथ ! त्वं मां रक्षेत्यन्वयः 'रक्ष' इति क्रियापदम् । कः कर्ता ? । 'त्वं' भवान् । 'रक्ष' पालय । कं कर्मतापन्नम् ? । 'माम्' । अन्यानि विशेषणानि भगवतः सम्बोधनरूपाणि व्याचक्षते । जितः-निर्जितः अष्टापदं-सुवर्णं तस्य अद्रिः-पर्वतो मेरुर्येन स जिताष्टापदाद्रिः, तस्य सं० हे 'जिताष्टापदाद्रे !' । कया ? । 'तन्वा' मूर्त्या । किंविशिष्टया तन्वा ? । 'राजन्त्या' शोभमानया । कैः कृत्वा ? । 'पादैः' किरणैः । किंविशिष्टैः पादैः ? । नवं-नवीनं यत् पद्मं-कमलं तस्य रागः-रक्तिमा तद्वत् रुचिरा-मनोहरास्तैः 'नवपद्मरागरुचिरैः' । हे 'अकोप !' अक्रोध ! । पुनः किंविशिष्टया तन्वा ? । द्रुतं-उत्तप्तं जातरूपं-सुवर्णं तद्वद् विशिष्टा भा-प्रभा यस्याः सा द्रुतजातरूपविभा तया 'द्रुतजातरूपविभया' । कथंभूतस्त्वम् ? । अतनुः-अकृशा आर्या-प्रधाना धीः-बुद्धिर्यस्य स 'अतन्वार्यधीः' । यद्वा संबोधनमपीदं हे 'अतन्वार्यधीः !' । पुनः किंविशिष्टया तन्वा ? । 'बिभ्रत्या धारयन्त्या । कां कर्मतापन्नाम् ? । 'क्षमां' क्षान्तिम् । पुनः किंविशिष्टया तन्वा ? । अमरा-देवास्तैः सेव्या-सेवनीया अमरसेव्या तया । जिनाः-सामान्यकेवलिनस्तेषां पतिर्जिनपतिः, तस्य सं० हे 'जिनपते !' स्मरः-कामः तस्य उद्रेक-आधिक्यं स नास्ति यस्य सः अस्मरोद्रेकः, तस्य सं० हे 'अस्मरोद्रेक' ! । हे 'उपद्रुत !' उप-समीपे द्रुतं-चारित्रं यस्य (स) उपद्रुतः, तस्य सं० हे उपद्रुत ! । जातं-प्राप्तं रूपं-परमात्मरूपं यस्य येन वा स जातरूपः, तस्य सं० हे 'जातरूप !' । विगतं भयं यस्मात् स विभयः, तस्य सं० हे 'विभय !' । हे 'आर्य !' हे श्रेष्ठ ! । हे 'धीर !' धियं ईरयतीति धीरः, यद्वा धियं-बुद्धिं राति-ददातीति धीरः, यद्वा धिया-बुद्ध्या राजते इति धीरः, तस्य सं० हे धीर ! । त्वं मां रक्ष इति पदार्थः ।।

अथ समासः—राजते सा राजन्ती, तया राजन्त्या । नवानि च तानि पद्मानि च नवपद्मानि, नवपद्मानां रागो नवपद्मरागः, नवपद्मरागवद् रुचिरा नवपद्मरागरुचिराः, तैर्नवपद्मरागरुचिरैः । अष्टापदस्य अद्रिः अष्टापदाद्रिः, जितः अष्टापदाद्रिर्येन स जिताष्टापदाद्रिः, तस्य सं० हे जिताष्टापदाद्रे ! । नास्ति कोपो यस्य सः अकोपः, तस्य सं० हे अकोप ! । द्रुतं च तद् जातरूपं च द्रुतजातरूपं, द्रुतजातरूपवद् विभा यस्याः सा द्रुतजातरूपविभा, तया द्रुतजातरूपविभया । न तनुः अतनुः, आर्या चासौ धीश्च आर्यधीः, अतनुः आर्यधीर्यस्य स अतन्वार्यधीः । बिभर्ति सा बिभ्रती, तया बिभ्रत्या । सेवितुं योग्या सेव्या, अमरैः

सेव्या अमरसेव्या, तया अमरसेव्यया । जिनानां पतिर्जिनपतिः, तस्य सं० हे जिनपते ! । श्रिया युक्तः शान्तिनाथः श्रीशान्तिनाथः, तस्य सं० हे श्रीशान्तिनाथ ! । स्मरस्य उद्रेकः स्मरोद्रेकः, न विद्यते स्मरोद्रेको यस्य सः अस्मरोद्रेकः (तस्य सं० हे अस्म०) । उप द्रुतं-चारित्रं यस्य स उपद्रुतः, तस्य सं० हे उपद्रुत ! । "द्रुतं स्थिरे चरित्रे च, ध्रौव्येऽनेकार्थभस्मनोः" इत्यनेकार्थतिलकः । उप-समीपे जातं रूपं यस्य सः, तस्य सं० हे जातरूप ! । विगतं भयं यस्मात् स विभयः, तस्य सं० हे विभय ! । आरात्-पापाद् रितो-गतः आर्यः, तस्य सं० हे आर्य ! । हे धीर ! । इति प्रथमवृत्तार्थः ।

शार्दूलविक्रीडितच्छन्दसा स्तुतिरियम् । तथा तनुशब्दः स्त्रीलिङ्गे दीर्घोऽप्यस्ति तन्वेति सिद्धम् । तनुमेर्वोः सादृश्यमुक्तमतो मेरुरपि अमरसेव्यो भवति, नवपद्मरागरुचिरैः पदै राजितो भवति, उत्तप्तसुवर्णकान्तिर्भवति इत्युभयोः सादृश्यम् । इति छायार्थः ।। ६१ ।।

(४)

दे० व्या०—राजन्त्येति । हे श्रीशान्तिनाथ ! त्वं मां रक्ष-पालयेत्यन्वयः । 'रक्ष रक्षणे' धातुः । 'रक्ष' इति क्रियापदम् । कः कर्ता ? । 'त्वम्' । कं कर्मतापन्नम् ? । 'माम्' । हे 'जिताष्टापदाद्रे !' जितः-अधरीकृतः अष्टापदाद्रिः येन स तस्यामन्त्रणम् । "स्वर्गिकाञ्चनजो(तो)गिरिः" इत्यभिधानचिन्तामणिः (का० ४, श्लो० ९८) । कया ? । तन्वा-शरीरेण । किं कुर्वत्या तन्वा ? । राजन्त्या-शोभमानया । कैः ? । चरणैः । "पदङ्घ्रिश्चरणोऽस्त्रियाम्" इत्यमरः (श्लो० १२१६) । किंविशिष्टैः पादैः ? । 'नवपद्मराग-रुचिरैः' नवं-नूतनं यत् पद्मं-कमलं तस्य रागो-रक्तिमा, यद्वा नवः-प्रत्यग्रो यः पद्मरागमणिः तद्वद् रुचिरैः-मनोज्ञैः, माञ्जिष्ठवर्णत्वात् । पुनः किं कुर्वत्या तन्वा ? । बिभ्रत्या-धारयन्त्या । काम् ? । 'क्षमां'-तितिक्षाम् । "तितिक्षा सहनं क्षमा" इत्यभिधानचिन्तामणिः (का० ३, श्लो० ५५) । किंविशिष्टया तन्वा ? । 'द्रुतजातरूपविभया' द्रुतं-विलीनं यद् जातरूपं-सुवर्णं तद्वद् विभा-कान्तिः यस्याः सा तया । पुनः किंविशिष्टया ? । 'अमरसेव्यया' अमरा-देवाः तेषां सेवनार्हा सेव्या तया । हे 'अकोप !' न विद्यते कोपः-क्रोधो यस्य स तस्यामन्त्रणम्, ध्वस्तक्रोधत्वात् । हे आर्य !-हे स्वामिन् ! हे 'धीर !' धियं-बुद्धिं राति-दत्ते इति धीरः, यद्वा परीषहाद्यक्षोभ्यत्वेन धीरः स तस्यामन्त्रणम् । हे 'जिनपते !' जिनाः-सामान्यकेवलिनः तेषां पतिः-स्वामी यः स तस्यामन्त्रणं, तीर्थप्रवर्तकत्वात् । हे 'अस्मरोद्रेकोपद्रुत !' स्मरः-कामः तस्य उद्रेकः-आधिक्यं तेन उपद्रुतः-पीडितः न भवति यः स तस्यामन्त्रणम् । हे 'जातरूप !' जातं-प्रादुर्भूतं रूपं-सौन्दर्यं यस्य स तस्यामन्त्रणम्, तीर्थकरनामकर्मोदयात्', हे 'विभय !' विगतं भयं-दरो यस्मात् स तस्यामन्त्रणं, शरीरादपि निःस्पृहत्वात् । हे 'अतन्वार्यधीः ! । अतन्वी-प्रचुरा आर्या-प्रशस्या धीः-बुद्धिर्यस्य स तस्यामन्त्रणं, प्रतिसमयं परहितचिन्तनात् । एतानि सर्वाणि भगवतः सम्बोधनपदानि ।

अत्र भगवत्तनोरष्टापदाद्रिणा श्लेषः । सोऽपि नवपद्ममणिरागरुचिरैः पादैः-मूलप्रदेशैः राजति (ते) द्रुतजातरूपविभवं विभर्ति अमरसेव्यश्च स्यात् ॥ इति प्रथमवृत्तार्थः ॥ ६१ ॥

(५)

ध० टीका—राजन्त्या इति । 'राजन्त्या' भ्राजमानया । 'नवपद्मरागरुचिरैः' नवस्य पद्मस्य यो रागो-रक्तता तद्वत् रुचिरैः-चारुभिः पादैः-अंह्रिभिः । 'जिताष्टापदाद्रे !' जितः-तुलितोऽष्टापदाद्रिः-कनकशैलो येन तस्यामन्त्रणम् । 'अकोप !' क्रोधरहित ! । 'द्रुतजातरूपविभया' द्रुतं-विलीनं यज्जातरूपं-स्वर्णं तद्वत् विभा यस्याः तया । 'तन्वा' मूर्त्या । 'अर्य !' स्वामिन् ! । 'धीर !' धैर्ययुक्त ! । 'क्षमाम्' क्षान्तिम् । 'बिभ्रत्या' दधानया। 'अमरसेव्यया' सुरैः सेवनीयया । 'जिनपते !' जिनेन्द्र ! । 'श्रीशान्तिनाथ !' । 'अस्मरोद्रेकोपद्रुत !' न स्मरोद्रेकेण-मदनावेगेन उपद्रुतः-खलीकृतो यस्तस्यामन्त्रणम् । 'जातरूप !' प्रादुर्भूतसौन्दर्य ! । 'विभय !' विगतत्रास ! । 'अतन्वार्यधीः' अतनुः-अकृशः आर्या-प्रशस्या धीः-बुद्धिर्यस्य तस्यामन्त्रणम् । 'रक्ष मां' त्रायस्व माम् । अत्र भगवत्तनोरष्टापदाद्रिणा श्लेषः, सोऽपि नवपद्मरागरुचिरैः नवारुणमणिरुचिरैः पादैर्मूलप्रदेशे राजति(ते), द्रुतजातरूपविभः-प्रसृतसुवर्णद्युतिः क्षमां-भुवं बिभृर्ति अमरसेव्यश्च । तदेवं तन्वा जिताष्टापदाद्रे ! श्रीशान्तिनाथ ! रक्ष मामिति योगः ॥ ६१ ॥

(६)

अवचूरिः

हे श्रीशान्तिदेव ! मां रक्ष-पालय । जितोऽष्टापदाद्रिः-मेरुर्येन तस्य संबोधनम् । कया ? । तन्वा-शरीरेण । किंभूतया ? । पादैः-चरणै राजन्त्या-शोभमानया । किंभूतैः ? । नवपद्मरागो-नूतनकमलरक्तता तद्वद् रुचिरैः-चारुभिः । हे अकोप !-अक्रोध ! । पुनस्तन्वा किंभूतया ? । द्रुतम्-उत्तप्तं यज्जातरूपं-तपनीयं तद्वद् विभा-कान्तिर्यस्यास्तया । हे अर्य !-स्वामिन् ! । हे धीर !-परिषहाद्यक्षोभ्य ! । तन्वा किं कुर्वत्या ? । क्षमां-क्षान्तिं बिभ्रत्या-धारयन्त्या । अमरसेव्यया-देवसेवनीयया । हे अस्मरोद्रेकोपद्रुत !-न कामवेग-पीडित ! । जातं-प्रादुर्भुतं विश्वातिशायि रूपं-सौन्दर्यं यस्य । हे विभय !-गतभय ! । अतनुः-अकृशा आर्या-प्रशस्या धीर्यस्य तस्य संबोधनम् । त्वमित्यस्यानुक्तस्यापि रक्षेति क्रिययोपलब्धस्य विशेषणं वा । अत्र तनोर्मेरुणा श्लेषः, सोऽपि पद्मरागमणिमयैः पादैर्मूले राजते स्वर्णवर्णश्च । क्षमां-भुवं विभर्ति अमरसेव्यश्च स्यात् ॥ ६१ ॥

जिनवराणां विजयः—

ते जीयासुरविद्विषो जिनवृषा मालां दधाना रजो—
राज्या मेदुरपारिजातसुमनःसन्तानकान्तां चिताः ।
कीर्त्या कुन्दसमत्विषेषदपि ये न प्राप्तलोकत्रयी—
राज्या मेदुरपारिजातसुमनःसन्तानकान्ताञ्चिताः ॥ २ ॥ ६२ ॥

- शार्दूल०

(१)

ज० वि०—ते जियासुरिति । ते जिनवृषा-जिनवृषभा जीयासुः-जयन्तु इति क्रियाकारकप्रयोगः । अत्र 'जीयासुः' इति क्रियापदम् । के कर्तारः ? 'जिनवृषाः' । कथंभूता जिनवृषाः ? 'अविद्विषः' गतविद्वेषाः । जिनवृषाः किं कुर्वाणाः ? 'दधानाः' विभ्रतः । कां कर्मतापन्नाम् ? 'मालां' स्रजम् । कथंभूतां मालाम् ? 'रजोराज्या मेदुरपारिजातसुमनःसन्तानकान्ताम्' रजांसि-पुष्परागाः तेषां राज्या-श्रेण्या मेदुराः-पीवराः पारिजातसुमनसः-पारिजातकुसुमानि सन्तानककुसुमानि च तेषां अन्ता-अवयवा यस्याः सा तथा ताम् । जिनवृषाः पुनः कथं० ? 'चिताः' सम्बद्धाः व्याप्ता इति यावत् । कया ? 'कीर्त्या' प्रख्यात्या । कथंभूतया ? 'कुन्दसमत्विषा' कुन्दकुसुमोपमदीप्त्या । त इति तच्छब्दसम्बद्धत्वाद् यच्छब्दघटनामाह-ये जिनवृषाः ईषदपि-मनागपि न मेदुः-न मदं गतवन्तः । अत्रापि 'मेदुः' इति क्रियापदम् । के कर्तारः ? 'ये' । कथम् ? 'न' । नेति निषेधपदम् । कथम् ? 'ईषदपि' । ये कथंभूताः सन्तः ? 'प्राप्तलोकत्रयीराज्याः' लब्धजगत्त्रयैश्वर्याः । पुनः कथं० ? 'अपारिजातसुमनःसन्तानकान्ताञ्चिताः' अपारिजाताः-अपगतवैरिसमूहा ये सुमनःसन्ताना-देवानां समूहाः तेषां कान्ता-मुख्याः शिरःप्रान्ता वा प्रणामप्रान्ताः स्त्रियो वा तैः अञ्चिताः-पूजिताः । अपेर्गम्यमानत्वाद् ये एतादृशाः सन्तोऽपि न मेदुरिति ।

अथ समासः—न विद्यन्ते विद्विषो येषां ते अविद्विषः 'बहुव्रीहिः' । जिनानां जिनेषु वा वृषाः जिनवृषाः 'तत्पुरुषः' । रजसां राजी रजोराजी 'तत्पुरुषः' । तया रजोराज्या । पारिजातस्य सुमनसः पारि० 'तत्पुरुषः' । पारिजातसुमनसश्च सन्तानकानि च पारिजा० 'इतरेतरद्वन्द्वः' । पारिजातसुमनसः-सन्तानकानामन्ताः पारि० 'तत्पुरुषः । मेदुराः पारिजातसुमनःसन्तानकान्ता यस्याः सा मेदुरपा० 'बहुव्रीहिः' । तां मेदु० । कुन्दस्य समा कुन्दसमा 'तत्पुरुषः' । कुन्दसमा त्विट् यस्याः सा कुन्द० 'बहुव्रीहिः' । तया कुन्द० । लोकानां त्रयी लोकत्रयी 'तत्पुरुषः' । लोकत्रय्या राज्यं लोक० 'तत्पुरुषः'। प्राप्तं लोकत्रयीराज्यं यैस्ते प्राप्तलो० 'बहुव्रीहिः' । अरीणां जातं अरिजातं 'तत्पुरुषः' । अपगतं अरिजातं येभ्यस्ते अपारिजाताः 'बहुव्रीहिः' । सुमनसां सन्तानाः सुमनःसन्तानाः 'तत्पुरुषः' । अपारिजाताश्च

ते सुमनःसन्तानाश्च अपारि० 'बहुव्रीहिः' । अपारिजातसुमनःसन्तानानां कान्ताः अपारि० 'तत्पुरुषः'। अपारिजातसुमनःसन्तानकान्तैरञ्चिता अपारि० 'तत्पुरुषः' । शिरःप्रान्तपक्षे कानामन्ताः कान्ता इति समस्यते । स्त्रीपक्षे च कान्ताभिरिति स्त्रीनिर्देशेन समस्यते । इति काव्यार्थः ॥ ६२ ॥

(२)

सि० वृ०—ते जीयासुरिति । ते जिनवृषा-जिनवृषभा जीयासुः-जयन्तु इत्यर्थः । 'जि जये' धातोराशिषि कर्तरि परस्मैपदे प्रथमपुरुषबहुवचनं यासुस् । 'ये' (सा० सू० ७७९) इति दीर्घः । स्रोर्विसर्गः (सा० सू० १२४) । तथा च 'जीयासुः' इति सिद्धम् । अत्र 'जीयासुः' इति क्रियापदम् । के कर्तारः ? । 'जिनवृषाः' जिनानां जिनेषु वा वृषाः-श्रेष्ठाः जिनवृषा इत्यर्थः ।

"वृषः स्याद् वासके धर्मः, सौरभेये च शुक्रले ।
पुंराशिभेदयोः शृङ्ग्या, मूषकश्रेष्ठयोरपि ॥"

इति विश्वः । कथंभूता जिनवृषाः ? । 'अविद्विषः' न सन्ति विद्विषो येषां ते अविद्विषः । जिनवृषा किं कुर्वाणाः ? । 'दधानाः'-बिभ्रतः । काम् ? । 'मालां'-स्रजम् । कथंभूतां मालाम् ? । 'रजोराज्या मेदुर-पारिजातसुमनःसन्तानकान्तां' रजसां-पुष्परागाणां राजिः-श्रेणिः तया मेदुराः-पीवरा ये पारिजातसुमनःसन्तानाः पारिजातस्य-कल्पवृक्षस्य सुमनःसन्तानाः-पुष्पसमूहाः तैः कान्तं-मनोहरम् । अन्ये तु पारिजातस्य कुसुमानि सन्तानकानि सन्तानककुसुमानि च तेषामन्ताः-अवयवा यस्यामिति व्याख्यान्ति । पुनः कथंभता जिनवृषाः ? । चिता-व्याप्ताः । कया ? । 'कीर्त्या' । कथंभूतया ? । 'कुन्दसमत्विषा' कुन्दः-पुष्पविशेषः तेन समाना त्विट्-प्रभा यस्याः सा तथा तया । ते इति ते के इत्याह-ये जिनवृषा ईषदपि-मनागपि न मेदुः-न मदं गतवन्त इत्यर्थः । 'मदी हर्षे' इति धातोः कर्तरि परस्मैपदे परोक्षे प्रथमपुरुषबहुवचनं उस् । 'द्विश्च' (सा० सू० ७१०) इति धातोर्द्वित्वम् । 'णादिः कित्' (सा० सू० ७०९) इत्यनेन कित्त्वम् । 'लोपः पचा कित्ये चास्य' (सा० सू० ७६२) इत्यनेन पूर्वस्य लोपः, अकारस्य चैकहसस्य एकारः । तथा च 'मेदुः' इति सिद्धम् । अत्र 'न मेदुः' इति क्रियापदम् । के कर्तारः ? । 'ये' । कथम् ? । न । 'न' इति निषेधपदम् । कथम् ? । ईषदपि । कथंभूता ये ? । 'प्राप्तलोकत्रयीराज्याः' प्राप्तं-लब्धं लोकत्रय्याः लोकानां त्रयी तस्याः राज्यं-ऐश्वर्यं यैस्ते तथा । पुनः कथंभूताः ? । 'अपारिजातसुमनःसन्तानकान्ताञ्चिताः' अपारिजाताः-अपगतवैरिसमूहा ये सुमनःसन्ताना-देवसमूहाः तेषां कानां अन्ताः कान्ताः-शिरःप्रान्ताः कान्ताः-स्त्रियो वा ताभिश्च अञ्चिताः-पूजिताः । अपेर्गम्य-मानत्वाद् ये एतादृशाः सन्तोऽपि न मेदुरिति भावः ॥ ६२ ॥

(३)

सौ० वृ०—ते जीयासुरिति । ते जिनवृषाः-तीर्थकरश्रेष्ठाः जीयासुरित्यन्वयः । 'जीयासुः' इति क्रियापदम् । के कर्तारः ? । 'जिनवृषाः' । 'जीयासुः' जयन्तु । किंविशिष्टा जिनवृषाः ? । 'ते' प्रसिद्धाः । प्रक्रान्तप्रसिद्धार्थस्तच्छब्दो यच्छब्दमपेक्षते । ते के जिनाः ? । प्राप्तलोकत्रयीराज्या अपि ईषद् न मेदुरित्यन्वयः । 'मेदुः' इति क्रियापदम् । ये जिनाः न मेदुः-मदं न प्रापुः । कथम् ? । 'ईषद्' स्तोकमात्रमपि । किंविशिष्टा जिनवृषाः ? । 'प्राप्तलोकत्रयीराज्या अपि' सम्प्राप्तत्रिभुवनसाम्राज्या अपि । पुनः किंविशिष्टा जिनवृषाः ? । 'अविद्विषः' गतशत्रवः । पुनर्जिनवृषाः किं कुर्वाणाः ? । 'दधानाः' धार्यमाणाः । कां कर्मतापन्नाम् ? । 'मालां' कुसुमस्रजम् । किंविशिष्टां मालाम् ? । रजः-परागः तस्य राजिः-श्रेणिः रजोराजिस्तया रजोराज्या कृत्वा मेदुराः-पुष्टाः पारिजाताः-कल्पवृक्षास्तेषां सुमनसः-पुष्पाणि तेषां सन्तानाः-समूहास्तैः कृत्वा कान्ताः-मनोज्ञाः [अन्ता-मध्यभागा यस्याः सा] मेदुरपारिजातसुमनःसन्तानकान्ता तां 'मेदुरपारिजातसुमनःसन्तानकान्ताम्' । [पुनः किंविशिष्टा जिनवृषाः ? । 'पीनाः' पुष्टाः ।] कया ? । 'कीर्त्या' यशसा । किंविशिष्टया कीर्त्या ? । मुचकुन्दपुष्पाणि तैः समा-सदृशी त्विट्-कान्तिर्यस्याः सा कुन्दसमत्विट् तया 'कुन्दसमत्विषा' । पुनः किंविशिष्टा जिनवृषाः ? । अपगतमरीणां-शत्रूणां जातं-समूहो येभ्यस्ते तादृशाः सुमनसो-विबुधाः पण्डिता वा तेषां सन्तानाः-समुदायास्तेषां कान्ताः-स्वामिनस्तैरञ्चिताः-पूजिता 'अपारिजातसुमनःसन्तानकान्ताञ्चिताः' । इति पदार्थः ॥

अथ समासः—विशेषेण द्विषन्तीति विद्विषः, न सन्ति विद्विषो येषां ते अविद्विषः । जिनेषु वृषाः जिनवृषाः । "वृषो धर्मे पशौ दासे, श्रेष्ठे शब्दे स्थितेतरे" इत्यनेकार्थसंग्रहः । रजसां राजिः रजोराजिः, तया रजोराज्या । मेदुरश्चासौ पारिजातश्च मेदुरपारिजातः, मेदुरपारिजातस्य सुमनांसि मेदुरपारिजात-सुमनांसि, मेदुरपारिजातसुमनांसि च सन्तानाश्च मेदुरपारिजातसुमनःसन्तानाः, मेदुरपारिजात-सुमनःसन्तानैः कान्ता मेदुरपारिजातसुमनःसन्तानकान्ता, (ताम्) । कुन्दस्य समा कुन्दसमा, कुन्दसमा त्विट् यस्याः सा कुन्दसमत्विट्, तया कुन्दसमत्विषा । लोकानां त्रयी लोकत्रयी, लोकत्रय्या राज्यं (लोकत्रयीराज्यं), लोकत्रयीराज्यं प्राप्तं यैस्ते प्राप्तलोकत्रयीराज्याः । अरीणां जातम् अरिजातं, अपगतम् अरिजातं येभ्यस्ते अपारिजाताः, सुमनसां सन्तानाः सुमनःसन्तानाः, अपारिजाताश्च ते सुमनःसन्तानाश्च अपारि०, अपारिजातसुमनःसन्तानानां कान्ता अपारिजातसुमनःसन्तानकान्ताः, अपारिजातसुमनः-सन्तानकान्तैः अञ्चिता अपारिजातसुमनःसन्तानकान्ताञ्चिताः । पारिजात-सन्तान-मन्दार-हरिचन्दन-कल्पाद्याः पञ्चापि कल्पवृक्षाः सन्ति । 'सुमनाः पण्डिते पुष्पे, देवे सज्जने समितौ" **इत्यनेकार्थः** ॥ इति द्वितीयवृत्तार्थः ॥ ६२ ॥

(४)

दे० व्या०—ते जीयासुरिति । ते जिनाः-तीर्थकराः जीयासुः इति संबन्धः । 'जि जये' धातुः । 'जीयासुः' इति क्रियापदम् । के कर्तारः ? । 'जिनवृषाः' जिनाः-सामान्यकेवलिनः तेषु वृषाः-श्रेष्ठाः । "धर्मो वृषो वृषश्रेष्ठो, वृषण्डो मूर्षको वृषः" **इत्यनेकार्थः** । किंविशिष्टा जिनवृषाः ? । 'अविद्विषः' नास्ति विद्वेषो येषां ते तथा । तदुक्तं-"वासीचंदणकप्पे[1], समाणे लेट्ठुकंचणे" इति । जिनाः किं कुर्वाणाः ? । 'दधाना'-धारयन्तः । काम् ? । 'मालां'-स्रजम् । किंविशिष्टां मालाम् ? । 'रजोराज्या मेदुरपारिजात-सुमनःसन्तानकान्ताम्' 'रजसां-पुष्परेणूनां राजिः-श्रेणिस्तया मेदुराः-पीवराः ये पारिजाताः-कल्पपादपाः तेषां सुमनःसन्तानाः-पुष्पसमूहाः तैः कान्तां-भूषिताम् । "गुलुञ्छोऽथ रजः पौष्पं, परागोऽथ रसो मधु" इत्यभिधानचिन्तामणिः (का० ४, श्लो० १९२) । संतानः-तरुविशेषः तस्य पुष्पाणि संतानकानि तेषां अन्ता-अवयवा यस्यां सा तथेति प्राञ्चः । पुनः किंविशिष्टाः ? । 'चिताः'-व्याप्ताः । कया ? । 'कीर्त्या'-यशसा । "श्लोकः कीर्तिर्यशोऽभिख्या" इत्यभिधानचिन्तामणिः' (का० २, श्लो० १८७) । किंविशिष्टया कीर्त्या ? । 'कुन्दसमत्विषा' कुन्दः-कुसुमविशेषः तेन सदृशा त्विट्-कान्तिः यस्याः सा तया । पुनः किंविशिष्टाः ? । यत्तदोर्नित्याभिसम्बन्धाद् ये जिनवृषाः प्राप्तलोकत्रयीराज्या अपि ईषद्-मनाक् न मेदुः-न मदं गतवन्तः ।''न मेदुः' इति क्रियापदम् । के कर्तारः ? । 'जिनवृषाः' । किं कर्मतापन्नम् ? । 'ईषत्' । किंविशिष्टा जिनवृषाः ? । 'प्राप्तलोकत्रयीराज्याः' प्राप्तं-लब्धं लोकत्रय्याः-त्रिभुवनस्य राज्यं-साम्राज्यं यैस्ते तथा । पुनः किंविशिष्टाः ? । 'अपारिजातसुमनःसन्तानकान्ताञ्चिताः' अपगता अरिजाताः-शत्रुसमूहा येषां ते अपारिजाताः ते च ते सुमनःसन्तानाश्च-देवसमूहास्तेषां कान्ताः-योषितः ताभिः अञ्चिताः-पूजिताः । "वृन्दारकाः सुमनसस्त्रिदशा अमर्त्याः" इत्यभिधानचिन्तामणिः (का० २, श्लो० २) ।। इति द्वितीयवृत्तार्थः ।। ६२ ।।

(५)

ध० टीका—ते इति । 'ते' । 'जीयासुः' जयन्तु । 'अविद्विषः' विगतद्विषः । 'जिनवृषाः' जिनवृषभाः । 'मालां दधानाः' स्रजं बिभ्रतः । 'रजोराज्या' परागसन्तत्या । 'मेदुरपारिजातसुमनः-सन्तानकान्तां' मेदुराः-पीवराः पारिजातसुमनसः सन्तानकानि-सन्तानकुसुमानि च तेषामन्ता-अवयवा यस्यां ताम् । 'चिताः' सम्बद्धाः । 'कीर्त्या' प्रख्यात्या । 'कुन्दसमत्विषा' कुन्दसदृशदीप्त्या । 'ईषदपि ये' मनागपि ये । 'न' इति प्रतिषेधे । 'प्राप्तलोकत्रयीराज्याः' लब्धजगत्त्रयैश्वर्याः । 'मेदुः' मदं गतवन्तः । 'अपारिजातसुमनःसन्तानकान्ताञ्चिताः' अपगतारिसन्दोहाः ये सुमनसां-देवानां सन्तानाः-समूहाः तेषां

१. वासीचन्दनकल्पः समानो लेष्टुकाञ्चने ।

कान्ताः-मुख्याः शिरःप्रान्ता वा प्रणामपर्यन्ताः स्त्रियो वा तैरञ्चिताः-पूजिताः । ते जिनवृषभाः जीयासुः ये कीर्त्या चिताः प्राप्तलोकत्रयीराज्याः ईषदपि न मेदुरित्यन्वयः ।। ६२ ।।

(६)

अवचूरिः

ते जिनोत्तमा जयन्तु । ये प्राप्तत्रैलोक्यैश्वर्या अपि ईषदपि न मेदुः-मदं चक्रुरिति संबन्धः । किंविशिष्टाः ? । अविद्विषः-शत्रुरहिताः, मालां-स्रजं धारयन्तः । मालां किंभूताम् ? । रजोराज्या-परागपूरेण मेदुराः पारिजातकुसुमानि संतानककुसुमानि च तेषामन्ता-अवयवा यस्यां ताम् । चिता-व्याप्ताः । कया ? 'कीर्त्या' । कथंभूतया ? । 'कुन्दपुष्पोज्ज्वलया' । अपारिजाता-अपगतवैरिवृन्दा ये सुमनः-सन्ताना-विद्वत्समूहा देवसमूहा वा तेषां कान्ताः-शिरःप्रान्ताः प्रणामपराः स्त्रियो वा तैरञ्चिताः-पूजिताः ।। ६२ ।।

जिनमतस्य स्तुतिः–

जैनेन्द्रं मतमातनोतु सततं सम्यग्दृशां सद्गुणा–
लीलाभं गमहारि भिन्नमदनं तापापहृद् यामरम् ।
दुर्निर्भेदनिरन्तरान्तरतमोनिर्नाशि पर्युल्लस–
ल्लीलाभङ्गमहारिभिन्नमदनन्तापापहृद्यामरम् ।। ३ ।। ६३ ।।

- शार्दूल०

(१)

ज० वि०—जैनेन्द्रमिति । जैनन्द्रं-जिनेन्द्रसम्बन्धि मतं-दर्शनं सम्यग्दृशां-सम्यग्दृष्टीनां 'सद्गुणा-लीलाभं' सन्तः-शोभना ये गुणास्तेषां (आली-पङ्क्तिस्तस्या) लाभं-प्राप्तिं सततं-निरन्तरम् आतनोतु-समन्ताद् विस्तारयत्विति क्रियाकारकसंयोजनम् । अत्र 'आतनोतु' इति क्रियापदम् । किं कर्तृ ? 'मतम्' । कं कर्मतापन्नम् ? 'सद्गुणालीलाभम्' । केषाम् ? 'सम्यग्दृशाम्' । कथम् ? 'सततम्' । मतं किमिदम् ? 'जैनेन्द्रम्' । कथंभूतं मतम् ? 'गमहारि' गमैः-सदृशपाठैर्हारि-मनोहरम् । पुनः कथं० ? 'भिन्नमदनम्' विदारितमारम् । पुनः कथं० ? 'तापापहृत्' तापमपहरतीति तापापहृत् । पुनः कथं० ? 'यामरं' यामानि-व्रतानि राति-ददातीति यामरम् । पुनः कथं० ? 'दुर्निर्भेदनिरन्तरान्तरतमोनिर्नाशि' दुर्निर्भेदं-दुरवच्छेद्यं निरन्तरं-निर्विवरं आन्तरं-मनोऽन्तर्भवं एतादृशं यत् तमो-मोहस्तं निर्नाशयतीत्येवंशीलम् । पुनः

कथं० ? 'पर्युल्लसल्लीलाभङ्गमहारिभित्' पर्युल्लसल्लीलाः-प्रोद्यद्विलासा अभङ्गाः-अजेया ये महारयो-महाप्रतिपक्षा अर्थाद् रागद्वेषादयस्तान् भिनत्ति यत् तत् तथा । पुनः कथं० ? 'नमदनन्तापापहृद्यामरं' नमन्तः-नमस्कुर्वन्तः अनन्ता-अन्तरहिता अपापाः-पापरहिता हृद्या-मनोज्ञा अमरा-देवा यस्य तत् तथा ॥

अथ समासः—जिनानां जिनेषु वा इन्द्रः जिनेन्द्रः 'तत्पुरुषः' । जिनेन्द्रस्येदं जैनेन्द्रम् । सम्यग् दृशौ येषां ते सम्यग्दृशः 'बहुव्रीहिः' । तेषां सम्यग्दृशाम् । सन्तश्च ते गुणाश्च सद्गुणाः 'कर्मधारयः' । सद्गुणानाम्-आली सद्गुणाली 'तत्पुरुषः' । सद्गुणाल्या लाभः सद्गु० 'तत्पुरुषः' । तं सद्गुणा० । गमैर्हारि गमहारि 'तत्पुरुषः' । भिन्नो मदनो येन तद् भिन्नमदनं 'बहुव्रीहिः' । तापमपहरतीति तापापहृत् 'तत्पुरुषः' । यामानि रातीति यामरं 'तत्पुरुषः' । दुःखेन निर्भेदो यस्य तद् दुर्निर्भेदं 'बहुव्रीहिः' । न विद्यते अन्तरं यस्मिन् तत् निरन्तरं 'बहुव्रीहिः' । दुर्निर्भेदं च तद् निरन्तरं च दुर्निर्भेदनिरन्तरं 'कर्मधारयः' । आन्तरं च तत् तमश्च आन्तरतमः 'कर्मधारयः' । दुर्निर्भेदनिरन्तरं च तद् आन्तरतमश्च दुर्निर्भेदनिर० 'कर्मधारयः' । दुर्निर्भेदनिरन्तरान्तरतमो निर्नाशयतीत्येवंशीलं दुर्निर्भेद० 'तत्पुरुषः' । पर्युल्लसन्ती लीला येषां ते पर्युल्ल० 'बहुव्रीहिः' । न विद्यते भङ्गो येषां ते अभङ्गाः 'बहुव्रीहिः' । महान्तश्च ते अरयश्च महारयः 'कर्मधारयः' । पर्युल्लसल्लीलाश्च ते अभङ्गाश्च पर्युल्ल० 'कर्मधारयः' । पर्युल्लसल्लीलाभङ्गाश्च ते महारयश्च पर्युल्लस० 'कर्मधारयः' । पर्युल्लसल्लीलाभङ्गमहारीन् भिनत्तीत्येवंशीलं पर्युल्लस० 'तत्पुरुषः' । न विद्यते अन्तो येषां ते अनन्ताः 'बहुव्रीहिः' । हृद्याश्च ते अमराश्च हृद्यामराः 'कर्मधारयः' । न विद्यते पापं येषां ते अपापाः ('बहुव्रीहिः') । अपापाश्च ते हृद्यामराश्च अपापहृद्यामराः ('कर्मधारयः') । अनन्ताश्च ते अपापहृद्यामराश्च अनन्ता० 'कर्मधारयः' । नमन्तोऽनन्तापापहृद्यामरा यस्य तन्नमद० 'बहुव्रीहिः' ॥ इति काव्यार्थः ॥६३॥

(२)

सि० बृ०—जैनेन्द्रमिति । जिनेन्द्रस्येदं जैनेन्द्रं-जिनेन्द्रसंबन्धि मतं-दर्शनं सम्यग्दृशो येषां ते सम्यग्दृशः तेषां सम्यग्दृशां-सम्यग्दृष्टीनां सद्गुणालीलाभं-सद्गुणश्रेणीप्राप्तिं सततं-निरन्तरं 'आतनोतु' आ-समन्ताद् विस्तारयतु इत्यर्थः । आङ्पूर्वक 'तनु विस्तारे' धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि परस्मैपदे प्रथमपुरुषैकवचनम् । अत्र 'आतनोतु' इति क्रियापदम् । किं कर्तृ ? । 'मतम्' । कं कर्मतापन्नम् ? । 'सद्गुणालीलाभं' सन्तः-शोभना ये गुणास्तेषां (आली-पङ्क्तिस्तस्या) लाभः-प्राप्तिः तम् । केषाम् ? । 'सम्यग्दृशाम्' । कथम् ? । 'सततम्' । मतं किमात्मीयम् ? । 'जैनेन्द्रम्' । कथंभूतम् ? । 'गमहारि' गमाः-सदृशपाठाः तैर्हारि-मनोहरम् । पुनः कथंभूतम् ? । 'भिन्नमदनं' भिन्नो-विदारितो मदनो येन तत्, तदुच्छेदपरत्वेनास्य सिद्धत्वात् । पुनः कथंभूतम् ? । 'तापापहृत्' तापं अर्थात् संसारजनितं अपहरतीति तापापहृत् । पुनः कथंभूतम् ? । 'यामरं' यामानि-अहिंसाद्यात्मकानि महाव्रतानि

राति-ददातीति यामरम् । पुनः कथंभूतम् ? । 'दुर्निर्भेदनिरन्तरान्तरतमोनिर्नाशि' दुर्निर्भेदं-दुःखेन दूरीकर्तुं शक्यं तन्निरन्तरं-निर्विवरं आन्तरं-अन्तर्भवं एतादृशं यत् तमः-अज्ञानं तन्निर्नाशयतीत्येवंशीलम् । दुर्निर्भेदं च निरन्तरं च दुर्निर्भेदनिरन्तरं इति 'कर्मधारयः', आन्तरं च तत् तमश्चान्तरतमः 'कर्मधारयः', दुर्निर्भेदनिरन्तरं च तद् आन्तरतमश्च दुर्निर्भेदनिरन्तरान्तरतमः, दुर्निर्भेदनिरन्तरान्तरतमो निर्नाशयतीत्येवंशीलं दुर्निर्भेदनिरन्तरान्तरतमोनिर्नाशि, सर्वत्र 'कर्मधारयः' । पुनः कथंभूतम् ? । 'पर्युल्लसल्लीलाभङ्गमहारिभित्' पर्युल्लसन्ती लीला येषां ते पर्युल्लसल्लीलाः, न विद्यते भङ्गः-पराजयो येषां ते अभङ्गाः, महान्तः-प्रकृष्टाश्च ते अरयश्च महारयः, ततः पर्युल्लसल्लीलाश्च ते अभङ्गाश्च ते महारयश्च ते तथा तान् भिनत्तीत्येवंशीलम् । पुनः कथंभूतम् ? । 'नमदनन्तापापहृद्यामरं' नमन्तः-प्रणामं कुर्वन्तः अनन्ताः-अपरिमिताः (अपापाः-गतपापाः) ते च ते हृद्याः-मनोज्ञाः अमरा-देवाः यस्य तत् ।। ६३ ।।

(३)

सौ० वृ०—जैनेन्द्रमिति । जैनन्द्रं मतं-तीर्थकरप्रवचनं सम्यग्दृशां-सम्यग्दृष्टीनां सततं-निरन्तरं 'सद्गुणालीलाभं' सन्तः-शोभना ये गुणाः-क्षमामार्दवार्जवादयः तेषामाली-श्रेणिः तस्या लाभः-प्राप्तिः तं [सद्गुणालीलाभं] आतनोत्वित्यन्वयः । 'आतनोतु' इति क्रियापदम् । किं कर्तृ ? । 'मतं' प्रवचनम् । 'आतनोतु' विस्तारयतु । कं कर्मतापन्नम् ? । 'सद्गुणालीलाभम्' । केषाम् ? । 'सम्यग्दृशाम्' । कथम् ? । 'सततं' निरन्तरम् । किंविशिष्टं मतम् ? । 'जैनेन्द्रं' तीर्थकरसत्कम् । पुनः किंविशिष्टं मतम् ? । गमाः-सदृशपाठाः तैः कृत्वा हारि-मनोहरं 'गमहारि' । पुनः किंविशिष्टं मतम् ? । तापः-संसारभ्रमणलक्षणः तं अपहरतीति 'तापापहृत्' । पुनः किंविशिष्टं मतम् ? । यामा-महाव्रतानि राति-ददातीति तद् 'यामरम्' । पुनः किंविशिष्टं मतम् ? । दुःखेन नितरां भिद्यते इति 'दुर्निर्भेदं तादृशं यद् निरन्तरं-निश्छिद्रं-घनं आन्तरं-चेतोवृत्ति तमो-मोहान्धकारं अज्ञानं वा निश्चितं नाशयतीति 'दुर्निर्भेदनिरन्तरान्तर-तमोनिर्नाशि' । पुनः किंविशिष्टं मतम् ? । पर्युल्लसती-दीप्यमाना या लीला-विलासः तस्या भङ्गो-विविधरचना येषां ते तादृशा ये महान्तोऽरयः-शत्रवो रागद्वेषादयः तान् भिनत्तीति 'पर्युल्लसल्लीलाभङ्गमहारिभित्' । किंविशिष्टं मतम् ? । नमन्तः-प्रणमन्तः अनन्ता-अप्रमाणा अपापा-गतपापा हृद्या-मनोज्ञा अमरा-देवा यस्य यस्मिन् वा तत् 'नमदनन्तापापहृद्यामरम्' । एतादृशं प्रवचनं सम्यग्दृशां सद्गुणालीलाभं आतनोतु । इति पदार्थः ।।

अथ समासः—जिनेन्द्राणामिदं जैनेन्द्रम् । सम्यग्-अविपरीता दृग् येषां ते सम्यग्दृशः, तेषां सम्यग्दृशाम् । सन्तश्च ते गुणाश्च सद्गुणाः, सद्गुणानामाली सद्गुणाली, सद्गुणाल्या लाभः सद्गुणा०, तं सद्गुणालीलाभम् । हरति चित्तं तद्धारि, गमैर्हारि गमहारि । भिन्नो मदनो येन तद् भिन्नमदनम् ।

तापं अपहरतीति तापापहृत् । यामं राति-ददातीति यामरम् । दुःखेन निरन्तरं भेदा यस्य तद् दुर्निर्भेदम्, अन्तरे भवं आन्तरं, आन्तरं च तत् तमश्च आन्तरतमः, निरन्तरं च आन्तरतमश्च निरन्तरान्तरतमः, दुर्निर्भेदं च तद् निरन्तरान्तरतमश्च दुर्निर्भेदनिरन्तरान्तरतमः, दुर्निर्भेदनिरन्तरान्तरतमो निर्-निश्चितं नाशयतीति दुर्निर्भेदनिरन्तरान्तरतमोनिर्नाशि । पर्युल्लसन्ती चासौ लीला च पर्युल्लसल्लीला, पर्युल्लसल्लीला भङ्गा येषां ते पर्युल्लसल्लीलाभङ्गाः, महान्तश्च ते अरयश्च महारयः, पर्युल्लसल्लीलाभङ्गाश्च ते महारयश्च पर्युल्लसल्लीलाभङ्गमहारयः, पर्युल्लसल्लीलाभङ्गमहारीन् भिनत्तीति पर्युल्लसल्लीलाभङ्गमहारिभित् । नमन्तश्च ते अनन्ताश्च नमदनन्ताः, नास्ति पापं येषां ते अपापाः, नमदनन्ताश्च ते अपापाश्च नमदनन्तापापाः, हृद्याश्च ते अमराश्च हृद्यामराः, (नमदन्तापापाश्च हृद्यामराश्च नमद०) नमदनन्तापापहृद्यामरा यस्मिन् तद् नमदनन्तापापहृद्यामरं-प्रणमदनेकनिष्पापमनोज्ञदेववृन्दवन्द्यम् । तादृशं प्रवचनं बोधिलाभमातनोतु ।। इति तृतीयवृत्तार्थः ।। ६३ ।।

(४)

दे० वृ०—जैनेंन्द्रमिति । जिनेन्द्रस्य इदं जैनेन्द्रं मतं-प्रवचनं सम्यग्दृशां सततं-निरन्तरं यथा स्यात् तथा सद्गुणालीलाभं आतनोतु-विस्तारयतु इत्यन्वयः । 'तनुः विस्तारे' धातुः । 'आतनोतु' इति क्रियापदम् । किं कर्तृ ? । 'मतम्' । कं कर्मतापन्नम् ? । 'सद्गुणालीलाभं' सती-शोभना या गुणाली-गुणपरम्परा तस्या लाभो-लब्धिस्तम् । केषाम् ? । सम्यग्दृशां-सम्यग्दृष्टीनाम् । तदुक्तम्—

"या देवे देवताबुद्धि-र्गुरौ च गुरुतामतिः ।
धर्मे च धर्मधीः शुद्धा, सम्यक्त्वमिदमुच्यते ।।"

इति योगशास्त्रे (प्र० २, श्लो० २) । तथा—

"[1]जीवाइनवपयत्थे जो जाणइ तस्स होइ सम्मत्तं ।
भावेण सद्दहंतो अयाणमाणेवि सम्मत्तं ।।"

इति नवतत्त्वग्रन्थे । किंविशिष्टं मतम् ? । 'गमहारि' गमाः-सदृशपाठाः तैः हरतीत्येवंशीलं गमहारि । पुनः किंविशिष्टम् ? । 'भिन्नमदनं' भिन्नः-पाटितो मदनः-कन्दर्पो येन तत्, तदुच्छेदपरत्वेनास्य सिद्धत्वात् । पुनः किंविशिष्टम् ? । 'तापापहृत्' तापः-संसारखेदः तं अपहरतीति तापापहृत् । पुनः किंविशिष्टम् ? । 'यामरं' यामा-महाव्रतानि तान् राति-दत्ते इति यामरम् । पुनः किंविशिष्टम् ? । 'पर्युल्लसल्लीलाभङ्गमहारिभित्' परि-सामस्त्येन उल्लसन्त्यः-उल्लासं प्राप्नुवन्त्यः लीला-विलासा येषां ते

१. जीवादिनवपदार्थान् यो जानाति तस्य भवति सम्यक्त्वम् ।
भावेन श्रद्दधानस्य अजानानस्यापि सम्यक्त्वम् ।।

पर्युल्लसल्लीलाः, "लीला विलासो विच्छित्तिः" इत्यभिधानचिन्तामणिः (का० ३, श्लो० १७१), ते च ते अभङ्गमहारयः-अजेयशत्रवः तान् भिनत्ति विदारयतीति तत् । अभङ्गाश्च ते महारयश्चेति पूर्वं 'कर्मधारयः' । पुनः किंविशिष्टम् ? । 'दुर्निर्भेदनिरन्तरान्तरतमोनिर्नाशि' । पुनः किंविशिष्टम् ? । 'नमदनन्तापापहृद्यामरम्' नमन्तः-प्रणामं कुर्वन्तः अपापाः-पापरहिताः अनन्ता-असंख्याता हृद्या-मनोहरा अमरा-देवा यस्य तत् ।। इति तृतीयवृत्तार्थः ।। ६३ ।।

(५)

ध० टीका—जैनेन्द्रमिति । 'जैनेन्द्रं' जिनेन्द्रसम्बन्धि । 'मतं' दर्शनम् । 'आतनोतु' प्रथयतु । 'सततम्' अजस्रम् । 'सम्यग्दृशाम्' अविपरीतबुद्धीनाम् । 'सद्गुणालीलाभम्' साधुगुणावलीप्राप्तिम् । 'गमहारि' गमैर्मनोहरम् । 'भिन्नमदनम्' विदारितस्मरम् । 'तापापहृत्' तापं अपहरति यत् तत् । 'यामरम्' यामाः-यमाः तान् राति-ददाति यत् तत् । 'दुर्निर्भेदनिरन्तरान्तरतमोनिर्नाशि' दुर्भेदं-दुःखभेद्यम्, निरन्तरं-निर्विवरं, आन्तरं-मनोऽन्तर्भवं, तमः-मोहं निर्नाशयत्येवंशीलं यत् तत् । 'पर्युल्लसल्लीलाभङ्गमहारिभित्' पर्युल्लसल्लीलान्-प्रोद्यद्विलासान् अभङ्गान्-अजेयान् महारीन्-महाप्रतिपक्षान् भिनत्ति यत् तत् । 'नमदनन्तापापहृद्यामरम्' नमन्तोऽनन्ताः अपापाः-हृद्याः अमरा यस्य तत् ।। ६३ ।।

(६)

अवचूरिः

जैनेन्द्रं-जिनेन्द्रप्रोक्तं मतं सद्गुणश्रेणिलाभं सम्यग्दृष्टीनां वितनोतु । किंविशिष्टम् ? । गमाः-सदृशपाठास्तैर्हारि-मनोहरम् । भिन्नो-विदीर्णो मदनः-अनङ्गो येन । तापं-संसारभ्रमणजमपहरतीति । यमानि-व्रतानि रातीति । दुर्निर्भेदं-दुःखभेद्यं निरन्तरं-निर्विवरम् अन्तरम्-अन्तर्भवं तमो-मोहं निर्नाशयतीत्येवंशीलम् । पर्युल्लसल्लीलान् प्रोद्यद्विलासान् अभङ्गान्-अजेयान् महारीन्-महावैरिणो भिनत्तीति । नमन्तोऽनन्ता-अप्रमाणाः अपापहृद्या अमरा यस्य ।। ६३ ।।

श्रीब्रह्मशान्तियक्षस्य स्तुतिः—

दण्डच्छत्रकमण्डलूनि कलयन् स ब्रह्मशान्तिः क्रियात्
सन्त्यज्यानि शमी क्षणेन शमिनो मुक्ताक्षमाली हितम् ।
तप्ताष्टापदपिण्डपिङ्गलरुचिर्योऽधारयन्मूढतां
संत्यज्यानिशमीक्षणेन शमिनो मुक्ताक्षमालीहितम् ।। ४ ।। ६४ ।।

- शार्दूल०

(१)

ज० व०—दण्डच्छत्रेति । स ब्रह्मशान्तिः-ब्रह्मशान्तिनामा यक्षः शं-सुखं क्रियाद्-विधेयादिति क्रियाकारकसण्टङ्कः । अत्र 'क्रियात्' इति क्रियापदम् । कः कर्ता ? 'ब्रह्मशान्तिः' । किं कर्मतापन्नम् ? 'शम्' । कथम् ? 'क्षणेन' सपदि । ब्रह्मशान्तिः किं कुर्वन् ? 'कलयन्' । कानि कर्मतापन्नानि ? 'दण्डच्छत्रकमण्डलूनि' दण्डो-यष्टिः छत्रं-आतपत्रं कमण्डलुः-कुण्डिका तानि । (दण्ड०) कथंभूतानि ? 'सन्ति' शोभनानि । पुनः कथंभूतानि ? 'अज्यानि' अहीनानि । ब्रह्मशान्तिः कथंभूतः ? 'इनः' प्रभुः । पुनः कथंभूतः ? 'मुक्ताक्षमाली' मुक्ताक्षमालावान् । पुनः कथं० ? 'तप्ताष्टापदपिण्डपिङ्गलरुचिः' तप्तः-उत्तप्तः यः अष्टापदपिण्डः-कनकगोलः तद्वत् पिङ्गलरुचिः-कपिलच्छविः । पुनः किंविशिष्टः ? 'शमी' शमवान् । स इति तच्छब्दसाहचर्याद् यच्छब्दघटनामाह-यो ब्रह्मशान्तिः शमिनः-मुनेः कस्यापि हितं-परिणामसुखं 'मुक्ताक्षमालीहितं' मुक्ता अक्षमा यैस्ते तथा (अर्थात्) साधवस्तेषामाली-श्रेणी तस्या ईहितं-चेष्टितं हितं-परिणामसुखम् अधारयद्-धृतवान् । अत्रापि 'अधारयत्' इति क्रियापदम् । कः कर्ता ? 'यः' । किं कर्मतापन्नम् ? 'हितम्' । हितं कथंभूतम् ? 'मुक्ताक्षमालीहितम्' । केन कृत्वा ? 'ईक्षणेन' विलोकनेन । कथम् ? 'अनिशम्' अनवरतम् । किं कृत्वा ? 'संत्यज्य' त्यक्त्वा । कां कर्मतापन्नाम् ? 'मूढताम्' अज्ञताम् ॥

अथ समासः—दण्डश्च छत्रं च कमण्डलुश्च दण्डच्छत्रकमण्डलूनि 'इतरेतरद्वन्द्वः' । तानि दण्ड० । मुक्तानामक्षमाला मुक्ताक्षमाला 'तत्पुरुषः' । मुक्ताक्षमालाऽस्यास्तीति मुक्ता० । अष्टापदस्य पिण्डोऽष्टापदपिण्डः 'तत्पुरुषः' । तप्तश्चासावष्टापदपिण्डश्च तप्ताष्टा० 'कर्मधारयः' । तप्ताष्टापदपिण्डवत् पिङ्गला तप्ताप्ता० 'तत्पुरुषः' । तप्ताष्टापदपिण्डपिङ्गला रुचिर्यस्य स तप्ताष्टा० 'बहुव्रीहिः' । न क्षमा अक्षमा 'तत्पुरुषः' । मुक्ता अक्षमा यैस्ते मुक्ताक्षमाः 'बहुव्रीहिः' । मुक्ताक्षमाणामाली मुक्ताक्षमाली 'तत्पुरुषः' । मुक्ताक्षमाल्या ईहितं मुक्ताक्ष० 'तत्पुरुषः' । तद् मुक्ता० ॥ इति काव्यार्थः ॥ ६४ ॥

॥ इति श्रीशोभनस्तुतिवृत्तौ श्रीशान्तिनाथस्य स्तुतेर्व्याख्या ॥ ४ । १६ । ६४ ॥

(२)

सि० वृ०—दण्डच्छत्रेति । स ब्रह्मशान्तिः-ब्रह्मशान्तिनामा यक्षः शं-सुखं क्रियाद्-विधेयादि -त्यर्थः । 'डुकृञ् करणे' धातोः आशिषि कर्तरि परस्मैपदे प्रथमपुरुषैकवचनम् । क्रियानिष्पत्तिप्रकारस्तु पूर्वमेवोक्तः । अत्र 'क्रियात्' इति क्रियापदम् । कः कर्ता ? । 'ब्रह्मशान्तिः' । किं कर्मतापन्नम् ? । 'शम्' ।

कथम् ? । 'क्षणेन'-सपदि । ब्रह्मशान्तिः किं कुर्वन् ? । कलयतीति 'कलयन्' धारयन् । कानि ? । 'दण्डच्छत्रकमण्डलूनि' दण्डो-दण्डः छत्रं-आतपत्रं कमण्डलुः-कुण्डिका तानि । दण्डश्च छत्रं च कमण्डलुश्च दण्डच्छत्रकमण्डलूनि 'इतरेतरद्वन्द्वः' । कथंभूतानि ? । 'सन्ति'-शोभनानि । पुनः कथंभूतानि ? । अज्यानि-अहीनानि । ब्रह्मशान्तिः कथंभूतः ? 'शमी' शमः-उपशमः सोऽस्यास्तीति शमी, प्रशमवानित्यर्थः । पुनः कथंभूतः ? । 'इनः'-प्रभुः, कतिपयदेवदेवाङ्गनानां प्रभुत्वात् । "इनः सूर्ये प्रभौ राजा" इत्यमरः (श्लो० २५५७) । पुनः कथंभूतः ? । 'मुक्ताक्षमाली' मुक्तानां-मुक्ताफलानां अक्षमाला-जपमालिका सा अस्यास्तीति मुक्ताक्षमाली । पुनः कथंभूतः ? । 'तप्ताष्टापदपिण्डपिङ्गलरुचिः' तप्तं-द्रुतं यद् अष्टापदं-सुवर्णं तस्य पिण्डो-गोलकः तद्वत् पिङ्गला-पीतरक्ता रुचिः-कान्तिः यस्य स तथा । "पीतरक्तस्तु पिञ्जरः । कपिलः पिङ्गलः श्यावः" (अभि० का० ६, श्लो० ३२), "पिङ्गलः स्वर्णवर्णवत्" इति तु शब्दार्णवः । तथा च सितपीतहरिद्रक्तः पिङ्गल इत्यर्थः । स इति स कः ? । यो ब्रह्मशान्तिः शमिनः-कस्यापि मुनेर्हितं-परिणतिसुखं अहर्निशं-निरन्तरं ईक्षणेन-विलोकनेन कृत्वा अधारयद्-धारयामासेत्यर्थः । 'धृञ् धारणे' धातोरनद्यतने अतीते कर्तरि परस्मैपदे प्रथमपुरुषैकवचनं दिप् । 'दिबादावट्' (सा० सू० ७०७), 'चुरादेः' (सा० सू० १०३१) इति ञिः, 'गुणः' (सा० सू० ६९२) इति गुणः, 'ए अय्' (सा० सू० ४१), 'स्वरहीनम्०' (सा० सू० ३६) । (तथा च) 'अधारयत्' इति सिद्धम् । अत्र 'अधारयत्' इति क्रियापदम् । कः कर्ता ? । 'यः' । किं कर्मतापन्नम् ? । 'हितम्' । कस्य ? । 'शमिनः' शमोऽस्यास्तीति शमी तस्य शमिनः । केन कृत्वा ? । 'ईक्षणेन' । कथम् ? । 'अनिशम्' । कीदृशं हितम् ? । 'मुक्ताक्षमालीहितं' मुक्ता अक्षमा-[1]क्षमारहिता (?) यैस्ते तथा अर्थात् साधवस्तेषां आली-पङ्क्तिः तस्या ईहितं-चेष्टितम् । किं कृत्वा ? । 'संत्यज्य'-त्यक्त्वा । काम् ? । मूढस्य भावो मूढता तां मूढतां, अज्ञतामित्यर्थः ।। ६४ ।। शार्दूलविक्रीडितं छन्दः । तल्लक्षणं तु प्रथमस्तुतौ पूर्वमेवोक्तम् ।।

।। इति महामहोपाध्यायश्रीभानुचन्द्रगणि० श्रीशान्तिनाथस्य स्तुतिवृत्तिः ।। ४ । १६ । ६४ ।।

(३)

सौ० वृ०—दण्डच्छत्रेति । स ब्रह्मशान्तिर्नामा यक्षः शं-सुखं क्षणेन-वेगेन क्रियादित्यन्वयः । 'क्रियात्' इति क्रियापदम् । कः कर्ता ? 'ब्रह्मशान्तिः' । 'क्रियात्' कुर्यात् । किं कर्मतापन्नम् ? । 'शं' सुखम् । "शं सुखे बलवति (त्?) सुष्ठु" इति हैमः (का० ६, श्लो० १७१) । ब्रह्मशान्तिः किं कुर्वन् ? । 'कलयन्' । कानि कर्मतापन्नानि ? । दण्डो-यष्टिः छत्र-आतपवारणं कमण्डलुः-कुण्डिका तानि 'दण्डच्छत्रकमण्डलूनि' । कथंभूतानि दण्डच्छत्रकमण्डलूनि ? । 'सन्ति' शोभनानि, विद्यमानानि वा । अत एव ज्या-हानिः सा न विद्यते येषु तानि 'अज्यानि', शाश्वतानीत्यर्थः । किंविशिष्टो ब्रह्मशान्तिः ? ।

१. **अघटितेयं व्याख्या, साधवस्तु क्षमापवित्रिताः सन्ति न तु क्षमारहिता अत एवं व्याख्या भवतु - तत्सदृशार्थेऽत्र नञ् तत्पुरुषः प्रयुक्तस्तस्मात् 'अक्षमा' क्षमान्वीताः ।**

'शमी' उपशमवान् । पुनः किंविशिष्टो ब्रह्मशान्तिः ? । मुक्तानां-मौक्तिकानां अक्षमाला-स्नानजाप्यमाला अस्यास्तीति 'मुक्ताक्षमाली' । पुनः कथंभूतो ब्रह्मशान्तिः ? । तप्तं-तापितं यद् अष्टापदं-सुवर्णं तस्य पिण्डो-गोलः तद्वत् पिङ्गला-पीता रुचिः-कान्तिर्यस्य स 'तप्ताष्टापदपिण्डपिङ्गलरुचिः' । पुनः किंविशिष्टो ब्रह्मशान्तिः ? । 'सः' प्रसिद्धः । तच्छब्दो यच्छब्दमपेक्षते । सः कः ? । यो ब्रह्मशान्तिः शमिनः-शमवतः साधोः सज्जनस्य वा अनिशं निरन्तरं ईक्षणेन-विलोकनेन कृत्वा हितं अधारयदित्यन्वयः ।'अधारयत्' इति क्रियापदम् । कः कर्ता ? । 'यः' ब्रह्मशान्तिः ।'अधारयत्' अदधत् । किं कर्मतापन्नम् ? । 'हितं' शुभम् । केन ? । 'ईक्षणेन' । कस्य । 'शमिनः' । कथम् ? । 'अनिशं' निरन्तरम् । किं कृत्वा ? । 'सन्त्यज्य' त्यक्त्वा । कां कर्मतापन्नाम् ? । 'मूढतां' अज्ञानताम् । किंविशिष्टं हितम् ? । मुक्ता-त्यक्ता अक्षमा-कोपो यैस्ते मुक्ताक्षमाः-साधवस्तेषां आली-श्रेणिस्तस्या ईहितं-वाञ्छितं सिद्धिपदं यस्मिन् तत् 'मुक्ताक्षमालीहितम्' । इति पदार्थः ॥

अथ समासः—दण्डश्च छत्रं च कमण्डलुश्च दण्डच्छत्रकमण्डलूनि, तानि दण्डच्छत्रकमण्डलूनि । ब्रह्मणा-ज्ञानेन शान्तिः ब्रह्मशान्तिः । ज्या-हानिः, नास्ति ज्या येषु तानि अज्यानि । [सन्ति च तानि अज्यानि च सन्त्यज्यानि] । शमः अस्यास्तीति (शमी) । पुनः ब्रह्मशान्तिः इनः-स्वामी । अक्षाणां माला अक्षमाला, मुक्तानां अक्षमालाऽस्यास्तीति मुक्ताक्षमाली । तप्तं च तद् अष्टापदं च तप्ताष्टापदम्, तप्ताष्टापदस्य पिण्डः तप्ताष्टापदपिण्डः, तप्ताष्टापदपिण्डवत् पिङ्गला रुचिर्यस्य स तप्ताष्टापदपिण्ड-पिङ्गलरुचिः । मूढस्य भावो मूढता, तां मूढताम् । शमोऽस्यास्तीति शमी, तस्य शमिनः । न क्षमा अक्षमा, मुक्ता अक्षमा यैस्ते मुक्ताक्षमाः, मुक्ताक्षमानां आली मुक्ताक्षमाली, मुक्ताक्षमाल्या ईहितं यस्मिन् तत् मुक्ताक्षमालीहितम् ॥ इति चतुर्थवृत्तार्थः ॥ ६४ ॥

श्रीमच्छान्तिजिनेशस्य, स्तुतेरर्थो लिपीकृतः ।
सौभाग्यसागराख्येण, सूरिणा ज्ञानधारिणा ॥ १ ॥

॥ इति षोडशजिनशान्तिनाथस्य स्तुतेरर्थो लिपीकृतः ॥४।१६।६४॥

(४)

दे० व्या०—दण्डच्छत्रेति । स ब्रह्मशान्तिर्यक्षः क्षणेन-वेगेन यथा भवति तथा शं-सुखं क्रियात्-कुर्यादि-त्यन्वयः । 'डुकृञ् करणे' धातुः । 'क्रियात्' इति क्रियापदम् । कः कर्ता ? । स 'ब्रह्मशान्तिः' । किं कर्मतापन्नम् ? । 'शम् '। कथम् ? । 'क्षणेन' । अव्ययमेतत् । "सहसैकपदे सद्योऽकस्मात् सपदि तत्क्षणे" इत्यभिधानचिन्तामणिः (का० ६, श्लो० १६८) । किं कुर्वन् यक्षः ? । 'कलयन्'-उद्वहन्, धारयन्निति-

यावत् । कानि ? । 'दण्डच्छत्रकमण्डलूनि' दण्डः-प्रहरणविशेषः छत्रं-आतपत्रं कमण्डलुः-कुण्डिका, एतेषां 'द्वन्द्वः' । तानि किंविशिष्टानि ? । 'सन्ति'-शोभनानि । पुनः किंविशिष्टानि ? । 'अज्यानि' नास्ति ज्या[निः]-जरा येषां तानि, देवताधिष्ठितत्वेन तत्सम्भवात् । यत्तदोर्नित्याभिसम्बन्धाद् यो ब्रह्मशान्तिः कस्यापि शमिनः-तपस्विनः ईक्षणेन-विलोकनेन हितं-पथ्यम् अधारयद्-धारयामासेत्यन्वयः । 'डुधाञ् धारणपोषणयोः' इति धातुः । किं कृत्वा ? । 'संत्यज्य'-परिहृत्य । काम् ? । 'अज्ञतां' अज्ञस्य भावः अज्ञता तां, मूर्खस्य भावतामित्यर्थः । 'भावे तत्त्वयणः' (सा० सू० ५९१) इति तप्रत्ययः । किंविशिष्टं हितम् ? । 'मुक्ताक्षमालीहितम्' मुक्ता-त्यक्ता अक्षमा यैस्ते मुक्ताक्षमा-मुमुक्षवः तेषां आली-परम्परा तस्या ईहितं-वाञ्छितं, अक्षमा-क्रोधः । यत् तु किंविशिष्टं शम् ? । 'ईहितं'-चेष्टितम् । किंविशिष्टो यक्षः ? । 'मुक्ताक्षमाली' मुक्ता अक्षमायाः आली-परम्परा येन स तथेति पृथक् पदद्वयमिति कश्चित् तन्न, अर्थानवबोधात् । किंविशिष्टो यक्षः ? । 'शमी' शमोऽस्यास्तीति शमी-उपशमवान् । पुनः किंविशिष्टः ? । 'इनः'-स्वामी, सर्वेषां रक्षाकरणत्वात् । पुनः किंविशिष्टः ? । 'मुक्ताक्षमाली' मुक्तायाः-मुक्ताफलस्य अक्षमाला-जपमाला विद्यते यस्यासौ मुक्ताक्षमाली । "शुक्तिजं मौक्तिकं मुक्ता" इत्यभिधानचिन्तामणिः (का० ४ , श्लो० १३४) । पुनः किंविशिष्टः ? । 'तप्ताष्टापदपिण्डपिङ्गलरुचिः' तप्तं-द्रुतं यद् अष्टापदं-सुवर्णं तस्य पिण्डः-समुदायः तद्वत् पिङ्गला-कपिला पीतरक्ता इति यावत् रुचिः-कान्तिर्यस्य स तथा । "कपिलः पिङ्गल श्यावः" इत्यभिधानचिन्तामणिः (का० ६, श्लो० ३२) । इति तुरीयवृत्तार्थः ॥ ६४ ॥ शार्दूलविक्रीडितच्छन्दः । अस्य भेदकत्वा(त्वमा ?)द्यस्तुतौ पूर्वमेवोद्दिष्टमिति ॥ ४ । १६ । ६४ ॥

(५)

ध० टीका—दण्डेति । 'दण्डच्छत्रकमण्डलूनि' दण्डः-आषाढो व्रतिदण्डः छत्रं-आतपत्रं कमण्डलुः-कुण्डिका (तानि) । 'कलयन्' उद्वहन् । 'सः' । 'ब्रह्मशान्तिः' ब्रह्मशान्तिनामा ब्रह्मराक्षसः । 'क्रियात्' विधेयात् । 'सन्ति' शोभनानि । 'अज्यानि' ज्यानिरहितम् । 'शमी' प्रशमवान् । 'क्षणेन' सपदि । 'शं' सुखम् । 'इनः' प्रभुः । 'मुक्ताक्षमाली' मौक्तिकाक्षमालावान् । 'हितं' परिणतिसुखम् । 'तप्ताष्टापदपिण्डपिङ्गलरुचिः' तप्तो योऽष्टापदपिण्डः-कनकगोलः तद्वत् पिङ्गलरुचिः-कपिलच्छविः । 'यः' । 'अधारयत्' धृतवान् । 'मूढतां' अज्ञताम् । 'संत्यज्य' त्यक्त्वा । 'अनिशं' अनवरतम् । 'ईक्षणेन' आलोकनेन । 'शमिनः' मुनेः कस्यापि । 'मुक्ताक्षमाली' मुक्ता-त्यक्ता अक्षमायाः-अक्षान्तेः आली-परम्परा येन-सः । 'ईहितं' चेष्टितम् । सन्ति दण्डच्छत्रकमण्डलूनि कलयन् स ब्रह्मशान्तिरज्यानि शं क्षणेन क्रियाद् यः शमिनः अनिशं ईक्षणेन मूढतां संत्यज्य हितं अधारयदिति सम्बन्धः ॥ ४ । १६ । ६४ ॥

(६)

अवचूरिः

स ब्रह्मशान्तिनामा यक्षः शं-सुखं कुरुतात् । किं कुर्वन् ? । दण्डच्छत्रकमण्डलूनि कलयन्-उद्वहन् । किंभूतानि ? । सन्ति-शोभनानि । अज्यानि-अहीनानि । शमी-प्रशमवान् । क्षणेन-वेगेन । मुक्ताक्षमाला अस्यास्तीति । तप्तस्वर्णपिण्डपीतरुचिः । यो यक्षः कस्यापि शमिनो-मुनेरनिशं-निरन्तरमीक्षणेन-विलोकनेनाज्ञतां-मूढतां संत्यज्य हितं परिणतिसुखमधारयत् । हितं किंभूतम् ? । मुक्ता अक्षमा यैस्ते मुनयस्तेषामाली-श्रेणिस्तस्या ईहितं-चेष्टितम् ॥ ४ । १६ । ६४ ॥

१७. श्रीकुन्थुजिनस्तुतयः

अथ श्रीकुन्थुनाथाय वन्दनम्–

भवतु मम नमः श्रीकुन्थुनाथाय तस्मा–
यमितशमितमोहायामितापाय हृद्यः ।
सकलभरतभर्ताऽभूज्जिनोऽप्यक्षपाशा–
यमितशमितमोहायामितापायहृद् यः ॥ १ ॥ ६५ ॥

- मालिनी (८, ७)

(१)

ज० वि०—भवत्विति । श्रीकुन्थुनाथाय-श्रीकुन्थुनाथनाम्ने जिनाय, श्रीशब्दः प्राग्वत्, मम-मे नमस्कारो भवतु-अस्तु इति क्रियाकारकप्रयोगः । अत्र 'भवतु' इति क्रियापदम् । किं कर्तृ ? 'नमः' । कस्मै ? 'श्रीकुन्थुनाथाय' । कस्य ? 'मम' । कथंभूताय श्रीकुन्थुनाथाय ? 'अमितशमितमोहायामितापाय' अमितः-अपरिमितः शमितः-शमं नीतः मोहः-मोहनीयं (कर्म) स एव आयामितापो-दीर्घदवथुर्येन स तथा तस्मै । पुनः कथं० ? 'अक्षपाशायमितशमितमोहाय' अक्षपाशैः-इन्द्रियरज्जुभिः अयमिता-अबद्धा ये शमिनो-मुनयस्तेषां तमोहाय-अज्ञानघातिने । तस्मै इति तच्छब्दसाहचर्याद् यच्छब्दघटनामाह–यः श्रीकुन्थुनाथः सकलभरतभर्तासकलभारतस्वामी चक्रवर्तीत्यर्थः, जिनोऽपि-तीर्थंकरोऽपि अभूत् । अपिशब्दः समुच्चयार्थः । अत्रापि 'अभूत्' इति क्रियापदम् । कः कर्ता ? 'यः' । कथंभूतोऽभूत् ?

'सकलभरतभर्ता' । पुनः कथं० ? 'जिनः' । कथम् ? 'अपि' । यः कथंभूतः ? 'हृद्यः' मनोहरः । पुनः कथं० ? 'अमितापायहृत्' अमितान्-अपरिमितान् अपायान् हरतीत्यमितापायहृत् ।

अथ समासः—कुन्थुश्चासौ नाथश्च कुन्थुनाथः 'कर्मधारयः' । श्रियोपलक्षितः कुन्थुनाथः श्रीकुन्थु० 'तत्पुरुषः' । तस्मै श्रीकुन्थु० । अमितश्चासौ शमितश्च अमित० 'कर्मधारयः' । आयामी चासौ तापश्च आया० 'कर्मधारयः' । मोहश्चासावायामितापश्च मोहाया० 'कर्मधारयः' । अमितशमितो मोहायामितापो येन सोऽमित० 'बहुव्रीहिः' । तस्मै अमित० । सकलं च तद् भरतं च सक० 'कर्मधारयः' । सकलभरतस्य भर्ता सक० 'तत्पुरुषः' । अक्षाण्येव पाशाः अक्षपाशाः 'कर्मधारयः' । न यमिता अयमिताः 'तत्पुरुषः' । अक्षपाशैरयमिता अक्षपा० 'तत्पुरुषः' । अक्षपाशायमिताश्च ते शमिनश्च अक्षपा० 'कर्मधारयः' । तमो हन्तीति तमोहः 'तत्पुरुषः' । अक्षपाशायमितशमिनां तमोहः अक्षपा० 'तत्पुरुषः' । तस्मै अक्षपा० । अमितश्चासावपायश्च अमितापायः 'कर्मधारयः' । अमितापायं हरतीत्यमितापायहृत् 'तत्पुरुषः' ।। इति काव्यार्थः ।। ६५ ।।

(२)

सि० वृ०—भवत्विति । कुन्थुनाथः कौ-पृथिव्यां स्थितिमान् इति कुन्थुः, "क्षितिः क्षोणिः क्षमाऽनन्ता, ज्या कुर्वसुमतिर्मही" इति हैमः (अभि० का० ४, श्लो० २), पृषोदरादित्वात् सकारलोपः, गर्भस्थेऽस्मिन् माता विचित्रं कुन्थुरूपं दृष्टवतीति वा कुन्थुः, स चासौ श्रियोपलक्षितो नाथः श्रीकुन्थुनाथः तस्मै मम नमस्कारो भवतु इति संबन्धः । 'भू सत्तायाम्' धातुः अग्रे 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि परस्मैपदे प्रथमपुरुषैकवचनं तुप् । 'अप् कर्तरि' (सा० सू० ६९१) इत्यप्, 'गुणः' (सा० सू० ६९२), 'ओ अव्' (सा० सू० ४२), 'स्वरहीनं०' (सा० सू० ३६) । तथा च 'भवतु' इति सिद्धम् । अत्र 'भवतु' इति क्रियापदम् । किं कर्तृ ? । 'नमः' । कस्मै ? । 'श्रीकुन्थुनाथाय' । कथंभूताय श्रीकुन्थुनाथाय ? । 'अमितशमितमोहायामितापाय' अमितः-अप्रमाणः शमितः-शमं नीतो मोहो-मोहनीयं स एव आयामितापो-(दीर्घ)दवथुर्येन स तथा तस्मै । अमितश्चासौ शमितश्च अमितशमितः, आयामी चासौ तापश्च आयामितापः इति 'कर्मधारयः' । पुनः कथंभूताय ? । 'अक्षपाशायमितशमितमोहाय' अक्षाण्येव-इन्द्रियाण्येव पाशा-रज्जवः तैः अयमिता-अबद्धा ये शमिनो-मुनयः तेषां तमोहाय अज्ञानघातिने । पुनः कथंभूताय ? । 'तस्मै' । तस्मै कस्मै ? । यः कुन्थुनाथः सकलभरतभर्ता-समस्तभारतस्वामी, चक्रवर्तीत्यर्थः । बिभर्ति षट्खण्डानीति 'भरतः' । 'डुभृञ् धारणादौ' भृमृदृशियजिपर्विपच्यमिनमितमिन-मिहर्यिभ्योऽतच्' (उणा० सू० ३९०) तस्य भर्ता जिनोऽपि-तीर्थंकरोऽपि अभूद्-अभवदित्यर्थः । अपिः समुच्चयार्थे । यद्वा अपिशब्दोऽत्र यः सकलभरतभर्ता स कथं जिनः स्यात् इति विरोधसूचकः । 'भू सत्तायाम्' धातोः भूते सौ कर्तरि परस्मैपदे प्रथमपुरुषैकवचनं दिप् । इकार उच्चारणार्थः 'भूते सिः' (सा०

सू० ७२४), 'दिबादावट्' (सा० सू० ७०७), अभू सद् इति स्थिते 'दादेः पे' (सा० सू० ७२५) इति सेर्लोपः । अत्र 'अभूत्' इति क्रियापदम् । कः कर्ता ? । यः सकलभरतभर्ता सकलं-समग्रं षट्खण्डलक्षणं यद् भरतं-भरतक्षेत्रं तस्य भर्ता-स्वामी धारको वा । "भर्ता स्वामिनि धारक" इति विश्वः । पुनः कथंभूतः ? यो जिनो हृद्यः-मनोहरः । पुनः कथंभूतः ? । 'अमितापायहृत्' अमितान्-अपरिमितान् अपायान्-कष्टान् हरतीत्यमितापायहृत् ।। ६५ ।।

(३)

सौ० वृ०—यः शान्तिकृद् भवति स कौ-पृथिव्यां स्थावरजङ्गमप्राणिनां रक्षको भवति । अनेन सम्बन्धेनायातस्य श्रीकुन्थुनामसप्तदशजिनस्य स्तुतिव्याख्यानं व्यक्तीकरोमि-भवत्विति ।

तस्मै श्रीकुन्थुनाथाय मम नमः भवतु इत्यन्वयः । 'भवतु' इति क्रियापदम् । किं कर्तृ ? । 'नमः' प्रणामः । 'भवतु' अस्तु । कस्य ? 'मम' मत्सम्बन्धी । कस्मै ? । श्रीशब्दः पूज्यार्थे 'श्रीकुन्थुनाथाय' कुन्थुनाथस्वामिने । किंविशिष्टाय श्रीकुन्थुनाथाय ? । अमितः-अपरिमितः शमितः-शमं नीतः तादृशो यो मोहो-मोहनीयकं कर्म तस्य आयामी-दीर्घविस्तारी तापो-दवथुर्येन स (तस्मै) 'अमितशमित-मोहायामितापाय' । पुनः किंविशिष्टाय श्रीकुन्थुनाथाय ? । 'तस्मै' प्रसिद्धाय । प्रक्रान्तप्रसिद्धार्थस्तच्छब्दो यच्छब्दमपेक्षते । तस्मै कस्मै ? । यः कुन्थुनाथः सकलं-संपूर्णं यद् भरतं-भरतक्षेत्रं षट्खण्डलक्षणं तस्य भर्ता-स्वामी चक्रवर्ती अपि जिनः-तीर्थंकरः अभूदित्यन्वयः । 'अभूत्' इति क्रियापदम् । कः कर्ता ? । यः श्रीकुन्थुनाथः अभूद्-जातः । किंविशिष्टो यः ? । 'जिनः तीर्थंकरः । पुनः किंविशिष्टो यः । 'सकलभरतभर्ता' । अपिशब्दः समुच्चयार्थे । चक्रवर्ती भूत्वा जिनो जात इत्यर्थः । पुनः किंविशिष्टो यः । 'हृद्यः' मनोहरः । पुनः किंविशिष्टाय ? । अक्षाणि-इन्द्रियाणि तान्येव पाशा रज्जवः तैरयमिता-असम्बद्धा ये शमिनः-साधवः तेषां तमः-अज्ञानं तत् हन्तीति (स तस्मै) 'अक्षपाशायमितशमितमोहाय' । इदमपि (श्री) कुन्थुनाथायपदस्य विशेषणम् । पुनः किंविशिष्टो यः ? । [आयामिनः-विस्तारिणः] (अमितान्-अपरिमितान्) ये अपाया-विघ्नास्तान् हरतीति 'आयामि(अमिता)-तापायहृत् । एतादृशाय कुन्थुनाथाय नमः । इति पदार्थः ।।

अथ समासः—कौ-पृथिव्यां स्वामित्वेन तिष्ठतीति कुन्थुः, कुन्थुश्चासौ नाथश्च कुन्थुनाथः, श्रिया [युक्तः]-चतुस्त्रिंशदतिशयलक्ष्म्या युक्तः कुन्थुनाथः श्रीकुन्थुनाथः, तस्मै श्रीकुन्थुनाथाय । न मितः अमितः, शमं-उपशमं इतः-प्राप्तः शमितः[1], अमितश्चासौ शमितश्च अमितशमितः, अमितशमितश्चासौ मोहश्च अमितशमितमोहः, आयामः अस्यास्तीति आयामी, आयामी चासौ तापश्च आयामितापः, अमितशमितमोहश्च (?) आयामितापो येन सः अमितशमितमोहायामितापस्तस्मै अमितशमितमोहाया-

१. अयुक्तोऽयं विग्रहः, 'शमिते' त्यसामासिकम्पदम् ।

मितापाय । सकलं च तद् भरतं च सकलभरतं, सकलभरतस्य भर्ता सकलभरतभर्ता । रागादीन् शत्रून् जयतीति जिनः । अक्षाण्येव पाशाः अक्षपाशाः, न यमिता अयमिताः, अक्षपाशैरयमिता अक्षपाशायमिताः, अक्षपाशायमिताश्च शमिनश्च अक्षपाशायमितशमिनः, अक्षपाशायमितशमिनां तमांसि अक्षपाशायमितशमितमांसि, तानि हन्तीति अक्षपाशायमितशमितमोहः, तस्मै अक्षपाशायमितशमितमोहाय । न मित अमितः, अमितश्चासौ अपायश्च अमितापायः, अमितापायं हरतीति अमितापायहृत् ।। मालिनीच्छन्दसा स्तुतिरियम् ।। इति प्रथमवृत्तार्थः ।। ६५ ।।

(४)

दे० व्या०—भवत्त्विति । तस्मै (श्री)कुन्थुनाथाय मम नमः-नमस्कारो भवतु इत्यन्वयः । 'भू सत्तायाम्' धातुः । 'भवतु' इति क्रियापदम् । कः कर्ता ? । 'नमः' । कस्मै ? । '(श्री)कुन्थुनाथाय' । कस्य ? 'मम' । किंविशिष्टाय श्रीकुन्थुनाथाय ? । 'अमितशमितमोहायामितापाय' अमितः-अप्रमाणः शमितो-विनाशं नीतः मोहस्य आयामितापः-आनाहसन्तापो येन स तस्मै । "दैर्घ्यं आयाम आनाहः" इत्यभिधानचिन्तामणिः (का० ६, श्लो० ६७) । यत्तदोर्नित्याभिसम्बन्धाद् यः कुन्थुनाथः सकलभरतभर्ताऽपि जिनः-तीर्थङ्करः अभूद्-आसीदित्यन्वयः । 'भू सत्तायाम्' धातुः । 'अभूत्' इति क्रियापदम् । कः कर्ता ? । कुन्थुनाथो 'जिनः' रागादिजेतृत्वात् जिनः । पुनः किंविशिष्टः ? । 'सकलभरतभर्ता' सकलं-समग्रं यद् भरतक्षेत्रं तस्य भर्ता-प्रभुः । अपिशब्दो विरोधाभासालङ्काराय । पुनः किंविशिष्टः ? । 'हृद्यः'-प्रियः । कस्मै ? 'अक्षपाशायमितशमितमोहाय' अक्षाणि-इन्द्रियाणि तेषां पाशैः-बन्धनैः अयमिता-अबद्धाः ते च ते शमितमोहाश्चेति विग्रहः तस्मै । "पाशस्तु बन्धनग्रन्थिः" इत्यभिधानचिन्तामणिः (का० ३, श्लो० ५९५) । पुनः किंविशिष्टः ? । 'अमितापायहृत्' अमितान्-अप्रमाणान् अपायान्-कष्टान् हरतीति अमितापायहृत् ।। इति प्रथमवृत्तार्थः ।। ६५ ।।

(५)

ध० टीका—भवत्त्विति । 'भवतु' अस्तु । 'मम नमः' मत्सम्बन्धी नमस्कारः । 'श्रीकुन्थुनाथाय' श्रीकुन्थुनाम्ने नाथाय । 'तस्मै' । 'अमितशमितमोहायामितापाय' अमितः-अपरिगतः शमितः-शमं नीतो मोहायामितापः-मोहनीयदीर्घदवथुर्येन तस्मै । 'हृद्यः' हृदयहारी । 'सकलभरतभर्ता' समस्तभरतवर्षाधिपः चक्रवर्तीत्यर्थः । 'अभूत्' संवृत्तः । 'जिनोऽपि' जिनश्च । अपिशब्दः समुच्चयार्थः । 'अक्षपाशायमितशमितमोहाय' अक्षपाशैः-इन्द्रियरज्जुभिः अयमिता-अबद्धा ये शमिनः-मुनयस्तेषां तमोहाय-अज्ञानघातिने । 'अमितापायहृद्' अमितान् अपायान् हरति यः सः । तस्मै श्रीकुन्थुनाथाय मम नमो भवतु यः सकलभरतभर्ता जिनोऽपि अभूदिति सम्बन्धः ।। ६५ ।।

(६)

अवचूरिः

तस्मै श्रीकुन्थुनाथाय जिनाय नमोऽस्तु । अमितः शमितो मोहस्यायामितापो-दीर्घदवथुर्येन तस्मै । यः स्वामी हृद्यो-हृदयहारी । संपूर्णभरतक्षेत्राधिपः-चक्रवर्ती । जिनोऽप्यभूत् । किंभूतः ? । अमितान-पायान् हरतीति तस्मै । किंभूताय ? । अक्षपाशा-इन्द्रियरज्जवस्तैरयमिता-अबद्धा ये शमिनो-मुनयस्तेषां तमोहाय-अज्ञानघातिने ।। ६५ ।।

सकलतीर्थपतिभ्यः प्रणतिः—

सकलजिनपतिभ्यः पावनेभ्यो नमः सन्—
नयनरवरदेभ्यः सारवादस्तुतेभ्यः ।
समधिगतनुतिभ्यो देववृन्दाद् गरीयो—
नयनरवरदेभ्यः सारवादस्तु तेभ्यः ।। २ ।। ६६ ।।

- मालिनी

(१)

ज० वि०—सकलेति । तेभ्यः सकलजिनपतिभ्यः-समस्ततीर्थकरेभ्यः नमः अस्तु इति क्रियाकारकान्वयः । अत्र 'अस्तु' इति क्रियापदम् । किं कर्तृ ? 'नमः' । केभ्यः ? 'सकलजिनपतिभ्यः' । कथंभूतेभ्यः ? 'तेभ्यः' प्रसिद्धेभ्यः । अयं तच्छब्दः प्रसिद्धार्थवाचकत्वाद् यच्छब्दं नापेक्षते । यदुक्तम्—"प्रक्रान्तप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यदुपादानं नापेक्षते" इति । पुनः कथंभूतेभ्यः ? 'पावनेभ्यः' पवित्रताजनकेभ्यः । पुनः कथं० ? 'सन्नयनरवरदेभ्यः' नयने-लोचने रवः-शब्दः रदा-दन्ताः, सन्तः-शोभना नयनरवरदा येषां ते तथा तेभ्यः । पुनः कथं० ? 'सारवादस्तुतेभ्यः' सारः-अर्थप्रधानः वादः-उक्तिर्येषां तैः स्तुतेभ्यः-वन्दितेभ्यः, यदि वा सारेण वादेन कृत्वा स्तुतेभ्यः । पुनः कथं० ? 'समाधिगतनुतिभ्यः' समधिगता-प्राप्ता नुतिः-प्रणामो यैस्ते तथा तेभ्यः । कस्मात् ? 'देववृन्दात्' सुरसमूहात् । कथंभूताद् देववृन्दात् ? 'सारवात्' आरवेण-शब्देन सह वर्तमानात्, स्तुतिपरादित्यर्थः । पुनः कथं० सकलजिनपतिभ्यः ? 'गरीयोनयनरवरदेभ्यः' गरीयोनयाः-गरिष्ठनीतयो ये नरा-मानवाः तेषां वरदेभ्यः-प्रार्थितार्थप्रदेभ्यः ।।

अथ समासः—जिनानां जिनेषु वा पतयो जिनप० 'तत्पुरुषः' । सकलाश्च ते जिनपतयश्च सकल० 'कर्मधारयः' । तेभ्यः सकल० । नयने च रवश्च रदाश्च नयन० 'इतरेतरद्वन्द्वः' । सन्तो[1] नयनरवरदा येषां ते सन्नयन० 'बहुव्रीहिः' । तेभ्यः सन्नयन० । सारो वादो येषां ते सारवादाः 'बहुव्रीहिः' । सारवादैः स्तुताः सार० 'तत्पुरुषः' । तेभ्यः सार० । यदि वा सारश्चासौ वादश्च सारवादः 'कर्मधारयः' । सारवादेन स्तुताः सार० 'तत्पुरुषः' । तेभ्यः सार० । समधिगता नुतिर्यैस्ते सम० 'बहुव्रीहिः' । तेभ्यः सम० । देवानां वृन्दं देववृन्दं 'तत्पुरुषः' । तस्माद् देववृन्दात् । गरीयांसो नया येषां ते गरीयोनयाः 'बहुव्रीहिः' । गरीयोनयाश्च ते नराश्च गरीयो० 'कर्मधारयः' । वरं ददतीति वरदाः 'तत्पुरुषः' । गरीयोनयनराणां वरदाः गरीयो० 'तत्पुरुषः' । तेभ्यो गरीयो० । सह आरवेण वर्तते यत् तत् सारवम् 'तत्पुरुषः(?)' । तस्मात् सारवात् ॥ इति काव्यार्थः ॥ ६६ ॥

(२)

सि० वृ०—सकलेति । तेभ्यः सकलजिनपतिभ्यः-समस्ततीर्थकरेभ्यः नमोऽस्तु । 'अस्तु' इति क्रियापदमध्याह्रियते । किं कर्तृ ? । 'नमः' । केभ्यः ? । 'सकलजिनपतिभ्यः' सकलाश्च ते जिनपतयश्च सकलजिनपतयस्तेभ्यः । कथंभूतेभ्यः ? । 'तेभ्यः'-प्रसिद्धेभ्यः । तच्छब्दोऽत्र प्रसिद्धार्थवाचकः, तेन यच्छब्दस्यानापेक्षतेति मन्तव्यम् । यदाह—"प्रक्रान्तप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यदुपादानं नापेक्षते" इति । पुनः कथंभूतेभ्यः ? । 'पावनेभ्यः'-पवित्रेभ्यः । पुनः कथंभूतेभ्यः ? 'सन्नयनरवरदेभ्यः' नयने-लोचने रवः-शब्दः रदा-दन्ताः, नयने च रवश्च रदाश्च नयनरवरदं 'इतरेतरद्वन्द्वः'[2] 'प्राण्यङ्गतूर्यसेनाङ्गानाम्'[3] इति एकवद्भावः, सत्-शोभनं नयनरवरदं येषां ते तथा तेभ्यः । इन्दीवरश्रीतिरस्कारित्वेन नयनयोः स्निग्धगंभीरघोषत्वेन योजनगामित्वेन च रवस्य हीरकादिन्यक्कारित्वेन च रदानां शोभनत्वं स्वयं ज्ञातव्यम् । पुनः कथंभूतेभ्यः ? । 'सारवादस्तुतेभ्यः' सारः-अर्थप्रधानो वादः-उक्तिर्येषां ते तैः स्तुतेभ्यः-स्तोत्रीकृतेभ्यः वन्दितेभ्यो वा । पुनः कथंभूतेभ्यः ? । 'समधिगतनुतिभ्यः' समधिगता-प्राप्ता नुतिः-प्रणामो यैस्ते तथा तेभ्यः । कस्मात् ? 'देववृन्दात्'-सुरसमूहात् । "स्त्रियां तु संहतिर्वृन्दं निकुरम्बं कदम्बकं" इत्यमरः (श्लो० १०६८) । कथंभूताद् देववृन्दात् ? । 'सारवात्' आरवेण-शब्देन सह वर्तमानात्, स्तुतिपरादित्यर्थः । पुनः कथंभूतेभ्यः सकलजिनपतिभ्यः ? । 'गरीयोनयनरवरदेभ्यः' अतिशयेन गुरवो-गरीयांसो नया येषु ते गरिष्ठनीतयो ये नरा-मानवाः तेषां वरं ददति ते वरदास्तेभ्यः । "देवाद् वृते वरः श्रेष्ठे, त्रिषु क्लीबं मनाक् प्रिये" इत्यमरः (श्लो० २६८१) । 'ईयस्विष्टौ (डितावििति वक्तव्यौ)' (सा० सू० ६५४) इति ईयसुस् । 'गुर्वादेरिष्ठेमेयस्सु (गरादिष्ट्यलोपश्च)' (सा० सू० ६५६) इति गुरोर्गरादेशः ष्ट्यलोपश्च ॥ ६६ ॥

---

१. 'सत् नयनरवरदं' इति प्रतिभाति ।

२. नत्वयमितरेतरः परं समाहारद्वन्द्वः ।

३. 'प्राणितूर्याङ्गानाम्' इति सिद्धहैमे (अ० ३, पा० १, सू० १३७) ।

(३)

सौ० वृ०—सकलेति । तेभ्यः सकलजिनपतिभ्यः-समस्ततीर्थकृद्भ्यः नमः अस्तु । 'अस्तु' इति क्रियापदम् । किं कर्तृ ? । 'नमः' । 'अस्तु' भवतु । नमस् इत्यव्ययं प्रणामार्थे । केभ्यः ? । 'सकलजिनपतिभ्यः'। किंविशिष्टेभ्यः सकलजिनपतिभ्यः ? । 'पावनेभ्यः' पवित्रेभ्यः । पुनः किंविशिष्टेभ्यः सकलजिनपतिभ्यः ? । सन्तः-शोभमाना नयनानि-लोचनानि रवाः-शब्दा रदा-दन्ता येषां ते सन्नयनरवरदास्तेभ्यः 'सन्नयनरवरदेभ्यः' । पुनः किंविशिष्टेभ्यः सकलजिनपतिभ्यः ? । सारः-श्रेष्ठः वादो-वाक्चातुर्यलक्षणः तेन स्तुताः-स्तविताः सारवादस्तुताः तेभ्यः 'सारवादस्तुतेभ्यः' । पुनः किंविशिष्टेभ्यः सकलजिनपतिभ्यः ? । सं-सम्यक् प्रकारेण अधिगता-प्राप्ता नुतिः-स्तुतिः पूजा वा यैस्ते समधिगतनुतयः तेभ्यः 'समधिगतनुतिभ्यः' । कस्मात् ? । 'देववृन्दात्' । किंविशिंष्टेभ्यः सकलजिनपतिभ्यः ? । 'तेभ्यः' यमकान्त्यपदगतस्तच्छब्दः यच्छब्दं नापेक्षते, तेभ्यः-प्रसिद्धेभ्यः । पुनः किंविशिष्टेभ्यः सकलजिनपतिभ्यः ? । गरीयांसो-महान्तो ये नया-नैगमाद्या येषां ते तादृशा ये नरा-मनुष्याः तेषां वरदा-अभीष्टदायकाः गरीयोनयनरवरदाः, तेभ्यः 'गरीयोनयनरवरदेभ्यः' । तादृशेभ्यः सकलजिनपतिभ्यः नमोऽस्तु । इति पदार्थः ॥

अथ समासः—जिनानां पतयः जिनपतयः, सकलाश्च ते जिनपतयश्च सकलजिनपतयः, तेभ्यः सकलजिनपतिभ्यः । नयनानि च रवाश्च रदाश्च नयनरवरदाः[1], सन्तः-शोभमानाः प्रशस्ता वा नयनरवरदा येषां ते सन्नयनरवरदाः, तेभ्यः सन्नयनरवरदेभ्यः । वदनं वादः, सार(रो) वादो येषां ते सारवादाः, सारवादैः स्तुताः सारवादस्तुताः, यद्वा सारश्चासौ वादश्च सारवादः-शास्त्रं, सारवादेन स्तुताः सारवादस्तुताः, तेभ्यः सारवादस्तुतेभ्यः । समधिगता नुतिर्यैस्ते समधिगतनुतयः, तेभ्यः समधिगतनुतिभ्यः । देवानां वृन्दं देववृन्दं, तस्माद् देववृन्दात् । अतिशयेन गुरुर्गरीयान्[2], गरीयांसो नया येषां ते गरीयोनयाः, गरीयोनयाश्च ते नराश्च गरीयोनयनराः, वरं ददतीति वरदाः, गरीयोनयनराणां वरदा गरीयोनयनरवरदाः, तेभ्यः गरीयोनयनरवरदेभ्यः । आरवैः सहितं सारवं, तस्मात् सारवात् ॥ इति द्वितीयवृत्तार्थः ॥ ६६ ॥

(४)

दे० व्या०—सकलेति । सकलजिनपतिभ्यः नमः-नमस्कारः अस्तु-भवतु इति संबन्धः । 'अस् भुवि' धातुः । 'अस्तु' इति क्रियापदम् । कः कर्ता ? । (नमः-)'नमस्कारः' । केभ्यः ? । 'सकलजिनपतिभ्यः' सकलाः-समस्ता ये जिनाः-सामान्यकेवलिनः तेषां पतयः-स्वामिनः तेभ्यः, तीर्थप्रवर्तकत्वेन तेषां पतित्वमत्रावसेयम् । किंविशिष्टेभ्यः सकलजिनपतिभ्यः ? । 'पावनेभ्यः'-पवित्रेभ्यः । "पवित्रं पावनं पूतं"

१. **'नयनरवरदं' इति प्रतिभाति ।**

२. **'गुरवो गरीयांसः' इति प्रतिभाति ।**

इत्यभिधानचिन्तामणिः (का० ६, श्लो० ७१) । पुनः किंविशिष्टेभ्यः ? । 'सन्नयनरवरदेभ्यः' नयनं-लोचनं रवो-देशनाध्वनिः रदा-दन्ताः एतेषां 'द्वन्द्वः', ततः सन्तः-शोभना नयनरवरदा येषां ते तथेति समासः । अत्रेन्दीवरश्रीतिरस्कारत्वेन नयनयोः, स्निग्धगम्भीरघोषत्वेन योजनगामित्वेन च देशनाध्वनेः, हीरकादिन्यक्कारित्वेन च रदानां शोभनत्वमवसेयम् । पुनः किंविशिष्टेभ्यः ? । 'सारवादस्तुतेभ्यः' सारः-प्रधानो वादो-वाग्विलासो येषां ते सारवादाः-पण्डिताः तैः स्तुतेभ्यः-स्तोत्रीकृतेभ्यः । पुनः किंविशिष्टेभ्यः ? । 'समधिगतनुतिभ्यः' समधिगता-प्राप्ता नुतिः-स्तुतिः यैस्ते तथा तेभ्यः । "स्तवः स्तोत्रं स्तुतिर्नुतिः" इत्यभिधानचिन्तामणिः (का० २, श्लो० १८३) । कस्मात् ? । 'देववृन्दात्' देवानां वृन्दं[1]-समूहः तस्मात् । अत्र सामान्यदेवशब्दग्रहणेन देवाश्चातुर्निकाया बोध्याः । किंविशिष्टाद् देववृन्दात् ? । सारवात्-सशब्दात् । समारब्धस्तुतित्वादिति भावः । पुनः किंविशिष्टेभ्यः ? । 'गरीयोनयनरवरदेभ्यः' गरीयांसः नया-नीतयो येषु ते च ते नरा-मनुष्यास्तेषां वरं-वाञ्छितं ददतीति वरदाः तेभ्यः ।। इति द्वितीयवृत्तार्थः ।। ६६ ।।

(५)

ध० टीका—सकलेति । 'सकलजिनपतिभ्यः' निखिलतीर्थकृद्भ्यः । 'पावनेभ्यः' पवित्रताजनकेभ्यः । 'नमः' इति स्तुत्यर्थे । 'सन्नयनरवरदेभ्यः' रदाः-दशनाः शोभना नयाश्च रवश्च रदाश्च येषां तेभ्यः । 'सारवादस्तुतेभ्यः' सारः-अर्थप्रधानो वादः-उक्तिर्येषां तेभ्यः, सारेण वादेन स्तुतेभ्यः-वन्दितेभ्यः । 'समधिगतनतिभ्यः'[2] प्राप्तप्रणामेभ्यः । 'देववृन्दात्' सुरकदम्बकात् । 'वरीयोनयनरवरदेभ्यः'[3] वरीयोनयाः-उरुतरनीतयो ये नरास्तेभ्यो वरदेभ्यः । सारवात् सशब्दात् । स्तुतिपरादित्यर्थः । 'अस्तु' भवतु । 'तेभ्यः' । ये इत्थंभूताः 'सारवात्' देववृन्दात् समधिगतनतिभ्यः तेभ्यः सकलजिनपतिभ्यो नमः इति योगः ।। ६६ ।।

(६)

अवचूरिः

तेभ्यः सर्वजिनेन्द्रेभ्यो नमोऽस्तु । किंभूतेभ्यः ? । 'पावनेभ्यः'-पवित्रताजनकेभ्यः । सन्तः-शोभमाना नयनानि-लोचनानि रवो-देशनाध्वनिः रदा-दन्ताश्च येषां तेभ्यः । सारः-अर्थप्रधानो वाद-उक्तिर्येषां तैः स्तुताः । यद्वा सारश्चासौ वादश्च तेन स्तुताः तेभ्यः । समधिगता-प्राप्ता नुतिर्यैस्तेभ्यः । कस्मात् ? । 'देवसमूहात्' । किंविशिष्टात् ? । 'सारवात्'-प्रस्तुतस्तुतिकात् । गरीयांसो-गरिष्ठा नया-नीतयो येषु ते च ते नराश्च तेषां वरदेभ्यः । इत्थंभूतेभ्यो जिनेभ्यो नमोऽस्तु-भवतु ।। ६६ ।।

---

१. अशुद्धमिदम्, 'वृन्द' इत्यपेक्ष्यते शब्दस्य पुल्लिङ्गत्वात् ।

२. अन्यासु टीकासु 'xxनुतिभ्य' इति पाठस्य स्वीकारः परन्तु धनपालीयटीकायां-'नतिभ्य' इति पाठस्य स्वीकृतिर्दृश्यते तत्र कारणं 'समधिगतनतिभ्य' इति पाठान्तरम् ।

३. अत्र 'वरीय' इत्युचितम्मूलपाठास्यैवम्विधात् ।

सिद्धान्तस्मरणम्—

स्मरत विगतमुद्रं जैनचन्द्रं चकासत्—
कविपदगमभङ्गं हेतुदन्तं कृतान्तम् ।
द्विरदमिव समुद्यद्दानमार्गं धुताघै—
कविपदगमभङ्गं हे तुदन्तं कृतान्तम् ॥ ३ ॥ ६७ ॥

- मालिनी

(१)

ज० वि०—स्मरतेति । हे लोकाः ! यूयं जैनचन्द्रं-जिनचन्द्रसम्बन्धिनं कृतान्तं-सिद्धान्तं स्मरत-ध्यायत इति क्रियाकारकसम्बन्धः । अत्र 'स्मरत' इति क्रियापदम् । के कर्तारः ? 'यूयम्' । कं कर्मतापन्नम् ? 'कृतान्तम्' । कथंभूतम् ? 'जैनचन्द्रम्' । कृतान्तं कमिव ? 'द्विरदमिव' हस्तिनमिव, हस्तितुल्यमित्यर्थः । पुनः कथं० कृतान्तम् ? 'विगतमुद्रम्' अपर्यन्तम् । पुनः कथं० ? 'चकासत्कविपदगमभङ्गम्' कविपदानि-कवियोग्यशब्दाः गमाः-सदृशपाठा भङ्गा-एकद्वित्र्यादिपदसंयोगोत्थाः, चकासन्तः-शोभमानाः कविपदगमभङ्गा यस्मिन् स तथा तम् । पुनः कथंभूतम् ? 'हेतुदन्तम्' हेतवः प्रतिपक्षभेदकत्वाद् दन्तौ-विषाणौ यस्य स तथा तम् । पुनः कथंभूतम् ? 'समुद्यद्दानमार्गम्' समुद्यत्-समुल्लसद् दानमार्गो-ज्ञानादीनां वितरणक्रमो यत्र स तथा तम् । पुनः कथं० ? 'धुताघैकविपदगम्' अघं-पापं तदेवैका-अद्वितीया विपद्-आपत् सैव दुःखफलदायकत्वाद् अगो-वृक्षः, धुतो-निरस्तः अघैकविपदगो येन स तथा तम् । पुनः कथं० ? 'अभङ्गम्' अजेयम् । किं कुर्वन्तं जैनचन्द्रं कृतान्तम् ? 'तुदन्तम्' पीडयन्तम् । कं कर्मतापन्नम् ? 'कृतान्तं' मरणम् । अत्र द्विरदमिवेत्यनेन जिनसिद्धान्तगजयोः साम्यं प्रत्यपादि । यथाहि-गजोऽपि विगतमुद्रः-अपेतमर्यादः स्वच्छन्दो भवति तथा तस्यापि कविपदगमभङ्गाः कविना वर्णयितुं योग्याः पदचारक्रमाश्चकासद्दन्ताश्च भवन्ति, दानमार्गो-मदप्रवाहश्च समुदेति तथा सोऽपि वृक्षं धुनोति अभङ्गश्च भवति तथा सोऽपि कृतान्तं-कृतविनाशं विपक्षादिकं तुदतीति ॥

अथ समासः—विगता मुद्रा यस्मात् स विगत० 'बहुव्रीहिः । तं विग० । जिनानां जिनेषु वा चन्द्रो जिनचन्द्रः 'तत्पुरुषः' । जिनचन्द्रस्यायं जैन० । तं जैनचन्द्रम् । कवीनां योग्यानि पदानि कवि० 'तत्पुरुषः' । कविपदानि च गमाश्च भङ्गाश्च कविपद० 'इतरेतरद्वन्द्वः' । चकासन्तः कविपदगमभङ्गा यस्मिन् स चकासत्क० 'बहुव्रीहिः' । तं चकासत्क० । द्विरदपक्षे तु गमस्य भङ्गा गमभङ्गाः 'तत्पुरुषः' । पदानां गमभङ्गाः पदगम० 'तत्पुरुषः' । शेषं प्राग्वत् । हेतव एव दन्ता यस्य स हेतु० 'बहुव्रीहिः' । तं

हेतु० । द्वौ रदौ यस्य स द्विरदः 'बहुव्रीहिः' । तं द्विरदम् । दानस्य मार्गो दानमार्गः 'तत्पुरुषः' । समुद्यद् दानमार्गो यस्मिन् स समुद्य० 'बहुव्रीहिः । तं समुद्य० । एका चासौ विपत् च एकविपत् 'कर्मधारयः' । अघमेवैकविपद् अघै० 'कर्मधारयः' । अग इव अगः । अघैकविपच्चासावगश्च अघैकवि० 'कर्मधारयः' । धुतोऽघैकविपदगो येन स धुताघै० । तं धुता० । न विद्यते भङ्गो यस्यासौ अभङ्गः 'बहुव्रीहिः' । तं अभङ्गम् । कृतः अन्तो येन स कृतान्तः 'बहुव्रीहिः' । तं कृतान्तम् ॥ इति काव्यार्थः ॥ ६७ ॥

(२)

सि० वृ०—स्मरतेति । हे लोकाः ! यूयं जिनचन्द्रस्येमं जैनचन्द्रं कृतान्तं-सिद्धान्तं स्मरत-ध्यायतेत्यर्थः । 'स्मृ चिन्तायाम्' धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि परस्मैपदे मध्यमपुरुषबहुवचनं त । 'अप्०' (सा० सू० ६९१), 'गुणः' (सा० सू० ६९२), 'स्वरहीनं०' (सा० सू० ३६) । तथा च 'स्मरत' इति सिद्धम् । अत्र 'स्मरत' इति क्रियापदम् । के कर्तारः ? । 'यूयम्' । कं कर्मतापन्नम् ? । 'कृतान्तम्' । कमिव ? । 'द्विरदमिव' । द्वौ रदौ-दन्तौ यस्य स द्विरदस्तमिव, हस्तितुल्यमित्यर्थः । कथंभूतं कृतान्तम् ? 'विगतमुद्रं' विगता मुद्रा-इयत्ता मानमिति यावद् यस्मात् स तम् । पुनः कथंभूतम् ? । 'चकासत्कविपदगमभङ्गम्' कविपदानि-उत्प्रेक्षा(द्य)लङ्कारव्यङ्ग्यसूचकानि गमाः-सदृशपाठाः भङ्गाः-विकल्पसमूहाः, कविपदानि च गमाश्च भङ्गाश्च कविपदगमभङ्गाः 'इतरेतरद्वन्द्वः', चकासन्तः-शोभमानाः कविपदगमभङ्गा यस्मिन् स तथा तम् । पुनः कथंभूतम् ? । 'हेतुदन्तं' हेतव एव प्रतिपक्षभेदकत्वाद् दन्तौ-विषाणौ यस्य स तम् । "अङ्गुलिः कर्णिका दन्तः-विषाणौ स्कन्ध आसनं" इति हैमः (का० ४, श्लो० २९०) । पुनः कथंभूतम् ? । 'समुद्यद्दानमार्गम्' समुद्यत्-समुल्लसन् दानमार्गो-ज्ञानादीनां वितरणक्रमो यत्र स तम् । पुनः कथंभूतम् ? । 'धुताघैकविपदगं' अघं-पापं तदेवैका-अद्वितीया विपद्-आपत् सैव दुःखफलदायकत्वाद् अगो-वृक्षः, धुतो-निरस्तः अघैकविपदगो येन स तथा तम् । एका चासौ विपच्च एकविपत् इति 'कर्मधारयः' । पुनः कथंभूतम् ? । 'अभङ्गं' न विद्यते भङ्गो यस्य स तम्, अजेयमित्यर्थः । किं कुर्वन्तं जैनचन्द्रं कृतान्तम् ? । 'तुदन्तं'-पीडयन्तम् । कम् ? । 'कृतान्तं'-मरणं, एतत्प्रतिपादितानुष्ठानकृतो भवग्रहणाभावेन मरणाभावादिति भावः । अत्र द्विरदेन सह सिद्धान्तस्य श्लेषः । सोऽपि विगतमुद्रो-गतमर्यादः स्वच्छन्द इति प्रलम्बश्च भवति । तस्यापि कवेर्वर्णयितुं योग्याः पदप्रचारक्रमाश्चकासद्दन्ताश्च भवन्ति । दानमार्गो-मदप्रवाहश्च समुदेति । सोऽपि वृक्षं धुनोति अभङ्गश्च भवति । कृतान्तं-कृतविनाशं विपक्षादिकं तुदतीति ॥ ६७ ॥

(३)

सौ० वृ०—स्मरतेति । हे लोकाः ! यूयं कृतान्तं-सिद्धान्तं स्मरतेत्यन्वयः ।'स्मरत' इति क्रियापदम् । के कर्तारः ? । 'यूयम्' । 'स्मरत' ध्यायत । कं कर्मतापन्नम् ? । 'कृतान्तं' सिद्धान्तम् ।

"राद्धसिद्धकृतेभ्योऽन्तः" इति हैमः (का० २, श्लो० १५६) । किंविशिष्टं कृतान्तम् ? । 'विगतमुद्रं' अपास्तपर्यन्तम् । पुनः किंविशिष्टं कृतान्तम् ? । 'जैनचन्द्रं' तीर्थकरसत्कम् । पुनः किंविशिष्टं कृतान्तम् ? । चकासन्तो दीप्यमानाः कवीनां-पण्डितानां पदानि-पदरचना गमाः-सदृशपाठाः भङ्गा-एकद्वित्र्यादयः येषु स चकासत्कविपदगमभङ्गः तं 'चकासत्कविपदगमभङ्गम्' । पुनः किंविशिष्टं कृतान्तम् ? । हेतवः [दृष्टान्ताः] एव प्रतिपक्षदुर्गभेदनत्वाद् दन्ता इव दन्ता यस्मिन् स हेतुदन्तः तं हेतुदन्तम् । पुनः किंविशिष्टं कृतान्तम् ? । समुद्यत्-सम्यक्प्रकारेण उद्यद्-विलसद् दानं-ज्ञानदर्शन-चारित्रादीनां वितरणं तस्य मार्गः-पन्थाः यस्मिन् स समुद्यद्दानमार्गः तं 'समुद्यद्दानमार्गम्' । पुनः किंविशिष्टं कृतान्तम् ? । धुतो-निराकृतः अघं-पापं तदेव एका-अद्वितीया विपद्-आपत् सैव अगो-वृक्षो येन स धुताघैकविपदगः तं 'धुताघैकविपदगम्' । पुनः किंविशिष्टं कृतान्तम् ? 'अभङ्गं' अजेयम् । कृतान्तं किं कुर्वन्तम् ? । 'तुदन्तं' पीडयन्तम् । कं कर्मतापन्नम् ? । 'कृतान्तम्' यमं मरणं [कृतान्तं-सिद्धान्तं वा] । कमिव ? । 'द्विरदमिव' हस्तिनमिव । हस्तिकृतान्तयोः सादृश्यम् । द्विरदोऽपि विगतमुद्रो-मुक्तमर्यादो भवति, दीप्यमानकविवर्णनीयपदगमनभङ्गो भवति, दन्तैः कृत्वा दुर्गभेद्यो भवति, समुद्यद्दानमदमार्गो भवति, निराकृतदुष्टवृक्षोऽपि भवति, (अभङ्गश्च भवति) अरिवर्गं व्यथयन् भवति इति द्विरदेन सह कृतान्तस्य-सिद्धान्तस्य छायार्थः । इति पदार्थः ।।

अथ समासः—विगता मुद्रा यस्य स विगतमुद्रः, तं विगतमुद्रम् । जिनेषु चन्द्राः जिनचन्द्राः, जिनचन्द्राणामयं जैनचन्द्रः, तं जैनचन्द्रम् । पदानि च गमाश्च भङ्गाश्च पदगमभङ्गा, चकासन्तः कविभिः कृत्वा पदगमभङ्गा यस्मिन् स यस्य वा चकासत्कविपदगमभङ्गः, तं चकासत्कविपदगमभङ्गम् । हेतव एव दन्ता यस्य स हेतुदन्तः, तं हेतुदन्तम् । द्वौ रदौ यस्य स द्विरदः तं द्विरदम् । समुद्यद् दानमार्गो यस्य स समुद्यद्दानमार्गः, तं समुद्यद्दानमार्गम् । एका चासौ विपच्च एकविपत्, अघेनैव एकविपत् अघैकविपत् सैव अगः अघैकविपदगः, गच्छतीति गः, न गः अगः, धुतः अघैकविपदगो येन स धुताघैकविपदगः, तं धुताघैकविपदगम् । नास्ति भङ्गः-पराजयो यस्य सः अभङ्गः, तं अभङ्गम् । तुदतीति तुदन्, तं तुदन्तम् । हे इत्यामन्त्रणे भिन्नपदम् । इति तृतीयवृत्तार्थः ।। ६७ ।।

(४)

दे० व्या०—स्मरतेति । हे भव्यजनाः ! यूयं द्विरदमिव-हस्तिनमिव जैनचन्द्रं कृतान्तं स्मरत-स्मृतिविषयीकुरुतेत्यन्वयः । 'स्मृ चिन्तायाम्' धातुः । 'स्मरत' इति क्रियापदम् । के कर्तारः ? । 'यूयम्' । कं कर्मतापन्नम् ? । 'कृतान्तं' सिद्धान्तम् । "राद्धसिद्धकृतेभ्योऽन्त, आप्तोक्तिः समयागमौ" इत्यभिधानचिन्तामणिः (का० २, श्लो० १५६) । कमिव ? । 'द्विरदमिव' हस्तिनमिव । किंविशिष्टं कृतान्तम् ? । 'जैनचन्द्रम्' जिनचन्द्रस्य इदं(मं) जैनचन्द्रम् । पुनः किंविशिष्टम् ? । 'विगतमुद्रम्' विगता

मुद्रा-इयत्ता यस्य स तम्, अपरिमितमित्यर्थः । पुनः किंविशिष्टम् ? । 'चकासत्कविपदगमभङ्गम्' कविपदानि-उत्प्रेक्षाद्यलङ्कारव्यङ्ग्यसूचकानि पदानि [कविपदानि], गमाः-सदृशपाठाः, भङ्गा-विकल्पसमूहाः, एतेषां पूर्वं 'द्वन्द्वः', ततः चकासन्तः-शोभमानाः कविपदगमभङ्गा यस्मिन् स तम् । पुनः किंविशिष्टम् ? । 'हेतुदन्तम्' हेतवः-साध्यगमकाः प्रतिपक्षदुर्गभेदकत्वात् त एव दन्ता-विषाणा यस्य स तम् । "अङ्गुलिः कर्णिका दन्त-विषाणौ स्कन्ध आसनम्" इत्यभिधानचिन्तामणिः (का० ४, श्लो० २९०) । पुनः किंविशिष्टम् ? । 'समुद्यद्दानमार्गम्' समुद्यत्-समुल्लसन् दानस्य-वितरणस्य मार्गः-क्रमो यत्र स तम्, सम्यग्ज्ञानद्वारा मुक्तिप्रदायकत्वात् । पुनः किंविशिष्टम् ? ।'धुताघैकविपदगम्'[1] । पुनः किंविशिष्टम् ? । 'अभङ्गं'-अजेयम् । परैरिति शेषः । किं कुर्वन्तं कृतान्तम् ? । 'तुदन्तं' पीडयन्तम् । कम् ? । 'कृतान्तं' यमम् । एतत्प्रतिपादितानुष्ठानकृतो भवग्रहणाभावेन मरणाभावात् । "यमः कृतान्तः पितृदक्षिणाशा-प्रेतात्पतिर्दण्डधरोऽर्कसूनुः" इत्यभिधानचिन्तामणिः (का० २, श्लो० ९८) । अत्र द्विरदेन सह सिद्धान्तस्य श्लेषः । सोऽपि विगतमुद्रो-गतमर्यादः प्रलम्बो भवति, तस्यापि पदगमभङ्गाः-पदप्रकारक्रमाश्चकासति दन्ताश्च भवन्ति दानमार्गो-मदप्रवाहः, सोऽप्यगं धुनोति अभङ्ग(श्च) कृतान्तं-च-विपक्षादिकं च तुदति ।। इति तृतीयवृत्तार्थः ।। ६७ ।।

(५)

ध० टीका—स्मरतेति । 'स्मरत' ध्यायत । 'विगतमुद्रं' अपर्यन्तम् । 'जैनचन्द्रं' जिनचन्द्र-संबन्धिनम् । 'चकासत्कविपदगमभङ्गं' चकासन्तः-शोभमानाः कविपदानि-कवियोग्यशब्दाः गमाः भङ्गाश्च यस्मिन् तम् । 'हेतुदन्तं' हेतव एव प्रतिपक्षभेद(क)त्वात् दन्तौ-विषाणौ यस्य तम् । 'कृतान्तं' आगमम् । 'द्विरदमिव' द्विपमिव । 'समुद्यद्दानमार्गं' समुद्यन्-समुल्लसन् दानमार्गो-ज्ञानादीनां वितरणक्रमो यत्र तम् । 'धुताघैकविपदगं' अघं-पापं तदेवैका-अद्वितीया विपत् सैव दुःखफलदायकत्वात् अगो-विटपी, धुतो-निरस्तः अघैकविपदगो येन तम् । 'अभङ्गं' अजेयम् । 'हे' इत्यामन्त्रणम् । 'तुदन्तं' पीडयन्तम् । 'कृतान्तं' अन्तकम् । अत्र द्विरदेन सह श्लेषः । सोऽपि विगतमुद्रः-अपेतमर्यादः स्वच्छन्दो भवति, तस्यापि पदगमभङ्गाः-पदप्रचारक्रमाश्चकासति, दन्ताश्च भवन्ति, दानमार्गः-मदप्रवाहः समुदेति, सोऽपि अगं धुनोति अभङ्गश्च । कृतान्तं कृतमिव (?) नाशं विपक्षादिकं तुदति । तदेवं द्विरदमिव हे (भव्य-लोकाः!) जैनचन्द्रं कृतान्तं स्मरतेत्यन्वयः ।। ६७ ।।

(६)

अवचूरिः

हे लोकाः ! जिनचन्द्रसंबन्धिनं कृतान्तं यूयं स्मरत । हस्तिनमिव । किंभूतम् ? । विगतमुद्रं-गत-

---

१. अत्र त्रुटिरिति प्रतिभाति ।

प्रमाणम् । चकासन्तः-शोभमानाः कविपदानि-कवियोग्याः शब्दाः गमा भङ्गाश्च यस्मिन् । हेतुदन्तं हेतव एव दन्तौ विपक्षभेदकत्वाद् विषाणौ यस्य तम् । कृतान्तं-यमम् । तुदन्तं-व्यथमानम् । समुद्यन्-समुल्लसन् दानमार्गो-ज्ञानादीनां वितरणक्रमो यस्मिन् । अघैकविपदः-पापैकविपद एवागा-वृक्षास्ते धुता येन । अभङ्गं-अजेयम् । अत्र द्विरदेन श्लेषः । सोऽप्यपेतमर्यादः । तस्यापि पदगमनभङ्गाः शोभन्ते । दानमार्गो मदप्रवाहश्च स्यात् । स च कृतविनाशं च तुदति ॥ ६७ ॥

❀ ❀ ❀

श्रीपुरुषदत्तायै प्रार्थना—

प्रचलदचिररोचिश्चारुगात्रे ! समुद्यत्—
सदसिफलकरामेऽभीमहासेऽरिभीते ! ।
सपदि पुरुषदत्ते ! ते भवन्तु प्रसादाः
सदसि फलकरा मेऽभीमहासेरिभीते ॥ ४ ॥ ६८ ॥

- मालिनी

(१)

ज० वि०—प्रचलदचिरेति । हे पुरुषदत्ते !-पुरुषदत्ताभिधे ! ते-तव सम्बन्धिनः प्रसादाः-अनुग्रहाः मे-मम सदसि-सभायां सपदि-तत्क्षणं फलकराः-सिद्धिकारिणः भवन्तु-सम्पद्यन्ताम् इति क्रियाकारक-प्रयोगः । अत्र 'भवन्तु' इति क्रियापदम् । के कर्तारः ? 'प्रसादाः' । कथंभूता भवन्तु ? 'फलकराः' कथम् ? 'सपदि' । कस्य ? 'मे' । कस्मिन् 'सदसि' । अवशिष्टानि पुरुषदत्ताया देव्याःसम्बोधनानि । तद्व्याख्यानं त्वेवम्-हे 'प्रचलदचिररोचिश्चारुगात्रे !' प्रचलन्ती-स्फुरन्ती या अचिररोचिः-तडित् तद्वत् चारु-मनोहरं गात्रं-देहो यस्याः सा तथा तत्सम्बो० हे प्रचल० । हे 'समुद्यत्सदसिफलकरामे' ! समुद्यती-प्रोल्लसन्ती सती-शोभने असिफलके-खड्गखेटके ताभ्यां रामे !-रमणीये ! । हे 'अभीमहासे !' अभीमः-सौम्यः हासो-हसनं यस्याः सा तथा तत्सम्बो० हे अभी० । हे 'अरिभीते !' अरिभ्यो-वैरिभ्यो या भीः-भयं तस्या ईते !-ईतिभूते ! । हे 'अभीमहासेरिभीते !' अभीः-भीवर्जिता या महासेरिभी-महामहिषी तां इते !-गते !, महिष्यारूढे इत्यर्थः ॥

अथ समासः—अचिरा रोचिर्यस्याः सा अचिररोचिः 'बहुव्रीहिः' । प्रचलन्ती चासावचिररोचिश्च प्रचल० 'कर्मधारयः' । प्रचलदचिररोचिर्वत् चारु प्रचल० 'तत्पुरुषः' । प्रचलदचिररोचिश्चारु गात्रं यस्याः सा प्रचल० 'बहुव्रीहिः' । तत्सम्बो० हे प्रचल० । असिश्च फलकं च असिफलके 'इतरेतरद्वन्द्वः' । सती च ते असिफलके च सदसि० 'कर्मधारयः' । समुद्यती च ते सदसिफलके च समुद्यत्स० 'कर्मधारयः' ।

समुद्यत्सदसिफलकाभ्यां रामा समुद्यत्स० 'तत्पुरुषः' । तत्सम्बो० हे समुद्यत्स० । न भीमः अभीमः 'तत्पुरुषः' । अभीमो हासो यस्याः सा अभी० 'बहुव्रीहिः' । तत्सम्बो० हे अभी० । अरिभ्यो भीः अरिभीः 'तत्पुरुषः' । अरिभिय ईतिः अरिभीतिः 'तत्पुरुषः' । तत्सम्बो० हे अरिभीते ! । फलं कुर्वन्तीति फलकराः 'तत्पुरुषः' । न विद्यते भीर्यस्याः सा अभीः 'बहुव्रीहिः' । महती चासौ सेरिभी च महा० 'कर्मधारयः' । अभीश्चासौ महासेरिभी च अभी० 'कर्मधारयः' । अभीमहासेरिभीं इता अभी० 'तत्पुरुषः' । तत्सम्बो० हे अभीम० ।। इति काव्यार्थः ।। ६८ ।।

।। इति श्रीशोभनस्तुतिवृत्तौ श्रीकुन्थुनाथस्य स्तुतेर्व्याख्या ।। ४ । १७ । ६८ ।।

(२)

सि० वृ०—प्रचलदचिरेति । पुरुषेषु दत्तं यस्याः सा पुरुषदत्ता तस्याः संबोधनं हे पुरुषदत्ते । ते-तव प्रसादा-अनुग्रहाः मे-मम सदसि-सभायां सपदि-तत्क्षणं फलकराः-कार्यसिद्धिकारिणो भवन्तु-सम्पद्यन्तामित्यर्थः । 'भू सत्तायाम्' धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि परस्मैपदे प्रथमपुरुष-बहुवचनम् । अत्र 'भवन्तु' इति क्रियापदम् । के कर्तारः ? । 'प्रसादाः' । "प्रसादोऽनुग्रहे काव्य-गुणस्वास्थ्यप्रसत्तिषु" इति विश्वः । कस्याः ? । 'ते' तव संबन्धिनः । कथंभूताः प्रसादाः ? । 'फलकराः' । कथम् ? । 'सपदि' । कस्य ? । 'मे' । कस्मिन् ? । 'सदसि' । "समाजः परिषत् सदः" इति हैमः (का० ३, श्लो० १४५) । अवशिष्टानि पुरुषदत्तायाः संबोधनानि, तद्व्याख्यानं त्वेवम्—हे 'प्रचलदचिररोचिश्चारुगात्रे !' प्रचलन्ती-प्रकर्षेण चलन्ती-इतस्ततः स्फुरन्ती या 'अचिररोचिः' अचिरा रोचिर्यस्याः सा अचिररोचिः-विद्युत् तद्वत् चारु-मनोज्ञं गात्रं-देहो यस्याः सा तस्याः संबोधनं हे प्रचल० । हे 'समुद्यत्सदसिफलकरामे !' समुद्यती-प्रोल्लसन्ती सती-शोभनं असिफलके-खड्गखेटके ताभ्यां रामा-रमणीया तस्याः संबोधनम् । असिश्च फलकं च असिफलके 'इतरेतरद्वन्द्वः', सती च ते असिफलके च सद० 'कर्मधारयः', समुद्यती च ते सदसिफलके च समुद्यत्सदसिफलके 'कर्मधारयः', ततः समुद्यत्सद-सिफलकाभ्यां रामा इति 'तत्पुरुषः' । हे 'अभीमहासे !' न भीमः अभीमः 'तत्पुरुषः' । अभीमः-अरौद्रो हासो-हसनं यस्याः सा तथा तस्याः संबोधनं हे अभीम० । हे 'अरिभीते !' अरिभ्यो भीः-भयं तस्या ईतिरिव ईतिः अरिभीतिः तस्याः संबोधनं हे अरि० । । "ईतिः प्रवासे डिम्बे स्यादतिवृष्ट्यादिषट्सु च" इति विश्वः । 'उपमितं व्याघ्रा०' (पा० अ० २, पा० १, सू० ५६) इति समासः । हे 'अभीमहासेरिभीते !' अभीः-भीवर्जिता या महासेरिभी-महामहिषी तां इते !-गते ! महिष्यारूढे ! इत्यर्थः । न विद्यते भीर्यस्याः सा अभीः इति 'बहुव्रीहिः', महती चासौ सेरिभी च महासेरिभी 'कर्मधारयः' । "लुलायो महिषो वाह-द्विषत्कासर-सेरिभाः" इत्यमरः (श्लो० ९९६) ।। ६८ ।।

।। इति श्रीमहामहोपाध्याय० श्रीकुन्थुनाथस्तुतिवृत्तिः ।। ४ । १७ । ६८ ।।

(३)

सौ० वृ०—प्रचलदचिरेति । हे पुरुषदत्ते !-पुरुषदत्तानाम्नि देवि ! ते-तव प्रसादाः-प्रसन्नगुणाः सदसि-सभायां मे-मम फलकराः-फलदायकाः सपदि-शीघ्रं भवन्तु इत्यन्वयः । 'भवन्तु' इति क्रियापदम् । के कर्तारः ? । 'प्रसादाः' । 'भवन्तु' सन्तु । कस्याः ? । 'ते' भवत्याः । किंविशिष्टाः प्रसादाः ? । 'फलकराः' फलदायिनः । कस्य ? । 'मे' मम । कस्याम् ? । 'सदसि' सभायाम् । कथम् ? । 'सपदि' शीघ्रम् । शेषाणि सम्बोधनपदानि पुरुषदत्ताया ज्ञेयानि । तानि व्याचक्ष्महे वयम् । प्रचलन्ती-इतस्ततः झात्कारायमाणा या अचिररोचिः-विद्युत् तद्वत् चारु-मनोज्ञं गात्रं-शरीरं यस्याः सा प्रचलदचिररोचिश्चारुगात्रा, तस्याः सं० हे 'प्रचलदचिररोचिश्चारुगात्रे !' । समुद्यत्-तेजोजाग्रत् सन्-शोभनः असिः-खड्गः फलकं-खेटकं ताभ्यां रामा-अभिरामा समुद्यत्सदसिफलकरामा, तस्याः सं० हे 'समुद्यत्सदसिफलकरामे !' । पुनः अभीमं-अरौद्रं-सौम्यं हासं[1] यस्याः सा अभीमहासा, तस्याः सं० हे 'अभीमहासे !' । पुनः अरयः-शत्रवः तेषां भीः-भयं तेषु ईतिरिव ईतिः अरिभीतिः, तस्याः सं० हे 'अरिभीते !'। पुनः अभीः-निर्भया महती सेरिभी-महिषी तां प्रति इता-प्राप्ता अभीमहासेरिभीता, तस्याः सं० हे 'अभीमहासेरिभीते !' । 'निर्भयमहामहिष्यारूढे ! इत्यर्थः । इति पदार्थः ।।

अथ समासः—न चिरं अचिरं, अचिरं रोचिर्यस्याः सा अचिररोचिः, प्रचलन्ती चासौ अचिररोचिश्च प्रचलदचिररोचिः, प्रचलदचिररोचिर्वत् चारु गात्रं यस्याः सा प्रचलदचिररोचिश्चारुगात्रा, तस्याः सं० हे प्रचलदचिररोचिश्चारुगात्रे ! । असिश्च फलकं च असिफलके, सती च ते असिफलके च सदसिफलके, समुद्यती च ते सदसिफलके च समुद्यत्सदसिफलके, समुद्यत्सदसिफलकाभ्यां रामा समुद्यत्सदसि-फलकरामा, तस्याः सं० हे समुद्यत्सदसिफलकरामे ! । न भीमं अभीमं, अभीमं हासं यस्याः सा अभीमहासा, तस्याः सं० हे अभीमहासे ! । अरीणां भीः अरिभीः, अरिभियां ईतिरिव ईतिस्तस्याः सं० हे अरिभीते ! । फलानि कुर्वन्ति ते फलकराः । न (विद्यते) भीः (यस्याः सा) अभीः, महती चासौ सेरिभी च महासेरिभी, अभीश्चासौ महासेरिभी च अभीमहासेरिभी, अभीमहासेरिभीं इता अभीमहासेरिभीता, तस्याः सं० हे अभीमहासेरिभीते ! । इति चतुर्थवृत्तार्थः ।। ६८ ।।

श्रीमत्कुन्थुजिनेन्द्रस्य, स्तुतेरर्थो लिपीकृतः ।
सौभाग्यसागराख्येण, सूरिणा ज्ञानसेविना ।। १ ।।

।। इति कुन्थुजिनस्तुतिः ।। ४।१७।६८ ।।

१. अत्र 'हासः' इत्युचितम्, शब्दस्याऽस्य पुल्लिङ्गत्वात् ।

(४)

दे० व्या०—प्रचलदचिरेति । हे पुरुषदत्ते ! ते-तव प्रसादाः-अनुग्रहाः सदसि फलकराः-कार्यकारिणो मे-मम भवन्तु इति सम्बन्धः । 'भू सत्तायाम्' धातुः । 'भवन्तु' इति क्रियापदम् । के कर्तारः ? । 'प्रसादाः' । किंविशिष्टाः प्रसादाः ? । 'फलकराः' । कस्याम् ? । 'सदसि'-सभायाम् । "समाजः परिषत् सदः" इत्यभिधान-चिन्तामणिः (का० ३, श्लो० १४५) । कथम् ? । 'सपदि'-शीघ्रं यथा स्यात् तथेति क्रियाविशेषणम् । 'प्रचलदचिररोचिश्चारुगात्रे !' इति । प्रकर्षेण चलन्ती-इतस्ततः स्फुरन्ती या अचिररोचिः-विद्युत् तद्वत् (चारु)-कान्तं गात्रं-शरीरं यस्याः सा तस्याः संबोधनम् । "चला शम्पाऽचिरप्रभा" इत्यभिधानचिन्तामणिः (का० ४, श्लो० १७०) । 'समुद्यत्सदसिफलकरामे !' इति । (विलसद्भ्यां असिफलकाभ्यां रामा-रमणीया तस्याः संबोधनम्) । 'अभीमहासे !' इति । अभीमः-अरौद्रः हासो-हसनं यस्याः सा तस्याः संबोधनम् । हासस्तु हसनं हसः" इत्यभिधानचिन्तामणिः (का० २, श्लो० २१०) । 'अरिभीते !' इति अरयो-विपक्षाः तेभ्यो भीः-भयं तस्या ईते !-ईतिभूते ! इति प्राञ्चः । 'अभीमहासेरिभीते !' इति । अभीः-निर्भया महासेरिभी-प्रौढमहिषी तां इते ! अर्थादारूढे ! । "लुलायः सेरिभो महः" इत्यभिधानचिन्तामणिः (का० ४, श्लो० ३४८) । एतानि सर्वाण्यपि देव्याः संबोधनपदानि ।। इति तुरीयवृत्तार्थः ।। ४ । १७ । ६८ ।।

(५)

ध० टीका—प्रचलदिति । 'प्रचलदचिररोचिश्चारुगात्रे !' प्रचलन्ती-स्फुरन्ती या अचिररोचिः-तडित् तद्वत् चारुगात्रे-रुचिराङ्गि ! । 'समुद्यत्सदसिफलकरामे !' समुद्यन्ती-प्रोल्लसन्ती ये सती-शोभने असिफलके-खड्गचर्मणी ताभ्यां रामे-रमणीये ! । 'अभीमहासे !' सौम्यहसने ! । 'अरिभीते !' अरिभ्यो भीः अरिभीः तस्या ईते-ईतिभूते ! । 'सपदि' तत्क्षणम् । 'पुरुषदत्ते !' पुरुषदत्तादेवि ! । 'ते' त्वत्सम्बन्धिनः ।'भवन्तु' सम्पद्यन्ताम् । 'प्रसादाः' अनुग्रहाः । 'सदसि' सभायाम् । 'फलकराः' कार्यसिद्धिकारिणः । 'मे' मम । 'अभीमहासेरिभीते !' अभीः-अविद्यमानभया या महासेरिभी-महामहिषी तस्यां इते-गते ! । हे पुरुषदत्ते ! सपदि ते प्रसादाः सदसि फलकरा मे भवन्तु इति योगः ।। ४ । १७ । ६८ ।।

(६)

अवचूरिः

हे पुरुषदत्ते ! ते-तव प्रसादाः सदसि-सभायां फलकराः-कार्यसिद्धिकारिणो भवन्तु मे-मम । प्रचलन्ती-स्फुरन्ती या विद्युत् तद्वत् चारु गात्रं यस्याः सा तस्याः संबोधनम् । विलसद्भ्यामसिफलकाभ्यां-खड्गखेटकाभ्यां रामा-रमणीया तस्याः संबोधनम् । अभीमः-अरौद्रो हासो-हसनं यस्याः । अरिभ्यो भीः-भयं तस्या ईतिभूते ! । अभीः-निर्भया या महासेरिभी-प्रौढमहिषी तामिता-गता तस्याः संबोधनम् ।। ४ । १७ । ६८ ।।

१८. श्रीअरजिनस्तुतयः

अथ श्रीअरनाथाय प्रणिपातः—

व्यमुञ्चच्चक्रवर्तिलक्ष्मीमिह तृणमिव यः क्षणेन तं
सन्नमदमरमानसंसारमनेकपराजितामरम् ।
द्रुतकलधौतकान्तमानमतानन्दितभूरिभक्तिभाक्—
सन्नमदमरमानसं सारमनेकपराजितामरम् ॥ १ ॥ ६९ ॥

- द्विपदी

(१)

ज० वि०—व्यमुञ्चच्चक्रेति । भो भव्याः ! यूयं तं अरम्-अरनामानं जिनम् आनमत-प्रणमत इति क्रियाकारकसण्टङ्कः । अत्र 'आनमत' इति क्रियापदम् । के कर्तारः ? 'यूयम्' । कं कर्मतापन्नम् ? 'अरम्' । कथंभूतम् ? 'सन्नमदमरमानसंसारम्' मदः-जात्यादिकः मरः-मरणं मानः-अभिमानः संसारः-भवः, सन्नाः-क्षीणा मदमरमानसंसारा यस्य स तथा तम् । पुनः कथं० ? 'द्रुतकलधौतकान्तम्' द्रुतं-उत्तप्तं कलधौतं-सुवर्णं तद्वत् कान्तं-कमनीयम् । पुनः कथं० ? 'आनन्दितभूरिभक्तिभाक्सन्नमदमरमानसम्' आनन्दितम्-आह्लादितं भूरिभक्तिभाजां-प्रभूतभावजुषां सन्नमतां-प्रणमताम् अमराणां-देवानां मानसं-मनो येन स तथा तम् । पुनः कथं० ? 'सारम्' श्रेष्ठम् । पुनः कथं० ? 'अनेकपराजितामरम्' अनेके-अपरिमिताः पराजिता-निर्जिता अमरा-देवा येन स तथा तम् । इदं च विशेषणं दिग्विजयसमयापेक्षया

ज्ञेयम् । तमिति तच्छब्दसहचारित्वाद् यच्छब्दघटनामाह—यः अरजिनः इह-अत्र जगति चक्रवर्तिलक्ष्मीं-चक्रधरश्रियं तृणमिव-तृणं वीरणादि तदिव क्षणेन-सपदि व्यमुञ्चत्-त्यक्तवान् । अत्रापि 'व्यमुञ्चत्' इति क्रियापदम् । कः कर्ता ? 'यः' । कां कर्मतापन्नाम् ? 'चक्रवर्तिलक्ष्मीम्' । किमिव ? 'तृणमिव' । कुत्र ? 'इह' केन ? 'क्षणेन' । कथंभूतां चक्रवर्तिलक्ष्मीम् ? 'अनेकपराजिताम्' अनेकपाः-करिणः तैः राजिताम् । अनेक-पराजितामरम् इति पदं यत् जिनविशेषणत्वेन व्याख्यातं तत् चक्रवर्तिलक्ष्म्या विशेषणत्वेन व्याख्येयम् । तथाहि-अनेकैः परैः-शत्रुभिः अजितां-अपरिभूताम्, अरं-शीघ्रम् ॥

अथ समासः—चक्रेण वर्तते इति चक्रवर्ती 'तत्पुरुषः' । चक्रवर्तिनो लक्ष्मीः चक्र० 'तत्पुरुषः' । तां चक्र० । मदश्च मरश्च मानश्च संसारश्च मंदमर० 'इतरेतरद्वन्द्वः' । सन्ना मदमरमानसंसारा येन स सन्नमद० 'बहुव्रीहिः' । तं सन्नमद० । अनेकपैः राजिता अनेक० 'तत्पुरुषः' । तां अनेक० । द्रुतं च तत् कलधौतं च द्रुत० 'कर्मधारयः' । द्रुतकलधौतवत् कान्तः द्रुत० 'तत्पुरुषः' । तं द्रुत० । भूरिश्चासौ भक्तिश्च भूरिभक्तिः 'कर्मधारयः' भूरिभक्तिं भजन्तीति भूरिभ० 'तत्पुरुषः' । सन्नमन्तश्च ते अमराश्च सन्नम० 'कर्मधारयः' । भूरिभक्तिभाजश्च ते सन्नमदमराश्च भूरिभ० 'कर्मधारयः' । भूरिभक्तिभाक्सन्नमदमराणां मानसं भूरिभ० 'तत्पुरुषः' । आनन्दितं भूरिभक्तिभाक्सन्नमदमरमानसं येन स आनन्दित० 'बहुव्रीहिः' । तं आनन्दित० । अनेके च ते पराजिताश्च अनेक० 'कर्मधारयः' । अनेकपराजिता अमरा येन सः अनेक० 'बहुव्रीहिः' । तं अनेक० । चक्रवर्तिलक्ष्मीपक्षे तु-अनेके च ते परे च अनेकपरे 'कर्मधारयः' । न जिता अजिता 'तत्पुरुषः' । अनेकपरैः अजिता अनेक० 'तत्पुरुषः' । तां अनेक० ॥ इति काव्यार्थः ॥ ६९ ॥

(२)

सि० वृ०—व्यमुञ्चच्चक्रेति । भो भव्याः ! यूयं तं अरं-अरनाथं आनमत-प्रणमतेत्यर्थः । आङ्पूर्वक-'णम प्रह्वीभावे' धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि परस्मैपदे मध्यमपुरुषबहुवचनम् । अत्र 'नम'[1] इति क्रियापदम् । के कर्तारः ? । 'यूयम्' । कं कर्मतापन्नम् ? । 'अरम्' गर्भस्थेऽस्मिन् मात्रा सर्वरत्नमयोऽरो दृष्ट इत्यरः तम् ।

"सर्वोत्तमे महासत्त्व-कुले य उपजायते ।
तस्याभिवृद्धये वृद्धै-रसावर उदाहृतः ॥"

इति हैम्यां नाममालावृत्तौ [इति] वचनाद् अरः । किंविशिष्टं अरम् ? । 'सन्नमदमरमानसंसारं' मदः-जात्यादिकः मरः-मरणं मानः-अभिमानः संसारः-जन्मजरालक्षणः, मदश्च मरश्च मानश्च संसारश्च 'इतरेतरद्वन्द्वः', सन्नाः-क्षीणा मदमरमानसंसारा यस्य स तथा तम् । पुनः कथंभूतम् ? । 'द्रुतकलधौत-कान्तं' द्रुतं-उत्तप्तं यत् कलधौतं-काञ्चनं तद्वत् कान्तं-कमनीयम् । "कलधौतं रूप्यहेम्नोः" इत्यमरः (श्लो० २४८७) । पुनः कथंभूतम् ? । 'आनन्दितभूरिभक्तिभाक्सन्नमदमरमानसं' आनन्दितं-आनन्दं प्रापितं

1. 'आनमत' इत्यत्राऽपेक्षितम् ।

'भूरिभक्तिभाजां' भूरिभक्तिं-अनुरागं भजन्ति ते भूरिभक्तिभाजः तेषाम्,'भजां विण्' (सा० सू० १२३२) इति विण्, सन्नमतां-प्रणमतां अमराणां-देवानां मानसं-मनो येन स तथा तद् । सन्नमन्तश्च ते अमराश्च सन्नमदमराः, भूरिभक्तिभाजश्च ते सन्नमदमराश्च भूरिभक्तिभाक्सन्नमदमराः इति 'कर्मधारयः', ततः आनन्दितं भूरिभक्तिभाक्सन्नमदमराणां मानसं येन इति 'बहुव्रीहिः' । पुनः कथंभूतम् ? । सारं-श्रेष्ठम् । पुनः कथंभूतम् ? । 'अनेकपराजितामरं' अनेके-अपरिमिताः परजिताः-निर्जिताः दिग्विजये अमराः-मागधादिदेवाः येन स तथा तम् । तमिति तच्छब्दस्य यच्छब्दसापेक्षत्वात् तं कम् ? । यः अरजिनः इह-अत्र जगति चक्रवर्तिलक्ष्मीं-सार्वभौमश्रियं तृणमिव-यवसमिव क्षणेन-सपदि व्यमुञ्चत्-त्यक्तवानित्यर्थः । 'मुच्लृ मोक्षणे' धातोरनद्यतने कर्तरि परस्मैपदे प्रथमपुरुषैकवचनं दिप् । 'तुदादेरः' (सा० सू० १००७) इत्यप्रत्ययः । 'मुचादेर्मुम्' (सा० सू० १०११) इति मुम् । 'नश्चापदान्ते झसे' (सा० सू० ९५) इति मस्यानुस्वारः । 'दिवादावट्' (सा० सू० ७०७) । अत्र 'व्यमुञ्चत्' इति क्रियापदम् । कः कर्ता ? । 'यः' । कां कर्मतापन्नाम् ? । 'चक्रवर्तिलक्ष्मीम्' । चक्रभूमण्डले-द्वादशराजमण्डले चक्रवर्तितुं प्रभुत्वलक्षणां वृत्तिघण्टां कर्तुं शीलमस्य णिनिः चक्रे-राजसमूहे अवश्यं स्वामित्वेन वर्तते वा, आवश्यके णिनिः । चक्रवर्ती । "चक्रवर्ती बल्लगणे चक्रवाके" इति विश्वः । चक्रेण-चक्रायुधबलेन वा वर्तत इति चक्रवर्ती तस्य लक्ष्मीः-श्रीः ताम् । नृपाणां चक्रे-समूहे वर्तते चक्रेण चक्रायुधबलेन वा वर्तत इति चक्रवर्ती । लक्षयति-पश्यति नीतिशालिनं इति लक्ष्मीः । 'लक्ष दर्शनाङ्कनयोः' । 'लक्षेर्मुट् च' (उणा० सू० ४४०) इतीकारप्रत्यतो मुडागमश्च । अत एव ङ्यन्तत्वाभावान्न सुलोपः । 'कृदिकारादक्तिनो वा ङीप्' इत्यत्र सावर्ण्यग्रहणात् ङीबतोऽपि मैवेयः (ज्ञेयः ?) तेन लक्ष्मीशब्दस्य नदीवद् रूपाणि भवन्ति, 'कृदिकारात्' इति ङीपि लक्ष्मीत्यपि भवतीति, दुर्घटे रक्षित इत्युज्ज्वलदत्तः । लक्ष्मीः "लक्ष्मीर्हरेः स्त्रियाम्" इति शब्दप्रभेदः । "चक्रवर्ती सार्वभौमः" इति हैमः (का० ३, श्लो० ३५५) । "चक्रवर्ती सार्वभौमो, नृपोऽन्यो मण्डले स्त्रियाम्(श्वरः ?)" इत्यमरः (श्लो० १४७२) । किमिव ? । तृणमिव । कुत्र ? । इह । केन ? । क्षणेन । कथंभूतां चक्रवर्तिलक्ष्मीम् ? । 'अनेकपराजितां' अनेकपा-द्विरदाः तैः राजितां-शोभिताम् । "दन्ती दन्तावलो हस्ती, द्विरदोऽनेकपो द्विपः" इत्यमरः (श्लो० १५३५) । करेण मुखेन च पानात् न एकेन पिबतीत्यनेकपः । 'सुपि०' (पा० अ० ३, पा० २, सू० ४) इति योगविभागात् कः ॥

(३)

सौ० वृ०—यः कौ-पृथिव्यां षड्जीवनिकायरक्षको भवति स भवोदधेः अरं-परतटं प्राप्नोत्येव । अनेन सम्बन्धनेनायातस्याष्टादशश्रीअरजिनस्य स्तुतेरर्थो लिख्यते-व्यमुञ्चच्चक्रेति ।

हे जनाः ! यूयं तं अरनामानं जिनं आनमत इत्यन्वयः ।'आनमत' इति क्रियापदम् । के कर्तारः ? । 'यूयम्' । 'आनमत' प्रणमत । कं कर्मतापन्नम् ? । 'अरम्' । "अरो जिनेऽरं चक्राङ्गे, शीघ्रगे सत्वरे तटे"

इत्यनेकार्थः । किंविशिष्टं अरम् ? । 'तं' प्रसिद्धम् । तच्छब्दो यच्छब्दमपेक्षते । तं कम् ? । यो जिनः इह-संसारे चक्रवर्तिलक्ष्मीं-चक्रधरऋद्धिं सपदि-शीघ्रं क्षणेन-वेगेन तृणमिव-चारणमिव(?) व्यमुञ्चदित्यन्वयः । 'व्यमुञ्चत्' इति क्रियापदम् । कः कर्ता ? । 'यः' जिनः । 'व्यमुञ्चत्' विशेषेण अमुञ्चत्-अत्यजत् । कां कर्मतापन्नाम् ? । 'चक्रवर्तिलक्ष्मीम्' । कस्मिन् ? । 'इह' संसारे । कथम् ? । 'क्षणेन' वेगेन । किमिव ? । 'तृणमिव' । इव-यथा तृणं मुच्यते तद्वच्चक्रवर्तिलक्ष्मीं व्यमुञ्चत् । किंविशिष्टं तं अरजिनम् ? । सन्नः-क्षीणः मदो-दर्पः मरो-मरणं मानः-अहङ्कारः संसारो-भवः यस्मात् स सन्नमदमरमान-संसारस्तं 'सन्नमदमरमान-संसारम्' । किंविशिष्टां चक्रवर्तिलक्ष्मीम् ? । 'अनेकपा'-गजास्तै राजिता-शोभिता अनेकपराजिता तां 'अनेकपराजिताम्' । पुनः किंविशिष्टं अरं जिनम् ? । द्रुतं-उत्तप्तं यत् कलधौतं-सुवर्णं तद्वत् कान्तः-मनोज्ञः द्रुतकलधौतकान्तस्तं 'द्रुतकलधौतकान्तम्' । पुनः किंविशिष्टं अरं जिनम् ? । आनन्दितं-आनन्दं प्रापितं भूरिः-प्रचुरा भक्तिर्येषां ते भूरिभक्तिभाजः तादृशा ये सन्तः-शोभनाः नमन्तः-प्रणमन्तः ये अमरा-देवास्तेषां मानसं-चित्तं येन स आनन्दितभूरिभक्तिभाक्सन्नमदमरमानसस्तं 'आनन्दितभूरिभक्तिभाक्सन्नमदमरमान-सम्' । पुनः किंविशिष्टं अरं जिनम् ? । 'सारं' प्रधानम् । पुनः किंविशिष्टं अरं जिनम् ? । अनेके-बहवः पराजिताः-विजयीकृता अमराः-मागधवरदामादयो येन सः अनेकपराजितामरस्तं 'अनेकपराजितामरम्' । एतद् विशेषणं (चक्रवर्तिनः षट्खण्डविजय) यात्रापेक्षया ज्ञेयम् । इति पदार्थः ॥

अथ समासः—चक्रमअनुवर्तत इति चक्रवर्ती, वा चक्रेण वर्तत इति । चक्रवर्तिनो लक्ष्मीः चक्रवर्तिलक्ष्मीः, तां चक्रवर्तिलक्ष्मीम् । मदश्च मरश्च मानश्च संसारश्च मदमरमानसंसाराः, सन्नाः-क्षीणा गता वा मदमरमानसंसारा यस्मात् स सन्नमदमरमानसंसारः, तं सन्नमदमरमानसंसारम् । न एकेन पिबन्तीत्यनेकपाः, यद्वा अनेकान् पान्तीत्यनेकपाः, अनेकपैः राजिताः अनेकपराजिताः, तां अनेक-पराजिताम् । अरति-संसारसमुद्रस्य परतटं गच्छतीति अरः, तं अरम् । द्रुतं च तत् कलधौतं च द्रुतकलधौतं, द्रुतकलधौतवत् कान्तः द्रुतकलधौतकान्तः, तं द्रुतकलधौतकान्तम् । आनन्दः सञ्जातः अस्मिन्निति आनन्दितः, तम् (आनन्दितम्), भूरिश्चासौ भक्तिश्च भूरिभक्तिः, भूरिभक्तिं भजन्ति ते भूरिभक्तिभाजः, नमन्तश्च ते अमराश्च नमदमराः, सन्तश्च ते नमदमराश्च सन्नमदमराः, भूरिभक्तिभाजश्च ते सन्नमदमराश्च भूरिभक्तिभाक्सन्नमदमराः, भूरिभक्तिभाक्सन्नमदमराणां मानसं भूरिभक्तिभाक्सन्नमदमरमानसं, आनन्दितं भूरिभक्तिभाक्सन्नमदमरमानसं येन स आनन्दितभूरिभक्तिभाक्सन्नमदमरमानसः, तं आनन्दितभूरिभक्तिभाक्सन्नमदमरमानसम् । न एके अनेके, (अनेके) पराजिता अमरा येन सः अनेकपराजितामरः, तं अनेकपराजितामरम् । विंशतिवर्णमयी विषमच्छन्दसा [1]वैश्वदेवीनाम्ना स्तुति-रियम् ॥ इति प्रथमवृत्तार्थः ॥ ६९ ॥

---

१. अयमुल्लेखो भ्रान्तिमूलक इति प्रतिभाति ।

(४)

दे० व्या०—व्यमुञ्चच्चक्रेति । हे जनाः ! तं अरं-अरनाथं यूयं आनमत-प्रणमतेत्यन्वयः । 'णम प्रह्वीभावे' धातुः । 'आनमत' इति क्रियापदम् । के कर्तारः ? । यूयम् । कं कर्मतापन्नम् ? । अरम् । किंविशिष्टं अरम् ? । 'सन्नमदमरमानसंसारं' मदः पूर्वोक्तः मरो-मरणं मानः-स्मयः संसारो-भवग्रहणं एतेषां पूर्वं 'द्वन्द्वः', ततः सन्नः-क्षीणो मदमरमानसंसारो, यस्येति 'बहुव्रीहिः' । पुनः किंविशिष्टम् ? । 'द्रुतकलधौतकान्तं' द्रुतं-गालितं यत् कलधौतं-सुवर्णं तद्वत् कान्तं-कमनीयम् । "कलधौतलौहोत्तम-वह्निबीजा०" इत्यभिधानचिन्तामणिः (का० ४, श्लो० ११०) । पुनः किंविशिष्टम् ? । 'आनन्दितभूरिभक्तिभाक्सन्नमदमरमानसं' भूरि-अतिशयेन भक्तिं-सेवां भजन्तीति भूरिभक्तिभाजः इति 'द्वितीयातत्पुरुषः', आराध्यत्वेन ज्ञानं भक्तिरिति वर्धमानचरणाः, ते च ते सम्-सम्यक् नमन्तश्च ते अमराश्चेति 'कर्मधारयः', ततः आनन्दितं-प्रीणितं भूरिभक्तिभाक्सन्नमदमराणां मानसं-हृदयं येनेति 'तृतीयाबहुव्रीहिः' । अरं-शीघ्रं यथा स्यात् तथेति क्रियाविशेषणम् । पुनः किंविशिष्टम् ? । 'अनेकपराजितामरं' अनेके पराजिता-भग्ना दिग्विजयादौ अमरा-मगधादिदेवा येन स तम् । "जितो भग्नः पराजितः" इत्यभिधानचिन्तामणिः (का० ३, श्लो० ४६९) । यत्तदोर्नित्याभिसम्बन्धाद् यः अरनाथः चक्रवर्तिलक्ष्मीं तृणमिव क्षणेन-क्षणमात्रेण व्यमुञ्चत्-अत्याक्षीत् । 'मुञ्च मोचने' धातुः । 'व्यमुञ्चत्' इति क्रियापदम् । कः कर्ता ? । 'अरनाथः' । कां कर्मतापन्नाम् ? । चक्रवर्तिलक्ष्मीम् । "चक्रवर्ती सार्वभौमः" इत्यभिधानचिन्तामणिः (का० ३, श्लो० ३५५) । किंविशिष्टां चक्रवर्तिलक्ष्मीम् ? । 'अनेकपराजितां' अनेकपा-हस्तिनः तैः राजितां-भूषितां, चतुरशीतिलक्षगजानामधिपत्वात् । इति प्रथमवृत्तार्थः ॥ ६९ ॥

(५)

ध० टीका—व्यमुञ्चच्चक्रेति । 'व्यमुञ्चत्' त्यक्तवान् । 'चक्रवर्तिलक्ष्मीं' चक्रधरश्रियम् । 'इह' अत्र जगति । 'तृणमिव' तृणं-वीरणादि तदिव । 'यः' । 'क्षणेन' सपदि । 'तम्' । 'सन्नमदमरमानसंसारं' मा(म)रः-मरणं सन्नः क्षीणो मदश्च मरश्च मानश्च संसारश्च यस्य तम् । 'अनेकपराजितां' अनेकपाः-करिणः तैः राजिताम् । 'अरं' अरनामानम् । 'द्रुतकलधौतकान्तं' द्रुतं यत् कलधौतं तद्वत् कान्तम् । 'आनमत' प्रणिपतत । 'आनन्दितभूरिभक्तिभाक्सन्नमदमरमानसं' आनन्दितं-आह्लादितं भूरिभक्तिभाजां-प्रभूत-भावजुषां सन्नमतां अमराणां मानसं-मनो येन तम् । 'सारं' श्रेष्ठम् । 'अनेकपराजितामरं' अनेके पराजिताः दिग्विजयादिप्रक्रमे अमरा येन तम् । अथवा चक्रवर्तिलक्ष्मीविशेषणम् । अनेकैः परैः-शत्रुभिर्न जितां अनेकपराजिताम् । 'अरं' शीघ्रम् । यश्चक्रवर्तिलक्ष्मीं तृणमिव व्यमुञ्चत् तं अरं आनमतेति सम्बन्धः ॥ ६९ ॥

(६)

अवचूरिः

यश्चक्रवर्तिलक्ष्मीं क्षणेन-वेगेन तृणवदत्याक्षीत् तं अरं-अरनामानं जिनं हे जनाः ! आनमत । किंभूतम् ? । 'सन्नाः'-क्षीणा मदमरणमानसंसारा यस्य तम् । लक्ष्मीं किंभूताम् ? । 'अनेकपा' गजास्तै राजितां-शोभिताम् । जिनं किंभूतम् ? । 'द्रुतं' विलीनं यत् सुवर्णं तद्वत् कान्तं-कमनीयम् । आनन्दितं भूरिभक्तिभाजां संनमतां-प्रणामकारकाणाममराणां मानसं-चित्तं येन । तथा सारं-श्रेष्ठम् । दिग्विजयादि-प्रक्रमेऽनेके-बहवः पराजिता-अमरा मागधादिदेवा येन तम् । यद्वा लक्ष्मीं कथंभूताम् ? । अनेकैः परैरजिताम् । अरं-शीघ्रम् ॥ ६९ ॥

जिनवरेभ्यो वन्दना--

स्तौति समन्ततः स्म समवसरणभूमौ यं सुरावलिः
सकलकलाकलापकलिताऽपमदाऽरुणकरमपापदम् ।
तं जिनराजविसरमुज्जासितजन्मजरं नमाम्यहं
सकलकला कलाऽपकलितापमदारुणकरमपापदम् ॥ २ ॥ ७० ॥

- द्विपदी

(१)

ज० वि०--स्तौतीति । अहं तं जिनराजविसरं-जिनपतिसमूहं नमामि-प्रणमामि इति क्रियाकारकप्रयोगः । अत्र 'नमामि' इति क्रियापदम् । कः कर्ता ? 'अहम्' । कं कर्मतापन्नम् ? 'जिनराजविसरम्' । तमिति तच्छब्दसम्बन्धाद् यच्छब्दघटनामाचष्टे--यं जिनराजविसरं समवसरणभूमौ-समवसृतिक्षितौ सुरावलिः-त्रिदशसन्ततिः समन्ततः-सर्वतः स्तौति स्म - वन्दते स्म । अत्र 'स्म' इति अतीतार्थद्योतको निपातः । अत्रापि 'स्तौति' इति क्रियापदम् । का कर्त्री ? 'सुरावलिः' । कं कर्मतापन्नम् ? 'यम्' । कस्याम् ? 'समवसरणभूमौ' । कथम् ? 'समन्ततः' । कथंभूता सुरावलिः ? 'सकलकला-कलापकलिता' सकलेन-समग्रेण कलाकलापेन-विज्ञाननिकरेण कलिता-युक्ता । पुनः कथं० ? 'अपमदा' अपगतदर्पा । पुनः कथं० ? 'सकलकला' कलकलेन-कोलाहलेन सहिता, बाढस्वरेण गुणानु-च्चरन्तीत्यर्थः । पुनः कथं० ? 'कला' मधुरा, मधुरस्वरधारित्वात् । कथंभूतं जिनराजविसरम् ? 'अरुणकरं' आताम्रपाणिम् । पुनः कथं० ? 'अपापदं' अपगतविपदम् । पुनः कथं० ? 'उज्जासितजन्मजरं' उज्जासिते-प्रतिहते जन्मजरे-जननविस्रसे येन स तथा तम् । पुनः कथं० ?

'अपकलितापं' अपगतौ कलितापौ-कलहसन्तापौ यस्मात् स तथा तम् । (पुनः कथं० ? 'अदारुणकरं') अदारुणं-अरौद्रं करोति यः स तथा तम् । पुनः कथं० ? 'अपापदं' अपापं-पुण्यं ददाति यः स तथा तम् ॥

अथ समासः—समवसरणस्य भूमिः समव० 'तत्पुरुषः' । तस्यां समव० । सुराणां आवलिः सुरावलिः 'तत्पुरुषः' । सकलाश्च ताः कलाश्च सकल० 'कर्मधारयः' । सकलकलानां कलापः सकल० 'तत्पुरुषः' । सकलकलाकलापेन कलिता सकल० 'तत्पुरुषः' । अपगतो मदो यस्याः सा अपमदा 'बहुव्रीहिः' । अरुणौ करौ यस्य सः अरुणकरः 'बहुव्रीहिः' । तं अरुण० । अपगता आपदो यस्मात् सः अपापत् 'बहुव्रीहिः' । तं अपापदम् । जिनानां जिनेषु वा राजानो जिनराजाः 'तत्पुरुषः' । जिनराजानां विसरो जिनराज० 'तत्पुरुषः' । तं जिनराज० । जन्म च जरा च जन्मजरे 'इतरेतरद्वन्द्वः' । उज्जासिते जन्मजरे येन स उज्जासि० 'बहुव्रीहिः' । तं उज्जासि० । सह कलकलेन वर्तत इति सकल० 'तत्पुरुषः' । कलिश्च तापश्च कलितापौ 'इतरेतरद्वन्द्वः' । अपगतौ कलितापौ यस्मात् सः अपक० 'बहुव्रीहिः' । तं अपक० । न दारुणमदारुणं 'तत्पुरुषः' । अदारुणं करोतीत्यदारुणकरः 'तत्पुरुषः' । तं अदारुण० । न पापं अपापं 'तत्पुरुषः' । अपापं ददातीत्यपापदः 'तत्पुरुषः' । तं अपापदम् ॥ इति काव्यार्थः ॥ ७० ॥

(२)

सि० वृ०—स्तौतीति । अहं तं जिनराजविसरं-जिनपतिनिकरं नमामि-प्रणमामीत्यर्थः । 'णम प्रह्वत्वे शब्दे च' धातोः कर्तरि वर्तमाने परस्मैपदे उत्तमपुरुषैकवचनं मिप् । 'अप् कर्तरि' (सा० सू० ६९१) इत्यप्, 'व्मोरा' (सा० सू० ६९६) इत्यात्त्वम्, 'स्वरहीनं०' (सा० सू० ३६) । तथा च 'नमामि' इति सिद्धम् । अत्र 'नमामि' इति क्रियापदम् । कः कर्ता ? अहम् । कं कर्मतापन्नम् ? । 'जिनराजविसरम्' जिनानां जिनेषु वा राजानो जिनराजाः तेषां विसरः-समूहः तम् । "समूहो निवहव्यूह-सन्दोहविसरव्रजाः" इत्यमरः (श्लो० १०६५) । तच्छब्दस्य यच्छब्दसापेक्षत्वात् तं कम् ? । 'यं' जिनराजविसरं समवसरणभूमौ-समवसृतिभुवि सुरावलिः-देवपङ्क्तिः समन्ततः-सर्वतः स्तौति स्म-वन्दते स्म, अस्तावीदित्यर्थः । 'स्तुञ् स्तुतौ' धातोर्वर्तमाने कर्तरि परस्मैपदे प्रथमपुरुषैकवचनं तिप् । 'अप् कर्तरि' (सा० सू० ६९१) इत्यप् । 'अदादेर्लुक्' (सा० सू० ८८०) इति लुक् । 'ओरौ' (सा० सू० १९३) इत्यौकारः । 'स्मयोगे भूतार्थता वक्तव्या' (सा० सू० ७३३) इति भूतार्थता । अत्र 'स्तौति स्म' इति क्रियापदम् । का कर्त्री ? । 'सुरावलिः' सुराणां-देवानामावलिः-सुरावलिः । कं कर्मतापन्नम् ? । 'यम्' । कस्याम् ? । 'समवसरणभूमौ' समवसरणस्य भूमिः समवसरणभूमिः तस्यां समवसरणभूमौ । कथम् ? । समन्ततः । कथम्भूता सुरावलिः ? । 'सकलकलाकलापकलिता' सकलेन - समग्रेण कलाकलापेन कलायाः-विज्ञानस्य,"कला शिल्पे कालभेदे" इत्यमरः (स्लो० २७३१), कलापेन-समूहेन कलिता-संयुता । "कलापो भूषणे बर्हे,

तूणीरे संहतेऽपि च" इत्यमरः (श्लो० २५९२) । पुनः कथंभूता ? । 'अपमदा' अपगतो मदो-दर्पो यस्याः सा अपमदा । पुनः कथंभूता ? । 'सकलकला' कलकलेन-कोलाहलेन सहिता सकलकला, तारस्वरेण गुणानुच्चरन्तीत्यर्थः । पुनः कथंभूता ? । कला-मधुरा । कथंभूतं जिनराजविसरम् ? । 'अरुणकरं' अरुणौ-रक्तौ करौ-हस्तौ यस्य स तथा तम्, सामुद्रिके सत्पुरुषाणां करचरणयो रक्तत्वेन वर्णनात् । पुनः कथंभूतम् ? । 'अपापदं' अपगता आपद्-विपत्तिः-दुर्दशेति यावत् यस्मात् स तम् । पुनः कथंभूतम् ? । 'उज्जासितजन्मजरं' जन्म च जरा च जन्मजरे 'इतरेतरद्वन्द्वः', उज्जासिते-प्रतिहते जन्मजरे-जननविस्रसे येन स तथा तम् । 'जरायाः स्वरादौ जरस् वा वक्तव्यः' (सा० सू० २०५) इति विकल्पपक्षे अभिरूपम् । पुनः कथंभूतम् ? । 'अपकलितापं' अपगतौ कलितापौ-कलहसन्तापौ यस्मात् स तम् । यद्वा अपगतः कलेः-कलिकालस्य [कलेः—] कलहस्य वा तापो यस्मादित्यर्थः । पुनः कथंभूतम् ? । 'अदारुणकरं' करोतीति करः, दारुणस्य करो दारुणकरः, पश्चान्नञ्समासः, तं अदारुणकरम् । पुनः कथंभूतम् ? । 'अपापदं' अपापं-पुण्यं ददातीत्यपापदः तं अपापदं, पुण्यप्रदमित्यर्थः ॥

(३)

सौ० वृ०—स्तौतीति । अहं तं जिनराजविसरं-तीर्थकरसमूहं नमामीत्यन्वयः । 'नमामि' इति क्रियापदम् । कः कर्ता ? । 'अहम्' । 'नमामि' (वन्दे) । कं कर्मतापन्नम् ? । 'जिनराजविसरम् ।' किंविशिष्टं जिनराजविसरम् ? । उज्जासिता-त्रासिता जन्म-जातिर्जरा-वयोहानिर्मरणादिरूपा येन स उज्जासितजन्मजरः, तं 'उज्जासितजन्मजरम्' । पुनः किंविशिष्टं जिनराजविसरम् ? । अरुणा-रक्ता हस्ता यस्य स अरुणकरः, तं 'अरुणकरम्' रक्तकमलपाणिमित्यर्थः । पुनः किंविशिष्टं जिनराज-विसरम् ? । 'तं' प्रसिद्धम् । तं कम् ? । सुरावलिः-देवश्रेणिः समवसरणभूमौ-समवसरणभूमिकायाम् समन्ततः-चतुर्दिशं यं जिनराजविसरं स्तौति स्मेत्यन्वयः । 'स्तौति' इति क्रियापदम् । का कर्त्री ? । 'सुरावलिः' । 'स्तौति' स्तुतिं करोति । स्म इति पदं अतीतार्थद्योतकम् । 'अस् भुवि' इत्यस्य धातोः उत्तमपुरुषार्थस्य क्रियाबहुत्वप्रयोगः । कं कर्मतापन्नम् ? । 'यं जिनराजविसरम्' । कस्याम् ? । 'समवसरणभूमौ' । कथम् ? । 'समन्ततः' चतुर्दिशं यथा स्यात् तथा । किंविशिष्टा सुरावलिः ? । सकलाः-संपूर्णा याः कला-ज्ञानविज्ञानादिकाः तासां कलापः-समूहः तेन कलिता-युक्ता 'सकलकलाकलाप-कलिता' । पुनः किंविशिष्टा सुरावलिः ? । 'अपमदा' गतदर्पा । पुनः किंविशिष्टं जिनराजविसरम् ? । अपापं-पुण्यं ददातीति अपापदस्तं 'अपापदम्' । यद्वा अपगता आपद्-विपद् यस्मात् स अपापत्, तं अपापदम् । पुनः किंविशिष्टं जिनराजविसरम् ? । 'अपकलितापं' (अपगतः) कलितापः-कलहदाघो यस्य सः अपकलितापः तं 'अपकलितापम्' । पुनः किंविशिष्टं जिनराजविसरम् ? । अदारुणं-सौम्यं करोतीति अदारुणकरः, तं 'अदारुणकरम्' । पुनः किंविशिष्टा सुरावलिः ? । कलो-मधुरः कलशब्दः-कलकलस्तेन

सहिता 'सकलकला' । एतावता मधुरध्वनिना तीर्थकरगुणगायिनीत्यर्थः । पुनः किंविशिष्टा सुरावलिः ? । 'कला' प्रधाना । इति पदार्थः ।।

अथ समासः—समन्तादिति समन्ततः । समवसरणस्य भूमिः समवसरणभूमिः, तस्यां समवसरणभूमौ । सुराणामावलिः सुरावलिः । सकलाश्च ताः कलाश्च सकलकलाः, सकलकलानां कलापः सकलकलाकलापः, सकलकलाकलापेन कलिता सकलकलाकलापकलिता । अपगतो मदो यस्याः सा अपमदा । अरुणाः करा यस्य सः अरुणकरः, तमरुणकरम् । न पापं अपापं, अपापं ददातीति अपापदः, तमपापदम् । जिनानां राजानो जिनराजाः, जिनराजानां विसरो जिनराजविसरः, तं जिनराजविसरम् । जन्म च जरा च जन्मजरसी, उज्जासिते जन्मजरसी यस्मात् स उज्जासितजन्मजरः, तं उज्जासितजन्मजरम् । कलश्चासौ कलश्च कलकलः, कलकलेन सहिता सकलकला । कलिश्च तापश्च कलितापौ, यद्वा कलेस्तापः कलितापः, अपगतः कलितापो यस्य सः अकलितापः, तं अकलितापम् । न दारुणं अदारुणं, अदारुणं करोतीति अदारुणकरः, तं अदारुणकरम् । अपगता आपद् यस्मात् सः अपापत्, तं अपापदम् ।। इति द्वितीयवृत्तार्थः ।। ७० ।।

(४)

दे० व्या०—स्तौतीति । तं जिनराजविसरं-तीर्थंकरसमूहमहं नमामि-नमस्कारविषयीकरोमीत्यन्वयः । 'णम नमने' धातुः । 'नमामि' इति क्रियापदम् । कः कर्ता ? अहम् । कं कर्मतापन्नम् ? । जिनराजविसरम् । "सन्दोहः समुदायराशिविसरव्राताःकलापो व्रजः" इत्यभिधानचिन्तामणिः (का० ६, श्लो० ४७) । किंविशिष्टं जिनराजविसरम् ? । 'उज्जासितजन्मजरं' जननं-जन्म जरा-विस्रसा अनयोः 'द्वन्द्वः', ततः उज्जासिते-नाशिते जन्मजरे येन स तम् । "प्रोज्जासनं प्रशमनं प्रतिघातनं वधः" इत्यभिधानचिन्तामणिः (का० ३, श्लो० ३४) । पुनः किंविशिष्टम् ? । 'अरुणकरं' अरुणौ-रक्तौ करौ-हस्तौ यस्य स तम् । पुनः किंविशिष्टम् ? । 'अपकलितापं' अपगतः कलेः-कलिकालस्य कलहस्य वा तापः-सन्तापो यस्माद् यस्य वा स तम् । पुनः किंविशिष्टम् ? । 'अदारुणकरं' दारुणं-रौद्रं तत्र करोतीत्यदारुणकरस्तम् । रुद्रकर्माकारकमित्यर्थः । यद्वा नास्ति दारुणा-रुद्रा करा-प्रभा यस्य स तम् । पुनः किंविशिष्टम् ? । 'अपापदं' पापं न दत्ते इत्यपापदस्तम्, पुण्यप्रदमित्यर्थः । यत्तदोर्नित्याभिसम्बन्धाद् यं जिनराजविसरं 'सुरावलिः' सुराणां-देवानामावलिः-श्रेणिः समन्ततः-सर्वदिक्षु समवसरणभूमौ स्तौति स्म-अस्तवीत् । 'स्तुञ् स्तुतौ' धातुः । 'स्तौति स्म' इति क्रियापदम् । का कर्त्री ? । सुरावलिः । कं कर्मतापन्नम् ? । जिनराजविसरम् । कस्याम् ? । 'समवसरणभूमौ' समवसरणस्य-वप्रत्रयस्य भूमिः-भूमिका तस्याम् । कथम् ? । समन्ततः । अव्ययमेतत् । किंविशिष्टा सुरावलिः ? । 'सकलकलाकलापकलिता' सकला-समस्ता या कला-विज्ञानं तस्याः कलापः-समूहः तेन कलिता-व्याप्ता । पुनः

किंविशिष्टा ? । 'अपापत्' अपगता आपद्-विपत्तिर्यस्याः सा तथा । जिनराजविसरविशेषणमेतदिति कश्चित् तच्चिन्त्यम् । पुनः किंविशिष्टा ? ।'अपमदा' अपगतो मदो यस्याः सा तथा । "मदो मुन्मोहसंभेदः" इत्यभिधानचिन्तामणिः (का० २, श्लो० २२६) । पुनः किंविशिष्टा ? । कला-मनोहरा ।। इति द्वितीयवृत्तार्थः ।। ७० ।।

(५)

ध० टीका—स्तौतीति । 'स्तौति' वन्दते । 'समन्ततः' सर्वतः । 'स्म' इति अतीतार्थद्योतको निपातः । 'समवसरणभूमौ' समवसृतिक्षितौ । 'यम्' । 'सुरावलिः' त्रिदशमाला । 'सकलकलाकलापकलिता' सकलेन-समग्रेण कलाकलापेन-विज्ञानकदम्बकेन कलिता-युक्ता । 'अपमदा' अपेतदर्पा । 'अरुणकरं' आताम्रपाणिम् । 'अपापदं' अपगतविपदम् । 'तम्' । 'जिनराजविसरं' जिनेन्द्रवृन्दम् । 'उज्जासितजन्मजरं' उज्जासितजननविस्रसम् । 'नमाम्यहं' नतोऽस्मि ! 'सकलकला' सकोलाहला । 'कला' मधुरा । 'अपकलितापं' अपगतकलहसन्तापम् । 'अदारुणकरं' अदारुणं-अरौद्रं करोति यस्तम् । 'अपापदं' अपापं-पुण्यं तत्प्रदम् । यं समवसरणभूमौ सुरावलिः स्तौति स्म तं जिनराजविसरं नमाम्यहं इत्यन्वयः ।। ७० ।।

(६)

अवचूरिः

सुरेन्द्रश्रेणी यं जिनेन्द्रव्यूहं स्तौति । समन्ततः-सर्वतः । स्मेत्यतीतार्थकम् । समवसरणभूमौ । किंभूता ? । सकलाः-समस्ताः कला-विज्ञानानि तासां कलापेन-समूहेन कलिता-सहिता । अपमदा-अपगतमदा । सह कलकलेन-कोलाहलेन वर्तते । कला-मधुरा । तं जिनेन्द्रविसरमहं नमामि । किंविशिष्टम् ?। अरुणौ-आरक्तौ करौ-हस्तौ यस्य । अपगता आपदो यस्मात् तम् । विनाशितजन्मजरम् । अपकलितापम्-अपगतकलहसन्तापम् । अदारुणम्-अरौद्रं करोतीति तम् । अपापं-पुण्यं ददातीति तम् ।। ७० ।।

❖ ❖ ❖

जिनागमाय नमः—

भीममहाभवाब्धिभवभीतिविभेदि परास्तविस्फुरत्—
परमतमोहमानमलनूनमलं घनमघवतेऽहितम् ।
जिनपतिमतमपारमर्त्यामरनिर्वृतिशर्मकारणं
परमतमोहमानमत नूनमलङ्घनमघवतेहितम् ।। ३ ।। ७१ ।।

- द्विपदी

(१)

ज० वि०—भीमेति । भो भव्याः ! यूयं जिनपतिमतं-सर्वज्ञप्रवचनं नूनं-निश्चयेन आनमत-प्रणमत इति क्रियाकारकयोजना । 'आनमत' इति क्रियापदम् । के कर्तारः ? 'यूयम्' । किं कर्मतापन्नम् ? 'जिनपतिमतम्' । जिनपतिमतं कथंभूतम् ? 'भीममहाभवाब्धिभवभीतिविभेदि' भीमो-भयङ्करः यो (महान्) भवाब्धिः-संसारसागरस्तत्र भवा या भीतयः-भियस्तासां विभेदि-भेदनशीलम् । पुनः कथं० ? 'परास्तविस्फुरत्परमतमोहमानं' परमतानि-अन्यप्रवचनानि मोहो-मिथ्यात्वं मानः-अहङ्कारः, परास्ता-निक्षिप्ता विस्फुरन्तः-विजृम्भमाणा परमतमोहमाना येन तत् तथा तत् । अथवा विस्फुरन् परमतानां 'मोहमानः' मोहाद्-अज्ञानाद् मानः-मिथ्याभिमानः स 'परास्तः' परं प्रकृष्टं यथा स्यात् तथा अस्तो येन तथा तत् । पुनः कथं० ? 'अतनूनं' तनु-कृशं ऊनं चशब्दार्थादिभिर्न्यूनं यत्र भवति तत् । पुनः कथं० ? 'घनं' निबिडं, प्रमेयगाढमित्यर्थः । कथं ? 'अलं' अत्यर्थम् । पुनः कथं० ? 'अहितं' न श्रेयस्कारि । कस्मिन् ? 'अघवते' पापान्विताय । पुनः कथं० ? 'अपारमर्त्यामरनिर्वृतिशर्मकारणम्' अपाराणि-अपर्यन्तानि यानि मर्त्यामराणां निर्वृतेः-निर्वाणस्य शर्माणि-सुखानि तेषां कारणं-हेतुः । पुनः कथं० ? 'परमतमोहं' परमं-प्रकृष्टं तमो हन्ति यत् तत् । यदिवा अतिशयेन परमाः-परमतमा ऊहा-विचारणा यस्मिन् तत् तथा तत् । पुनः कथं० ? ईहितम्' अभिलषितम् । केन ? 'अलङ्घनमघवता' नास्ति लङ्घनम्-अभिभवो यस्य तेन मघवता-इन्द्रेण, सामर्थ्यादच्युतस्वर्गनाथेन ॥

अथ समासः—अब्धिरिवाब्धिः । भवश्चासावब्धिश्च भवाब्धिः 'कर्मधारयः' । महांश्चासौ भवाब्धिश्च महा० 'कर्मधारयः' । भीमश्चासौ महाभवाब्धिश्च भीम० 'कर्मधारयः' । भीममहाभवाब्धेर्भवा भीमम० 'तत्पुरुषः' । भीममहाब्धिभवाश्च ता भीतयश्च भीम० 'कर्मधारयः । भीममहाभवाब्धिभवभीतीनां विभेदि भीमम० 'तत्पुरुषः' । तत् भीमम० । परेषां मतानि परमतानि 'तत्पुरुषः' । परमतानि च मोहश्च मानश्च परमत० 'इतरेतरद्वन्द्वः' । विस्फुरन्तश्च ते परमतमोहमानाश्च विस्फु० 'कर्मधारयः' । परास्ता विस्फुरत्परमतमोहमाना येन तत् परास्त० 'बहुव्रीहिः' । अथवा मोहाद् मानो मोहमानः 'तत्पुरुषः' । परमतानां मोहमानः परमत० 'तत्पुरुषः' । विस्फुरंश्चासौ परमतमोहमानश्च विस्फु० 'कर्मधारयः' । परं स्तः परास्तः 'तत्पुरुषः' । परास्तो विस्फुरत्परमतमोहमानो येन तत् परास्त० 'बहुव्रीहिः' । (तत् परास्त०) । तनु च तदूनं च तनूनं 'कर्मधारयः' । न तनूनं अतनूनं 'तत्पुरुषः' । तद् अतनूनम् । न हितं अहितं 'तत्पुरुषः' । तद् अहितम् । जिनानां जिनेषु वा पतिः जिनपतिः 'तत्पुरुषः' । जिनपतेर्मतं जिनप० 'तत्पुरुषः' । तद् जिन० । मर्त्याश्च अमराश्च मर्त्यामराः 'इतरेतरद्वन्द्वः' । निवृतेः शर्माणि निर्वृतिशर्माणि 'तत्पुरुषः' । मर्त्यामराणां निर्वृतिशर्माणि मर्त्या० 'तत्पुरुषः' । न विद्यते पारो येषां

तान्यपाराणि 'बहुव्रीहिः' । अपाराणि च तानि मर्त्यामरनिर्वृतिशर्माणि च अपार० 'कर्मधारयः' । अपारमर्त्यामरनिर्वृतिशर्मणां कारणं अपार० तत्पुरुषः । तदपारमर्त्या० । परमं च तत् तमश्च परम० 'कर्मधारयः' । परमतमो हन्तीति परम० 'तत्पुरुषः' । तत् परम० । यदिवा परमतमा ऊहा यस्मिन् तत् परम० 'बहुव्रीहिः' । तत् परम० । न विद्यते लङ्घनं यस्य सः अलङ्घनः 'बहुव्रीहिः' । अलङ्घनश्चासौ मघवांश्च अलङ्घन० 'कर्मधारयः' । तेनालङ्घन० ।। इति काव्यार्थः ।। ७१ ।।

(२)

सि० वृ०—भीमेति । भो भव्यलोकाः ! यूयं जिनपतिमतं-तीर्थेशप्रवचनं नूनं-निश्चयेन आनमत-प्रणमतेत्यर्थः । आङ्पूर्वक 'णम प्रह्वीभावे' धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि परस्मैपदे मध्यमपुरुषबहुवचनम् । अत्र 'आनमत' इति क्रियापदम् । के कर्तारः ? । यूयम् । किं कर्मतापन्नम् ? । 'जिनपतिमतं' जिनपतेर्मतं जिनपतिमतं इति 'तत्पुरुषः' । कथंभूतं जिनपतिमतम् ? । 'भीममहाभवाब्धिभवभीतिविभेदि' भीमो-भयङ्करो यो भव एव अब्धिः भवाब्धिः-संसारसागरः तत्र भवा या भीतयो-भियस्तासां विभेदि-भेदनशीलम् । पुनः कथंभूतम् ? । 'परास्तविस्फुरत्परमतमोहमानम्' परेषां-बौद्धादीनां मतानि परमतानि, अन्यप्रवचनानीत्यर्थः, मोहो-मिथ्यात्वं मानः-अभिमानः, परमतानि च मोहश्च मानश्च परमतमोहमानाः 'इतरेतरद्वन्द्वः', परास्ता-दूरीकृताः विस्फुरन्तो-विजृम्भमाणाः परमतमोहमाना येन तत् तथा तत् । पुनः कथंभूतम् ? । 'अतनूनम्' तनु च ऊनं च यत्र भवतीति अतनूनम् । पुनः कथंभूतम् ? । घनं-निबिडं, प्रमेयगाढमित्यर्थः । कथम् ? । अलम्-अत्यर्थम् । पुनः कथंभूतम् ? । अहितं-न श्रेयस्कारि । कस्मै ? । 'अघवते' अघं-पापं विद्यते यस्य स अघवान् तस्मै । पुनः कथंभूतम् ? । 'अपारमर्त्यामरनिर्वृतिशर्मकारणम्' मर्त्याश्च अमराश्च मर्त्यामराः 'इतरेतरद्वन्द्वः', अपाराणि-पाररहितानि अमर्यादानीत्यर्थः यानि मर्त्यामराणां निर्वृतेः-निर्वाणस्य शर्माणि-सुखानि तेषां कारणं-हेतुः (तत्), तत्त्वज्ञानद्वारा मुक्तिसुखजनकत्वात् । पुनः कथंभूतम् ? । 'परमतमोहं' परमं-प्रकृष्टं तमो हन्ति यत् तत् । अथवा अतिशयेन परमाः-परमतमाः ऊहा-विचारणा यस्मिन् तत् तथा तत् । पुनः कथंभूतम् ? । ईहितं-अभिलषितम् । केन ? । 'अलङ्घनमघवता' नास्ति लङ्घनं-अभिभवो यस्य तादृशेन मघवता-इन्द्रेण, सामर्थ्यादच्युतस्वर्गनाथेनेत्यर्थः । अलङ्घनश्चासौ मघवा चेति 'कर्मधारयः' ।। ७१ ।।

(३)

सौ० वृ०—भीमेति । भो भव्याः ! यूयं जिनपतिमतं-तीर्थकरप्रवचनम् आनमतेत्यन्वयः । 'आनमत' इति क्रियापदम् । के कर्तारः ? । 'यूयम्' । 'आनमत' प्रणमत । किं कर्मतापन्नम् ? । 'जिनपतिमतम्' । भीमो-रौद्रो [महा—] महान् यो भवाब्धिः-(संसार)समुद्रः तस्माद् भवा-उत्पन्नाः या

भीतयो-भयाः तान् भिनत्तीति तद् 'भीममहाभवाब्धिभवभीतिविभेदि' । पुनः किंविशिष्टं जिनपतिमतम् ? । परास्ताः-तिरस्कृताः विस्फुरन्तो-दीप्यन्तो-झगझगायमानाः परेषां-कुतीर्थानां मतानि-शासनानि मोहः-अज्ञानं तथा (यद्वा ?) मोहाद्-अज्ञानात् माना-गर्वा येन तत् 'परास्तविस्फुरत्पर-मतमोहमानम्' । पुनः किंविशिष्टं जिनपतिमतम् ? । 'घनं' निबिडम् । कथम् ? । 'अलम्' अत्यर्थम्, अप्रमेयप्रमेयमित्यर्थः । पुनः किंविशिष्टं जिनपतिमतम् ? । तनु-कृशं ऊनं-न्यूनं तद्द्वयं न इति 'अतनूनम्' । एतावता महत्, सम्पूर्णमित्यर्थः । पुनः किंविशिष्टं जिनपतिमतम् ? । अपारा-अनेके मर्त्या-मनुष्याः अमरा-देवाः तेषां निर्वृतिः-मोक्षस्तस्याः शर्माणि-सुखानि तेषां कारणं-हेतुः (तत्) 'अपार-मर्त्यामरनिर्वृतिशर्मकारणम्' । किंविशिष्टं जिनपतिमतम् ? । परमं-प्रकृष्टं तमः-अज्ञानं तत् प्रति हन्तीति 'परमतमोहम्', यद्वा परमतमः-उत्कृष्टः ऊहो-वितर्को यस्मिंस्तत् परमतमोहम् । पुनः किंविशिष्टं जिनपतिमतम् ? । 'ईहितं' वाञ्छितम् । केन ? । अलङ्घनः-अनुल्लङ्घनीयो मघवा-इन्द्रः तेन 'अलङ्घनमघवता', अच्युतेन्द्रेण ईप्सि(हि)तं-वाञ्छितम् । एवंविधं जिनपतिमतं नूनं-निश्चितं आनमत ।। इति पदार्थः ।।

अथ समासः—आपो निधीयन्ते यस्मिन् स अब्धिः, भव एवाब्धिः भवाब्धिः, महांश्चासौ भवाब्धिश्च महाभवाब्धिः, भीमश्चासौ महाभवाब्धिश्च भीममहाभवाब्धिः, भीममहाभवाब्धेर्भवा भीममहा-भवाब्धिभवाः, भीममहाभवाब्धिभवाश्च ता भीतयश्च भीममहाभवाब्धिभवभीतयः, विशेषेण भेदितुं शीलमस्यास्तीति विभेदि, भीममहाभवाब्धिभवभीतानां विभेदि, यद्वा भीममहाभवाब्धिभवा भीश्च ईतयश्च भीममहाभवाब्धि(भव)भीतयः इत्यपि । परेषां मतं परमतं, विस्फुरच्च तत् परमतं च विस्फुरत्परमतं, विस्फुरत्परमतस्य मोहः विस्फुरत्परमतमोहः, विस्फुरत्परमतमोहश्च मानश्च विस्फुरत्परमतमोहमानः, परास्तो-ध्वस्तः विस्फुरत्परमतमोहमानो येन तत् परास्तविस्फुरत्परमतमोहमानं तत् । तनु च ऊनं च तनूने, न स्तः तनूने यस्मिन् तद् अतनूनम् । अघं विद्यते यस्यासौ अघवान्, तस्मै अघवते । न हितं अहितं, तद् अहितम् । जिनानां पतिः जिनपतिः, तस्य मतं जिनपतिमतं, तत् जिनपतिमतम् । मर्त्याश्च अमराश्च मर्त्यामराः, अपाराश्च ते मर्त्यामराश्च अपारमर्त्यामराः, अपारमर्त्यामराणां निर्वृतिः अपारमर्त्यामरनिर्वृतिः, अपारमर्त्यामरनिर्वृतेः शर्माणि अपारमर्त्यामरनिर्वृतिशर्माणि, अपारमर्त्यामर-निर्वृतिशर्मणां कारणं अपारमर्त्यामरनिर्वृतिशर्मकारणम् । परमं च तत् तमश्च परमतमः, परमतमो हन्तीति परमतमोहं, यद्वा 'अतिशयेन परमाः परमतमाः, परमतमा ऊहा यस्मिन् तत् परमतमोहम् । लङ्घ्यते-उल्लङ्घ्यते इति लङ्घनः, न लङ्घनः अलङ्घनः, अलङ्घनश्चासौ मघवा च अलङ्घनमघवा, तेन अलङ्घनमघवता । इति तृतीयवृत्तार्थः ।। ७१ ।।

(४)

दे० व्या०—भीमेति । हे भव्यजनाः ! यूयं जिनपतिमतं-प्रवचनं नूनं-निश्चितं आनमत-प्रणमतेत्यन्वयः । 'णम प्रह्वीभावे' धातुः । 'आनमत' इति क्रियापदम् । के कर्तारः ? । यूयम् । किं कर्मतापन्नम् ? । जिनपतिमतं-तीर्थंकरमतम् । किंविशिष्टं जिनपतिमतम् ? । 'भीममहाभवाब्धिभव-भीतिविभेदि' भीमः-भयोत्पादको रुद्र इति यावद् यो महाभवाब्धिः-प्रकृष्टसंसारसमुद्रः तस्मिन् भवा-उत्पन्ना या भीतिः-साध्वसं तस्या विभेदि-भेदनशीलम् । पुनः किंविशिष्टम् ? । 'परास्तविस्फुरत्परमतमोहमानं' विस्फुरन्तश्च ते परमतमोहमानाश्चेति पूर्वं 'कर्मधारयः', परमतं-बौद्धादिशासनं मोहः-अज्ञानं मानः-स्मयः एतेषां पूर्वं 'द्वन्द्वः', ततः परास्ता-विध्वस्ताः(विस्फुरत्)परमतमोहमाना येन तत् । पुनः किंविशिष्टम् ? । 'अतनूनं' तनु-स्वल्पं ऊनं-अपूर्णं, अर्थापेक्षया ताभ्यां रहितम् । पुनः किंविशिष्टम् ? । अलङ्घनं-केनाप्यनतिक्रमणीयम् । पुनः किंविशिष्टम् ? अहितं-अपथ्यम् । कस्मै ? । 'अघवते' अघं-पापं विद्यते यस्यासौ अघवान् तस्मै । पुनः किंविशिष्टम् ? । 'अपारमर्त्यामरनिर्वृतिशर्मकारणं' मर्त्याश्च ते अमराश्चेति पूर्वं 'द्वन्द्वः', निर्वृतेः शर्माणि निर्वृतिशर्माणि इति 'षष्ठीतत्पुरुषः', ततः अपाराणि च तानि मर्त्यामरनिर्वृतिशर्माणि चेति 'कर्मधारयः', तेषां कारणं-हेतुभूतम्, तत्त्वज्ञानद्वारा मुक्तिसुखजनकत्वात् । पुनः किंविशिष्टम् ? । 'परमतमोहं' परमं-प्रकृष्टं यत् तमः-अज्ञानं तस्य हन्तृ-नाशकम् । यद्वा परमतमा-अत्युत्कृष्टा ऊहाः-तर्काः यत्र तत् । पुनः किंविशिष्टम् ? । 'अलङ्घनमघवतेहितं' अलङ्घनः-अनतिक्रमणीयो यो मघवा-इन्द्रः तेन ईहितं-वाञ्छितम् ।। इति तृतीयवृत्तार्थः ।। ७१ ।।

(५)

ध० टीका—भीमेति । 'भीममहाभवाब्धिभवभीतिविभेदि' भीमे महाभवाब्धौ भवन्ति भीतयो यास्तासां विभेदि-भेदनशीलम् । 'परास्तविस्फुरत्परमतमोहमानं' परास्तानि-क्षिप्तानि विस्फुरन्ति परमतानि मोहश्च मानश्च येन तम्, अथवा मोहात्-अज्ञानात् मानो मोहमानो-मिथ्याभिमानः परं-प्रकृष्टं विस्फुरत् यथा भवत्येवं अस्तः परमतानां मोहमानो येन तम् । 'अतनूनं' तनु च ऊनं च यन्न भवति । 'अलं' अत्यर्थम् । 'घनं' निबिडं प्रमेयगाढम् । 'अघवते' पापान्विताय । 'हितं' श्रेयस्कारि । 'जिनपतिमतं' सर्वज्ञप्रवचनम् । 'अपारमर्त्यामरनिर्वृतिशर्मकारणं' अपाराणि-अपर्यन्तानि यानि मर्त्यानां अमराणां निर्वृतेश्च-निर्वाणस्य सम्बन्धीनि शर्माणि-सुखानि तेषां कारणं-हेतुः । 'परमतमोहं' परमं तमो हन्ति यत् तत्, अथवा परमतमा-अतिशयेन परमा ऊहाः-तर्का यत्र तत् । 'आनमत' प्रणमत । 'नूनं' निश्चयेन । 'अलङ्घनमघवता' नास्ति लङ्घनं-अभिभवो यस्य तेन मघवता-महेन्द्रेण, सामर्थ्यादच्युतस्वर्गनाथेन । 'ईहितं' अभिलषितम् । जिनपतिमतं आनमतेति सम्बन्धः ।। ७१ ।।

(६)

अवचूरिः

भीषणमहासंसारसमुद्रोत्पन्नभयविदारकम् । परास्ताः-परिक्षिप्ता विस्फुरन्तः परमतमोहमाना येन । यद्वा मोहाद्-अज्ञानान्मानो-मिथ्याभिनिवेशः परमतानां मोहमानौ वा । तनु-तुच्छमूनम्-अपूर्णं च नं । अलम्-अत्यर्थं घनं-निबिडं प्रमेयगाढम् । अघवते-पापिने अहितं-न श्रेयस्कारि । अपाराण्यपर्यन्तानि मर्त्यानाममराणां निर्वाणस्य शर्माणि तेषां कारणम् । परमं तमो हन्ति । यद्वा परमतमा ऊहा यस्मिन् । आनमत-प्रणमत । नूनं-निश्चितम् । न लङ्घनम्-अभिभवो यस्य स चासौ मघवा च तेन सामर्थ्यादच्युतनाथेन ईहितम्-अभिलषितम् ।। ७१ ।।

श्रीचक्रधरायाः स्तुतिः–

याऽत्र विचित्रवर्णविनतात्मजपृष्ठमधिष्ठिता हुतात्–
समतनुभागविकृतधीरसमदवैरिव धामहारिभिः ।
तडिदिव भाति सान्ध्यघनमूर्धनि[1] चक्रधराऽस्तु मुदे–
ऽसमतनुभा गवि कृतधीरसमदवैरिवधा महारिभिः ।। ४ ।। ७२ ।।

\- द्विपदी

(१)

ज० वि०–याऽत्रेति । सा चक्रधरा-अप्रतिचक्रा देवी मुदे-प्रीत्ये अस्तु-भवतु इति क्रियाकारकसम्बन्धः । अत्र 'अस्तु' इति क्रियापदम् । का कर्त्री ? 'चक्रधरा' । कस्यै ? 'मुदे' । सेति तच्छब्दसाहचर्याद् यच्छब्दयोजनामाह–या चक्रधरा अत्र-अस्मिञ्जगति भाति-शोभते । अत्रापि 'भाति' इति क्रियापदम् । का कर्त्री ? 'या' । कुत्र ? 'अत्र' । या कथंभूता ? 'अधिष्ठिता' अधिरूढा । किं कर्मतापन्नम् ? 'विचित्रवर्णविनतात्मजपृष्ठं' विचित्रवर्णो-नानाविधवर्णसहितः, "आजानु कनकगौरम् आनाभेः शङ्खकुन्दहरधवलम्, आकण्ठतो नवदिवाकरकान्तितुल्यम्, आमूर्धतोऽञ्जननिभं गरुडस्वरूपम्" इति स्वरूपो यो विनतात्मजो-गरुत्मान् तस्य पृष्ठं-गात्रोपरिभागम् । पुनः कथं० ? 'हुतात्समतनुभाक्' हुतं अत्तीति हुतात्-वह्निस्तेन समां-तुल्यां मूर्त्तिं भजतीति हुतात्समतनुभाक् । कस्मिन् केव भाति ? 'सान्ध्यघनमूर्ध्नि' सान्ध्यः-सन्ध्यासम्बन्धी यो घनः-मेघः स च विचित्रवर्णो भवति तस्य मूर्ध्नि-शिरसि

१. अयं पाठः श्रीसौभाग्यसागरकृतवृत्त्यामेव ।

'तडिदिव' विद्युदिव । अत्र चक्रधरा तडित्स्थानीया, गरुडो घनस्थानीय इति ज्ञेयम् । पुनः कथंभूता चक्रधरा ? 'अविकृतधीः' अविकृता-न विकारं प्राप्ता धीः-बुद्धिर्यस्याः सा तथा । पुनः कथं० ? 'असमतनुभा' समा-सामान्या तनुः-कृशा, न समतनुः असमतनुः, असाधारणमहतीत्यर्थः, एतादृशी भा-कान्तिर्यस्याः सा तथा । कस्याम् ? 'गवि' पृथिव्यां स्वर्गे वा । पुनः कथं० ? 'कृतधीरसमदवैरिवधा' कृतः-विहितः धीराणां-शूराणां समदानां-मदान्वितानां वैरिणां-रिपूणां वधः-विनाशो यया सा तथा । कैः कृत्वा ? ('महारिभिः') महद्भिः-बृहद्भिररिभिः-चक्रैः । कथंभूतैः ? 'धामहारिभिः' धामभिः-तेजोभिः हारिभिः-कान्तैः । कैरिव ? 'असमदवैरिव' असमैः-असदृशैः दवैः-वनवह्निभिरिव ॥

अथ समासः—विचित्रो वर्णो यस्य स विचित्र० 'बहुव्रीहिः' । विनतायाश्चात्मजो विनतात्मजः 'तत्पुरुषः' । विचित्रवर्णश्चासौ विनतात्मजश्च विचित्र० 'कर्मधारयः' । विचित्रवर्णविनतात्मजस्य पृष्ठं विचित्र० 'तत्पुरुषः' । (तद् विचित्र०) । हुतमत्तीति हुतात् 'तत्पुरुषः' । हुतादः समा हुतात्समा 'तत्पुरुषः' । हुतात्समा चासौ तनुश्च हुता० 'कर्मधारयः' । हुतात्समतनुं भजत इति हुता० 'तत्पुरुषः' । न विकृता अविकृता 'तत्पुरुषः' । अविकृता धीर्यस्याः सा अविकृतधीः 'बहुव्रीहिः' । (न समा असमाः 'तत्पुरुषः') । असमाश्च ते दवाश्च असम० 'कर्मधारयः' । तैरसम० । धामभिर्हारीणि धाम० 'तत्पुरुषः' । तैर्धाम० । सन्ध्यायां भवं० सान्ध्यः ('तत्पुरुषः') । सान्ध्यश्चासौ घनश्च सान्ध्यघनः 'कर्मधारयः' । सान्ध्यघनस्य मूर्धा सान्ध्य० 'तत्पुरुषः' । असमतनुः भा यस्याः सा असम० 'बहुव्रीहिः' । धीराश्च ते समदाश्च धीरसमदाः 'कर्मधारयः' । धीरसमदाश्च ते वैरिणश्च धीर० 'कर्मधारयः' । धीरसमदवैरिणां वधो धीर० 'तत्पुरुषः' । कृतो धीरसमदवैरिवधो यया सा कृतधीर० ('बहुव्रीहिः') । महान्ति च तान्यरीणि च महारीणि 'कर्मधारयः' । तैर्महारिभिः ॥ इति काव्यार्थः ॥ ७२ ॥

इति श्रीमद्वृद्धपण्डितश्रीदेवविजयगणिशिष्यपं०जयविजयगणिविरचितायां श्रीशोभनस्तुतिवृत्तौ श्रीअरजिनस्य स्तुतेर्व्याख्या ॥ ४ । १८ । ७२ ॥

(२)

सि० वृ०—याऽत्रेति । सा 'चक्रधरा' धरतीति धरा चक्रस्य धरा (?) अप्रतिचक्रा देवी मुदे-प्रीत्यै अस्तु-भवत्वित्यर्थः । 'अस् भुवि' धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि परस्मैपदे प्रथमपुरुषैकवचनं तुप् । 'अप्०' (सा० सू० ६९१), 'अदादेः' (सा० सू० ८८०) इति लुक् । अत्र 'अस्तु' इति क्रियापदम् । का कर्त्री ? । चक्रधरा । कस्यै ? । मुदे । सेति तच्छब्दस्य यच्छब्दसाहचर्यात् सा का ? । या चक्रधरा अत्र-अस्मिन् जगति भाति-शोभते इत्यर्थः । 'भा दीप्तौ' इति धातोः वर्तमाने कर्तरि परस्मैपदे प्रथमपुरुषैकवचनम् । अत्र 'भाति' इति क्रियापदम् । का कर्त्री ? । या । कुत्र ? ।

अत्र । कथंभूता ? । अधिष्ठिता-आरूढा । किम् ? । 'विचित्रवर्णविनतात्मजपृष्ठम्' विचित्रा वर्णा यस्मिन् स विचित्रवर्णः, कर्बुर इत्यर्थः । "आजानु कनकगौरम्, आनाभेः शङ्खकुन्दहरधवलम्, आकण्ठतो नवदिवाकरकान्तितुल्यम्, आमूर्धतोऽञ्जननिभं गरुडस्वरूपम्" इति स्वरूपो यो विनतात्मजो-यो गरुडः तस्य पृष्ठं-पश्चाद्भागस्तत् । "पृष्ठं तु चरमं तनोः" इति हैमः (का० ३, श्लो० २६५) । पुनः कथंभूता ? । 'हुतात्समतनुभाक्' हुतं-होतव्यद्रव्यं अत्ति-भक्षतीति हुताद्-वह्निः तेन समां-तुल्यां तनुं-मूर्तिं भजतीति हुतात्समतनुभाक् । कस्मिन् केव भातीति योज्यम् । सन्ध्यायां भवः; सान्ध्यः, सन्ध्यासम्बन्धीत्यर्थः, यो घनो मेघः स च विचित्रवर्णो भवति तस्य मूर्धनि-मस्तके, आधारे सप्तमी, तडिदिव-विद्युदिव । यथा सान्ध्यघनशिरसि तडिद् भाति तथा देवी गरुडपृष्ठस्थिता शोभत इति भावः । पुनः कथंभूता चक्रधरा ? । 'अविकृतधीः' अविकृता-न विकारं प्राप्ता धीः-बुद्धिर्यस्याः सा । पुनः कथंभूता ? । 'असमतनुभा' समा-सामान्या तनुः-कृशा, समा चासौ तनुश्चेति 'कर्मधारयः', न समतनुरसमतनुरिति 'तत्पुरुषः', असाधारणमहतीत्यर्थः, एतादृशी भा-कान्तिर्यस्याः सा तथा । कस्याम् ? । गवि-पृथिव्यां स्वर्गे वा ।

"गौः स्वर्गे वृषभे रश्मौ, वज्रे शीतकरे पुमान् ।
अर्जुनीनेत्रदिग्बाण-भूवाग्वादिषु योषिति ॥"

इति मेदिनी । पुनः कथंभूता ? । 'कृतधीरसमदवैरिवधा' कृतो-विहितो धीराणां-सुराणां धैर्यवतां समदानां-मदसहितानां वैरिणां-रिपूणां वधो-विनाशो यया सा तथा । धीराश्च ते समदाश्च धीरसमदा इति 'कर्मधारयः' । कैः कृत्वा ? । 'महारिभिः' महान्ति च तानि अरीणि-चक्राणि च महारीणि तैः, बृहद्भिश्चक्रैरित्यर्थः । रथाङ्गं रथपादोऽरि, चक्रं धारा पुनः प्रधिः" इति हैमः (का० ३, श्लो० ४१९) । कथंभूतैः ? । 'धामहारिभिः' धाम्ना-तेजसा हारीणि-मनोज्ञानि तैः । कैरिव ? । 'असमदवैरिव' असमैः-असदृशैः दवैः-वनवह्निभिरिवेत्युत्प्रेक्षा । अत्राभेदे रूपकम् । "दवदावौ वनवह्नी" इत्यमरे हैमे (का० ४, श्लो० १६७) च । न च समदवैः इत्यत्र समासे विभक्तिलोपः शंक्यः "इवेन नित्यं समासो विभक्त्यलोपश्च" इति वार्तिकात् । अत्रार्थे "वागर्थाविव संपृक्तौ, वागर्थप्रतिपत्तये" (स० १, श्लो० १) इति रघुरेवोदाहरणं द्रष्टव्यम् ॥ ७२ ॥

॥ इति महोपाध्याय० श्रीअरजिनस्तुतेर्वृत्तिः ॥ ४ । १८ । ७२ ॥

(३)

सौ० वृ०—याऽत्रेति । सा (चक्रधरा-) अप्रतिचक्रा देवी मुदे-प्रीत्ये अस्तु इत्यन्वयः । 'अस्तु' इति क्रियापदम् । का कर्त्री ? । 'सा' । 'अस्तु' भवतु । कस्यै ? । 'मुदे' । किंविशिष्टा सा ? । चक्रं-नेमिं धरतीति 'चक्रधरा' । तच्छब्दो यच्छब्दमपेक्षते । सा का ? । या देवी अत्र-जगति भाति इत्यन्वयः ।

'भाति' इति क्रियापदम् । का कर्त्री ? । 'सा' । 'भाति' शोभते । कुत्र ? । 'अत्र' [जगति] । किंविशिष्टा या देवी ? । 'अधिष्ठिता' आश्रिता । किं कर्मतापन्नम् ? । विचित्रो-विविधप्रकारो वर्णो यस्य सः तादृशो यो विनतात्मजो-गरुडः तस्य पृष्ठं-मध्यभागः तत् 'विचित्रवर्णविनतात्मजपृष्ठं', गरुडवाहनेत्यर्थः । "आजानु कनकगौरम्, आनाभेः शङ्खकुन्दहरधवलं" तथा "आकण्ठतो नवदिवाकरकान्तितुल्यम्, आमूर्धतोऽञ्जननिभं गरुडस्वरूपम्" इति वचनात् । तथा—

"दितिर्माता च दैत्यानां, देवानामदितिस्तथा ।
विनता पक्षिणां माता, कद्रुः पन्नगमातरि ।।"

इति मातृ-प्रकरणे । अतो विनतात्मजो-गरुडः । पुनः किंविशिष्टा या ? । समा-सदृशी तनुः-शरीरं भजतीति समतनुभाक् । कस्मात् ? । 'हुतात्'[1] हुतं अत्तीति हुताद्-वह्निः तत्समानेत्यर्थः । पुनः किंविशिष्टा या ? । अविकृता-अविकारिणी धीः-बुद्धिर्यस्याः सा 'अविकृतधीः' । पुनः किंविशिष्टा या ? । असमा-अनन्यसदृशी तनुः-शरीरं तस्या भा-कान्तिर्यस्याः सा 'असमतनुभा' । पुनः किंविशिष्टा या ? । कृतो-विहितो धीराः-युद्धे विकटाः मदेन सहिताः समदाः तादृशा ये वैरिणः-शत्रवः तेषां वधो-हननं यया सा 'कृतधीरसमदवैरिवधा' । कैः कृत्वा ? । महान्ति अरीणि-चक्राणि महारीणि तैः 'महारिभिः', महच्चक्रैरित्यर्थः । किंविशिष्टैर्महारिभिः ? । धाम-तेजः तेन हारिभिः-मनोहरैः 'धामहारिभिः' । दिवि का इव भाति ! । 'तडिद् (इव)' विद्युदिव भाति इव-यथा तद्वत् । सान्ध्यसमयोत्पन्नो यो घनो-मेघः तस्य मूर्धा-मस्तकं तस्मिन् सान्ध्यघनमूर्धनि यथा भाति इत्यन्वयः । 'भाति' इति क्रियापदम् । का कर्त्री ? । 'तडित्' । 'भाति' शोभते । कस्मिन् ? । 'सान्ध्यघनमूर्धनि' । कैः कृत्वा ? । 'धाम[हारि]भिः' किरणैः । धाम[हारि]भिः कैरिव ? । असमा-असदृशाः दवा-वनवह्नयः असमदवाः, तैः 'असमदवैः' । अत्र तडित्स्थानीया देवी, सान्ध्यघनस्थानीयो गरुडः, धामस्थानीयं चक्रं, तद्वद् देवी भाति । कस्याम् ? । 'गवि' स्वर्गे पृथिव्यां वा । एतादृशी देवी प्रीत्यै अस्तु । इति पदार्थः ।।

अथ समासः—विचित्रा वर्णा यस्मिन् स विचित्रवर्णः, विनतायाः आत्मजो विनतात्मजः, विचित्रवर्णश्चासौ विनतात्मजश्च विचित्रवर्णविनतात्मजः, विचित्रवर्णविनतात्मजस्य पृष्ठं विचित्रवर्ण-विनतात्मजपृष्ठं, तत् विचित्रवर्णविनतात्मजपृष्ठम् । समा च सा तनुश्च समतनुः, हुतात्समतनुः[2] हुतात्समतनुः, हुतात्समतनुं भजतीति हुतात्समतनुभाक् । न अविकृता अविकृता, अविकृता धीर्यस्याः सा अविकृतधीः । न समा असमाः, असमाश्च ते दवाश्च असमदवाः, तैरसमदवैः । धामभिः हरन्तीत्येवंशीलानि धामहारीणि, तैः धामहारिभिः । सन्ध्यायां भवः सान्ध्यः, सान्ध्यश्चासौ घनश्च

---

१. अशुद्धं स्थलमिदम् ।
२. इदमप्यशुद्धम् ।

सान्ध्यघनः, सान्ध्यघनस्य मूर्धा सान्ध्यघनमूर्धा, तस्मिन् सान्ध्यघनमूर्धनि । चक्रं धरतीति चक्रधरा । असमाना (तनोः-) शरीरस्य भा-कान्तिर्यस्याः सा असमतनुभा । मदेन सहिताः समदाः, धीराश्च ते समदाश्च धीरसमदाः, धीरसमदाश्च ते वैरिणश्च धीरसमदवैरिणः, कृतो धीरसमदवैरिणां वधो यया सा कृतधीरसमदवैरिवधा । महान्ति च तानि अरीणि (च) [विद्यन्ते येषु तानि] महारीणि, तैः—महारिभिः । गवीति पदस्यार्थः—

"गौर्वज्रे सुवृषे धेनौ, वाचि दिग्बाणयोर्गिरि ।
भूमयूखसुखस्वर्गा—सत्यवह्न्यक्षिमातृषु ॥"

इति महीपकोषः । इति चतुर्थवृत्तार्थः ॥ ७२ ॥

अरनाथजिनेन्द्रस्य, स्तुतेरर्थो लिपीकृतः ।
सौभाग्यसागराख्येण, सूरिणा ज्ञानसेविना ॥ १ ॥

॥ इति श्रीअरनाथस्तुतिः सम्पूर्णा ॥ ४।१८।७२ ॥

(४)

दे० व्या०—याऽत्रेति । सा चक्रधरा देवी मुदे अस्तु-भवतु इत्यन्वयः । 'अस् भुवि' धातुः । 'अस्तु' । इति क्रियापदम् । का कर्त्री ? । चक्रधरा देवी । कस्यै ? । मुदे-हर्षाय । "मुत्प्रीत्यामोदसंमो(म)दाः" इत्यभिधानचिन्तामणिः (का० २, श्लो० २३०) । किंविशिष्टा देवी ? । 'हुतात्समतनुभाक्' हुतं-होमद्रव्यं अत्ति-भक्षयतीति हुताद्-वह्निः तेन समां-सदृशां तनुं भजतीति हुतात्समतनुभाक् । पुनः किंविशिष्टा ?' 'अविकृतधीः' अविकृता-अविकारिणी धीः-बुद्धिः यस्याः सा तथा । पुनः किंविशिष्टा ? । 'असमतनुभा' चिन्त्यं (?) पदम् । पुनः किंविशिष्टा ? । 'कृतधीरसमदवैरिवधा' धीराः-धैर्यवन्तः समदा-मदेन सह वर्तमानाः, धीराश्च ते मदाश्चेति 'द्वन्द्वः', ततः कृतः-सम्पादितो धीरसमदवैरिणां वधो-विनाशो यया सा तथा । कस्याम् ? । 'गवि' गौः-पृथ्वी तस्याम् । "गौर्गोत्रा भूतधात्री क्ष्मा" इत्यभिधानचिन्तामणिः (का० ४, श्लो० १) । यत्तदोर्नित्याभिसम्बन्धात् या चक्रधरा देवी अत्र-जगति महारिभिः-महच्चक्रैः भाति-शोभते । 'भा दीप्तौ' धातुः । 'भाति' इति क्रियापदम् । का कर्त्री ? । चक्रधरा देवी । कैः ? महारिभिः । 'रथाङ्गं रथपादोऽरि चक्रं धारा पुनः प्रधिः" इत्यभिधानचिन्तामणिः (का० ३, श्लो० ४१९) । किंविशिष्टा देवी ? । अधिष्ठिता-अध्यारूढा । किम् ? । 'विचित्रवर्णविनतात्मजपृष्ठं' विचित्रवर्णो यो विनतात्मजो-गरुडः तस्य पृष्ठं-पृष्ठप्रदेशम् । विचित्रः-कर्बुरो वर्णो यस्येति 'बहुव्रीहिः' । "कर्बुरश्चित्रला (लः)" इति पारस्करः । केव ? । 'तडिदिव' । कस्मिन् ? । 'सान्ध्यघनमूर्धनि' सान्ध्यः-सन्ध्यायां भवो यो घनो-मेघः तस्य मूर्धनि-मस्तके । आधारे सप्तमी । यथा सान्ध्यघनशिरःस्थिता तडिद्

भाति, तथा देवी गरुडपृष्ठारूढा चक्रैः शोभते इत्याशयः । किंविशिष्टैः महारिभिः ? । 'असमदवैरिव धामहारिभिः' असमा-अनन्यसदृशा ये दवाः-वनवह्नयः तैरिव धाम्ना-तेजसा हारिभिः-कान्तैः । "दवो दावो वनवह्निः" इत्यभिधानचिन्तामणिः (का० ४, श्लो० १६७) । न चात्र विभक्तिलोपः शङ्कनीयः "इवेन सह नित्यं समासो विभक्त्यलोपश्च" इति वार्तिकात् ।। इति तुरीयवृत्तार्थः ।। ४ । १८ । ७२ ।।

(५)

ध० टीका—येति । 'या' । 'अत्र' अस्मिन् जगति । 'विचित्रवर्णविनतात्मजपृष्ठं' विचित्रवर्णः-शबलवर्णः "आजानु कनकगौरम्" इत्यादिवचनात् यो विनतात्मजो-गरुत्मान् तस्य पृष्ठं-गात्रो-परिभागम् । 'अधिष्ठिता' अधिरूढा । 'हुतात्समतनुभाक्' हुतं अत्तीति हुताद्-अग्निः तत्समं तनुं-मूर्तिं भजते या सा । 'अविकृतधीः' अविकृता-अविकारिणी धीर्यस्याः सा । 'असमदवैरिव' असदृशदावैरिव । 'धामहारिभिः' धाम्ना-तेजसा हारिभिः-कान्तैः । 'तडिदिव' विद्युदिव । 'भाति' शोभते । 'सान्ध्य-घनमूर्धनि' सन्ध्याभवाम्भोदशिरसि । 'चक्रधरा' अप्रतिचक्रा । 'अस्तु' भवतु । 'सा' । 'मुदे' प्रीत्यै । 'असमतनुभा' समा च तनुश्च समतनुः, न समतनुः (असमतनुः) भा यस्याः सा । 'गवि' पृथिव्यां, स्वर्गे वा । 'कृतधीरसमदवैरिवधा' कृतो धीराणां समदानां वैरिणां वधो यया सा । 'महारिभिः' महद्भिश्चक्रैः । या विचित्रवर्णविनतात्मजपृष्ठं अधिष्ठिता सती सान्ध्यघनमूर्धनि तडिदिव भाति सा महारिभिः कृतधीरसमदवैरिवधा चक्रधरा मुदेऽस्त्विति सम्बन्धः ।। ४ । १८ । ७२ ।।

(६)

अवचूरिः

अरा एषां सन्तीत्यरीणि-चक्राणि । महान्ति च तान्यरीणि च तैर्महारिभिः-महाचक्रैः याऽत्र-जगति चक्रधरा देवी-अप्रतिचक्रा देवी भाती-शोभते । कथंभूता ? । विविधवर्णगरुडपृष्ठमधिरूढा । हुतमत्तीति हुताद्-वह्निस्तत्तुल्यां तनुं भजते । अविकृता-अविकारिणी धीर्यस्याः सा । महारिभिः किंभूतैः ? । असमानदवानलैरिव । धाम-तेजस्तेन हारिभिः-मनोहरैः । यथा विद्युत् सन्ध्याभवमेघमस्तके भाति तद्वत् । सा देवी मुदेऽस्तु-भवतु । समा च तनुश्च समतनुः, न समतनुरसमतनुः, एवंविधा भा यस्याः । गवि-पृथिव्यां स्वर्गे वा । कृतो धीराणां समदानां वैरिणां वधो यया ।। ४ । १८ । ७२ ।।

१९. श्रीमल्लिजिनस्तुतयः

अथ श्रीमल्लिनाथस्य स्तुतिः–

नुदंस्तनुं प्रवितर[1] मल्लिनाथ ! मे
प्रियङ्गुरोचिररुचिरोचितां वरम् ।
विडम्बयन् वररुचिमण्डलोज्ज्वलः
प्रियं गुरोऽचिररुचिरोचिताम्बरम् ॥ १ ॥ ७३ ॥

- रुचिरा (४,९)

(१)

ज० वि०– नुदंस्तनुमिति । हे मल्लिनाथ !-मल्लिप्रभो ! हे गुरो !-महात्मन् ! त्वं मे-मम वरं-प्रार्थितार्थम्, अत्र बवयोरैक्यं तु यमकवशात् ज्ञेयम्, प्रवितर-देहीति क्रियाकारकसम्बन्धः । अत्र 'प्रवितर' इति क्रियापदम् । कः कर्ता ? 'त्वम्' । कं कर्मतापन्नम् ? 'वरम्' । त्वं किं कुर्वन् ? 'नुदन्' प्रेरयन्-क्षिपन् । कां कर्मतापन्नाम् ? 'तनुं' शरीरम् । कथंभूतां तनुम् ? 'अरुचिरोचितां' रुचिरा-मनोहरा उचिता-योग्या, एतादृशी न भवतीत्यरुचिरोचिता ताम् । पुनः किं कुर्वन् ? 'विडम्बयन्' अवहेलयन् । किं कर्मतापन्नम् ? अचिररुचिरोचिताम्बरम्' अचिररुच्या-विद्युता रोचितं-उद्भासितं यदम्बरं-नभस्तत् । कथंभूतः सन् ? वरं-प्रधानं यद् रुचिमण्डलं-प्रभामण्डलं तेनोज्ज्वलः-कान्तः सन् । त्वं कथंभूतः ?

१. 'प्रवितनु' इत्यपि पाठः ।

'प्रियङ्गुरोचिः' प्रियङ्गुः-वृक्षविशेषः तद्वद् रुचिः-द्युतिर्यस्य स तथा, नीलद्युतिरित्यर्थः । वरं कथंभूतम् ? 'प्रियं' प्रीतिकरम् । इदं च विशेषणं अम्बरस्यापि घटते ॥

अथ समासः—मल्लिश्चासौ नाथश्च मल्लिनाथः 'कर्मधारयः' । तत्सम्बो० हे मल्लि० । प्रियङ्गुवद् रोचिर्यस्य स प्रियङ्गु० 'बहुव्रीहिः' । रुचिरा चासौ उचिता च रुचिरोचिता 'कर्मधारयः' । न रुचिरोचिता अरुचिरोचिता 'तत्पुरुषः' । तां अरुचि० । रुचीनां मण्डलं रुचि० 'तत्पुरुषः' । वरं च तद् रुचिमण्डलं च वररुचि० 'कर्मधारयः' । वररुचिमण्डलेनोज्ज्वलो वररुचि० 'तत्पुरुषः' । न चिरं(रा) अचिरं(रा) 'तत्पुरुषः' । अचिरं(रा) रुचिर्यस्याः सा अचिर० 'बहुव्रीहिः' । अचिररुच्या रोचितं अचिर० 'तत्पुरुषः' । अचिररुचिरोचितं च तदम्बरं च अचिर० 'कर्मधारयः' । तदचिर० ॥ इति काव्यार्थः ॥ ७३ ॥

(२)

सि० वृ०— नुदंस्तनुमिति । परीषहादिमल्लजयात् मल्लिः । निरुक्तात् गर्भस्थेऽस्मिन् मातुः सर्वर्तुकुसुममाल्यशयनीयदोहदो देवतयाऽपूरीति वा मल्लिः । स चासौ नाथश्च मल्लिनाथः तस्य संबोधनं हे मल्लिनाथ ! । हे 'गुरो !' गृणाति धर्मोपदेशं यथार्थोपदेष्टा वा गुरुः तस्य संबोधनं हे गुरो ! । [गृणाति हिताहितत्वं इति गुरुः तस्य सं० हे गुरो !-हे धर्मोपदेशक] ! 'गॄ शब्दे' कृग्रोरुच्च' (उणा० सू० २४) इति उप्रत्ययः । ऋकारस्य च उकारः 'उरण्रपरः' (पा० अ० १, पा० १, सू० ५१) । त्वं मे-मम वरं-समीहितं प्रवितर-प्रदेहीत्यर्थः । प्रविपूर्वक 'तॄ प्लवनतरणयोः' इति धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि परस्मैपदे मध्यमपुरुषैकवचनम् । अत्र 'प्रवितर' इति क्रियापदम् । कः कर्ता ? । त्वम् । किं कर्मतापन्नम् ? । वरम् । 'वृङ् वरणे' अप्रत्यये वरो देवेभ्यः, स्वसमीहितप्रार्थनमित्यर्थः । यदाह- "तपोभिरिष्यते यत् तु, देवेभ्यः स वरो मतः" इति कात्यः । वरमिति मान्तमव्ययमित्येके ।

"वरो जामातरि वृतौ, देवतादेरभीप्सिते ।
पिङ्गे पुंसि त्रिषु श्रेष्ठे, कुङ्कुमे तु नपुंसकम् ॥ १ ॥
वरी प्रोक्ता शतावर्यां, वरा च स्यात् फलत्रिके ।
मनागिष्टे वरं क्लीबं, केचिदाहुस्तदव्ययम् ॥ २ ॥"

इति रायमुकुटाख्यायाममरटीकायाम् । कथंभूतं वरम् ? । प्रियं-वल्लभम्, प्रीतिकरमित्यर्थः । इदं अम्बरस्यापि विशेषणं घटते । त्वं किं कुर्वन् ? । नुदन्-क्षिपन् । काम् ? । तनुं-देहम् । "त्वग्देहयोरपि तनुः" इत्यमरः (?) । कथंभूतां तनुम् ? । 'अरुचिरोचिताम्' रुचिरा-मनोहरा उचिता-योग्या, रुचिरा चासौ उचिता च रुचिरोचिता इति 'कर्मधारयः', एतादृशी न भवतीत्यरुचिरोचिता तां, लघुकर्मणा स्तोककालेनैव मुक्तिगमनेन तत्त्यागसम्भवाद् बहुलकर्मणामेव तत्सम्भवेनारुचिरोचितत्वमिति भावः । पुनः किं कुर्वन् ? ।

'विडम्बयन्' विडम्बयतीति विडम्बयन्-अवहेलयन् । किं कर्मतापन्नम् ? । 'अचिररुचिरोचिताम्बरम्' अचिररुच्या-तडिता रोचितं-उद्भासितं यदम्बरं-नभः तत् । "अम्बरं व्योम्नि वाससि" इत्यमरः (?) । किंविशिष्टः त्वम् ? । 'वररुचिमण्डलोज्ज्वलः' सन् वरः-प्रधानो यो रुचिमण्डलो-भामण्डलस्तेन उज्ज्वलः-अवदातः सन् । त्वं कथंभूतः ? । 'प्रियङ्गुरोचिः' प्रियङ्गुः-फलिनी तद्वद् रोचिः-कान्तिः यस्य सः, नीलद्युतिरित्यर्थः । यदाहुः (अभि० का० १, श्लो० ४९)–

"रक्तौ च पद्मप्रभवासुपूज्यौ
शुक्लौ च चन्द्रप्रभपुष्पदन्तौ ।
कृष्णौ पुनर्नेमिमुनी विनीलौ
श्रीमल्लिपार्श्वौ कनकत्विषोऽन्ये ॥" - इन्द्रवज्रा

इति श्रीहेमसूरिणः । "प्रियङ्गुः फलिनीकङ्गुपिप्पलीराजिकासु च" इति विश्वः । अत्र भामण्डल-विद्युतोः भगवत्तनुव्योम्नोश्च साधर्म्यादुपमानोपमेयभावः प्रदर्शितः ॥ ७३ ॥

(३)

सौ० वृ०—यो भवाम्भोधेररं-तटं प्राप्तः स कामादिषडन्तररिपूणां विजये मल्ल इव मल्लः तथा गर्भस्थे भगवति मातुर्मल्लिकामालादोहदोत्पन्नत्वेन नाम्ना मल्ली(?) । अनेन सम्बन्धेनायातस्य मल्लिजिनस्य स्तुतेर्व्याख्यानं लिख्यते नुदंस्तनुमिति । हे मल्लिनाथ !-हे मल्लिस्वामिन् ! हे गुरो !-महन् ! मे-मम मह्यं वा त्वं वरं-मनोऽभिलषितं प्रवितर इत्यन्वयः । 'प्रवितर' इति क्रियापदम् । कः कर्ता ? । 'त्वम्' । 'प्रवितर' ददस्व । कं कर्मतापन्नम् ? । 'वरं' इत्यत्र बवयोरैक्यं यमकत्वात् । 'प्रवितनु' इत्यपि पाठः । 'प्रवितनु' विस्तारय । त्वं किं कुर्वन् ? । 'नुदन्' पीडयन् । कां कर्मतापन्नाम् ? । 'तनुम्' । (किंविशिष्टाम् ?।) रुचिरा-मनोज्ञा उचिता-योग्या तद्द्वयं नास्ति सा अरुचिरोचिता, तां 'अरुचिरोचिताम्' । किंविशिष्टं वरम् ? । 'प्रियं' इष्टम्, पुनस्त्वं किं कुर्वन् ? । 'विडम्बयन्' तिरस्कुर्वन् । किं कर्मतापन्नम् ? । अचिररुचिः-विद्युत् [तस्य[1] । रोचिः-त्विट् कान्तिः ते-तव] (तया रोचितं) अम्बरं-आकाशं 'अचिररुचिरोचिताम्बरम्' । पुनः त्वं किंविशिष्टः ? । वरं-प्रधानं यद् रुचिमण्डलं-प्रभामण्डलं तेन तद्वद् वा उज्ज्वलो-निर्मलः-कान्तः 'वररुचिमण्डलो-ज्ज्वलः' । पुनः किंविशिष्टस्त्वम् ? । प्रियङ्गुः-वृक्षविशेषः फलिनीनामा तद्वद् रोचिः-कान्तिर्यस्य स 'प्रियङ्गुरोचिः', नीलवर्ण इत्यर्थः । एतादृशो मल्लिर्मम प्रियं वरं वितर । इति पदार्थः ॥

---

१. **इदं चिन्त्यम् ।**

अथ समासः—नुदतीति नुदन् । मल्लिश्चासौ नाथश्च मल्लिनाथः, तस्य सं० हे मल्लिनाथ ! । प्रियङ्गुवद् रोचिर्यस्य स प्रियङ्गुरोचिः । रुचिरा च उचिता च रुचिरोचिते, न विद्येते रुचिरोचिते यस्याः सा अरुचिरोचिता, तां अरुचिरोचिताम् । विडम्बयतीति विडम्बयन् । रुचेर्मण्डलं रुचिमण्डलं, वरं च तद् रुचिमण्डलं च वररुचिमण्डलं, वररुचिमण्डलेन उज्ज्वलः वररुचिमण्डलोज्ज्वलः । न विद्यते चिरा-चिरकालस्थायिनी रो(रु)चिर्यस्याः सा अचिररो(रु)चिः, अचिररोचिषा(रुच्या)रोचितं अचिर(रु)चिरोचितं, अचिररो(रु)चिरोचितं च तद् अम्बरं च अचिररुचिरोचिताम्बरम् । इति प्रथमवृत्तार्थः । इन्द्रवज्रो[1]पजात्युपजातिवंशस्थच्छन्दसा स्तुतिरियम् ।। ७३ ।।

(४)

दे० व्या०—नुदन्निति । हे मल्लिनाथ ! त्वं मे-मम वरं प्रवितर-दद्यादित्यन्वयः । 'तॄ प्लवनतरणयोः' इति धातुः । 'प्रवितर' इति क्रियापदम् । कः कर्ता ? । त्वम् । कं कर्मतापन्नम् ? । वरं-वाञ्छितम् । ववयोरैक्याद् वकारस्थाने बकारग्रहणम् । 'गुरो !' इति । गृणीते धर्ममिति गुरुः तस्यामन्त्रणम् । "गुरुर्ज्ञानो(धर्मो)पदेशकः" इत्यभिधानचिन्तामणिः (का० १, श्लो० ७७) । "हिताहितप्राप्तिपरिहारोपदेष्टा गुरुः" इति नैयायिकाः । किंविशिष्टं वरम् ? । प्रियं-वल्लभम् । त्वं किं कुर्वन् ? । नुदन्-परिक्षिपन् । काम् ? । तनुं-शरीरम् । किंविशिष्टां तनुम् ? । 'अरुचिरोचिताम्' अरुचिरा-बहुलकर्माणः तेषामुचिता-योग्या या सा ताम्, लघुकर्मणां स्तोककालेनैव मुक्तिगमनेन तत्त्यागात् । पुनः किं कुर्वन् ? । विडम्बयन्-हसन् । किम् ? । 'अचिररुचिरोचिताम्बरं' अचिररुचिः-विद्युत् तया रोचितं-उद्भासितं यद् अम्बरं-आकाशं तत् । किंविशिष्टस्त्वम् ? । 'वररुचिमण्डलोज्ज्वलः' वरः-प्रधानो यो रुचिमण्डलो-भामण्डलः तेन उज्ज्वलः-अवदातः । पुनः किंविशिष्टः ? । 'प्रियङ्गुरोचिः' प्रियङ्गुः-वृक्षभेदः तद्वद् रोचिः-कान्तिर्यस्य स तथा । "प्रियङ्गुः फलिनी श्यामा" इत्यभिधानचिन्तामणिः (का० ४, श्लो० २१५) । इति प्रथम-वृत्तार्थः ।। ७३ ।।

(५)

ध० टीका—नुदन्निति । 'नुदन्' प्रेरयन् । 'तनुं' मूर्तिम् । 'प्रवितनु' प्रकर्षेण विस्तारय । 'मल्लिनाथ !' मल्लिस्वामिन् ! । 'मे' मह्यम् । 'प्रियङ्गुरोचिः' श्यामद्युतिः । 'अरुचिरोचितां' रुचिरां च उचितां च रुचिरोचितां, न रुचिरोचिताम् । 'वरं' प्रार्थितार्थम् । 'विडम्बयन्' हसन् । 'वररुचिमण्डलोज्ज्वलः' वरं यद् रुचिमण्डलं-प्रभामण्डलं तेन उज्ज्वलः-कान्तः । 'प्रियं' प्रीतिकरम् । एतद् वरस्याम्बरस्य वा विशेषणम् । 'गुरो !' महात्मन् ! । 'अचिररुचिरोचिताम्बरम्' अचिररुच्या-विद्युता रोचितं-उद्भासितं

१. इदमपि चिन्त्यम् ।

यद् अम्बरं-आकाशं तत् । हे मल्लिनाथ ! तनुमरुचिरोचितां नुदन् वररुचिमण्डलोज्ज्वलः सन् अचिररुचिरोचिताम्बरं विडम्बयन् वरं मे प्रवितन्विति योगः ।। ७३ ।।

(६)

अवचूरिः

नुदन्-क्षिपन् तनुं-शरीरम् । प्रियंगुः-श्यामो वृक्षविशेषस्तद्वद् रोचिर्यस्य । तनुं कथंभूताम् ? रुचिरामुचितां च, न एवंविधाम् । रुचिमण्डलं-भामण्डलं तेनोज्ज्वलः-कान्तः । अचिररुच्या रोचितं विद्युच्छोभितमम्बरम्-आकाशं विडम्बयन् । हे मल्ले (मल्लिनाथ) ! हे गुरो ! अरुचिरोचितां तनुं नुदन् प्रियंगुवर्णः भामण्डलशोभितः विद्युत्सहितमाकाशं पराभवन् मम वरं प्रवितर ।। ७३ ।.

जिनपतीनां स्तुतिः—

जवाद् गतं जगदवतो वपुर्व्यथा-
कदम्बकैरवशतपत्त्रसं पदम् ।
जिनोत्तमान् स्तुत दधतः स्रजं स्फुरत्-
कदम्बकैरवशतपत्रसम्पदम् ।। २ ।। ७४ ।।

- रुचिरा

(१)

ज० वि०—जवादिति । भो भव्याः ! यूयं जिनोत्तमान्-जिनवरान् स्तुत-प्रणमतेति क्रियाकारकसंयोजनम् । अत्र 'स्तुत' इति क्रियापदम् । के कर्तारः ? 'यूयम्' । कान् कर्मतापन्नान् ? 'जिनोत्तमान्' । किं कुर्वतो जिनोत्तमान् ? 'अवतः' रक्षतः । किं कर्मतापन्नम् ? 'जगत्' विश्वम् । कस्मात् ? 'जवात्' वेगात् । कथंभूतं जगत् ? 'गतं' यातम् । किं कर्मतापन्नम् ? 'पदं' स्थानम् । पदं कथंभूतम् ? 'अवशतपत्त्रसम्' अवशाः-परवशाः तपन्तः-तापमनुभवन्तः त्रसाः-सत्त्वा यस्मिन् तथा । कैः कृत्वा ? 'वपुर्व्यथाकदम्बकैः' वपुःपीडोत्पीडैः । नरकादिगतं जगदवत इति समुदायार्थः । पुनः किं कुर्वतः ? 'दधतः' धारयतः । कां कर्मतापन्नाम् ? 'स्रजं' मालाम् । कथंभूतां स्रजम् ? 'स्फुरत्कदम्वकैरव-शतपत्रसम्पदम्' स्फुरन्ती-दीप्यमाना कदम्बानां-वृक्षविशेषकुसुमानां कैरवाणां-कुमुदानां शतपत्राणां-कमलानां सम्पत्-समृद्धिर्यस्यां सा तथा ताम् ।।

अथ समासः—वपुषो व्यथा वपुर्व्यथाः 'तत्पुरुषः' । वपुर्व्यथानां कदम्बकानि वपुर्व्यथा० 'तत्पुरुषः' । तैर्वपुर्व्यथा० । न वशा अवशाः 'तत्पुरुषः' । अवशाश्च ते तपन्तश्च अवश० 'कर्मधारयः' । अवशतपन्तस्त्रसा यस्मिन् तद् अवश० 'बहुव्रीहिः' । जिनानां जिनेषु वा उत्तमा जिनोत्तमाः 'तत्पुरुषः' । तान् जिनो० । कदम्बाश्च कैरवाणि च शतपत्राणि च कदम्ब० 'इतरेतरद्वन्द्वः' । कदम्बकैरवशतपत्राणां सम्पत् कदम्ब० 'तत्पुरुषः' । स्फुरन्ती कदम्बकैरवशतपत्रसम्पद् यस्यां सा स्फुर० 'बहुव्रीहिः' । तां स्फुर० ॥ इति काव्यार्थः ॥ ७४ ॥

(२)

सि० वृ०—जवादिति । भो भव्याः ! यूयं जिनोत्तमान्-जिनवरान् स्तुत-प्रणमतेत्यर्थः । 'स्तुञ् स्तुतौ' धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि परस्मैपदे मध्यमपुरुषबहुवचनम् । 'अप् कर्तरि' (सा० सू० ६९१) इत्यप्, 'अदादेर्लुक्' (सा० सू० ८८०) इति लुक् । अत्र 'स्तुत' इति क्रियापदम्। के कर्तारः ? । यूयम् । कान् कर्मतापन्नान् ? । 'जिनोत्तमान्' जिनेषु उत्तमाः जिनोत्तमाः तान् । किं कुर्वतः जिनोत्तमान् ? । 'अवतः' अवन्ति-रक्षन्ति ते अवन्तः तान् । किम् ? । जगत्-विश्वम् । कथम् ? । जवात्-वेगात् । "जवो वेगस्त्वरिस्तूर्णिः" इत्यमरः (?) । कथंभूतं जगत् ? । गतं-प्राप्तम् । किम् ? । पदं-स्थानम् । पदं कथंभूतम् ? । 'अवशतपत्त्रसं' न वशा अवशाः-पराधीनाः परमाधार्मिकायत्ता इति यावत् तपन्तः-तापमनुभवन्तः त्रसाः-सत्त्वाः यस्मिन् तत् तथा । कैः कृत्वा ? । 'वपुर्व्यथा कदम्बकैः' वपुषो-देहस्य व्यथा-यातना तस्याः कदम्बकैः-समूहैः । नरकादिगतं जगदवतीति समुदायार्थः । पुनः किं कुर्वतो जिनोत्तमान् ? । दधतो-धारयतः । काम् ? । स्रजं-मालाम् । कथंभूतां स्रजम् ? । 'स्फुरत्कदम्बकैरव-शतपत्रसम्पदं' स्फुरन्ती-दीप्यमाना कदम्बानां-वृक्षविशेषकुसुमानां कैरवाणां-कुमुदानां शतपत्राणां-कमलानां सम्पत्-समृद्धिर्यस्याः सा ताम् । "सहस्रपत्रं कमलं शतपत्रं कुशेशयं" इत्यमरः (श्लो० ५४६) । कदम्बो-नीपः । "नीपः कदम्बः सालस्तु" इति हैमः (का० ४, श्लो० २०४) । कैरवं-श्वेतकमलम् । "श्वेते तु तत्र कुमुदं, कैरवं गर्दमाह्वयम्" इति हैमः (का० ४, श्लो० २३०) । शतपत्रं-कमलम् । कदम्बश्च कैरवं च शतपत्रं च कदम्बकैरवशतपत्राणि 'इतरेतरद्वन्द्वः' ॥ ७४ ॥

(३)

सौ० वृ०—जवादिति । भो भव्याः ! यूयं जिनोत्तमान्-तीर्थकरप्रधानान् स्तुत इत्यन्वयः । 'स्तुत' इति क्रियापदम् । के कर्तारः ? । 'यूयम्' । 'स्तुत' प्रणमत । कान् कर्मतापन्नान् ? । 'जिनोत्तमान्' । किं कुर्वतो जिनोत्तमान् ? । 'अवतः' रक्षतः । किं कर्मतापन्नम् ? । 'जगत्' विश्वम् । कथम् ? । 'जवात्' वेगेन । किंविशिष्टं जगत् ? । 'गतं' प्राप्तम् । किं कर्मतापन्नम् ? । 'पदं' स्थानम् । कैः कृत्वा ? । वपुः-शरीरं तस्य व्यथाः-चिन्ताः पीडादयः तासां कदम्बकानि-वृन्दानि तैः 'वपुर्व्यथाकदम्बकैः' । पुनः

किंविशिष्टं जगत् (पदं?) ? । अवशाः-परवशाः तपन्तः-संसारसुखाभिलाषेण तापं प्राप्नुवन्तो ये त्रसाः-सत्त्वा यस्मिन् तद् 'अवशतपत्त्रसम्' । जिनोत्तमान् किं कुर्वतः ? 'दधतः' धारयतः । कां कर्मतापत्राम् ? । 'स्रजं' मालाम् । किंविशिष्टां स्रजम् ? । स्फुरन्तः-दीप्यन्तः कदम्बा-नीपवृक्षविशेषाः कैरवाः-कुमुदादयः शतपत्राणि-कमलादीनि तेषां सम्पत्-ऋद्धिः यस्यां सा 'स्फुरत्कदम्बकैरवशतपत्रसम्पदम्' । इति पदार्थः ॥

अथ समासः—अवन्ति-रक्षन्तीति अवन्तः, तान् अवतः । वपुषां व्यथाः वपुर्व्यथाः, वपुर्व्यथानां कदम्बकानि वपुर्व्यथाकदम्बकानि, तैर्वपुर्व्यथाकदम्बकैः । न वशा अवशाः, तपन्ति ते तपन्तः, अवशाः तपन्तस्त्रसा यस्मिन् तत् अवशतपत्त्रसं, तद् अवशतपत्त्रसम् । जिनेषु उत्तमा जिनोत्तमाः, तान् जिनोत्तमान् । दधति ते दधन्तः, तान् दधतः। कदम्बाश्च कैरवाश्च शतपत्राणि च कदम्बकैरवशतपत्राणि, स्फुरन्ति च तानि कदम्बकैरवशतपत्राणि च स्फुरत्कदम्बकैरवशतपत्राणि, स्फुरत्कदम्बकैरवशतपत्राणां सम्पद् यस्यां सा स्फुरत्कदम्बकैरवशतपत्रसम्पदम् । इति द्वितीयवृत्तार्थः ॥ ७४ ॥

(४)

दे० व्या०—जवादिति । हे भव्यलोकाः ! यूयं जिनोत्तमान्-जिनेषु उत्तमान्-श्रेष्ठान् तीर्थकरानित्यर्थः स्तुत-स्तुतिविषयीकुरुत इत्यन्वयः । 'स्तुञ् स्तुतौ' धातुः । 'स्तुत' इति क्रियापदम् । के कर्तारः ? । 'यूयम्' । कान् ? । 'जिनोत्तमान्' । किं कुर्वतो जिनोत्तमान् ? । 'दधतो'-धारयतः । काम् ? । 'स्रजं'-मालाम् । किंविशिष्टां स्रजम् ? । 'स्फुरत्कदम्बकैरवशतपत्रसम्पदं' कदम्बो-नीपः, "नीपः कदम्बः सालस्तु" इत्यभिधानचिन्तामणिः (का० ४, श्लो० २०४), कैरवं-श्वेतकमलं, "श्वेते तु तत्र कुमुदं, कैरवं गर्दमाह्वयम्" इत्यभिधानचिन्तामणिः (का० ४, श्लो० २३०), शतपत्रं-कमलं सेवन्तीति लोकप्रसिद्धं पुष्पं वा, एतेषां पूर्वं 'द्वन्द्वः', ततः स्फुरन्ती कदम्बकैरवशतपत्राणां सम्पद् यस्यामिति 'बहुव्रीहिः' । पुनः किं कुर्वतो जिनोत्तमान् ? । 'अवतः' रक्षतः । किम् ? । जगत्-विष्टपम् । कस्मात् ? । जवात् । किंविशिष्टं जगत् ? । 'गतं'-प्राप्तम् । किम् ? । पदं-नरकादिस्थानम् । किंविशिष्टं पदम् ? । 'अवशतपत्त्रसम्' अवशाः-परतन्त्राः परमाधार्मिकाधीना इति यावत् तपन्तः-तापमनुभवन्तः त्रसाः-प्राणिनो यत्र तत् । कैः ? । 'वपुर्व्यथाकदम्बकैः' वपुषः-शरीरस्य व्यथायातनाः तासां कदम्बकाः-समूहाः तैः । "वृन्दं चक्रकदम्बके समुदयः पुञ्जोत्करौ संहतिः" । इत्यभिधानचिन्तामणिः (का० ६, श्लो० ४७) । इति द्वितीयवृत्तार्थः ॥ ७४ ॥

(५)

ध० टीका—जवादिति । 'जवात्' वेगात् । 'गतं' यातम् । 'जगदवतः' विश्वं रक्षतः । 'वपुर्व्यथा-कदम्बकैः' शरीरपीडोत्पीडैः । 'अवशतपत्त्रसं' अवशाः-परवशाः तपन्तः-तापं अनुभवन्तः त्रसाः-सत्त्वा

यत्र तत् । 'पदं' स्थानं नरकादिकम् । 'जिनोत्तमान्' जिनवरान् । 'स्तुत' प्रणत । 'दधतः' धारयन्तः । 'स्रजं' पुष्पमालाम् । 'स्फुरत्कदम्बकैरवशतपत्रसंपदं' कैरवाणि-कुमुदानि स्फुरन्ती कदम्बानां कैरवाणां शतपत्राणां च सम्पत्-समृद्धिर्यत्र ताम् । अवशतपत्त्रसं पदं गतं जगज्जवादवतो जिनोत्तमान् स्तुतेति सम्बन्धः ।। ७४ ।।

(६)

अवचूरिः

जवाद्-वेगाज्जगद्-विश्वमवतो-रक्षतो जिनोत्तमान् हे भव्यजनाः ! स्तुत-नुत । जगत् किंविशिष्टम् ? । पदं-स्थानं नरकादिलक्षणं । गतं-प्राप्तम् । पदं किंभूतम् ? । वपुःपीडोत्पीडैरवशाः-परतन्त्रास्तपन्तः-तापमनुभवन्तस्त्रसाः-प्राणिनो यत्र तत् । जिनोत्तमान् कथंभूतान् ? । स्रजं-पुष्पमालां दधतः । मालां कथंभूताम् ? । स्फुरन्ती कदम्बानां कैरवाणां शतपत्राणां च सम्पद् यत्र ।। ७४ ।।

सिद्धान्तश्लाघनम्—

स सम्पदं दिशतु जिनोत्तमागमः
शमावहन्नतनुतमोहरोऽदिते ।
स चित्तभूः क्षत इह येन यस्तपः-
शमावहन्नतनुत मोहरोदिते ।। ३ ।। ७५ ।।

- रुचिरा

(१)

ज० वि०—स सम्पदमिति । स जिनोत्तमागमः-जिनपतिसिद्धान्तः सम्पदं-श्रियं दिशतु इति क्रियाकारकयोजना । अत्र 'दिशतु' इति क्रियापदम् । कः कर्ता ? 'जिनोत्तमागमः' । कां कर्मतापन्नाम् ? 'सम्पदम्' । जिनोत्तमागमः किं कुर्वन् ? 'आवहन्' कुर्वन् । किं कर्मतापन्नम् ? 'शं' सुखम् । जिनोत्तमागमः कथंभूतः ? 'अतनुतमोहरः' अतनु-प्रभूतं तमो हरति यः स तथा । अथवा अतनुतमान्-प्रभूततमान् ऊहान् राति-ददातीति अतनुतमोहरः । स इति तच्छब्दसम्बन्धाद् यच्छब्द(घटना)माह-येन जिनोत्तमागमेन (इह-लोके) स चित्तभूः-मनोभवः क्षतः-ध्वस्तः । अत्रापि 'क्षतः' इति क्रियापदम् । केन कर्त्रा ? 'येन' । कः कर्मतापन्नः ? 'चित्तभूः' अत्रापि स इति तच्छब्दसाहचर्याद् यच्छब्दघटनामाह-यः चित्तभूः 'मोहरोदिते' मोहः-अज्ञानं रोदितं-रोदनमेते द्वे अपि अतनुत-विस्तारयामास । अत्रापि च 'अतनुत' इति क्रियापदम् ।

कः कर्ता ? 'यः' । के कर्मतापन्ने ? 'मोहरोदिते' । कथंभूते मोहरोदिते ? 'अदिते' अखण्डिते । तथा यः चित्तभूः 'तपःशमौ' तपः द्वादशविधं शमः-उपशमः तौ अहन्-हतवान् । अत्रापि च ''अहन्' इति क्रियापदम् । कः कर्ता ? 'यः' । कौ कर्मतापन्नौ ? 'तपःशमौ' ॥

अथ समासः—जिनानां जिनेषु वा उत्तमाः जिनोत्तमाः 'तत्पुरुषः' । जिनोत्तमानामागमो जिनोत्तमागमः 'तत्पुरुषः' । न तनु अतनु 'तत्पुरुषः' । अतनु च तत् तमश्च अतनु० 'कर्मधारयः' । अतनुतमो हरतीति अतनु० 'तत्पुरुषः' । अथवा अतिशयेनातनवो अतनुतमाः । अतनुतमाश्च ते ऊहाश्च अतनु० 'कर्मधारयः' । अतनुतमोहान् रातीत्यतनु० 'तत्पुरुषः' । न दिते अदिते 'तत्पुरुषः' । ते अदिते । चित्ते भवतीति चित्तभूः 'तत्पुरुषः' । तपश्च शमश्च तपःशमौ । 'इतरेतरद्वन्द्वः' । तौ तपःशमौ । मोहश्च रोदितं च मोहरोदिते 'इतरेतरद्वन्द्वः' । ते मोहरोदिते ॥ इति काव्यार्थः ॥ ७५ ॥

(२)

सि० वृ०—स सम्पदमिति । स जिनोत्तमागमः-जिनवरसिद्धान्तः सम्पदं-श्रियं दिशतु-ददात्वित्यर्थः । 'दिश अतिसर्जने' धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि परस्मैपदे प्रथमपुरुषैकवचनं तुप् । 'तुदादेरः' (सा० सू० १००७) । तथा च 'दिशतु' इति सिद्धम् । अत्र 'दिशतु' इति क्रियापदम् । कः कर्ता ? । स जिनोत्तमागमः । कां कर्मतापन्नाम् ? । सम्पदम् । जिनोत्तमागमः किं कुर्वन् ? । आवहन्-कुर्वन् । किं कर्मतापन्नम् ? । शं-सुखम् । कथंभूतो जिनोत्तमागमः ? । 'अतनुतमोहरः' अतनु-प्रभूतं तमो हरति-नाशयति यः स तथा । अथवा अतनुतमान्-प्रभूततमान् ऊहान् राति-ददातीत्यतनुतमोहरः । स इति तच्छब्दसम्बन्धाद् यच्छब्द(घटना)माह-येन जिनोत्तमागमेन इह-अत्र जगति स चित्तभूः-कंदर्पः क्षतः-क्षपितः, क्षयं नीत इत्यर्थः । अत्रापि 'क्षतः' इति क्रियापदम् । केन कर्त्रा ? । येन । कः कर्मतापन्नः ? । चित्तभूः । अत्रापि स इति तच्छब्दसाहचर्याद् यच्छब्द(घटना)माह-यः अवगणितहरिहरादिदेवश्चित्तभूः अदिते-अखण्डिते 'मोहरोदिते' मोहश्च रोदितं च मोहरोदिते अतनुत-अप्रथयतेत्यर्थः । 'तनु विस्तारे' धातोः कर्तरि आत्मनेपदे प्रथमपुरुषैकवचनं तत् । 'तनादेरुप्' (सा० सू० ९९७) । 'दिबादावट्' (सा० सू० ७०७) । तथा च 'अतनुत' इति सिद्धम् । अत्र 'अतनुत' इति क्रियापदम् । कः कर्ता ? । यः । के कर्मतापन्ने ? । मोहरोदिते-अज्ञानरोदने । रोदित इत्यत्र 'क्तो वा सेट्' (सा० सू० १२७७) इति सेट् । क्तप्रत्ययस्य कित्वाभावपक्षे गुणः । तथा यश्चित्तभूः 'तपःशमौ' तपः-अनुष्ठानविशेषो द्वादशविधं वा धर्मविशेषो वा शमः-उपशमः तौ अहन्-हतवान् इत्यर्थः । 'हन हिंसागत्योः' इति धातोरनद्यतने कर्तरि परस्मैपदे प्रथमपुरुषैकवचनं दिप् । 'अप् कर्तरि' (सा० सू० ६९१) इत्यप् । 'अदादेर्लुक्' (सा० सू० ८८०) । 'दिबादावट्' (सा० सू० ७०७) । 'दिस्योर्हसात्' (सा०

सू० ८८५) इति दिपो लोपः । तथा च 'अहन्' इति सिद्धम् । अत्रापि 'अहन्' इति क्रियापदम् । कः कर्ता ? । यः । कौ कर्मतापन्नौ ? । 'तपःशमौ' तपश्च शमश्च तपःशमौ 'इतरेतरद्वन्द्वः' । "तपो लोकान्तरेऽपि च । चान्द्रायणादौ धर्मे च, पुमान् शिशिरमाघयोः" इति मेदिनी ।। ७५ ।।

(३)

सौ० वृ०—स सम्पदमिति । स जिनोत्तमागमः-तीर्थकृत्सिद्धान्तः [मे-मम] सम्पदं-श्रियं दिशतु इत्यन्वयः । 'दिशतु' इति क्रियापदम् । कः कर्ता ? । 'जिनोत्तमागमः' । 'दिशतु' ददातु । कां कर्मतापन्नाम् ? । 'सम्पदम्' । [कस्य ? । 'मम'] । जिनोत्तमागमः किं कुर्वन् ? । 'आवहन्' प्रापयन् कथयन् वा । किं कर्मतापन्नम् ? । 'शं' सुखम् । पुनः किंविशिष्टः जिनोत्तमागमः ? । अतनुतमाः-प्रचुरा ऊहा-विचाराः तान् राति-ददातीति 'अतनुतमोहरः' । किंविशिष्टो जिनोत्तमागमः ? । 'सः' प्रसिद्धः । तच्छब्दो यच्छब्दमपेक्षते । स कः ? । येन जिनोत्तमागमेन इह-संसारे चित्तभूः-कामः स दुर्धरः क्षतः इत्यन्वयः । 'क्षतः' इति क्रियापदम् । केन कर्त्रा ? । 'येन' जिनोत्तमागमेन । 'क्षतः' हतः । कः कर्मतापन्नः ? । 'चित्तभूः' । कस्मिन् ? । 'इह' संसारे । कथंभूतश्चित्तभूः ? । 'सः' । (स) कः ? । यः कामः मोहः-अज्ञानं रोदितं ते द्वे अतनुत इत्यन्वयः । 'अतनुत' इति क्रियापदम् । कः कर्ता ? । 'यः' कामः । 'अतनुत' विस्तारयत । के कर्मतापन्ने ? । 'मोहरोदिते' । किंविशिष्टे मोहरोदिते ? । 'अदिते' अखण्डिते-अच्छिन्ने । पुनः (यः) चित्तभूः-कामः तपःशमौ अहन् इत्यन्वयः । 'अहन्' इति क्रियापदम् । कः कर्ता ? । 'यः' चित्तभूः । 'अहन्' हन्ति स्म । कौ कर्मतापन्नौ ? । 'तपो' बाह्याभ्यन्तररूपं, 'शमः'-उपशमः, तौ द्वौ यो विनाशयति स चित्तभूर्येन जिनागमेन ध्वस्तः । इति पदार्थः ।।

अथ समासः—जिनेषु उत्तमाः जिनोत्तमाः, जिनोत्तमानां आगमः जिनोत्तमागमः । अतिशयेन तनवः इति तनुतमाः, न तनुतमा अतनुतमाः, अतनुतमाश्च ते ऊहाश्च अतनुतमोहाः, अतनुतमोहान् राति-ददातीति अतनुतमोहरः । न दिते अदिते, ते अदिते । चित्ताद् भवतीति चित्तभूः । तपश्च शमश्च तपःशमौ (तौ तपः०) । मोहश्च रोदितं च मोहरोदिते (ते मोह०) । इति तृतीयवृत्तार्थः ।। ७५ ।।

(४)

दे० व्या०—स सम्पदमिति । स जिनोत्तमागमः सम्पदं-लक्ष्मीं दिशतु-ददातु इत्यन्वयः । 'दिश अतिसर्जने' धातुः । 'दिशतु' इति क्रियापदम् । कः कर्ता ? । 'जिनोत्तमागमः' जिनेषु उत्तमाः-तीर्थंकराः तेषाम्, यद्वा जिनानां उत्तमः-श्रेष्ठो य आगमः-सिद्धान्तः । "आप्तोक्तिः समयागमौ" इत्यभिधानचिन्तामणिः (का० २, श्लो० १५६) । कां कर्मतापन्नाम् ? । सम्पदं-लक्ष्मीम् । किं कुर्वन् आगमः ? । आवहन्-प्रापयन् । किम् ? । शं-सुखम् । किंविशिष्ट आगमः ? । 'अतनुतमोहरः' न तनु

अतनु इति नञ्समासः, एवंविधं यत् तमः-अज्ञानं हरतीति तथा, यद्वा अतनुतमान्-अत्युत्कृष्टान् ऊहान्-तर्कान् रातीति अतनुतमोहरः । यत्तदोर्नित्याभिसम्बन्धाद् येन-जिनोत्तमागमेन स-वक्ष्यमाणः चित्तभूः-कन्दर्पः क्षतः-क्षयं प्रापितः । स कः ? । यो चित्तभूः । 'तपःशमौ' तपो द्वादशविधं, शमः-उपशमः अनयो 'र्द्वन्द्वः' तौ अहन्-हतवान् । 'हन हिंसागत्योः' इति धातुः । च-पुनः अदिते-अखण्डिते मोहरोदिते अतनुत-अप्रथयत । 'तनु विस्तारे' धातुः । 'अतनुत' इति क्रियापदम् । कः कर्ता ? । चित्तभूः । के कर्मतापन्ने ? । 'मोहरोदिते' मोहो-मिथ्याभिनिवेशो रोदितं-विप्रलापः अनयो 'र्द्वन्द्वः' ।। इति तृतीयवृत्तार्थः ।। ७५ ।।

(५)

ध० टीका—स सम्पदमिति । 'सः' । 'सम्पदं' श्रियम् । 'दिशतु' ददातु । 'जिनोत्तमागमः' अर्हत्सिद्धान्तः । 'शं' सुखम् । 'आवहन्' कुर्वन् । 'अतनुतमोहरः' अतनु-प्रभूतं तमो हरति यः सः, यदिवा अतनुतमान् ऊहान् राति यः सः । 'अदिते' अखण्डिते । 'सः' । 'चित्तभूः' मनोभवः । 'क्षतः' ध्वस्तः । 'इह' अत्र जगति । 'येन' आगमेन । 'यः' । 'तपःशमौ' तपश्च शमश्च (तौ) । 'अहन्' हतवान् । 'अतनुत' अपप्रथत । 'मोहरोदिते' मोहः च रोदितं च । स जिनोत्तमागमः सम्पदं दिशतु येन चित्तभूः क्षतः स यस्तपशमावहन् अदिते मोहरोदिते अतनुतेति योगः ।। ७५ ।।

(६)

अवचूरिः

स जिनेन्द्रागमः सम्पदं दद्यात् । कथंभूतः ? । शं-सुखमावहन्-कुर्वन् । अतनु-प्रौढं तमो हरतीति । यद्वा अतनुतमानूहान् राति-ददातीति । स चित्तभूः-कामो येन क्षतो-हतः । यः कन्दर्पस्तपःशमौ अहन्-जघान । अदिते-अखण्डिते मोहश्च रोदितं च मोहरोदिते च योऽतनुत-अप्रथयत ।। ७५ ।।

श्रीकपर्दिस्मरणम्—

द्विपं गतो हृदि रमतां दमश्रिया
प्रभाति मे चकितहरिद्विपं नगे ।
वटाह्वये कृतवसतिश्च यक्षराट्
प्रभातिमेचकितहरिद् विपन्नगे ।। ४ ।। ७६ ।।

- रुचिरा

(१)

जo विo—द्विपमिति । यक्षराट्-यक्षराजः कपर्दिनामा मे-मम हृदि-हृदये रमतां-क्रीडतु तिष्ठत्विति यावत् इति क्रियाकारकयोजनम् । अत्र 'रमतां' इति क्रियापदम् । कः कर्ता ? 'यक्षराट्' । कस्मिन् ? 'हृदि' । कस्य ? 'मे' । किं कुर्वति हृदि ? 'प्रभाति' शोभमाने । कया ? 'दमश्रिया' उपशम-सम्पदा । कथंभूतो यक्षराट् ? 'द्विपं गतः' गजमारूढः । कथंभूतं द्विपम् ? चकितः-त्रस्तो हरिद्विपः-सुरेन्द्रहस्ती यस्मात् तथा तम् । यक्षराट् पुनः कथंभूतः ? 'कृतवसतिः' विहितवसतिः । चः समुच्चयार्थः । कस्मिन् ? 'नगे' वृक्षे । नगे कथं० ? 'वटाह्वये' न्यग्रोधनाम्नि । पुनः कथं० ? 'विपन्नगे' विगतसर्पे । यक्षराट् पुनः कथं० ? 'प्रभातिमेचकितहरित्' प्रभया-कान्त्या अतिशयेन मेचकिताः-श्यामीकृता हरितो-दिशो येन स तथा ।।

अथ समासः—दमस्य श्रीः दमश्रीः 'तत्पुरुषः' । तया दमश्रिया । हरेर्द्विपो हरिद्विपः 'तत्पुरुषः' । चकितो हरिद्विपो यस्मात् स चकित० 'बहुव्रीहिः' । तं चकित० । वट इत्याह्वयो यस्य स वटाह्वयः 'बहुव्रीहिः' । तस्मिन् वटा० । कृता वसतिर्येन स कृत० 'बहुव्रीहिः' । यक्षाणां यक्षेषु वा राट् यक्षराट् 'तत्पुरुषः' । अतिशयेन मेचकिताः अतिमे० 'तत्पुरुषः' । अतिमेचकिता हरितो येन सोऽतिमे० 'बहुव्रीहिः' । प्रभयाऽतिमेचकितहरित् प्रभाति० 'तत्पुरुषः' । विगताः पन्नगा यस्मात् स विपन्नगः 'बहुव्रीहिः' । तस्मिन् विप० ।। इति काव्यार्थः ।। ७६ ।।

।। इति श्रीशोभनस्तुतिवृत्तौ श्रीमल्लितीर्थपतेः स्तुतेर्व्याख्या ।। ४ । १९ । ७६ ।।

(२)

सिo वृo—द्विपमिति । यक्षराट्-यक्षाधिपतिः कपर्दिनामा मे-मम हृदि-हृदये रमतां-क्रीडतु इत्यर्थः । "रमु क्रीडायाम्' धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि आत्मनेपदे प्रथमपुरुषैकवचनं ताम् । 'अप्०' (सा० सू० ६९१) । तथा च 'रमताम्' इति सिद्धम् । अत्र 'रमताम्' इति क्रियापदम् । कः कर्ता ? । 'यक्षराट्' यक्षेषु राजतीति यक्षराट् । क्विबन्तः 'ऋटुरषाणां मूर्धा' इति सावर्ण्येन 'षो डः' (सा० सू० २७७) इति षस्य डत्वम् । कस्मिन् ? । हृदि । कस्य ? मे । किं कुर्वति हृदि ? । प्रभाति-शोभमाने । कया ? । 'दमश्रिया' दमस्य-उपशमस्य श्रीः दमश्रीः तया, उपशमसम्पदा । कथंभूतो यक्षराट् ? । 'गतः'-प्राप्तः, अर्थादारूढः । कम् ? । 'द्विपं' द्वाभ्यां शुण्डाग्राभ्यां पिबतीति द्विपः तम् । 'सुपि स्थः' (पा० अ० ३, पा० २, सू० ४) इति योगविभागात् कः । कथंभूतं द्विपम् ? । चकितः-त्रस्तो हरेः-इन्द्रस्य द्विपो-हस्ती यस्मात् स तथा तम् । अतिशयबलवत्त्वेन ऐरावणस्यापि बलोत्पादकत्वादिति भावः । पुनः कथंभूतो यक्षराट् ? । 'कृतवसतिः' कृता-विहिता वसतिः-स्थानं गृहमितियावत् येन स तथा । "वसती रात्रिवेश्मनोः" इत्यमरः (श्लो० २४६८) । चः समुच्चयार्थः । कस्मिन् ? । 'नगे' न गच्छतीति नगः-

वृक्षः तस्मिन् नगे । कथंभूते ? । 'वटाह्वये' वट इत्याह्वयः-अभिधानं यस्य स तथा तस्मिन् । "उदन्तोऽथाह्वयोऽभिधा । गोत्रसंज्ञानामधेया०" इति हैमः (का० २, श्लो० १७४) । पुनः किंविशिष्टे ? । 'विपन्नगे' विगताः पन्नगाः-सर्पा यस्मिन् तथा तस्मिन् । पुनः किंविशिष्टो यक्षराट् ? । 'प्रभातिमेचकितहरित्' प्रभया-कान्त्या अतिशयेन मेचकः सञ्जातो यासां ताः अतिमेचकिता-अतिश्यामीकृता हरितो-दिशो येन स तथेति 'बहुव्रीहिः' । "मेचकः कृष्णनीलः स्यात्, अतसीपुष्पसन्निभः" इति शब्दार्णवः । "मेचकः शितिकण्ठाभः" इति तु दुर्गः । रुचिराच्छन्दः । "चतुर्ग्रहैरिह रुचिरा जभौ जसौ" इति च तल्लक्षणम् ॥ ७६ ॥

॥ इति महामहोपाध्यायश्रीभानु० श्रीमल्लिनाथजिनस्य स्तुतिवृत्तिः ॥ ४ । १९ । ७६ ॥

(३)

सौ० वृ०—द्विपमिति । स यक्षराट्-कपर्दिनामा यक्षराट् मे-मम हृदि-चित्ते रमतामित्यन्वयः । 'रमतां' इति क्रियापदम् । कः कर्ता ? । 'यक्षराट्' । 'रमतां' क्रीडताम् । 'कस्मिन् ? । 'हृदि' । कस्य ? । 'मे' किंविशिष्टो यक्षराट् ? । 'कृतवसतिः' कृतनिवासः । कस्मिन् ? । 'नगे' वृक्षे । किंविशिष्टे नगे ? । 'वटाह्वये' न्यग्रोधनामनि । पुनः किंविशिष्टो यक्षराट् ? । 'गतः' प्राप्तः, अधिरूढः । किं कर्मतापन्नम् ? । 'द्विपं' गजम् । गजवाहनमित्यर्थः । किंविशिष्टं द्विपम् ? । चकितः-त्रासितः हरेः-इन्द्रस्य द्विपो-हस्ती येन स चकितहरिद्विपस्तं 'चकितहरिद्विपं', ऐरावणजित्वरमित्यर्थः । किंविशिष्टे हृदि ? । 'प्रभाति' प्रकर्षेण भासनशीले । कया ? । 'दमश्रिया' विषयजयलक्षणशोभया । पुनः किंविशिष्टो यक्षराट् ? । प्रभया-कान्त्या अतिशयेन मेचकिताः-चित्रिताः पिञ्जरीकृता हरितो-दिशो येन सः 'प्रभातिमेचकितहरित्' । किंविशिष्टे नगे ? । विगता-दूरं गताः पन्नगाः-सर्पा यस्मिन् स विपन्नगः तस्मिन् 'विपन्नगे' । एतादृशो यक्षो मे-मम प्रसन्ने हृदि रमताम् । इति पदार्थः ॥

अथ समासः—द्वाभ्यां मुखशुण्डाभ्यां पिबतीति द्विपः, तं द्विपम्। दमस्य श्रीः दमश्रीः, तया दमश्रिया । प्रकर्षेण भातीति प्रभात्, तस्मिन् प्रभाति। हरेर्द्विपः हरिद्विपः, चकितो हरिद्विपो यस्मात् स चकितहरिद्विपः, तं चकितहरिद्विपम् । वट इत्याह्वयो यस्य स वटाह्वयः, तस्मिन् वटाह्वये कृता वसतिर्येन स कृतवसतिः । यक्षाणां राजा(ट्) इति यक्षराट् । प्रभया अतिमेचकिता हरितो येन स प्रभातिमेचकित-हरित् । विगताः पन्नगा यस्मिन् स विपन्नगः, तस्मिन् विपन्नगे ॥ इति तुर्यवृत्तार्थः ॥ ४ ॥

श्रीमन्मल्लिजिनेन्द्रस्य, स्तुतेरर्थो लिपीकृतः ॥
सौभाग्यसागराख्येण, सूरिणा ज्ञानसेविना ॥ १ ॥

॥ इति श्रीएकोनविंशतितममल्लिजिनस्तुतिः ॥ ४।१९।७६ ॥

(४)

दे० व्या०—द्विपमिति । यक्षराट्-यक्षाधिपतिः मे-मम हृदि-हृदये रमतां-परिक्रीडतामित्यर्थः । 'रमु क्रीडायां' धातुः । 'रमताम्' इति क्रियापदम् । कः कर्ता ? । यक्षराट् । कस्मिन् ? । हृदि । कस्य ? । मे । किंविशिष्टे हृदि ? । प्रभाति-शोभमाने । कया ? । 'दमश्रिया' दमः-उपशमः तस्य श्रीः-लक्ष्मीः तया । किंविशिष्टो यक्षः (यक्षराट्) ? । गतः-प्राप्तः, अर्थादारूढः । कम् ? । द्विपं-हस्तिनम् । किंविशिष्टं द्विपम् ? । 'चकितहरिद्विपम्' चकितः-त्रासितः हरिद्विपः-ऐरावणो यस्मात् स तम् । बलाधिक्यादिति भावः । पुनः किंविशिष्टः ? । 'कृतवसतिः' कृता-विहिता वसतिः-आश्रमो येन स तथा । कस्मिन् ? । नगे-वृक्षे । किंविशिष्टे नगे ? । 'वटाह्वये' वट इति आह्वयः-अभिधानं यस्य स तस्मिन् । "उदन्तोऽथाह्वयोऽभिधा" इत्यभिधानचिन्तामणिः (का० २, श्लो० १७४) । पुनः किंविशिष्टे ? । 'विपन्नगे' विगता पन्नगा-द्विजिह्वा यत्र स तस्मिन् । पुनः किंविशिष्टः ? । 'प्रभातिमेचकितहरित्' प्रभा-कान्तिः तया अतिशयेन मेचकिताः-श्यामीकृताः हरितः-दिशो येन स तथा । "काष्ठाऽऽशा दिक् हरित् ककुप्" इत्यभिधानचिन्तामणिः (का० २, श्लो० ८०) । इति तुरीयवृत्तार्थः । उपेन्द्रवज्राच्छन्दः ॥ लक्षणं तु पूर्वमेवोद्दिष्टमिति ॥ ४ । १९ । ७६ ॥

(५)

ध० टीका—द्विपमिति । 'द्विपं गतः' गजमारूढः । 'हृदि रमतां' मनसि क्रीडतु । 'दमश्रिया' शमसम्पदा । 'प्रभाति' शोभमाने । 'मे' मम । 'चकितहरिद्विपं' चकितः-त्रस्तो हरिद्विपः-सुरेन्द्रहस्ती यस्य तम् । 'नगे' विटपिनि । 'वटाह्वये' न्यग्रोधनाम्नि । 'कृतवसतिश्च' विहितालयश्च । 'यक्षराट्' यक्षराजः कपर्दिनामा । 'प्रभातिमेचकितहरित्' प्रभया अतिशयेन मेचकिताः-श्यामीकृताः हरितः-कुकुभो मेचकस्वरूपा एव येन सः । 'विपन्नगे' विगतसर्पे । द्विपं गतो नगे कृतवसतिश्च यक्षराट् मे हृदि रमतामित्यन्वयः ॥ ४ । १९ । ७६ ॥

(६)

अवचूरिः

यक्षराट् कपर्दिनामा मम मनसि रमतां-परिक्रीडताम् । हृदि कथंभूते ? । उपशमलक्ष्म्या प्रभाति-प्रकर्षेण शोभमाने । यक्षराट् किंविशिष्टः ? । चकितः-त्रस्तो हरिद्विप-ऐरावणो यस्मात् तं द्विपं-वारणं गतः-प्राप्तः । विपन्नगे-विगतसर्पे नगे-वृक्षे वटाभिधाने कृता वसतिः-आलयो येन । प्रभया-कान्त्या अतिमेचकिता-श्यामलीकृता हरितो-दिशो येन सः ॥ ४ । १९ । ७६ ॥

२०. श्रीमुनिसुव्रतजिनस्तुतयः

अथ श्रीमुनिसुव्रतनाथस्य संस्तवनम्—

जिनमुनिसुव्रतः समवताज्जनतावनतः
स[1] मुदितमानवा धनमलोभवतो भवतः ।
अवनिविकीर्णमादिषत यस्य निरस्तमनः-
समुदितमानबाधनमलो भवतो भवतः ॥ १ ॥ ७७ ॥

- **नर्कुटकम्** (७, १०)

(१)

ज० वि०—जिनमुनीति । स जिनमुनिसुव्रतः-मुनिसुव्रतनामा जिनः भवतः-युष्मान् भवतः-संसारतः समवतात्-सम्यग् रक्षतु इति क्रियाकारकसम्वन्धः । अत्र 'समवतात्' इति क्रियापदम् । कः कर्ता ? 'जिनमुनिसुव्रतः' । कान् कर्मतापन्नान् ? 'भवतः' । कुतः ? 'भवतः' । जिनमुनिसुव्रतः कथंभूतः ? 'जनतावनतः' जनतया-जनसमूहेन अवनतः-प्रणतः । पुनः कथं० ? 'निरस्तमनः समुदितमानबाधनमलः' निरस्ता-अपकीर्णा, मनःसमुदिता-हृदयसमुद्गताः संहिता, वा मानः-गर्वः, बाधनं-बाधा, मलः-कर्मरूपः, ततो निरस्ताः मनःसमुदितमानबाधनमला येन स तथा । स इति तच्छब्दाभिसम्बन्धाद् यच्छब्दमाह-यस्य भगवतः धनं-द्रव्यं समुदितमानवाः-हृष्टनराः आदिषत-गृहीतवन्तः । अत्रापि 'आदिषत' इति क्रियापदम् ।

१. 'समुदित०' इत्यपि पाठः ।

के कर्तारः ? 'समुदितमानवाः' । किं कर्मतापन्नम् ? 'धनम्' । मानवेत्यत्र बवयोरैक्यं यमकवशाज्ज्ञेयम् । धनं कथंभूतम् ? 'अवनिविकीर्णं' भुवि राशीकृतम् । यस्य किं कुर्वतः ? 'भवतः' जायमानस्य । कथंभूतस्य भवतः ? 'अलोभवतः' लोभरहितस्य । दीक्षां कक्षीकुर्वत इति हृदयम् ॥

अथ समासः—शोभनानि व्रतानि यस्य स सुव्रतः 'बहुव्रीहिः' । मुनिवत् सुव्रतः मुनि० 'तत्पुरुषः' । यदिवा मुनिश्चासौ सुव्रतश्च मुनि० 'कर्मधारयः' । जिनश्चासौ मुनिसुव्रतश्च जिन० 'कर्मधारयः' । जनतयाऽवनतो जन० 'तत्पुरुषः' । मुदिताश्च ते मानवाश्च मुदित० 'कर्मधारयः' । न लोभवान् अलोभवान् 'तत्पुरुषः' । तस्य अलोभवतः । अवनौ विकीर्णं अवनि० 'तत्पुरुषः' । मानश्च बाधनं च मलश्च मान० 'इतरेतरद्वन्द्वः' । मनसि समुदिताः मनःसमु० 'तत्पुरुषः' । मनःसमुदिताश्च ते मानबाधनमलाश्च मनःसमु० 'कर्मधारयः' । निरस्ता मनःसमुदितमानबाधनमला येन स निरस्त० 'बहुव्रीहिः' । इति काव्यार्थः ॥ ७७ ॥

(२)

सि० वृ०—जिनमुनीति । मन्यते जगतस्त्रिकालावस्थामिति मुनिः 'मनेरुच्च' (उणा० सू० ५६२) इति ईः । सुष्ठु व्रतानि अस्येति सुव्रतः । मुनिश्चासौ सुव्रतश्च मुनिसुव्रतः । गर्भस्थेऽस्मिन् माता मुनिवत् सुव्रता जाता इति वा मुनिसुव्रतः । जिनश्चासौ मुनिसुव्रतश्च जिनमुनिसुव्रतः इति 'कर्मधारयः' । स जिनमुनिसुव्रतः भवतः-युष्मान् भवतः-संसारात् समवतात्-सम्यग् रक्षतु इत्यर्थः । संपूर्वक 'अव रक्षणे' धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि परस्मैपदे प्रथमपुरुषैकवचनं तुप् । 'अप्०' (सा० सू० ६९१) । तुपस्तातङादेशः । तथा च 'समवतात्' इति सिद्धम् । अत्र 'समवतात्' इति क्रियापदम् । कः कर्ता ? । 'जिनमुनिसुव्रतः' । कान् कर्मतापन्नान् ? । 'भवतः' भवच्छब्दस्य द्वितीयाबहुवचनम् । कुतः ? । 'भवतः' भवात् इति भवतः । सार्वविभक्तिकस्तस् । कथंभूतो जिनमुनिसुव्रतः ? । 'जनतावनतः' जनानां समूहो जनता 'ग्रामजनबन्धुसह'[1] इति तल् तलन्तं च स्त्रीलिङ्गं भवति, जनतया अवनतः-प्रणतो जनतावनतः । पुनः कथंभूतः ? । 'निरस्तमनःसमुदितमानबाधनमलः' निरस्ता-दूरीकृता मनःसमुदिताः-हृदये समुद्गताः संहिता वा मानबाधनमला येन स तथा । मानश्च बाधनं च मलश्च मानबाधनमलाः 'इतरेतरद्वन्द्वः', मनःसमुदिताश्च ते मानबाधनमलाश्च मनःसमुदितमानबाधनमलाः इति 'कर्मधारयः' । तच्छब्दाभिसम्बन्धाद् यच्छब्दमाह-यस्य भगवतो धनं-द्रव्यं 'मुदितमानवाः' मुदिता-हर्षिताश्च ते मानवाश्च-मर्त्याः, आदिषत-गृहीतवन्तः । आङ्पूर्वक 'डुदाञ् दाने' धातोः कर्तरि आत्मनेपदे प्रथमपुरुषबहुवचनम् । 'भूते सिः' (सा० सू० ७२४) । 'आतोन्तोदनतः' इत्यन्तस्यातादेशः । 'दिबादावट्' (सा० सू० ७०७) । 'दादेः' (सा० सू० १११२) इतीत्वम् । 'क्विलात्०' (सा० सू० १४१)

१. 'ग्रामजनबन्धुभ्यस्तल्' इति पाणिनीये (४।२।४३), सिद्धहेमे तु 'ग्रामजनबन्धुगजसहायात् तल्' (६।२।२८) ।

इति षत्वम् । तथा च 'आदिषत' इति सिद्धम् । अत्र 'आदिषत' इति क्रियापदम् । के कर्तारः ? । मुदितमानवाः । किं कर्मतापन्नम् ? । धनम् । मानवेत्यत्र बवयोरैक्यं यमकवशादिति ज्ञेयम् । कथंभूतं धनम् ? । 'अवनिविकीर्णं' अवनौ-भुवि विकीर्णं-परिक्षिप्तं, राशीकृतमिति यावत् । 'कॄ विक्षेपे' । 'ऋत इर्' (सा० सू० ८२०) । 'य्वोर्विहसे' (सा० सू० ३१६) इति दीर्घः । यस्य किं कुर्वतः ? । 'भवतः' जायमानस्य । कीदृशस्य भवतः ? 'अलोभवतः' न लोभो-गार्द्ध्यं विद्यते यस्य स अलोभवान् तस्य अलोभवतः । दीक्षां कक्षीकुर्वत इत्यर्थः ।। ७७ ।।

(३)

सौ० वृ०—यः कर्मशत्रुजयेन मल्लो भवति स मुनिवत् सुव्रतो भवति । तथा गर्भस्थे भगवति जननी सुव्रता जाता । अनेन सम्बन्धेनायातस्य विंशतितमश्रीमुनिसुव्रतजिनस्य स्तुतिव्याख्यानं व्याख्यायते-जिनमुनीति । स जिनमुनिसुव्रतः-मुनिसुव्रतनामा तीर्थकृत् भवतः-युष्मान् भवतः-संसारात् (समवतात् इत्यन्वयः । 'समवतात्' इति क्रियापदम्। कः कर्ता ? । 'जिनमुनिसुव्रतः' । 'समवतात्' संरक्षतु । कान् कर्मतापन्नान् ? । 'भवतः' । कुतः ? । 'भवतः') । किंविशिष्टः जिनमुनिसुव्रतः ? । जनतया-जनसमूहेन अवनतः-प्रणतः 'जनतावनतः' । पुनः किंविशिष्टः जिनमुनिसुव्रतः ? । निरस्तः-निराकृतः मनसि-चित्ते समुदितः-उदयं प्राप्तः मानः-अहंकारः बाधनं-पीडा (मलः-) कर्ममलो येन स 'निरस्तमनः-समुदितमानवाधनमलः' । यमकत्वादत्र बवयोरैक्यम् । किंविशिष्टान् भवतः ? । न विद्यते लोभः-चतुर्थकषायो येषां ते अलोभवन्तः तान् 'अलोभवतः' । पुनः किंविशिष्टः जिनमुनिसुव्रतः ? । 'सः' स-प्रसिद्धः । तच्छब्दो यच्छब्दमपेक्षते । यत्तदोर्नित्यसम्बन्धः । स कः ? । यस्य जिनमुनिसुव्रतस्य धनं-द्रव्यं मुदितमानवा-हृष्टजना आदिषत इत्यन्वयः । 'आदिषत' इति क्रियापदम् । के कर्तारः ? । 'मुदितमानवाः' । 'आदिषत' गृहीतवन्तः । किं कर्मतापन्नम् ? । 'धनम्' । कस्य ? । 'यस्य' जिनमुनिसुव्रतस्य । किंविशिष्टं धनम् ? । 'अवनिविकीर्णं' अवनौ-पृथिव्यां विकीर्णं-विस्तारितम् । किंविशिष्टस्य यस्य ? । 'भवतः' वार्षिकदानोद्यतजायमानस्य धनं समुदितमानवैर्गृहीतम् । इति पदार्थः ।।

अथ समासः—जयति रागादीन् शत्रूनिति जिनः, मनुते तत्त्वमिति मुनिः, सुष्ठु शोभनानि व्रतानि यस्य स सुव्रतः, मुनिश्चासौ सुव्रतश्च मुनिसुव्रतः, मुनिसुव्रतश्चासौ जिनश्च मुनिसुव्रतजिनः (?) । सम्यक् प्रकारेण अवतात् समवतात् । जनानां समूहो जनता, जनतया अवनतः जनतावनतः । मुत् सञ्जाता येषां ते मुदिताः, मुदिताश्च ते मानवाश्च मुदितमानवाः । नास्ति लोभो येषां ते अलोभवन्तः, तान् अलोभवतः । अवनौ विकीर्णं अवनिविकीर्णं, तद् अवनिविकीर्णम् । मानश्च बाधनं च मलश्च मानबाधनमलाः, समुदिताश्च ते मानबाधनमलाश्च समुदितमानबाधनमलाः, मनसि समुदिताः मानबाधनमलाः

मनःसमुदितमानबाधनमलाः, निरस्ता मनःसमुदितमानबाधनमला येन स निरस्तमनःसमुदितमानबाधनमलः । इति प्रथमवृत्तार्थः । इति सप्तदशवर्णमयी विषमाक्षरबृहत्तिका(?)च्छन्दसा स्तुतिरियम् ॥ ७७ ॥

(४)

दे० व्या०—जिनमुनीति । च जिनमुनिसुव्रतो भवतो-युष्मान् भवतः-संसारात् समवताद्-रक्षताद् इत्यन्वयः । 'अव रक्षणे' धातुः । 'समवताद्' इति क्रियापदम् । कः कर्ता ? । 'जिनमुनिसुव्रतः' जिनश्चासौ मुनिसुव्रतश्चेति 'कर्मधारयः' । कान् कर्मतापन्नान् ? । भवतः । किंविशिष्टो जिनमुनिसुव्रतः ? । 'जनतावनतः' जनानां समूहो जनता तया अवनतः-प्रणतः । पुनः किंविशिष्टः ? । 'निरस्तमनःसमुदितमानबाधनमलः' मानः-अहंकृतिः, बाधनं बाधा-पीडा, मलो-दुरध्यवसायः एतेषां पूर्वं 'द्वन्द्वः', मनसि समुदिताः-उदयं प्राप्ताः मनःसमुदिताः, ततः ते च ते मानबाधनमलाश्चेति 'कर्मधारयः', ततः निरस्ताः-परिक्षिप्ताः मनःसमुदितमानबाधनमला येनेति 'तृतीयाबहुव्रीहिः' । यत्तदोर्नित्याभिसम्बन्धाद् यस्य मुनिसुव्रतस्य धनं-द्रव्यं मुदितमानवा आदिषत-गृहीतवन्तः । 'आदिषत' इति क्रियापदम् । के कर्तारः ? । 'मुदितमानवाः' मुत् जाता येषां ते मुदिताः, ते च ते मानवाश्चेति 'कर्मधारयः' । किं कर्मतापन्नम् ? । धनम् । कस्य ? । 'यस्य' मुनिसुव्रतस्य । किं कुर्वतो जिनस्य ? । 'अलोभवतो भवतः' अलोभिनो जायमानस्य, दीक्षां ग्रहीतुकामत्वात् । किंविशिष्टं धनम् ? । 'अवनिविकीर्णम्' अवनौ-पृथिव्यां विकीर्णं-विक्षिप्तम् ॥ इति प्रथमवृत्तार्थः ॥ ७७ ॥

(५)

ध० टीका—जिनमुनीति । 'जिनमुनिसुव्रतः' मुनिसुव्रतनामा जिनः । 'समवतात्' संरक्षतु । 'जनतावनतः' जनतया-जनसमूहेन अवनतः-प्रणतः । 'समुदितमानवाः' हृष्टाः पुमांसः । 'धनं' द्रव्यम् । 'अलोभवतो भवतः' लोभेनायुक्तस्य सतः । 'अवनिविकीर्णं' भूमौ राशीकृतम् । 'आदिषत' गृहीतवन्तः । 'यस्य' भगवतः । 'निरस्तमनःसमुदितमानबाधनमलः' बाधनं-बाधा निरस्ता-अपकीर्णा मनःसमुदिता-हृदि समुद्गताः संहता वा मानश्च बाधनं च मलाश्च येन सः । 'भवतः' युष्मान् । 'भवतः' संसारात् । स जिनमुनिसुव्रतो भवतो भवतः समवतात् यस्य धनं समुदितमानवा आदिषतेति सम्बन्धः ॥ ७७ ॥

(६)

अवचूरिः

जिनमुनिसुव्रतो भवतो-युष्मान् भवतः-संसारात् समवतात्-संरक्षतु । कथंभूतः ? । जनतया-जनसमूहेनावनतः । समुदिताः-सहर्षा ये मानवा-मनुष्या अवनिविकीर्णं-भूमौ राशीकृतं धनं-

कनकादिकं यस्यालोभवतः-अलोभिनो भवतः-सतः । दीक्षां ग्रहीतुकामस्येत्यर्थः । आदिषत-आददत । जिनः कथंभूतः ? । निरस्ता-अपकीर्णा मनःसमुदिता-हृदि समुत्पन्ना संहता वा मानो बाधनं-पीडा मलः-कर्म च येन ॥ ७७ ॥

जिनसमुदायप्रणामः—

प्रणमत तं जिनव्रजमपारविसारिरजो—
दलकमलानना महिमधाम भयासमरुक् ।
यमतितरां सुरेन्द्रवरयोषिदिलामिलनो—
दल‌कमला ननाम हिमधामभया समरुक् ॥ २ ॥ ७८ ॥

- नर्कु०

(१)

ज० वि०—प्रणमतेति । भो भव्याः ! यूयं तं जिनव्रजं-तीर्थङ्करसमूहं प्रणमत-नमत इति क्रियाकारकयोजना । अत्र 'प्रणमत' इति क्रियापदम् । के कर्तारः ? 'यूयम्' । कं कर्मतापन्नम् ? 'जिनव्रजम्' । कथंभूतं जिनव्रजम् ? 'महिमधाम' महत्त्वस्थानम् । पुनः कथंभूतम् ? 'भयासं' भयं अस्यति-क्षिपतीति भयासस्तम् । तमिति तच्छब्दसाहचर्याद् यच्छब्दमाह-यं जिनव्रजं सुरेन्द्रवरयोषित्-देवेन्द्रस्य प्रधानभूता स्त्री शची अतितराम्-अत्यर्थं ननाम-प्रणतवती । अत्रापि 'ननाम' इति क्रियापदम् । का कर्त्री ? 'सुरेन्द्रवरयोषित्' । कं कर्मतापन्नम् ? 'यम्' । कथंभूता सुरेन्द्रवरयोषित् ? 'अपारविसारिरजोदलकमलानना' अपाराणि-अपर्यन्तानि विसारीणि-प्रसरणशीलानि रजोदलानि-परागकणा यस्मिन् तादृशं यत् कमलं-पद्मं तद्वदाननं-मुखं यस्याः सा तथा । पुनः कथं० ? 'अरुक्' नीरोगा । पुनः कथं० ? 'इलामिलनोदलकमला' इलामिलनेन-क्षितिघट्टनेन उद्गतः अलकेषु-कुरलेषु मलः-रजो यस्याः सा तथा । अनेन विशेषणेन भक्तेः प्राबल्यमसूचि । पुनः कथं० ? 'समरुक्' सदृशरुचिः । कया ? 'हिमधामभया' हिमधामा-चन्द्रः तस्य भया-दीप्त्या ॥

अथ समासः—जिनानां व्रजो जिनव्रजः 'तत्पुरुषः' । तं जिन० । रजसां दलानि रजोद० 'तत्पुरुषः । विसारीणि च तानि रजोदलानि च विसारि० 'कर्मधारयः' । अपाराणि विसारिरजोदलानि यत्र तदपार० 'बहुव्रीहिः' । अपारविसारिरजोदलं च तत् कमलं च अपार० 'कर्मधारयः' । अपारविसारिरजोदलकमलवद् आननं यस्याः सा अपार० 'बहुव्रीहिः' । महतः भावः महिमा । महिम्नो

धाम महिम० 'तत्पुरुषः' । तद् महिम० । भयमस्यतीति भयासः 'तत्पुरुषः । तं भयासम् । न विद्यन्ते रुजो यस्याः सा अरुक् 'बहुव्रीहिः' । सुराणामिन्द्रः सुरेन्द्रः 'तत्पुरुषः' । वरा चासौ योषित् च वरयोषित् 'कर्मधारयः' । सुरेन्द्रस्य वरयोषित् सुरे० 'तत्पुरुषः' । इलायां मिलनं इलामिलनं 'तत्पुरुषः' । अलकेषु मलः अलकमलः 'तत्पुरुषः' । उद्गतोऽलकमलो यस्याः सा उदल० 'बहुव्रीहिः' । इलामिलनेन उदलकमला इलामि० 'तत्पुरुषः' । हिमानि धामानि यस्य स हिमधामा 'बहुव्रीहिः' । हिमधाम्नः भा हिम० 'तत्पुरुषः' । तया हिम० । समा रुक् यस्याः सा समरुक् 'बहुव्रीहिः' । इति काव्यार्थः ।। ७८ ।।

(२)

सि० वृ०—प्रणमतेति । भो भव्याः ! यूयं तं जिनव्रजं-तीर्थंकरसमूहं प्रणमत-नमतेत्यर्थः । प्रपूर्वक- 'णम प्रह्वीभावे' धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि परस्मैपदे मध्यमपुरुषबहुवचनम् । अत्र 'प्रणमत' इति क्रियापदम् । के कर्तारः ? । यूयम् । कं कर्मतापन्नम् ? । 'जिनव्रजं' जिनानां व्रजो जिनव्रजस्तम् । कथंभूतं जिनव्रजम् ? । 'महिमधाम' महिम्नो-महत्त्वस्य धाम-स्थानम् । धीयते इति धाम । 'डुधाञ् धातोः' मनिन् । "धाम देशे गृहे रश्मौ, चिह्ने स्थानापराधयोः" इति विश्वः । पुनः किंविशिष्टम् ? । 'भयासं' भयं-भीतिं अस्यति-क्षिपतीति भयासः तं भयासं, भयनाशकमित्यर्थः । तमिति तच्छब्दसाहचर्याद् यच्छब्दमाह-यं जिनव्रजं 'सुरेन्द्रवरयोषित्' सुरन्ति-ऐश्वर्यमनुभवन्तीति सुराः 'सुर[1] प्रसवैश्वर्ययोः' 'इगुपधज्ञाप्रीकिरः कः' (पा० अ० ३, पा० १, सू० १३५), क्षीरादौ(दु)त्था सुरा एषा अस्ति इत्यागमः 'अर्शआदिभ्योऽच्' (पा० अ० ५, पा० २, सू० १२७) । सुरापरिग्रहाद् वा सुराः । तथा च रामायणे—

"सुरापरिग्रहाद् देवाः, सुराख्या इति विश्रुताः ।
अपरिग्रहणात् तस्या, दैतेयाश्चासुराः स्मृताः ।। १ ।।"

इति तथेति । सुष्ठु राजन्त इति वा 'राजृ दीप्तौ' 'अन्येभ्योऽपि' (पा० अ० ३, पा० ३, सू० १३०) तिङ् । यद्वा सुन्वन्ति - खण्डयन्ति सेवकदुःखमिति वा 'षुञ् अभिषवे' अभिषवः-स्नपनं पीडनं [2]स्नानसन्धानादिः (?) । सुन्वन्ति-अभिषुण्वन्ति समुद्रमिति वा 'सुसूधागृधिभ्यः क्रन्' (उणा० सू० १८२) इति क्रन् । भक्तदन्तं (?) सुष्ठु रान्ति-आददते वा 'रा दाने' 'आतोऽनुपसर्गे कः' (पा० अ० ३, पा० २, सू० ३) सुराः । इन्दति-परमैश्वर्यं अनुभवतीति इन्द्रः । 'इदि परमैश्वर्ये' 'ऋज्रेन्द्राग्रवज्रविप्रक्रुप्र(ब्र)-चुप्र(ब्र)क्षुरखुरभद्रोग्रभेरभेलशुक्रतीव्रवर्णेर (शुक्लगौरवन्देरा)मालाः' (उणा० सू० १८६) इति सूत्रेण रन्-

१. **'षुर ऐश्वर्यदीप्त्योः' इति पाणिनीय धातुपाठे ।**
२. **'स्नानं सुरासन्धानं च' इति प्रतिभाति ।**

प्रत्ययान्तो निपातितः। योषति-गच्छति पुरुषमिति योषित्। सुराणां-देवानामिन्द्रः सुरेन्द्रः-शक्रः तस्या वरा-प्रधाना सा चासौ योषिच्च सुरेन्द्रवरयोषित्। 'युष भोजने' सौत्रः 'हसृरुहियुषिभ्य इतिः' (उणा० सू० ९७) इति इत्प्रत्ययः। देवेन्द्रस्य प्रधानभूता स्त्री शचीत्यर्थः। अतितरां-अत्यर्थं ननाम-प्रणतवतीत्यर्थः। णमधातोः कर्तरि परोक्षे परस्मैपदे प्रथमपुरुषैकवचनम्। 'णम प्रह्वत्वे' अग्रे णप्। 'आदेः ष्णः स्नः' (सा० सू० ७४८) इति णकारस्य नकारः। 'द्विश्च' (सा० सू० ७१०) इति द्विर्भावः। 'अत उपधायाः' (सा० सू० ७५७) इति वृद्धिः। तथा च 'ननाम' इति सिद्धम्। अत्र 'ननाम' इति क्रियापदम्। का कर्त्री ?। 'सुरेन्द्रवरयोषित्' सुराणामिन्द्रः-शक्रः तस्य वरा-प्रधाना सा चासौ योषिच्च सुरेन्द्रवरयोषित्। कं कर्मतापन्नम् ?। यम्। कथंभूता सुरेन्द्रवरयोषित् ? 'अपारविसारिरजोदलकमलानना' अपाराणि-इयत्तानवच्छिन्नानि विसारीणि-प्रसरणशीलानि यानि रजांसि-परागरेणूनि दलानि-पर्णानि च, अथवा रजोदलानि परागकणा एव यस्मिन् तादृशं यत् कमलं-पद्मं तदिव आननं-मुखं यस्याः सा तथा। रजांसि च दलानि च रजोदलानि इति 'द्वन्द्वः', अथवा रजसां दलानि रजोदलानीति 'तत्पुरुषः', विसारीणि च तानि रजोदलानि च विसारिरजोदलानीति 'कर्मधारयः', अपाराणि विसारिरजोदलानि च अपारविसारिरजोदलानीति 'कर्मधारयः', अपारविसारिरजोदलानि यस्मिन् तत् अपारविसारिरजोदलं इति 'बहुव्रीहिः', अपारविसारिरजोदलं च तत् कमलं च अपारविसारिरजोदलकमलमिति 'कर्मधारयः', अपारविसारिरजोदलकमलमिव आननं यस्येति 'बहुव्रीहिकर्मधारयौ (?)'। पुनः कथंभूता ?। 'अरुक्' न विद्यते रुक्-रोगो यस्याः सा तथा। पुनः कथंभूता ?। 'इलामिलनोद्धतमला' इलायाः-पृथिव्याः मिलनं-संघट्टनं तेन उद्धतो-विलग्नः अलकेषु-चूर्णकुन्तलेषु मलो यस्याः सा तथा। अनेन विशेषणेन तस्या भक्त्यतिशयो ध्वनितः। पुनः कथंभूता ?। 'समरुक्, समा-तुल्या रुक्-कान्तिर्यस्याः सा तथा। कया ?। 'हिमधामभया' हिमं-शीतलं धाम-तेजो यस्य स हिमधामा-चन्द्रः तस्य भा-प्रभा तया हिमधामभया ॥७८॥

(३)

सौ० वृ०—प्रणमतेति। भो भव्याः ! तं जिनव्रजं-तीर्थंकरसमूहं प्रणमत इत्यन्वयः। 'प्रणमत' इति क्रियापदम्। के कर्तारः ?। 'यूयम्'। 'प्रणमत' प्रणामं कुरुत। कं कर्मतापन्नम् ?। 'जिनव्रजम्'। किंविशिष्टं जिनव्रजम् ?। 'महिमधाम' महत्त्वगृहम्। पुनः किंविशिष्टं जिनव्रजम् ?। भयानि-इहलोकपरलोकादीनि अस्यति-क्षिपतीति भयासः तं 'भयासम्'। पुनः किंविशिष्टं जिनव्रजम् ?। 'अरुक्' रोगरहितमित्यर्थः। पुनः किंविशिष्टं जिनव्रजम् ?। 'तं' प्रसिद्धम्। प्रकान्तप्रसिद्धार्थं तच्छब्दो यच्छब्दमपेक्षते। तं कम् ?। सुरेन्द्रवरयोषिद्-इन्द्रप्रधानशची यं जिनव्रजं अतितरां ननाम इत्यन्वयः। 'ननाम' इति क्रियापदम्। का कर्त्री ?। 'सुरेन्द्रवरयोषित्'। 'ननाम' प्रणमति स्म। कं कर्मतापन्नम् ?। 'यं' जिनव्रजम्। कथम् ?। 'अतितराम्'। किंविशिष्टा सुरेन्द्रवरयोषित् ?। अपाराणि-अपर्यन्तानि

विसारीणि-विसरणशीलानि रजांसि-परागा येषु तानि तादृशानि दलानि-पत्राणि येषु तानि कमलानि-पद्मानि तद्वत् सुगन्धि आननं यस्याः सा 'अपारविसारिरजोदलकमलानना' । पुनः किंविशिष्टा सुरेन्द्रवरयोषित् ? । इला-पृथ्वी तस्या मिलनं-सङ्गमस्तेन ऊर्ध्वीभूता अलकाः-केशास्तेषां मलो यस्याः सा 'इलामिलनोदलकमला' । भक्तिबाहुल्येन पृथिव्यां शिरोनमनत्वादित्यर्थः । पुनः किंविशिष्टा सुरेन्द्रवरयोषित् ? । 'समरुक्' तुल्यकान्तिः । कया सह ? । हिमधामा-चन्द्रस्तस्य भा तया 'हिमधामभया' । इति पदार्थः ।।

अथ समासः—जिनानां व्रजः जिनव्रजः, तं जिनव्रजम् । (न) पाराणि अपाराणि, विसरणशीलानि विसारीणि, अपाराणि च तानि विसारीणि अपारविसारीणि, अपारविसारीणि च तानि रजांसि च अपारविसारिरजांसि, अपारविसारिरजांसि च तानि दलानि च अपारविसारिरजोदलानि, अपारविसारिरजोदलानि च तानि कमलानि च अपारविसारिरजोदलकमलानि, अपारविसारिरजोदलकमलवद् आननं यस्याः सा अपारविसारिरजोदलकमलानना । महिम्नां धाम महिमधाम, तद् महिमधाम । भयानि अस्यतीति भयासः, तं भयासम् । न विद्यन्ते रुजः-रोगा यस्य सः अरुक् । सुराणां इन्द्रः सुरेन्द्रः, वरा चासौ योषिच्च वरयोषित्, सुरेन्द्रस्य वरयोषित् सुरेन्द्रवरयोषित् । अत्र जातावेकवचनम् । इलायां मिलनं इलामिलनं, [इलामिलने उत्-उद्गतः] अलकानां मलः अलकमलः, इलामिलनेन उत्-प्रकटीभूतः अलकमलो यस्याः सा इलामिलनोदलकमला । हिमवद् धाम यस्याः सा हिमधामा, हिमधाम्नो भा हिमधामभा, तया हिमधामभया । समा-सदृशी रुग् यस्याः सा समरुक् । इति द्वितीयवृत्तार्थः ।। ७८ ।।

(४)

दे० व्या०—प्रणमतेति । तं 'जिनव्रजम्' जिनानां-तीर्थकराणां व्रजं-समूहं यूयं प्रणमत-नमस्कारविषयीकुरुत इत्यन्वयः । 'णम प्रह्वीभावे' धातुः । 'प्रणमत' इति क्रियापदम् । के कर्तारः ? । यूयम् । किं कर्मतापन्नम् ? । जिनव्रजम् । किंविशिष्टं जिनव्रजम् ? । 'महिमधाम' महिमा-माहात्म्यं तस्य धाम-गृहम् । "धामागारं निशान्तं च" इत्यभिधानचिन्तामणिः (का० ४, श्लो० ५८) । पुनः किंविशिष्टम् ? । 'भयासं' भयं अस्यति-क्षिपतीति तम् । पुनः किंविशिष्टम् ? । 'अरुक्' नास्ति रुक्-रोगो यस्य तम् (?) । यत्तदोर्नित्याभिसम्बन्धाद् यं जिनव्रजं अतितराम्-अतिशयेन यथा भवति तथा सुरेन्द्रवरयोषित्-इन्द्रमहिषी ननाम-अनंसीत् । '[प्र]णम प्रह्वीभावे' धातुः । 'ननाम' इति क्रियापदम् । का कर्त्री ? । 'सुरेन्द्रवरयोषित्' सुराणां इन्द्रः सुरेन्द्रः इति 'षष्ठीतत्पुरुषः', ततः सुरेन्द्रस्य वरा चासौ योषिच्चेति 'कर्मधारयः' । "योषा योषिद्विशेषास्तु" इत्यभिधानचिन्तामणिः (का० ३, श्लो० १६८) । किंविशिष्टा सुरेन्द्रवरयोषित् ? । 'अपारविसारिरजोदलकमलानना' अपाराणि-अपर्यन्तानि विसारीणि-

प्रसरणशीलानि रजांसि-परागाः दलानि-पर्णानि च यस्य एवंविधं यत् कमलं-तामरसं तद्वदाननं-मुखं यस्याः सा तथा । "बर्हं पर्णं छदं दलं" इत्यभिधानचिन्तामणिः (का० ४, श्लो० १८९) । पुनः किंविशिष्टा ? । 'इलामिलनोदलकमला' इलायाः-पृथिव्याः मिलनं-सम्पर्कः तेन उत्-उत्थितः अलकेषु-कुन्तलेषु मलो यस्याः सा तथा । पुनः किंविशिष्टा ? । 'समरुक्' समा-सदृशा रुक्-कान्तिः यस्याः सा तथा । कया ? । 'हिमधामभया' हिमधामा-चन्द्रः तस्य भा-कान्तिस्तया । एतेन शरीरस्य सौन्दर्यातिशयः सूचितः । इति द्वितीयवृत्तार्थः ।। ७८ ।।

(५)

ध० टीका—प्रणमतेति । 'प्रमणत' नमत । 'तम्' 'जिनव्रजं' अर्हत्सन्दोहम् । 'अपारविसारिरजोदलकमलानना' अपाराणि-अपर्यन्तानि विसारीणि-प्रसरणशीलानि रजोदलानि यस्य तद् अपारविसारिरजोदलं तच्च तत् कमलं च तद्वद् आननं-मुखं यस्याः सा । 'महिमधाम' महत्त्वस्य स्थानम् । 'भयासं' भयमस्यति यस्तम् । 'अरुक्' नीरोगः । 'यम्' । 'अतितरां' अत्यर्थम् । 'सुरेन्द्रवरयोषित्' सुरेन्द्रस्य वरा-प्रधानभूता योषिद्-अङ्गना शची । 'इलामिलनोदलकमला' इला-मिलनेन-क्षितिघट्टनेन उद्गतः अलकेषु-कुरलेषु मलो-रजो यस्याः सा । 'ननाम' प्रणतवती । 'हिमधामभया' हिमधामा-मृगाङ्कस्तस्य भया-दीप्त्या । 'समरुक्' सदृशरुचिः । तं जिनव्रजं प्रणमत यं सुरेन्द्रवरयोषित् ननामेति योगः ।। ७८ ।।

(६)

अवचूरिः

प्रणमत-नमत तं जिनव्रजम्-अर्हत्सन्दोहम् । कथंभूतम् ? । भयासं-भयक्षयकारकम् । सुरेन्द्रवरयोषित्-इन्द्राणी यं ननाम-अनंसीत् । कथंभूता ? । अपाराणि-अपर्यन्तानि प्रसरणशीलानि रजांसि दलानि च यस्य तच्च तत् कमलं च तद्वत् सुगन्धमाननं-मुखं यस्याः । महिम्नो धाम-गृहम् । जिनव्रजविशेषणमेतत् । हिमधामा-चन्द्रस्तस्य भया-कान्त्या समाना रुग्-रुचिर्यस्याः सा । इलामिलनेन-क्षितिघट्टनेन उद्गतोऽलकेषु-केशेषु मलो यस्याः सा ।। ७८ ।।

❖ ❖ ❖

सिद्धान्तस्तवनम्—

त्वमवनताञ्जिनोत्तमकृतान्त ! भवाद् विदुषो—
ऽव सदनुमानसङ्गमन ! याततमोदयितः ।

शिवसुखसाधकं स्वभिदधत् सुधियां चरणं
वसदनुमानसं गमनयातत ! मोदयितः ! ॥ ३ ॥ ७९ ॥

- नर्कु०

(१)

ज० वि०—त्वमवेति । हे जिनोत्तमकृतान्त !-तीर्थकृत्सिद्धान्त ! त्वं-भवान् अवनतान्-प्रणतान् विदुषः-सम्यग्ज्ञानवतः भवात्-संसारात् अव-रक्षेति क्रियाकारकसण्टङ्कः । अत्र 'अव' इति क्रियापदम् । कः कर्ता ? 'त्वम्' । कान् कर्मतापन्नान् ? 'विदुषः' । कथंभूतान् ? 'अवनतान्' । कस्मात् ? 'भवात्' । कथंभूतस्त्वं ? 'याततमोदयितः' याततमसः-गतमोहाः मुनय इत्यर्थः, तेषां दयितः-प्रियः । त्वं किं कुर्वन् ? 'स्वभिदधत्' सुष्ठु अभिदधानः । किं कर्मतापन्नम् ? 'चरणं' अनुष्ठानम् । कथंभूतम् ? 'शिवसुखसाधकं' मुक्तिसुखावर्जकम् । पुनः किं कुर्वन् ? 'वसत्' तिष्ठत् । कथम् ? 'अनुमानसं' मानसमनुलक्षीकृत्य । केषाम् ? 'सुधियां' धीमताम् । अवशिष्टानि सिद्धान्तस्य सम्बोधनानि, तद्व्याख्या त्वेवम्-हे 'सदनुमानसङ्गमन !' सद्-विद्यमानं शोभनं वा अनुमानसङ्गमनं-अनुमानस्य सङ्गतिर्यस्य स तथा तत्सम्बो० हे सदनु० । हे 'गमनयातत !' गमाः-सदृशपाठाः नयाः-नैगमादयः तैः आतत !-विस्तीर्ण ! । हे 'मोदयितः !' मोदयतीति मोदयिता, तत्सम्बो० हे मोदयितः ! ॥

अथ समासः—जिनानां जिनेषु वा उत्तमाः जिनोत्तमाः 'तत्पुरुषः' । जिनोत्तमानां कृतान्तः जिनोत्तम० 'तत्पुरुषः' । तत्सम्बो० हे जिनोत्त० । अनुमानस्य सङ्गमनं अनुमा० 'तत्पुरुषः' । सद् अनुमानसङ्गमनं यस्य स सदनु० 'तत्पुरुषः'[१] । तत् सम्बो० हे सदनु० । यातं तमो येषां ते यात० 'बहुव्रीहिः' । याततमसां दयितः यात० 'तत्पुरुषः' । शिवस्य सुखं शिव० 'तत्पुरुषः' । शिवसुखस्य साधकं शिव० 'तत्पुरुषः' । तद् शिव० । मानसमनु अनुमानसं 'अव्ययीभावः' । गमाश्च नयाश्च गमनयाः 'इतरेतरद्वन्द्वः' । गमनयैः आततः गम० 'तत्पुरुषः' । तत्सम्बो० हे गम० । इति काव्यार्थः ॥ ७९ ॥

(२)

सि० वृ०—त्वमवेति । जिनेषु उत्तमाः-प्रधानाः तीर्थङ्कराः तेषां कृतान्तो-राद्धान्तः तस्य संबोधनं हे जिनोत्तमकृतान्त ! त्वं-भवान् अवनतान्-प्रणतान् विदुषः-पण्डितान् भवात्-संसारात् अव-रक्षेत्यर्थः । 'अव रक्षणे' धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि परस्मैपदे मध्यमपुरुषैकवचनम् । क्रियायाः साधनिका तु पूर्ववत् । अत्र 'अव' इति क्रियापदम् । कः कर्ता ? । त्वम् । कान् कर्मतापन्नान् ? । 'विदुषः' विदन्तीति विद्वांसः तान् विदुषः । 'विदे' शतुर्वसुः' (पा० अ० ७, पा० १, सू० ३६), 'वसोर्व उः' (सा० सू० ३०२) इति वकारस्योकारः, 'अम्शसोरस्य' (सा० सू० १२६) इत्यकारलोपे,

१. अत्र 'बहुव्रीहि' रित्यावश्यकम्, 'तत्पुरुष' इत्युल्लेखो भ्रम एव ।

'क्विलात्०' (सा० सू० १४१) इति षत्वं, 'वसोः सम्प्रसारणं' (पा० अ० ६, पा० ४, सू० १३१) इति वकारस्योकारः पूर्वरूपत्वं चाकारस्य । कथंभूतान् विदुषः ? । अवनतान् । कस्मात् ? भवात् । कथंभूतस्त्वम् ? । 'याततमोदयितः' यातं-गतं तमो-मोहो येषां ते याततमा-मुनयः तेषां दयितो-वल्लभः, अज्ञानवर्जितानां प्रिय इत्यर्थः । त्वं किं कुर्वन् ? । 'स्वभिदधत्' सुष्ठु अभिदधानः । किं कर्म ? । चरणं-अनुष्ठानम् । कथंभूतम् ? 'शिवसुखसाधकं' शिवं-निःश्रेयसं तस्य सुखं-शर्म तस्य साधकं-जनकम् । पुनः किं कुर्वत् ? । वसत्-तिष्ठत् । कथम् ? । 'अनुमानसं' मानसमनुलक्षीकृत्य, मानसं मानसं अनु इति अनुमानसं 'अव्ययीभावः' । केषाम् ? । 'सुधियां' सुष्ठु-शोभना धीर्येषां ते सुधियः तेषाम् । अवशिष्टानि सिद्धान्तस्य सम्बोधनपदानि, तद्व्याख्या चैवम्-हे 'सदनुमानसङ्गमन !' सद्-विद्यमानं शोभनं वा यद् अनुमानं तस्य सङ्गमनं-सङ्गतिर्यस्मिन् यस्य वा स तथा तस्य संबोधनं हे सद० । "लिङ्गपरामर्शोऽनुमानम्" इति मणिकृतः । "परामृश्यमाणं लिङ्गमनुमानम्" इत्युदयनाचार्याः । हे 'गमनयातत !' गमाः-सदृशपाठाः, नया-नैगमादयः, गमाश्च नयाश्च गमनयाः 'इतरेतरद्वन्द्वः', गमनयैः आ-समन्तात् ततो-विस्तृतो गमनयाततः, तस्य संबोधनं० हे गम० ! । हे 'मोदयितः !' मोदयतीति मोदयिता, तस्य संबोधनं हे मोदयितः ! ।। ७९ ।।

(३)

सौ० वृ०—त्वमवेति । हे जिनोत्तमकृतान्त !-हे तीर्थकरप्रधानसिद्धान्त ! । हे सदनुमानसङ्गमन ! -हे प्रधानानुमानप्रसङ्ग ! । हे गमाः-सदृशपाठाः नया-नैगमाद्यास्तैः कृत्वा आतत !-विस्तीर्ण ! हे 'गमनयातत !' मोदयतीति मोदयिता तस्य सं० हे मोदयितः !-हे हर्षकारक ! । त्वं भवात्-संसारात् विदुषः-पण्डितान् अव इत्यन्वयः । 'अव' इति क्रियापदम् । कः कर्ता ? । 'त्वम्' । 'अव' रक्ष । कान् कर्मतापन्नान् ? । 'विदुषः' । कस्मात् ? । 'भवात्' । किंविशिष्टान् विदुषः ? । 'अवनतान्' प्रणतान् । किंविशिष्टस्त्वम् ? । यातं-गतं तमः-अज्ञानं येषां ते याततमसो-मुनयः तेषां दयितो-वल्लभो 'याततमोदयितः' । पुनस्त्वं किं कुर्वन् ? । 'वसत्' (?) वासं कुर्वन् । किं कर्मतापन्नम् ? । 'अनुमानसं' मानसं-चित्तं अनु-लक्ष्यीकृत्य । केषाम् ? । 'सुधियां' पण्डितानाम् । पुनस्त्वं किं कुर्वन् ? ।'स्वभिदधत्' सुष्ठु-शोभनं अभिदधत्-कथयत् । कं कर्मतापन्नम् ? । 'चरणं' चारित्रम् । किंविशिष्टं चरणम् ? । शिवो-मोक्षः तस्य सुखं स्वाभाविकं अचलमक्षयमव्याबाधरूपं तस्य साधकं-परमकारणम् । एतादृश हे जिनोत्तमकृतान्त ! त्वमव-रक्ष । इति पदार्थः ।।

अथ समासः—जिनामुत्तमः जिनोत्तमः, जिनोत्तमस्य कृतान्तः जिनोत्तमकृतान्तः, तस्य सं० हे जिनोत्तमकृतान्त ! । विदन्ति ते विद्वांसः, तान् विदुषः । सत् च तद् अनुमानं (च) सदनुमानं,

सदनुमानस्य सङ्गमनं-मिलनं यस्य स सदनुमानसङ्गमनः, तस्य सं० हे सदनुमानसङ्गमन ! । यातं तमो येषां ते याततमसः, याततमसां दयितो याततमोदयितः । शिवस्य सुखानि शिवसुखानि, शिवसुखानां साधकं शिवसुखसाधकं, तद् शिवसुखसाधकम् । सुष्ठु-शोभनं अभिदधत् स्वभिदधत् । सु-शोभना धीर्येषां ते सुधियः, तेषां सुधियाम् । चर्यते-संसारतीरं प्राप्यते अनेन इति चरणम् । मानसं अनु-लक्षीकृत्य इत्यनुमानसम् । गमाश्च नयाश्च गमनयाः, गमनयैः आततः गमनयाततः, तस्य सं० हे गमनयातत ! । मोदयतीति मोदयिता, तस्य सं० हे मोदयितः ! । इति तृतीयवृत्तार्थः ॥ ७९ ॥

(४)

दे० व्या०—त्वमवेति । हे 'जिनोत्तमकृतान्त !' जिनोत्तमाः-तीर्थंकराः तेषां कृतान्तः-सिद्धान्तः, तस्यामन्त्रणम् । त्वं भवात्-संसारात् विदुषः-पण्डितान् अव-रक्षेत्यन्वयः । 'अव रक्षणे' धातुः । 'अव' इति क्रियापदम् । कः कर्ता ? । त्वम् । कान् कर्मतापन्नान् ? । विदुषः । कस्मात् ? । भवात् । किंविशिष्टान् विदुषः । अवनतान्-प्रणतान् । किंविशिष्टस्त्वम् ? । 'याततमोदयितः' यातं-गतं तमः-अज्ञानं पापं येषां ते याततमाः अर्थान्मुनयः तेषां दयितो-वल्लभः । त्वं किं कुर्वन् ? । स्वभिदधत्-धारयन् । किम् ? । चरणम्-चारित्रम् । "चारित्रचरणे अपि" इत्यभिधानचिन्तामणिः (का० ३, श्लो० ५०७) । किंविशिष्टं चरणम् ? । 'शिवसुखसाधकम्' शिवसुखं-मुक्तिसुखं तस्य साधकं-प्रापकम् । शिवस्य सुखं शिवसुखमिति 'षष्ठीतत्पुरुषः' । पुनः किं कुर्वत् ? । वसत्-निवसत् । किम् ? । 'अनुमानसम्' मानसं मानसं प्रति अनुमानसम्, (मानसं) लक्षीकृत्येत्यर्थः । केषाम् ? । 'सुधियाम्' सुष्ठु-शोभना धीः-बुद्धिः येषां ते तथा तेषाम् । 'सदनुमानसङ्गमन !' इति । सत्-शोभनं यद् अनुमानं तस्य संगमनं-संघटनं यस्मिन् तस्यामन्त्रणम् । "लिङ्गपरामर्शोऽनुमानम्" इति नैयायिकाः । 'गमनयातत !' इति । गमाः-सदृशपाठाः नयाः-प्रमाणैकदेशाः एतेषां 'द्वन्द्वः', तैः आ-समन्तात् ततो-विस्तीर्णः यः स तस्यामन्त्रणम् । 'मोदयितः !' इति । मोदं-हर्षं कारयतीति मोदयिता तस्यामन्त्रणम् । एतानि सर्वाणि जिनसिद्धान्तस्य सम्बोधनपदानि । इति तृतीयवृत्तार्थः ॥ ७९ ॥

(५)

ध० टीका—त्वमिति । 'त्वम्' । अवनतान् । प्रणतान् । 'जिनोत्तमकृतान्त !' तीर्थकृत्सिद्धान्त ! । 'भवात्' संसारात् । 'विदुषः' सम्यग्ज्ञानवतः । 'अव' रक्ष । 'सदनुमानसङ्गमन !' सद्-विद्यमानं शोभनं वा अनुमानसङ्गमनं-अनुमानसङ्गतिर्यस्य स आमन्त्र्यते । 'याततमोदयितः' यातं-अपगतं तमो येषां ते याततमसो-मुनयस्तेषां दयितः-इष्टः ।'शिवसुखसाधकं' मुक्तिसौख्यावर्जकम् । 'स्वभिदधत्' सम्यक् अभिदधानम् । 'सुधियां' धीमताम् । 'चरणं' अनुष्ठानम् । 'वसत्' तिष्ठत् । 'अनुमानसं' मानसं

लक्ष्यीकृत्य । 'गमनयातत !' गमाश्च नयाश्च गमनयास्तैः आतत-विस्तीर्ण ! । 'मोदयितः !' प्रमोदजनक ! । हे जिनोत्तमकृतान्त ! त्वं याततमोदयितः सुधियां अनुमानसं वसत् चरणं स्वभिदधत् भवाद् अवनतानवेत्यन्वयः ।। ७९ ।।

(६)

अवचूरिः

हे जिनोत्तमसमय ! त्वमवनतान्-प्रणमतो विदुषोऽव-रक्ष भवात्-संसारात् । सद्-शोभमानं विद्यमानं वा अनुमानस्य प्रमाणस्य संगमनं-संगतिर्यस्य तस्य संबोधनम् । त्वं किंविशिष्टः ? । यातं तमो येभ्यस्ते याततमसो-मुनयस्तेषां दयितः-अभीष्टः । मोक्षसुखप्रापकं चरणं-चारित्रं स्वभिदधत्-स्वाख्यन् । किंभूतम् ? । सुधियां मानसमनु-लक्ष्यीकृत्य वसत्-तिष्ठत् । हे गमनयातत ! गमाः-सदृशपाठाः नयाश्च-नैगमादयस्तैरातत-विस्तीर्ण ! । हे मोदयितः !-प्रमोदकारक ! ।। ७९ ।।

❀ ❀ ❀

श्रीगौरीसंस्तवः—

अधिगतगोधिका कनकरुक् तव गौर्युचिता—
ङ्कमलकराजि[1] तामरसभास्यतुलोपकृतम् ।
मृगमदपत्रभङ्गतिलकैर्वदनं दधती
कमलकरा जितामरसभाऽस्यतु लोपकृतम् ।। ४ ।। ८० ।।

- नर्कु०

(१)

ज० वि०—अधिगतेति । भो भव्यात्मन् ! गौरी-गौर्याख्या देवता तव-भवतः लोपकृतं-विनाशकृतं अर्थाद् विपक्षादिकं अस्यतु-क्षिपतु अथवा विनाशयतु इति क्रियाकारकयोगः । अत्र 'अस्यतु' इति क्रियापदम् । का कर्त्री ? 'गौरी' । कं कर्मतापन्नम् ? 'लोपकृतम्' । कस्य ? 'तव' । गौरी कथंभूता ? 'अधिगतगोधिका' अधिगता-प्राप्ता गोधा-देववाहनविशेषो यया सा तथा । अत्र स्वार्थे कः प्रत्ययः । पुनः कथं० ? 'कनकरुक्' सुवर्णच्छविः । गौरी किं कुर्वती ? 'दधती' बिभ्राणा । किं कर्मतापन्नम् ? 'वदनं' मुखम् । कथंभूतं वदनम् ? 'उचिताङ्कम्' उचिता-योग्या अङ्का-लाञ्छनानि यस्य तत् तया । किं कृत्वा ? 'मृगमदपत्रभङ्गतिलकैः' मृगमदेन-कस्तूरिकया ये पत्रभङ्गतिलकाः-पत्रच्छेदोपलक्षित-

१. '०राजितामरस०' इत्यपि सम्भवति ।

विशेषकास्तैः कृत्वा । पुनः कथं० ? 'अलकराजि' कुरलोद्भासि । "कुरलो भ्रमरालकः" इत्यभिधानचिन्तामणौ (का० ३, श्लो० २३३) । पुनः कथं० ? 'तामरसभासि' पद्मवद् भासनशीलम् । पुनः कथं० ? 'अतुलोपकृतं' स्वकान्तिसम्भागप्रदानादिना अतुलं-असदृशं उपकृतं-उपकारो यस्य तत् तथा । अथवा अतुलं यथा स्यात् तथा उपकृतं-उपकारे स्थितम् । पुनः कथंभूता गौरी ? 'कमलकरा' कमलं करे यस्याः सा तथा, अथवा कमलवत् करौ यस्याः सा तथा । पुनः कथं० ? 'जितामरसभा' जिता-निष्प्रभीकृता रूपनेपथ्यप्रागल्भ्यादिभिः अमराणां सभा यया सा तथा ॥

अथ समासः—अधिगता गोधा यया सा अधिगतगोधिका 'बहुव्रीहिः' । कनकवद् रुक् यस्याः सा कनक० 'बहुव्रीहिः' । उचिता अङ्का यस्मिन् तद् उचिताङ्कम् 'बहुव्रीहिः' । (तद् उचि० ।) अलकै राजि अल० 'तत्पुरुषः' । तदल० । तामरसवद् भासि तामर० 'तत्पुरुषः' । तत् ताम० । अतुलं उपकृतं यस्य तदतुलो० 'बहुव्रीहिः' । अथवा अतुलं उपकृतं येन तदतुलो० 'बहुव्रीहिः' । तदतुलो० । मृगस्य मदो मृगमदः 'तत्पुरुषः' । पत्रभङ्गैरुपलक्षितास्तिलकाः पत्र० 'तत्पुरुषः' । मृगमदेन पत्रभङ्गतिलका मृगमद० 'तत्पुरुषः' । तैर्मृग० । कमलं करे यस्याः सा कमल० 'बहुव्रीहिः' । अथवा कमलवत् करौ यस्याः सा कमल० 'बहुव्रीहिः' । अमराणां सभा अमर० 'तत्पुरुषः । जिता अमरसभा यया सा जिता० 'बहुव्रीहिः' । लोपं करोतीति लोपकृत् 'तत्पुरुषः' । तं लोपकृतम् । इति काव्यार्थः ॥ ८० ॥

॥ इति श्रीशोभनस्तुतिवृत्तौ श्रीमुनिसुव्रतजिनपतेः स्तुतेर्व्याख्या ॥ ४ । २० । ८० ॥

(२)

सि० वृ०—अधिगतेति । हे भव्यात्मन् ! गौरी-गौरीनाम्नी देवी तव-भवतो लोपकृतं-विनाशकृतं अर्थाद् विपक्षादिकं अस्यतु-क्षिपत्वित्यर्थः । 'असु क्षेपणे' धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि परस्मैपदे प्रथमपुरुषैकवचनं तुप् । 'दिवादेर्यः' (सा० सू० ९६३), 'स्वरहीनं' (सा० सू० ३६) । तथा च 'अस्यतु' इति सिद्धम् । अत्र 'अस्यतु' इति क्रियापदम् । का कर्त्री ? 'गौरी' गौरवर्णत्वाद् गौरी । कं कर्मतापन्नम् ? । 'लोपकृतम्' लोपं-विनाशं करोतीति लोपकृत् तम् । कस्य ? । तव । कथंभूता गौरी ? ।'अधिगतगोधिका' अधिगता-प्राप्ता गोधा-देववाहनविशेषो यया सा तथा । गोधा एव गोधिका, स्वार्थे कः । अन्ये तु गोधिकां अधिगता अधिगतगोधिका । क्वचिदमाद्यन्तस्य परमत्वमिति गोधिकाशब्दस्य परनिपातः इति व्याख्यान्ति तच्चिन्त्यमिव प्रतिभाति । पुनः कथंभूता ? । 'कनकरुक्' कनकं-काञ्चनं तदिव रुक्-छविर्यस्याः सा कनकरुक् । गौरी किं कुर्वती ? । दधती-बिभ्राणा । किम् ? । वदनं-मुखम् । कथंभूतं वदनम् ? । 'उचिताङ्कं' उचिता अङ्का-लाञ्छनानि यस्य तत् तथा । "अङ्कः समीपे उत्सङ्गे, चिह्ने स्थानापराधयोः" इत्यमरः (?) । कैः कृत्वा ? । 'मृगमदपत्रभङ्गतिलकैः' मृगमदेन-

कस्तूरिकया ये पत्रभङ्गतिलकाः-पत्रच्छेदोपलक्षितविशेषकाः तैः कृत्वा । पुनः कथंभूतम् ? । 'अलकराजि' अलकैः-कुन्तलैः राजते इत्येवंशीलं अलकराजि । पुनः कथंभूतम् ? । 'तामरसभासि' तामरसं-कमलं तद्वद् भासते इति तामरसभासि, पद्मवद् भासनशीलमित्यर्थः । पुनः कथंभूतम् ? । 'अतुलोपकृतं' अतुलं-असदृशं उपकृतं-उपकारो यस्य तत् । कृपाकटाक्षमात्रेणैव सुखजनकत्वादिति भावः । कथंभूता गौरी ? । 'कमलकरा' कमलं करे यस्याः सा, क्रीडार्थं तद्ग्रहणादिति भावः । यदि वा कमलवत् करौ यस्याः सा तथेत्यर्थः । पुनः कथंभूता ? । 'जितामरसभा' जिता-निष्प्रभीकृता स्वरूपनेपथ्यादिभिः अमराणां सभा यया सा तथा ।। नर्कुटकं छन्दः ।। "यदि भवतो नजौ भजजला गुरुर्नर्कुटकम्" इति च तल्लक्षणम् ।। ८० ।।

।। इति महोपाध्यायश्रीभानुचन्द्र० श्रीमुनिसुव्रतजिनस्तुतिवृत्तिः ।। ४ । २० । ८० ।।

(३)

सौ० वृ०—अधिगतेति । गौरी-गौरीनाम्नी देवी तव 'लोपकृतं' लोपो-विघ्नाक्षेमादि कृतं-कर्तारं अस्यतु इत्यन्वयः । 'अस्यतु' इति क्रियापदम् । का कर्त्री ? । 'गौरी' । 'अस्यतु' क्षिपतु-निराकरोतु । किं कर्मतापन्नम् ? । 'लोपकृतं' विघ्नकर्तारम् । कस्य ? । 'तव' ते । किंविशिष्टा गौरी ? । अधिगता-अधिष्ठिता गोधिका-देववाहनविशेषो यया सा 'अधिगतगोधिका', चन्दनगोधावाहनेत्यर्थः । पुनः किंविशिष्टा गौरी ? । 'कनकरुक्' सुवर्णच्छविः । पुनः किं कुर्वती गौरी ? । 'दधती' धारयन्ती । किं कर्मतापन्नम् ? । 'वदनं' मुखम् । किंविशिष्टं वदनम् ? । 'उचितं' योग्यम् अङ्कं-चिद्रेखादिकं[1] यस्मिन् तद् 'उचिताङ्कम्' । कैः कृत्वा ? । मृगमदः-कस्तूरिका पत्रभङ्गाः-पत्रवल्ल्यः प्रियलि इति भाषा तिलकं-ललामं मृगमदपत्रभङ्गतिलकानि तैः 'मृगमदपत्रभङ्गतिलकैः' । पुनः किंविशिष्टा गौरी ? । अलकाः-केशास्तेषां राजिः-श्रेणिः तस्यां तामरसानि-कमलानि तेषां भा-कान्तिर्यस्याः सा अलकराजितामरस-भासी । पुनः किंविशिष्टा गौरी ? । 'कमलकरा' कमलहस्ता । पुनः किंविशिष्टा गौरी ? । लावण्यादिगुणैः 'जितामरसभा' निर्जितसुरपर्षत् । कथम् ? । अतुलः(लं)-अमेयः(यं) उपकृतं-उपकृतिगुणो यथा भवतीति तथा 'अतुलोपकृतम् । अमेयोपकारगुणाधिक्येन निर्जितसुरपर्षत् तादृशी गौरी देवी तव लोपकृतं क्षिपतु । इति पदार्थः ।।

अथ समासः—अधिगता गोधिका-देववाहनविशेषो यया सा अधिगतगोधिका । कनकवद् रुक् यस्याः सा कनकरुक् । उचितानि अङ्कानि-चिह्नानि रेखादीनि यस्मिन् तद् उचिताङ्कम्, तद् उचिताङ्कम् । अलकानां राजिः अलकराजिः, अलकराज्यां तामरसानि अलकराजितामरसानि, अलकराजितामरसानां

१. 'चिह्नं रेखादिकं' इति प्रतिभाति ।

भा यस्यां सा अलकराजितामरसभासी । अतुलं उपकृतं यस्मिन् तद् अतुलोपकृतं यथा स्यात् तथा । अथवा वदनस्यापि विशेषणमिदम् । मृगमदश्च पत्रभङ्गाश्च तिलकानि च मृगमदपत्रभङ्गतिलकानि, तैः मृगमदपत्रभङ्गतिलकैः । कमलं करे यस्याः सा कमलकरा । अमराणां सभा अमरसभा, जिता अमरसभा यया सा जितामरसभा । लोपं करोतीति लोपकृत्, तं लोपकृतम् ।। इति तुर्यवृत्तार्थः ।। ८० ।।

श्रीकूर्माङ्कजिनेशस्य, स्तुतेरर्थो लिपीकृतः ।
सौभाग्यसागराख्येण, सूरिणा ज्ञानसेविना ।।

।। इति श्रीविंशतितममुनिसुव्रतजिनस्तुतिः ।। ४ । २० । ८० ।।

(४)

दे० व्या०—अधिगतेति । गौरी देवी तव लोपकृतं-विनाशकारकं अस्यतु-क्षिपतु इत्यन्वयः । 'अस क्षेपणे' धातुः । 'अस्यतु' इति क्रियापदम् । का कर्त्री ? । गौरी देवी । कं कर्मतापन्नम् ? । लोपकृतम् । कस्य ? । तव । किंविशिष्टा गौरी ? । 'अधिगतगोधिका' अधिगता-आरूढा गोधिका यया सा तथा। गोधिका-देववाहनविशेषः । पुनः किंविशिष्टा ? । 'कनकरुक्' कनकं-सुवर्णं तद्वद् रुक्-कान्तिर्यस्याः सा तथा, सुवर्णवर्णेति भावः । पुनः किंविशिष्टा ? । 'कमलकरा' कमलं-नलिनं करे-हस्ते यस्याः सा तथा, क्रीडायै तद्ग्रहणात् । यद्वा कमलवत् करौ-हस्तौ यस्याः सा तथा । पुनः किंविशिष्टा ? । 'जितामरसभा' अमराणां सभा अमरसभा इति 'षष्ठीतत्पुरुषः', ततः जिता-पराजिता अमरसभा-देवपर्षद् यया सा तथा शरीरसौन्दर्यात् तादृशनेपथ्यादिपरिधानाद् वा । किं कुर्वती देवी ? । दधती-धारयन्ती । किम् ? । वदनं-वक्त्रम् । किंविशिष्टं वदनम् ? । 'उचिताङ्कम्' उचितं-योग्यस्थाने कृतं अङ्क-लाञ्छनं यस्य तत् । "कलङ्काङ्कौ लाञ्छनं च" इत्यमरः (श्लो० १७८) । कैः ? । 'मृगमदपत्रभङ्गतिलकैः' मृगमदो-मृगनाभिः, "मृगनाभिर्मृगमदः" इत्यभिधानचिन्तामणिः (का० ३, श्लो० ३०८), तस्य पत्रभङ्गाः-पत्रच्छेदाः तैरुपलक्षिता ये तिलकाः-पुण्ड्रविशेषाः तैः । पुनः किंविशिष्टम् ? । 'अलकराजि' अलकाः-कुरलाः तैः राजते इत्येवंशीलं अलकराजि । पुनः किंविशिष्टम् ? । 'तामरसभासि' तामरसं-कमलं तद्वद् भासते इत्येवंशीलं तामरसभासि । पुनः किंविशिष्टम् ? । 'अतुलोपकृतम्' अतुलं-असदृशं उपकृतंउपकारो यस्य तत् ।। इति तुरीयवृत्तार्थः ।। ४ । २० । ८० ।।

(५)

ध० टीका—अधिगतेति । 'अधिगतगोधिका' अधिगता-प्राप्ता गोधा-देववाहनविशेषो यया सा । अत्र स्वार्थे कन् । 'कनकरुक्' सुवर्णच्छविः । 'तव' भवतः । 'गौरी' गौर्याख्या देवता । 'उचिताङ्गम्' उचिता-योग्या अङ्का-लाञ्छनानि यस्य तत् । 'अलकराजि' कुरुलोल्लासि । 'तामरसभासि' पद्मद्युति ।

'अतुलोपकृतं' स्वकान्तिसंविभागप्रदानादिना अतुलं-असदृशं उपकृतं-उपकारो यस्य तत्, अथवा अतुलं यथा भवत्येवं उपकृतं-उपकारे स्थितम् । 'मृगमदपत्रभङ्गतिलकैः' मृगमदेन(दस्य)-कस्तूरिकाया ये पत्रभङ्गतिलकाः-पत्रच्छेदोपलक्षितविशेषकाः तैः । 'वदनं' आस्यम् । 'दधती' बिभ्राणा । 'कमलकरा' कमलं करे यस्याः सा, अथवा कमलवत् करावस्याः इति । 'जितामरसभा' जिता-निष्प्रभीकृता रूपनेपथ्यप्रागल्भ्यादिभिः अमराणां सभा यया सा । 'अस्यतु' क्षिपतु, अथवा अस्यतु-विनाशयतु । 'लोपकृतं' लोपो-विनाशस्तं करोतीति लोपकृत् प्रतिपक्षादिस्तम् । मृगमदपत्रभङ्गतिलकैः कृत्वा उचिताङ्कं वदनं दधती गौरी तव लोपकृतं अस्यतु इति सम्बन्धः ॥ ४ । २० । ८० ॥

(६)

अवचूरिः

गौरी देवी तव लोपकृतं-विनाशकारकमस्यतु-क्षिपतु । किंभूता ? । अधिगता-प्राप्ता गोधिका-देववाहनविशेषो यया सा । कनकवद् रुग्-दीप्तिर्यस्य वदनं-मुखं दधती । किंभूतम् ? । मृगमदस्य-कस्तूरिकाया ये पत्रभङ्गाः-पत्रच्छेदास्तैरुपलक्षिता ये तिलकास्तैरुचिता-योग्या अङ्का-लाञ्छनानि यस्य तदुचिताङ्कम् । अलकैः-चिकुरै राजते इत्येवंशीलमलकराजि । तामरसभासि । अतुलमुपकृतं स्वकान्तिविभागादिना उपकारो यस्य तत् । कमलं करे यस्याः कमलवद् वा करो यस्याः सा । जिता-निष्प्रभीकृता रूपनेपथ्यप्रागल्भ्यादिभिरमराणां सभा यया सा ॥ ४ । २० । ८० ॥

२१. श्रीनमिजिनस्तुतयः

अथ श्रीनमिनाथस्य संकीर्तनम्–

स्फुरद्विद्युत्कान्ते ! प्रविकिर वितन्वन्ति सततं
ममायासं चारो ! दितमद ! 'नमे'ऽघानि लपितः[1] ! ।
नमद्रव्यश्रेणीभवभयभिदां हृद्यवचसा–
ममायासञ्चारोदितमदनमेघानिल ! पितः ! ॥ १ ॥ ८१ ॥

- शिखरिणी (६,११)

(१)

ज० वि०–स्फुरद्विद्युदिति । हे नमिनाथ ! जिनपते ! त्वं मम-मे सततं-सर्वदा अघानि-पापानि प्रविकिर-निरस इति क्रियाकारकसंयोजनम् । अत्र 'प्रविकिर' इति क्रियापदम् । कः कर्ता ? 'त्वम्' । कानि कर्मतापन्नानि ? 'अघानि' पापानि । कस्य ? 'मम' । कथम् ? 'सततम्' । अघानि किं कुर्वन्ति ? 'वितन्वन्ति' विस्तारयमाणानि । किं कर्मतापन्नम् ? 'आयासं' श्रमम्, भवभ्रमणक्लेशमित्यर्थः । अवशिष्टानि सर्वाण्यपि श्रीनमेः सम्बोधनानि, तद्व्याख्या चैवम्-हे 'स्फुरद्विद्युत्कान्ते !' चञ्चल-तडित्प्रभ ! । हे 'चारो' ! दर्शनीय ! । हे 'दितमद' ! खण्डितदर्प ! । हे 'लपितः' ! लपति-कथयतीत्येवंशीलो लपिता तत्सम्बो० हे लपितः ! । केषाम् ? 'हृद्यवचसां' हृदयङ्गमवचनानाम् । कथंभूतानां हृद्यवचसाम् ?

1. प्रथमायां वा ।

'नमद्भव्यश्रेणीभवभयभिदां' प्रणमद्भव्यसन्ततेः संसारभीतिभेदकानाम् । हे 'अमायासञ्चार' ! न विद्यते मायायाः-शाठ्यस्य सञ्चारः-प्रचारो यस्मिन् तत्सम्बो० हे अमा० ! । हे 'उदितमदनमेघानिल' ! उदितः-उद्गतो यो मदनमेघः-कामरूपो जलदः तत्र अनिल !-समीर !, तद्विघटनहेतुत्वात् । हे 'पितः' ! जनक !, निष्कारणहितकारित्वात् ॥

अथ समासः—स्फुरन्ती चासौ विद्युच्च स्फुर० 'कर्मधारयः' । स्फुरद्विद्युत्वत् कान्तिर्यस्य स स्फुर० 'बहुव्रीहिः' । तत्सम्बो० हे स्फुर० । दितो मदो येन स दितमदः 'तत्पुरुषः' । तत्सम्बो० हे दित० । भव्यानां श्रेणी भव्य० 'तत्पुरुषः' । नमन्ती चासौ भव्यश्रेणी च नमद्भव्य० 'कर्मधारयः' । भवस्य भयं भवभयं 'तत्पुरुषः' । भवभयं भिन्दन्तीति भव० 'तत्पुरुषः' । नमद्भव्यश्रेण्या भवभयभिदो नमद्भव्य० 'तत्पुरुषः' । तेषां नमद्भव्य० । हृद्यानि च तानि वचांसि हृद्य० 'कर्मधारयः' । तेषां हृद्य० । मायायाः सञ्चारो माया० 'तत्पुरुषः' । न विद्यते मायासञ्चारो यस्य सः अमाया० 'बहुव्रीहिः' । तत्सम्बो० हे माया० । मेघ इव मेघः । मदनश्चासौ मेघश्च मदन० 'कर्मधारयः' । उदितश्चासौ मदनमेघश्च उदित० 'कर्मधारयः' । अनिल इवानिलः । उदितमदनमेघेऽनिलः उदित० 'तत्पुरुषः' । तत्सम्बो० हे उदित० । इति काव्यार्थः ॥ ८१ ॥

(२)

सि० वृ०—स्फुरद्विद्युदिति । परीषहादिनाऽनमनान्नमिः, गर्भस्थेऽस्मिन् वैरिनृपैः रुद्धे पुरे भगवत्पुण्यशक्तिप्रेरितां प्राकारोपरिस्थितां भगवन्मातरमालोक्य ते वैरिनृपाः प्रणता इति वा नमिः, तस्य संबोधनं हे नमे !-नमिनामजिनपते ! त्वं मम सततं-सर्वदा अघानि-पापानि प्रविकिर-विक्षिपेत्यर्थः । प्रपूर्वक 'कृ विक्षेपे' धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) मध्यमपुरुषैकवचनं हिः । 'अप्०' (सा० सू० ६९१), 'ऋत इर्' (सा० सू० ८२०), 'अतः' (सा० सू० ७०५) इति हेर्लुक्, 'स्वरहीनं०' (सा० सू० ३६) । तथा च 'प्रविकिर' इति सिद्धम् । अत्र 'प्रविकिर' इति क्रियापदम् । कः कर्ता ? । त्वम् । कानि कर्मतापन्नानि ? । अघानि । "अघं तु व्यसने प्रोक्तमघं दुरितदुःखयोः" इति विश्वः । कस्य ? । मम । कथम् ? । सततम् । अघानि किं कुर्वन्ति ? । वितन्वन्ति । 'तनु विस्तारे' वितन्वन्ति तानि विस्तारयमाणानि । किम् ? । आयासं-श्रमं, भवभ्रमणक्लेशमित्यर्थः । अवशिष्टानि सर्वाणि नमेः संबोधनानि, तेषां व्याख्या यथा-हे 'स्फुरद्विद्युत्कान्ते' ! स्फुरन्ती-इतस्ततः चलन्ती या विद्युत्-तडित् तद्वत् कान्तिः-शरीरद्युतिर्यस्य स तस्य संबोधनं हे स्फुर० । हे 'चार'[1] ! चरतीति चरः चर एव चारः । प्रज्ञादित्वादण्[2] । तस्य संबोधनं हे चार ! दर्शनीय इत्यर्थः । हे 'दितमद' ! दितः-खण्डितो मदो-दर्पो मुन्मोहसंभेदो वा येन स तथा तस्य सं० । हे 'लपितः' ! लपति-कथयतीत्येवंशीलः लपिता तस्य सं०

१. इदं चिन्त्यमिव प्रतिभाति ।

२. 'प्रज्ञार्चाश्रद्धावृत्तिभ्योऽण्' इति सारस्वते (सू० ६१९) ।

हे लपितः ! । 'लप परिभाषणे' कर्तरि क्तः । केषाम् ? । 'हृद्यवचसां' हृद्यानि-हृदयङ्गमानि च तानि वचांसि च हृद्यवचांसि तेषां हृद्यवचसाम् । कथंभूतानां हृद्यवचसाम् ? । 'नमद्भव्यश्रेणीभवभयभिदां' नमन्ती-नमस्कारं कुर्वन्ती या भव्यानां भवन्तीति भवन्त्येभिरिति वा भव्याः 'भव्यगेय०' (पा० अ० ३, पा० ४, सू० ६८) इति निपातः तेषां सम्यग्दृशामित्यर्थः श्रेणी-पंक्तिः तस्याः भवभयं भवस्य-संसारस्य भयं-भीतिं भिन्दन्ति-विदारयन्ति तानि तथोक्तानि तेषां नमद्भव्यश्रेणीभवभयभिदाम् । "श्रेणी लेखास्तु राजयः" इत्यमरः (श्लो० ६५६) । हे 'अमायासञ्चार !' नास्ति मायायाः-निकृतेः-शाठ्यस्य सञ्चारः-प्रचारो यस्मिन् स तथा तस्य सं० । हे 'उदितमदनमेघानिल !' उदितः-उदयं प्राप्तः यो मदनः-कामः स एव मेघः-पर्जन्यः तस्य तस्मिन् वा अनिल इव अनिलो-वायुः तस्य सं० । प्रादुर्भूतकन्दर्पमेघविघट्टने पवनकल्प इति निष्कर्षः । हे 'पितः' पाति रक्षतीति पिता तस्य संबोधनम्, निष्कारणहितकारित्वादिति भावः ।। ८१ ।।

(३)

सौ० वृ०—यो मुनिवत् सुव्रतो-महात्मा भवति तं प्रति सर्वेऽपि नमन्ति । तथा गर्भस्थे भगवति मातुर्दर्शनेन सर्वेऽपि शत्रवो नमिताः । अनेन सम्बन्धेनायातस्यैकविंशतितमश्रीनमिनाथजिनस्य स्तुतेरर्थो लिख्यते-स्फुरद्विद्युदिति ।

हे 'नमे !' हे नमिजिनपते ! । पुनः स्फुरन्ती-दीप्यन्ती या विद्युत्-तडित् तद्वत् कान्तिः-प्रभा यस्य स स्फुरद्विद्युत्कान्तिः तस्य सं० हे 'स्फुरद्विद्युत्कान्ते' ! । हे 'चारो' ! हे मनोज्ञ ! । हे 'दितमद' ! हे खण्डितदर्प ! । हे 'अमायप्रचार'[1] ! नास्ति (मायायाः प्रचारो यस्मिन् तस्यामन्त्रणं) अशाठ्यप्रचार ! । हे 'उदितमदनमेघानिल' ! हे प्रकटितकामघनप्रचण्डपवन !, तन्निर्घाटकत्वात् । हे 'पितः' ! हे निष्कारणेन जगज्जन्तुरक्षकत्वात् जनक ! । त्वं मे-मम अघानि-पापानि सततं-सदा प्रविकिर इत्यन्वयः । 'प्रविकिर' इति क्रियापदम् । कः कर्ता ? । 'त्वम्' । 'प्रविकिर'-निरस्य-दूरं क्षिप । कानि कर्मतापन्नानि ? । 'अघानि' पापानि । कस्य ? । 'मे' मम । कथम् ? । 'सततं' निरन्तरम् । किंविशिष्टानि अघानि ? । 'वितन्वन्ति' विस्तारं कुर्वन्ति । किं कर्मतापन्नम् ? । 'आयासं' श्रमं भवभ्रमणलक्षणम् । कस्य ? । 'मम' । किंविशिष्टस्त्वम् ? । 'लपितः' हृद्यकथकः । केषाम् ? । हृद्यानि-मनोहराणि यानि वचांसि हृद्यवचांसि तेषां हृद्यवचसाम् । किंविशिष्टानां हृद्यवचसाम् ? । नमन्ती-प्रणमन्ती या भव्यानां-मुक्तिगमनयोग्यानां श्रेणी-राजिः तस्याः भवभयं-संसारभयं तस्य भेदनशीलानां 'नमद्भव्यश्रेणीभवभयभिदाम्' । तादृशस्त्वं मम दुरितानि प्रविकिर-दूरं प्रक्षिप । इति पदार्थः ।।

अथ समासः—स्फुरन्ती चासौ विद्युच्च स्फुरद्विद्युत्, स्फुरद्विद्युदिव कान्तिर्यस्य स स्फुरद्विद्युत्कान्तिः, तस्य सं० हे स्फुरद्विद्युत्कान्ते ! । दितो मदो येन स दितमदः, तस्य सं० हे दितमद ! ।

१. अत्र 'अमायासञ्चार !' इत्युचितम्मूलश्लोके प्ररूपितस्य तथाविधत्वात् ।

लपति-भाषते इति लपितः । नमन्तश्च ते भव्याश्च नमद्भव्याः, नमद्भव्यानां श्रेणी नमद्भव्यश्रेणी, भवस्य भयं भवभयं, नमद्भव्यश्रेण्या भवभयं नमद्भव्यश्रेणीभवभयं, नमद्भव्यश्रेणीभवभयं भिन्दन्ति तानि नमद्भव्यश्रेणीभवभयभीन्दि, तेषां नमद्भव्यश्रेणीभवभयभिदाम् । हृद्यानि च तानि वचांसि च हृद्यवचांसि, तेषां हृद्यवचसाम् । मायायाः सञ्चारो मायासञ्चारः, नास्ति मायासञ्चारो यस्य सः अमायासञ्चारः, तस्य सं० हे अमायासञ्चार ! । उदितश्चासौ मदनश्च उदितमदनः, उदितमदन एव मेघः उदितमदनमेघः, (उदितमदनमेघे) अनिल इवानिलः, उदितमदनमेघानिलः, तस्य सं० उदितमदनमेघानिल ! । पातीति पिता तस्य सं० हे पितः ! । क्वचिद्वृत्त्यन्तरे लपित इति विशेषणं संबोधनमप्यस्ति तत्र लपते इति लपिता तस्य सं० हे लपितः ! इत्यपि समासः । शिखरिणीच्छन्दसा स्तुतिरियम् । इति प्रथमवृत्तार्थः ॥ ८१ ॥

(४)

दे० व्या०—स्फुरद्विद्युदिति । हे नमे !-नमिजिन ! त्वं मम अघानि-पापानि सततं प्रविकिर-प्रकर्षेण विक्षेपय इत्यन्वयः । 'कृ विक्षेपे' धातुः । 'प्रविकिर' इति क्रियापदम् । कः कर्ता ? । त्वम् । कानि कर्मतापन्नानि ? अघानि । कथम् ? । सततं-निरन्तरं यथा स्यात् तथेति क्रियाविशेषणम् । किं कुर्वन्ति अघानि ? । वितन्वन्ति-विस्तारयमाणानि । किम् ? । आयासं-परिश्रमम् संसारदुःखमिति यावत् । 'स्फुरद्विद्युत्कान्ते' ! इति । स्फुरन्ती-इतस्ततश्चलन्ती या तडिद्-विद्युत् तद्वत् कान्तिः-प्रभा यस्य स तस्यामन्त्रणं, सुवर्णवर्णशरीरत्वात् । 'चारो' ! इति । चारो !-दर्शनीय ! इति प्राञ्चः । 'दितमद' ! इति । दितः-खण्डितो मुन्मोह-सम्भेदो येन स तस्यामन्त्रणम् । 'लपितः' ! इति । प्रजल्पक ! इत्यर्थः । केषाम् ? । 'हृद्यवचसाम्' हृद्यानि-मनोज्ञानि वचांसि-वचनानि येषां तेषाम् । किंविशिष्टानां हृद्यवचसाम् ? । 'नमद्भव्यश्रेणीभवभयभिदाम्' नमन्ती-प्रणामं कुर्वन्ती या 'भव्यश्रेणी' भव्यानां-भव्यप्राणिनां श्रेणी-सन्ततिः तस्याः 'भवभयं' भवस्य-संसारस्य भयं-साध्वसं भिन्दन्ति-विदारयन्तीति तथा तेषाम् । 'अमायासञ्चार !' इति । नास्ति मायया-कपटेन सञ्चारः-प्रचारो यस्य स तस्यामन्त्रणम् । 'उदितमदन-मेघानिल !' इति । उदितः-उदयं प्राप्तः यो मदनः-कन्दर्पः स एव मेघः-पर्जन्यः तस्मिन्, विघटनहेतुत्वात् अनिल इव अनिलो यः स तस्यामन्त्रणम् । 'पितः' ! इति आमन्त्रणे पदम्, जनक इव हितकारित्वात् । एतानि सर्वाण्यपि नमेः सम्बोधनपदानि ॥ इति प्रथमवृत्तार्थः ॥ ८१ ॥

(५)

ध० टीका—स्फुरदिति । 'स्फुरद्विद्युत्कान्ते !' चञ्चत्तडित्प्रभ ! । 'प्रविकिर' निरस्य । 'वितन्वन्ति' विस्तारयमाणानि । 'सततं' सर्वदा । 'मम' मे । 'आयासं' श्रमम् । 'चारो' ! दर्शनीय ! । 'दितमद' !

खण्डितदर्प ! । 'नमे' ! नमिजिन ! । 'अघानि' पापानि । 'लपितः' ! लपनशील ! । 'नमद्भव्यश्रेणी-भवभयभिदां' नमन्त्याः भव्यश्रेण्याः भवभयं भिन्दन्ति यानि तेषाम् । 'हृद्यवचसां' हृदयङ्गमवचनानाम् । 'अमायासंचार !' न विद्यते मायासंचारः-शाठ्यस्य प्रचारो यस्मिन् स सम्बोध्यते । 'उदितमदनमेघानिल !' मदनो मेघ इव मदनमेघः, उदितः-उद्गतो यो मदनमेघस्तस्य विघट्टनहेतुत्वात् अनिल-नभस्वन् ! । 'पितः' ! जनकभूत ! । हे नमे ! हृद्यवचसां लपितः ! आयासं वितन्वन्ति अघानि मम प्रविकिरेति योगः ।। ८१ ।।

(६)

अवचूरिः

हे नमे !-नमिजिन ! ममायासं वितन्वन्ति अघानि-पापानि प्रविकिर-निरस्य । स्फुरन्ती या विद्युत् तद्वत् कान्तिर्यस्य तस्य संबोधनम् । हे चारो !-दर्शनीय ! । हे दितमद !-छिन्नमद ! । हे लपितः !- वादक ! । केषाम् ? । हृद्यवचसाम् । कथंभूतानाम् ? । नमद्भव्यश्रेणीभवभयभिदाम् । मायाया-दम्भस्य संचारो यस्य स नैवंविधस्तस्य संबोधनम् । उदितः-उदयं प्राप्तो मदनः-कामः स एव मेघो-जीमूतस्तस्य संहारकत्वादनिलो-वात इव तस्य संवोधनम् । हे पितः !-जनक इव हितकारक ।। ८१ ।।

जिनेश्वराणां जयः—

नखांशुश्रेणीभिः कपिशितनमन्नाकिमुकुटः
सदा नोदी नानामयमलमदारेरिततमः ।
प्रचक्रे विश्वं यः स जयति जिनाधीशनिवहः
सदानो दीनानामयमलमदारेरिततमः ।। २ ।। ८२ ।।

- शिख०

(१)

ज० वि०—नखांश्विति । सोऽयं-एष जिनाधीशनिवहः-तीर्थकरनिकरः सदा-सर्वदा अलं-अत्यर्थं जयति-सर्वतः अतिशायीभवति इति क्रियाकारकसम्बन्धः । अत्र 'जयति' इति क्रियापदम् । कः कर्ता ? 'जिनाधीशनिवहः' । कथम् ? 'सदा' । पुनः कथम् ? 'अलम्' । जिनाधीशनिवहः कथंभूतः ? 'कपि-शितनमन्नाकिमुकुटः' कपिशिताः-पिङ्गिताः नमन्नाकिमुकुटाः-प्रणमत्सुरशिरोमणयो येन स तथा। काभिः कृत्वा ? 'नखांशुश्रेणीभिः' नखमयूखमालाभिः । पुनः कथं० ? 'नोदी' प्रेरणशीलः, दूरीकरणशील इत्यर्थः । कस्य ? 'नानामयमलमदारेः' नाना-अनेकरूपाः ये आमयाः-रोगाः, मलाः-कर्ममलाः, मदाः-

जात्यादिरूपाः त एवारिः तस्य । पुनः कथं० ? 'सदानः' दानसहितः । केषाम् ? 'दीनानां' कृपणानाम् । पुनः कथं० ? 'अदारेरिततमः' दारैः-स्त्रीभिः ईरितो-ध्यानाच्चालितः, न दारेरितः अदारेरितः, अतिशयेन अदारेरितः अदारेरिततमः । स इति तच्छब्दसम्बन्धाद् यच्छब्दयोजनामाह-यो विश्वं-जगत् इततमः-गतमोहं प्रचक्रे-कृतवान् । अत्रापि 'प्रचक्रे' इति क्रियापदम् । कः कर्ता ? 'यः' । किं कर्मतापन्नम् ? 'विश्वम्' । कथंभूतम् ? 'इततमः' ॥

अथ समासः—नखानां अंशवः नखांशवः 'तत्पुरुषः' । नखांशूनां श्रेण्यः नखां० 'तत्पुरुषः' । ताभिः नखां० । नमन्तश्च ते नाकिनश्च नम० 'कर्मधारयः' । नमन्नाकिनां मुकुटाः नम० 'तत्पुरुषः' । कपिशिता नमन्नाकिमुकुटा येन स कपिशित० 'बहुव्रीहिः' । आमयाश्च मलाश्च मदाश्च आमयमलमदाः 'इतरेतरद्वन्द्वः' । नाना च ते आमयमलमदाश्च नानामय० 'कर्मधारयः' । अरिरिवारिः । नानामयमलमदा एवारिर्नानामय० 'कर्मधारयः' । तस्य नानामय० । इतं तमो यस्मात् तद् इततमः 'बहुव्रीहिः' । जिनानां जिनेषु वा अधीशा जिनाधीशाः 'तत्पुरुषः' । जिनाधीशानां निवहो जिना० 'तत्पुरुषः' । सह दानेन वर्तते यः स सदानः 'तत्पुरुषः' । दारैरीरितो दारेरितः 'तत्पुरुषः' । न दारेरितः अदारेरितः 'तत्पुरुषः' । अतिशयेनादारेरितः अदारेरिततमः । इति काव्यार्थः ॥ ८२ ॥

(२)

सि० वृ०—नखांश्विति । सोऽयं-एष जिनाधीशनिवहः-तीर्थंकरसमूहः सदा-सर्वदा अलं-अत्यर्थं जयति-सर्वतः अतिशायीभवतीत्यर्थः । 'जि जये' धातोः कर्तरि वर्तमाने परस्मैपदे प्रथमपुरुषैकवचनम् । क्रियासाधनिका पूर्ववत् । अत्र 'जयति' इति क्रियापदम् । कः कर्ता ? । 'जिनाधीशनिवहः' जिनानां जिनेषु वा अधीशाः-स्वामिनः तेषां निवहो-निकुरम्बो जिनाधीशनिवहः । "समूहो निवहव्यूह-सन्दोहविसरव्रजाः" इत्यमरः (श्लो० १०६५) । कथंभूतो जिनाधीशनिवहः ? । 'कपिशित-नमन्नाकिमुकुटः' कपिशिताःपिशङ्गीकृता नमन्तो ये नाकिनः-देवाः तेषां मुकुटाः-किरीटानि येन स तथा । "पिशङ्गः कपिशो हरिः" इति हैमः (का० ६, श्लो० ३२) । "मौलिः कोटीरमुष्णीषं, किरीटं मुकुटोऽस्त्रियाम्" इति वैजयन्ती । "मौलिः किरीटं कोटीरमुष्णीषं" इति (अभिधान)चिन्तामणौ (का० ३, श्लो० ३१५) । काभिः कृत्वा ? । 'नखांशुश्रेणीभिः' नखाः-करशूकाः तेषां अंशवो-मयूखास्तेषां श्रेणयः-पङ्क्तयः ताभिः । पुनः कथंभूतः ? । 'नोदी' नुदतीत्येवंशीलो नोदी, दूरीकरणशील इत्यर्थः । 'नुद स्फेटने' 'सुप्यजातौ०' (पा० अ० ३, पा० २, सू० ७८) इति णिनिः । कस्य ? । 'नानामय-मलमदारेः' नाना-विविधप्रकारा ये आमया-रोगाः मलाः-पापानि मदाः-जात्याद्यहङ्कृतयस्त एव अरिः तस्य, आमयाश्च मलाश्च मदाश्च आमयमलमदाः 'इतरेतरद्वन्द्वः' । नाना च ते आमयमलमदाश्च नानामयमलमदाः 'कर्मधारयः' । अरिरिवारिः, नानामय (मलमदा एव अरिः नाना०) इति 'कर्मधारयः' ।

पुनः कथंभूतः ? । सदानः-दानसहितः । केषाम् ? । दीनानां-कृपणानाम् । पुनः कथंभूतः ? । 'अदारेरिततमः' दारैः-स्त्रीभिरीरितो-ध्यानाच्चालितः दारेरितः, न दारेरितः अदारेरितः, अतिशयेन अदारेरितः अदारेरिततमः, स्त्रीभिर्व्याक्षिप्तचित्तो नेत्यर्थः । अतिशयेऽर्थे तमप् । स इति स कः ? । यो जिनाधीशनिवहः विश्वं-जगद् इततमः-गतमोहं चक्रे-चकारेत्यर्थः । 'डुकृञ् करणे' धातोः परोक्षे *आत्मनेपदे प्रथमपुरुषैकवचनम् । 'द्विश्च' (सा० सू० ७१०) इति द्वित्वम् । 'रः' (सा० सू० ७६८)* इत्यनेन ऋकारस्याकार । 'कुहोश्चुः' (सा० सू० ७४६) । 'ऋ रं' (सा० सू० ३९) । 'स्वरहीनं०' (सा० सू० ३६) । तथा च 'चक्रे' इति सिद्धम् । अत्र च 'चक्रे' इति क्रियापदम् । कः कर्ता ? । यः । किं कर्मतापन्नम् ? । विश्वम् । कीदृशम् ? । 'इततमः' इतं-गतं तमः-अज्ञानं शोको वा यस्य तद् इततमः । "तमोऽन्धकारे स्वर्भानौ, तमः शोके गुणान्तरे" इत्यमरः (?) ।। ८२ ।।

(३)

सौ० वृ०—नखांश्विति । अयं-प्रत्यक्षो मानसगतः स्थापनागतो वा स-प्रसिद्धो जिनाधीशनिवहः-तीर्थकरसमूहः सदा-सर्वदा जयतीत्यन्वयः । 'जयति' इति क्रियापदम् । कः कर्ता ? । 'जिनाधीशनिवहः' । 'जयति' सर्वातिशयोत्कर्षेण वर्तते । किंविशिष्टो जिनाधीशनिवहः ? । कपिशिताः-पिञ्जरीकृताः नमन्तो ये नाकिनो-देवास्तेषां मुकुटानि-किरीटानि येन सः कपिशितनमन्नाकिमुकुटः' । नखानां-करजानां अंशवः-किरणास्तेषां श्रेण्यो-राजयः ताभिः नखांशुश्रेणीभिः । किंविशिष्टो जिनाधीशनिवहः ? । 'नोदी' प्रेरणशीलः, वार्यमाणत्वात् । कस्य ? । नानाप्रकारा आमया-रोगाः मलाः-कर्ममलाः मदाः-जात्यादयः त एव अरयः[1]-शत्रवः, जातौ एकवचनम्, नानामयमलमदारिः स तस्य 'नानामय मलमदारेः' । पुनः किंविशिष्टो जिनाधीशनिवहः ? । 'सः' प्रसिद्धः । तच्छब्दो यच्छब्दमपेक्षते । स कः ? । यो जिनाधीशनिवहः अलम्-अत्यर्थं विश्वं-जगद् इतं-गतं तमः-अज्ञानं यस्मात् तद् इततमः-गताज्ञानं प्रचक्रे इत्यन्वयः । 'प्रचक्रे' इति क्रियापदम् । कः कर्ता ? । 'यः' 'जिनाधीशनिवहः । 'प्रचक्रे' प्रकर्षेण कृतवान् । किं कर्मतापन्नम् ? । 'विश्वं' जगत् । किंविशिष्टं विश्वम् ? । 'इततमः' । कथम् ? । 'अलं' अत्यर्थम् । किंविशिष्टो यः ? । ('सदानः') अभयदानादिना वार्षिकदानादिना वा सहितः । केषाम् ? । 'दीनानाम्' दुःखितानाम् । पुनः किंविशिष्टो यः ? । न विद्यते दारैः-स्त्रीभिः ईरिततमः-अतिशयेन प्रेरणं यस्य सः 'अदारेरिततमः' । एतादृशो जिनसमूहो जयति । इति पदार्थः ।।

अथ समासः—नखानां अंशवः नखांशवः, नखांशूनां श्रेण्यः नखांशुश्रेण्यः, ताभिः नखांशुश्रेणीभिः । नमन्तश्च ते नाकिनश्च नमन्नाकिनः, नमन्नाकिनां मुकुटाः नमन्नाकिमुकुटाः, कपिशिताः नमन्नाकिमुकुटा येन स कपिशितनमन्नाकिमुकुटः । नुदः-प्रेरणं अस्यास्तीति नोदी। नानाविधा आमया

१. 'अरिः-शत्रु' इति प्रतिभाति ।

नानामयाः, नानामयाश्च मलाश्च मदाश्च नानामयमलमदाः, नानामयमलमदा एव अरिः नानामयमलमदारिः, तस्य नानामयमलमदारेः । इतं-गतं तमः-अज्ञानं यस्मात् तद् इततमः । जिनानां अधीशा जिनाधीशाः, जिनाधीशानां निवहः जिनाधीशनिवहः । दानेन सहितः सदानः । अतिशयेन ईरित इति ईरिततमः, नास्ति दारैः ईरिततमः अदारेरिततमः । इति द्वितीयवृत्तार्थः ।। ८२ ।।

(४)

दे० व्या०—नखांश्विति । स जिनाधीशनिवहो-जिनपतिसमूहः अलं-अत्यर्थं जयति-सर्वोत्कर्षेण वर्तत इत्यन्वयः । 'जि जये' धातुः । 'जयति' इति क्रियापदम् । कः कर्ता ? । जिनाधीशनिवहः । कथम् ? । अलं-अत्यर्थं यथा स्यात् तथेति क्रियाविशेषणम् । किंविशिष्टो जिनाधीशनिवहः ? । 'कपिशितनमन्नाकिमुकुटः' नमन्तश्च ते नाकिनश्चेति पूर्वं 'कर्मधारयः', ततः कपिशिताः-पिशङ्गीकृताः कर्बुरीकृता इति यावत् नमन्नाकिनां-प्रणमद्देवानां मुकुटाः-किरीटा येनेति 'तृतीयाबहुव्रीहिः' । "पिशङ्गः कपिशो हरिः" इत्यभिधानचिन्तामणिः (का० ६, श्लो० ३२) । काभिः ? । 'नखांशुश्रेणीभिः' अंशूनां श्रेण्यः अंशुश्रेण्य इति पूर्वं 'षष्ठीतत्पुरुषः', ततः नखाः-कररुहाः तेषां अंशुश्रेण्यः-किरणसमूहाः ताभिरिति विग्रहः । किंविशिष्टः ? । नोदी-प्रेरकः । कस्य ? । "नानामयमलमदारेः' आमयो-रोगः, "आम आमय आकल्पः (ल्यम्)" इत्यभिधानचिन्तामणिः (का० ३; श्लो० १२७), मलः-कर्मलेपः, मदः-अहंकृतिः एतेषां 'द्वन्द्वः', पश्चान्नानापदेन 'कर्मधारयः', तेषां अरिः-शत्रुर्यः स तस्य । पुनः किंविशिष्टः ? । 'सदानः' दानं-वितरणं तेन सह वर्तमानः । केषाम् ? । दीनानां-दुःखितानाम् । पुनः किंविशिष्टः ? । 'अदारेरिततमः' दाराः-कलत्राणि तैरीरिततमः-अतिशयेन व्याक्षिप्तचेतो नेत्यर्थः । यत्तदोर्नित्याभिसम्बन्धाद् यो जिनाधीशनिवहः विश्वं-विष्टपं इततमः-गततमः चक्रे-चकार । 'डुकृञ् करणे' धातुः । 'चक्रे' इति क्रियापदम् । कः कर्ता ? । जिनाधीशनिवहः । किं कर्मतापन्नम् ? । विश्वम् । किंविशिष्टं विश्वम् ? । 'इततमः' इतं-गतं तमः-अज्ञानं यस्य तत् ।। इति द्वितीयवृत्तार्थः ।। ८२ ।।

(५)

ध० टीका—नखांशुश्रेणीभिरिति । 'नखांशुश्रेणीभिः' नखमयूखसन्ततिभिः । 'कपिशितनमन्नाकिमुकुटः' कपिलितनमत्सुरकिरीटः । 'सदा' शश्वत् । 'नोदी' प्रेरणशीलः । 'नानामयमलमदारेः' नाना-अनेकरूपा ये आमयाश्च मलाश्च मदाश्च त एवारिस्तस्य । 'इततमः' गतमोहम् । 'प्रचक्रे' कृतवान् । 'विश्वं' जगत् । 'सः' । 'जयति' सर्वमतिशेते । 'जिनाधीशनिवहः' जिनेन्द्रविसरः । 'सदानः' दानसमेतः । 'दीनानां' कृपणानाम् । 'अयं' एषः । 'अलं' अतिमात्रम् । 'अदारेरिततमः' अतिशयेन दारैः-कलत्रैरीरितो-धैर्याच्चालितो दारेरिततमः स यो न भवति । य इततमो विश्वं प्रचक्रे स जिनाधीशनिवहो जयतीति सम्बन्धः ।। ८२ ।।

(६)

अवचूरिः

यो विश्वं इततमो-गतमोहं प्रचक्रे स जिनेन्द्रसमूहो जयति । कथंभूतः ? । नखांशुश्रेणीभिः-नखमयूखसंततिभिः कपिशितनमन्नाकिमुकुटः-पीतीकृतनमद्देवकिरीटः । सदा-शश्वद् नोदी-प्रेरणशीलः । कस्य ? । नाना-अनेकरूपा आमयाश्च मलाश्च मदाश्च समाहारद्वन्द्वः, तदेवारिस्तस्य । सदानो-दान-सहितः । दीनानां-कृपणानाम् । अयम्-एषः । अलम्-अतिमात्रम् । अतिशयेन दारैः-कलत्रैरीरितो-धैर्याच्चालितो दारेरिततमः, न एवंविधः अदारेरिततमः ।। ८२ ।।

सिद्धान्तपरिचयः—

जल-व्याल-व्याघ्र-ज्वलन-गज-रुग्-बन्धन-युधो
गुरुर्वाहोऽपातापदघनगरीयानसुमतः ।
कृतान्तस्त्रासीष्ट स्फुटविकटहेतुप्रमितिभा-
गुरुर्वाऽहो ! पाता-पदघनगरीयानसुमतः ।। ३ ।। ८३ ।।

- शिख०

(१)

ज० वि०—जलव्यालेति । अहो इत्यामन्त्रणे तच्चैवं योज्यते-अहो भव्याः ! । कृतान्तः-सिद्धान्तः त्रासीष्ट-रक्ष्यात् इति क्रियाकारकयोजना । अत्र 'त्रासीष्ट' इति क्रियापदम् । कः कर्ता ? 'कृतान्तः' । कान् कर्मतापन्नान् ? 'असुमतः' प्राणिनः । कस्मात् सकाशात् त्रासीष्ट ? 'जलव्यालव्याघ्रज्वलन-गजरुग्बन्धनयुधः' जलं-समुद्रादिसम्बन्धि वारि, व्यालः-पन्नगः, व्याघ्रो-द्वीपी, ज्वलनो-वह्निः, गजः-करी, रुग्-जलोदरादिरोगः, बन्धनं-करचरणादिनियन्त्रणं, युत्-सङ्ग्रामः, तस्मात् । कृतान्तः कथंभूतः ? 'गुरुः' महान् । पुनः कथं० ? । 'वाहः' वाहः-अश्वः स इव वाहः । वाहो हि ग्रामादियाने सुमतः स्यात् तेनासौ वाहः । कथंभूतः ? 'अपातापदघनगरीयानसुमतः' पातः-च्यवनं, आपद्-विपद्, अघं-पापं, ततो न विद्यन्ते पातापदघानि यस्याः सा चासौ नगरी युक्त्या मुक्तिरेव तस्यां यानं-गमनं तत्र सुमतः-सुष्ठु सम्मतः । एष मुक्तिगमनसाधनमित्यभिप्रेत इत्यर्थः । कृतान्तः पुनः कथं ? 'स्फुटविकटहेतुप्रमितिभाक्' स्फुटाः-अविसंवादिनीः विकटाः-अश्लिष्टाः हेतुप्रमितीः-लिङ्गप्रमाणानि भजतीति यः स तथा । पुनः कथं० ? 'उरुर्वा' अत्र वाशब्दश्चकारार्थः तेन उरुश्च-विशालश्च । पुनः कथं० ? 'पाता' त्राता । पुनः कथंभूतः ? 'पदघनगरीयान्' पदेषु-वाक्यावयवेषु घनः-अर्थनिबिडः गरीयान्-महत्त्वातिरेकयुक्तः ।।

अथ समासः—जलं च व्यालश्च व्याघ्रश्च ज्वलनश्च गजश्च रुक् च बन्धनं च युत् च जलव्याल० 'समाहारद्वन्द्वः' । तस्मात् जलव्यालव्याघ्रज्वलनगजरुग्बन्धनयुधः । पातश्च आपच्च अघं च पातापदघानि 'इतरेतरद्वन्द्वः' । न विद्यन्ते पातापदघानि यस्याः सा अपाता० 'बहुव्रीहिः' । अपातापदघा चासौ नगरी च अपाता० 'कर्मधारयः' । अपातापदघनगर्यां यानं अपाता० 'तत्पुरुषः' । सुष्ठु मतः सुमतः 'तत्पुरुषः' । अपातापदघनगरीयाने सुमतः अपाता० 'तत्पुरुषः' । हेतवश्च प्रमितयश्च हेतु० 'इतरेतर-द्वन्द्वः' । विकटाश्च ता हेतुप्रमितयश्च विकट० 'कर्मधारयः' । स्फुटाश्च ता विकटहेतुप्रमितयश्च स्फुटवि० 'कर्मधारयः' । स्फुटविकटहेतुप्रमितीर्भजतीति स्फुटवि० 'तत्पुरुषः' । घनश्चासौ गरीयांश्च घनगरीयान् 'कर्मधारयः' । पदेषु घनगरीयान् पद० 'तत्पुरुषः' । इति काव्यार्थः ।। ८३ ।।

(२)

सि० वृ०—जलव्यालेति । अहो इत्यामन्त्रणे । तच्चैवं योज्यते-अहो भव्याः ! कृतान्तः-सिद्धान्तः असुमतः त्रासीष्ट-रक्षतामित्यर्थः । 'त्रैङ् दैङ् पालनयोः' इति धातोः आशिषि कर्तरि आत्मनेपदे प्रथमपुरुषैकवचनं सीष्ट । 'सन्ध्यक्षराणामा' (सा० सू० ८०३) इत्यात्वम् । तथा च 'त्रासीष्ट' इति सिद्धम् । अत्र 'त्रासीष्ट' इति क्रियापदम् । कः कर्ता ? । कृतान्तः । कान् कर्मतापन्नान् ? । 'असुमतः' असवः-प्राणाः विद्यन्ते येषां ते असुमन्तः तान् । कस्मात् ? । 'जलव्यालव्याघ्रज्वलनगजरुग्बन्धनयुधः' जलं-समुद्रादि, व्यालः-सर्पः, व्याघ्रः-सिंहः, ज्वलनो-वह्निः, गजः-करी, रुग्-रोगः, बन्धनं-काराक्षेपः, युत्-सङ्ग्रामः, जलं च व्यालश्च व्याघ्रश्च ज्वलनश्च गजश्च रुक् च बन्धनं च युच्च जलव्यालव्याघ्रज्वलनगज-रुग्बन्धनयुधः 'इतरेतरद्वन्द्वः' तस्मात् । पुनः कथंभूतः ? । गुरुः-महान् । गृणाति हिताहितमिति गुरुः । 'कृग्रोरुच्च' (उणा० सू० २४) इति उः, उकारान्तादेशो रपरः । पुनः कथंभूतः ? । 'वाहः' वाह्यते इति वाहः, वाह इव वाह-तुरङ्गमः, वाहो हि ग्रामादियाने सुमतः स्यात् तेनासौ वाहः । कथंभूतः ? । 'अपातापदघनगरीयानसुमतः' पातः-च्यवनं, आपद्-विपत्, अघं-पापं, ततो न विद्यन्ते पापापदघानि यस्यां सा चासौ नगरी अर्थान्मुक्तिरेव तस्यां यानं-गमनं तत्र सुमतः-सुष्ठु संमतः-सुतरामभिप्रेतः, एष मुक्तिगमनसाधनमित्यभिप्रेत इत्यर्थः । कृतान्तस्येदं विशेषणमिति कश्चित् । पुनः कथंभूतः कृतान्तः ? । 'स्फुटविकटहेतुप्रमितिभाक्' स्फुटा-अविसंवादिनीः विकटा-अश्लिष्टाः हेतुप्रमितीः-लिङ्गप्रमाणानि भजति यः स तथा । हेतवश्च प्रमितयश्च हेतुप्रमितयः 'इतरेतरद्वन्द्वः', विकटाश्च ता हेतुप्रमितयश्च विकटहेतुप्रमितयः 'कर्मधारयः', स्फुटाश्च ता विकटहेतुप्रमितीर्भजतीति स्फुटविकटहेतुप्रमितिभाक् । पुनः कथंभूतः ? । 'उरुः'-विशालः । अत्र वा शब्दश्चकारार्थः । तेन उरुश्च विशालश्च । पुनः कथंभूतः ? । 'पाता' पातीति पाता-त्राता दुर्गतिनिपतत्प्राणिनां रक्षकत्वात् इति भावः । पुनः कथंभूतः ? । 'पदघनगरीयान्'

पदेषु-वाक्यावयवेषु घनः-अर्थनिबिडः गरीयान्-महत्त्वातिरेकयुक्तः, घनश्चासौ गरीयांश्च घनगरीयान्, पदेषु घनगरीयान् पदघनगरीयान् इति 'तत्पुरुषः' ॥

(३)

सौ० वृ०—जलव्यालेति । अहो इत्यामन्त्रणे । भो भव्याः ! कृतान्तः-सिद्धान्तः असुमतः-प्राणिनः त्रासीष्ट इत्यन्वयः । 'त्रासीष्ट' इति क्रियापदम् । कः कर्ता ? । 'कृतान्तः' । 'त्रासीष्ट' रक्षतात् । कान् कर्मतापन्नान् ? । 'असुमतः' प्राणिनः । कस्मात् सकाशात् ? । जलं-सरःसरित्समुद्राम्बुसम्बन्धि, व्यालाः-सर्पाः, व्याघ्राः-द्वीपिशार्दूलादयः, ज्वलनः-वह्निः, गजाः-करिणः, रुजः-जलोदरादयः, बन्धनं-करपादादिनिगडं, युत्-सङ्ग्रामः इत्याद्यष्टभयेभ्यः जलव्यालव्याघ्रज्वलनगजरुक्बन्धनयुधः तस्मात् 'जलव्यालव्याघ्रज्वलनगजरुग्बन्धनयुधः' । पुनः किंविशिष्टः कृतान्तः ? । 'गुरुः' महान् । पुनः किंविशिष्टः कृतान्तः ? । 'वाहः' अश्व इव अश्वः । पुनः किंविशिष्टः कृतान्तः ? । न विद्यते पातः-च्यवनं आपद्-विपद् अघं-पापं यस्यां सा अपातापदघा तादृशी या नगरी अर्थान्मुक्तिः तस्या यानं-गमनं मार्गो वा तस्मिन् सु-शोभनो मतः-अभिमतः-अभिलषितः 'अपातापदघनगरीयानसुमतः' तादृशः कृतान्तः-सिद्धान्तः मुक्तिगमनयोग्यः वाह इव मतः । अन्योऽपि यो वाहो भवति स पुरप्रापणे अभिमतो भवति । पुनः किंविशिष्टः कृतान्तः ? । स्फुटाः-प्रकटा, विकटा-अतिगम्भीरा अर्थगहनत्वात् तादृशा ये हेतवः-कारणानि दृष्टान्ता वा प्रमितयः-प्रमाणानि प्रत्यक्षपरोक्षादीनि अनुमानोपमानप्रमुखानि (ताः) भजति स 'स्फुटविकटहेतुप्रमितिभाक्' । पुनः किंविशिष्टः कृतान्तः ? । 'उरुः' विशालः । वा शब्दः समुच्चयार्थे चकारार्थे वा । पुनः किंविशिष्टः कृतान्तः ? । 'पाता' रक्षकः अर्थाद् जगतः । पुनः किंविशिष्टः कृतान्तः ? । पदानि स्यादित्यादीनि सुश्लिष्टसुमधुरादीनि वा तैः कृत्वा घनो-निबिडः [ते] गरीयान्-अतिशयेन गुरुः 'पदघनगरीयान्' । एतादृशः कृतान्तः प्राणिनो रक्षतात् । इति पदार्थः ॥

अथ समासः—जलानि च व्यालाश्च व्याघ्राश्च ज्वलनश्च गजाश्च रुजश्च बन्धनानि च युधश्च जलव्यालव्याघ्रज्वलनगजरुग्बन्धनयुधः । गृणाति-वदति तत्त्वं हिताहितं इति गुरुः । वाह्यते-आरुह्यते इति वाहः । पतनं-च्यवनं-पातः, पातश्च आपच्च अघं च पातापदघानि, न विद्यन्ते पातापदघानि यस्यां सा अपातापदघा, अपातापदघा चासौ नगरी च अपातापदघनगरी, अपातापदघनगर्या यानं अपातापदघनगरीयानं, सु-शोभनो मतः सुमतः, अपातापदघनगरीयाने सुमतः अपातापदघनगरीयान-सुमतः । हेतवश्च प्रमितयश्च हेतुप्रमितयः, विकटाश्च ते हेतुप्रमितयश्च विकटहेतुप्रमितयः, स्फुटाश्च ता विकटहेतुप्रमितयश्च स्फुटविकटहेतुप्रमितयः, स्फुटविकटहेतुप्रमितीः भजतीति स्फुटविकटहेतुप्रमिति-भाक् । पाति-रक्षतीति पाता । पदानां पदैर्वा घनं पदघनं, अतिशयेन गुरुर्गरीयान्, पदघनेन गरीयान् पदघनगरीयान् । असवः-प्राणा विद्यन्ते येषां ते असुमन्तः, तान् असुमतः । इति तृतीयवृत्तार्थः ॥ ८३ ॥

(४)

दे० व्या०—जलव्यालेति । कृतान्तः-सिद्धान्तः असुमतः-प्राणिनः त्रासीष्ट-रक्षतादित्यन्वयः । 'त्रासीष्ट' इति क्रियापदम् । कः कर्ता ? । कृतान्तः । कान् कर्मतापन्नान् ? । असुमतः । कस्मात् ? । 'जलव्यालव्याघ्रज्वलनगजरुग्बन्धनयुधः' जलं-समुद्रादि, व्यालः-सर्पः, व्याघ्रः-सिंहः, ज्वलनो-वह्निः, गजो-मत्तमातङ्गः, रुक्-रोगः, बन्धनं-काराक्षेपः, युत्-संग्रामः एतेषां 'द्वन्द्वः' तस्मात् । किंविशिष्टः कृतान्तः ? । वाहः-तुरङ्गमः । अत्राभेदरुपकालङ्कारः । "वाहो वाजी हयो हरिः" इत्यभिधानचिन्तामणिः (का० ४, श्लो० २९९) । पुनः किंविशिष्टः ? । गुरुः-हिताहितप्राप्तिपरिहारोपदेष्टा । पुनः किंविशिष्टः ? । 'अपातापदघनगरीयानसुमतः' न विद्यते पातश्च आपच्च अघं च यस्याः सा अपातापदघा, एवंविधा या नगरी अर्थान्मुक्तिः तस्या याने-गमने सुमतः-सुतरामभिप्रेतः । वाहस्य विशेषणं वा । पुनः किंविशिष्टः ? । 'स्फुटविकटहेतुप्रमितिभाक्' स्फुटाः-स्पष्टाः शब्दतः विकटा-दुर्गमाः अर्थतः ते च ते हेतवः-साध्यगमकास्तेषां प्रमितिः-यथार्थज्ञानं(तां)भजतीति भाक्, क्विप्प्रत्ययान्तम् । पुनः किंविशिष्टः ? । उरुः-विशालः । वा वैकल्पिकः । पुनः किंविशिष्टः ? । 'पाता' पातीति पाता-रक्षकः, दुर्गतिपतत्प्राणिरक्षकत्वात् । पुनः किंविशिष्टः ? । 'पदघनगरीयान्' पदानि-वर्णसमूहाः सुप्तिङन्तानि वा तैर्घनो (-निविडः) निवहः अत एव गरीयान्-गरिष्ठः ।। इति तृतीयवृत्तार्थः ।। ८३ ।।

(५)

ध० टीका—जलेति । 'जलव्यालव्याघ्रज्वलनगजरुग्बन्धनयुधः' व्यालः-पन्नगः, रुक्-रोगः जलोदरादिः, बन्धनं-कारादिनिरोधः, युत्-संग्रामः, जलादेरुपसर्गात् सकाशात् । 'गुरुः' महान् । 'वाहः' अश्वः । 'अपातापदघनगरीयानसुमतः' पातः-च्यवनं, न विद्यन्ते पातश्च आपच्च अघं च यस्याः सा अपातापदघा, सा चासौ नगरी च अपातापदघनगरी, युक्त्या मुक्तिरेव, तस्यां यानं-गमनं तत्र सुमतः-सुष्ठु सम्मतः । 'कृतान्तः' राद्धान्तः । 'त्रासीष्ट' रक्ष्यात् । 'स्फुटविकटहेतुप्रमितिभाक्' प्रमितयः-प्रमाणानि, हेतूञ्श्च प्रमितीश्च हेतुप्रमितीः, स्फुटा-अविसंवादिनीः विकटा-अक्लिष्टा हेतुप्रमितीर्भजते यः सः । 'उरुः' विशालः । 'वा' शब्दश्चकारार्थे । 'अहो' इत्यामन्त्रणे । 'पाता' त्रायकः । 'पदघनगरीयान्' घनः-अर्थनिबिडः गरीयान्-महत्त्वातिरेकयुक्तः पदेषु-वाक्यावयवेषु घनश्च गरीयांश्च । 'असुमतः' प्राणिनः । अहो कृतान्तो जलादेरसुमतः त्रासीष्टेति सम्बन्धः ।। ८३ ।।

(६)

अवचूरिः

कृतान्तः-सिद्धान्तोऽसुमतः-प्राणिनस्त्रासीष्ट-रक्षतात् । कस्मात् ? । जलव्यालव्याघ्रज्वलनग-जरुग्बन्धयुधः । व्यालः-सर्पः । रुजो-जलोदरादिरोगाः । बन्धनं-कारानिरोधादि । युत्-सङ्ग्रामः ।

जलादीनां सकाशादित्यर्थः । किंभूतः ? । गुरुः-महान् । वाहः-अश्वः । न विद्यते पातः-च्यवनं आपद्-विपत् अघं-पापं च यस्यां सा चासौ नगरी च, युक्त्या मुक्तिरेव, तस्या याने-गमने सुष्ठु मतः-अभिप्रेतः । स्फुटा-अविसंवादिन्यो विकटा-विस्तृता हेतुप्रमितयः हेतवः प्रमाणानि च (ताः) भजते यः (स) स्फुटविकटहेतुप्रमितिभाक् । उरुः-विशालः । वा शब्दश्चकारार्थे । अहो इत्यामन्त्रणे । पाता-त्रायकः । पदघनगरीयान् पदघनः-अर्थनिबिडः गरीयांश्च महत्त्वयुक्तः । यद्वा पदेषु वाक्यावयवेषु घनश्च गरीयांश्च ॥ ८३ ॥

कालीदेव्याः स्तुतिः–

विपक्षव्यूहं वो. दलयतु गदाक्षावलिधरा–
ऽसमा नालीकालीविशदचलना नालिकवरम् ।
समध्यासीनाऽम्भोभृतघननिभाऽम्भोधितनया–
समानाली काली विशदचलनानालिकबरम् ॥ ४ ॥ ८४ ॥

- शिख०

(१)

ज० वि०–विपक्षेति । काली-काल्याख्या देवी वः युष्माकं विपक्षव्यूहं दलयतु-विनाशयतु इति क्रियाकारकप्रयोगः । अत्र 'दलयतु' इति क्रियापदम् । का कर्त्री ? 'काली' । किं कर्मतापन्नम् ? 'विपक्षव्यूहम्' । केषाम् ? 'वः' । काली कथंभूता ? 'गदाक्षावलिधरा' गदा-प्रहरणविशेषः अक्षावलिः-माला ते धारयतीति गदाक्षावलिधरा । पुनः कथं० ? 'असमा' असदृशी । पुनः कथं० ? 'नालीकाली-विशदचलना' नालीकाली-कमलावली तद्वद् विशदौ-उज्ज्वलौ चलनौ-पादौ यस्याः सा तथा । काली किं कुर्वाणा ? 'समध्यासीना' सम्यक् अधिरोहन्ती । किं कर्मतापन्नम् ? 'नालिकवरं' प्रधानपद्मम् । नालिकवरं कथंभूतम् ? 'विशदचलनानालिकवरं' विशन्तः-निलीयमानाः अचलाः-स्थिराः एतादृशा ये नानालिनः नानालयो वा-विचित्रमधुकराः तैः कबरं-कर्बुरम् । अत्र यमकवशात् बवयोरैक्यम् । काली पुनः कथं० ? 'अम्भोभृतघननिभा' जलभरितमेघप्रभा, श्यामवर्णेत्यर्थः । पुनः कथं० ? 'अम्भोधितनयासमानाली' अम्भोधितनया-लक्ष्मीः तस्याः असमाना-अनन्यसमा आली-सखी ॥

अथ समासः–विपक्षाणां व्यूहः विपक्षव्यूहः 'तत्पुरुषः' । तं विपक्ष० । गदा च अक्षावलिश्च गदाक्षावली 'इतरेतरद्वन्द्वः' । गदाक्षावली धारयतीति गदाक्षावलि० 'तत्पुरुषः' । न समा असमा 'तत्पुरुषः' । नालीकानामाली नालीकाली 'तत्पुरुषः' । नालीकालीवद् विशदौ नालीक० 'तत्पुरुषः' ।

नालीकालीविशदौ चलनौ यस्याः सा नाली० 'बहुव्रीहिः' । नालीकेषु वरं नालीक० 'तत्पुरुषः' । अम्भोभिर्भृतः अम्भोभृतः 'तत्पुरुषः' । अम्भोभृतश्चासौ घनश्च अम्भो० 'कर्मधारयः' ।[1] अम्भोभृतघनवत् निभा यस्याः सा अम्भोभृत० 'बहुव्रीहिः' । अम्भोधेस्तनया अम्भोधि० 'तत्पुरुषः' । न समाना असमाना 'तत्पुरुषः' । असमाना चासौ सखी च असमा० 'कर्मधारयः' । अम्भोधितनयाया असमानसखी अम्भोधि० 'तत्पुरुषः' । नाना-विधाश्च ते अलिनश्च नानालिनः 'कर्मधारयः' । न चला अचलाः 'तत्पुरुषः' । अचलाश्च ते नानालिनश्च अचलनाना० 'कर्मधारयः' । विशन्तश्च ते अचलनानालिनश्च विशदचल० 'कर्मधारयः' । विशदचलनानालिभिः कबरं विशद० 'तत्पुरुषः' । तद् विशद० । इति काव्यार्थः ।। ८४ ।।

।। इति शोभनस्तुतिवृत्तौ श्रीनमिजिनपतेः स्तुतेर्व्याख्या ।। ४ । २१ । ८४ ।।

(२)

सि० वृ०—विपक्षेति । काली-कालीनाम्नी महादेवी वो-युष्माकं विपक्षव्यूहं-शत्रुव्रातं-वैरिसमूहं दलयतु-विनाशयतु इत्यर्थः । 'दल दलने' धातोर्ण्यन्तस्य 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि परस्मैपदे प्रथमपुरुषैकवचनं तुप् । 'चुरादेः [ञिः]' (सा० सू० १०३९) इति ञिः । 'अप् कर्तरि' (सा० सू० ६९१) इत्यप् । 'गुणः' (सा० सू० ६९२) इति गुणः । 'ए अय्' (सा० सू० ४१) । 'स्वरहीनं०' (सा० सू० ३६) । तथा च 'दलयतु' इति सिद्धम् । अत्र 'दलयतु' इति क्रियापदम् । का कर्त्री ? । काली । कं कर्मतापन्नम् ? । 'विपक्षव्यूहं' विपक्षाणां-शत्रूणां व्यूहो-निकरस्तम् । "व्यूहः स्याद् बलविन्यासे, निर्माणे वृन्दतर्कयोः" इति विश्वः । केषाम् ? । वः । षष्ठीबहुवचने युष्माकमित्यस्य वसादेशः । कथंभूता काली ? । 'गदाक्षावलिधरा' गदा-शस्त्रविशेषः अक्षावलिः-माला गदा च अक्षावली च गदाक्षावली 'इतरेतरद्वन्द्वः', ते धरतीति गदाक्षावलिधरा । पुनः कथंभूता ? । असमा-असदृशी, निरुपमेत्यर्थः । पुनः कथंभूता ? । 'नालीकालीविशदचलना' नालीकानां-कमलानामालिः-श्रेणी तद्वद् विशदौ-निर्मलौ (चलनौ-) पादौ यस्याः सा तथा । काली किं कुर्वाणा ? । समध्यासीना-सम्यगधिरोहन्ती । कम् ? । 'नालीकवरं' नालं विद्यते येषु तानि नालीकानि तेषु नालीकेषु-कमलेषु वरं-प्रधानं नालीकवरम् । कथंभूतं नालीकवरम् ? । 'विशदचलनानालिकबरं' विशन्तो-निलीयमानाः अचलाः-स्थिराः एवंभूता ये नाना-विविधप्रकाराः अलयो-भ्रमराः तैः कबरं-कर्बुरम् । विशन्तश्च ते अचलाश्च ते नानालयश्च विशदचलनानालय इति पूर्वं 'कर्मधारयः' । अत्र यमकवशाद् बवयोरैक्यम् । काली पुनः कथंभूता ? । 'अम्भोभृतघननिभा' अम्भः-जलं तेन भृतः-पूर्णः यो घनः-मेघः तेन निभा-तुल्या या सा तथा, सजलजलधरवन्नीलवर्णेति फलितार्थः ।

---

१. **अम्भोभृतघनेन निभा अम्भो० 'तत्पुरुषः' इति प्रतिभाति ।**

पुनः कथंभूता ? । 'अम्भोधितनयासमानाली' अम्भोधितनया-लक्ष्मीः तया समानाः-तुल्याः आल्यः-सख्यो यस्याः सा तथा । "क्षीराब्धितनया रमा" इत्यमरः (?) "हरिप्रिया पद्मवासा क्षीरोदतनयाऽपि च" इति हैमः (का० २, श्लो० १४०) । शिखरिणीवृत्तम् ।। "रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी" इति च लक्षणमुन्नेयम् ।। ८४।।

।। इति महामहोपाध्याय० श्रीनमिनाथजिनस्य स्तुतिवृत्तिः ।। ४ । २१ । ८४ ।।

(३)

सौ० वृ०—विपक्षेति । कालीनाम्नी देवी वो-युष्माकं विपक्षाः-वैरिणः तेषां व्यूहः-समूहः तं विपक्षव्यूहं दलयतु इत्यन्वयः । 'दलयतु' इति क्रियापदम् । का कर्त्री ? । 'काली' । 'दलयतु' पिनष्टु । कं कर्मतापन्नम् ? । 'विपक्षव्यूहम्' । केषाम् ? । 'वः' युष्माकम् । किंविशिष्टा काली ? । 'गदाक्षावलिधरा' गदा-प्रहरणविशेषः अक्षावलिः-जाप्यमाला ते द्वे धरतीति गदाक्षावलिधरा । पुनः किंविशिष्टा काली ? । 'असमा' लावण्यैश्वर्यादिगुणैर्नान्यसदृशी । पुनः किंविशिष्टा काली ? । नालीकानि-कमलानि तेषां आली-श्रेणिः तद्वद् विशदौ-निर्मलौ चलनौ-चरणौ यस्याः सा 'नालीकालीविशदचलना' । पुनः काली किं कुर्वाणा ? । सम्यक् प्रकारेण अध्यासीना-आरूढा 'समध्यासीना' । किं कर्मतापन्नम् ? । 'नालिकवरं' कमलेषु प्रधानं, ववयोरैक्यं यमकत्वात् । पुनः किंविशिष्टा काली ? । अम्भोभिः भृतः-पूर्णो यो घनो-मेघः तस्य (तेन?) निभा-सदृशी, घनश्यामवर्णा । पुनः किंविशिष्टा काली ? । अम्भोधिः-समुद्रः तस्य तनया-लक्ष्मीः तया समाना-सदृशी आली-सखी यस्याः सा अम्भोधितनयासमानाली । किंविशिष्टं नालिकवरम् ? । विशन्तः-प्रविशन्तः अचलाः-स्थिरा-लीना नानाप्रकारा-विचित्रा अलयः-अलिनो वा तैः कबरं-मिश्रितं 'विशदचलननानालिकबरम्' । बवयोरैक्यम् । एवंविधा काली देवी युष्माकं विपक्षव्यूहं पिनष्टु इति पदार्थः ।।

अथ समासः—विरुद्धपक्षा विपक्षाः, विपक्षाणां व्यूहः विपक्षव्यूहः, तं विपक्षव्यूहम् । अक्षाणां आवलिः (अक्षावलिः), गदा च अक्षावलिश्च गदाक्षावली, गदाक्षावली धारयतीति गदाक्षावलिधरा, न विद्यते समा-सदृशी यस्याः सा असमा, नालीकानामाली नालीकाली, नालीकालीवत् विशदौ चलनौ यस्याः सा नालीकालीविशदचलना । नालिकेषु वरं तद् नालिकवरम् । सम्यक् प्रकारेण अध्यासीना समध्यासीना । अम्भोभिः भृतः अम्भोभृतः, अम्भोभृतश्चासौ घनश्च अम्भोभृतघनः, अम्भोभृतघनस्य (घनेन?) निभा अम्भोभृतघननिभा । अम्भांसि धीयन्ते अस्मिन्निति अम्भोधिः, अम्भोधेस्तनया अम्भोधितनया-लक्ष्मीः, तया समाना-सदृशी आली-सखी यस्याः सा अम्भोधितनयासमानाली । नाना-विचित्राः अलयः अलिनो वा नानालयः, न चला अचला; अचलाश्च ते नानालयश्च अचलनानालयः,

विशन्तश्च ते अचलनानालयश्च विशदचलनानालयः, विशदचलनानालिभिः कबरं विशदचलनानालिकबरम् । इत्येकविंशतितमश्रीनमिनाथजिनस्तुतिः[1] ॥४।२१।८४॥

(४)

दे० व्या०—विपक्षेति । काली देवी वो-युष्माकं 'विपक्षव्यूहं' विपक्षाः-शत्रवः तेषां व्यूहं-समूहं दलयतु-मर्दयतु इत्यन्वयः । 'दलयतु' इति क्रियापदम् । का कर्त्री ? । काली । किं कर्मतापन्नम् ? । विपक्षव्यूहम् । किंविशिष्टा देवी ? । 'गदाक्षावलिधरा' गदा-शस्त्रविशेषः अक्षावलिः-जपमाला अनयो 'र्द्वन्द्वः', ते बिभर्ति-धारयतीति तथा । पुनः किंविशिष्टा ? । 'असमा' नास्ति बलेनेति शेषः समः-सदृशो यस्याः सा तथा । पुनः किंविशिष्टा ? । 'नालीकालीविशदचलना' नालीकं-कमलं तस्य आली-परम्परा तद्वद् विशदौ-उज्ज्वलौ चलनौ (-पादौ) यस्याः सा तथा । "बिसप्रसूतं नालीकं" इत्यभिधानचिन्तामणिः (का० ४, श्लो० २२७) । पुनः किंविशिष्टा ? । समध्यासीना-अध्यारूढा । किम् ? । नालिकवरं-प्रधानकमलम् । नालिकेषु वरं नालिकवरं इति समासः । बवयोरभेदादत्र वकारस्थाने बकारग्रहणम् । पुनः किंविशिष्टा ? । 'अम्भोभृतघननिभा' अम्भः-पयस्तेन भृतः-पूर्णो यो घनो-मेघः तेन निभा-सदृशा, सजलजलधरवत् कृष्णवर्णेत्यर्थः । पुनः किंविशिष्टा ? । 'अम्भोधितनयासमानाली' अम्भोधितनया-लक्ष्मीः तस्याः समानाः सदृशाः आल्यः-सख्यो यस्याः सा तथा । किंविशिष्टं नालिकवरम् ? । 'विशदचलनानालिकबरम्' विशन्तो-निलीयमानाः अचलाः-स्थिरा नाना-अनेके ये अलयो-भ्रमराः तैः कबरं-मिश्रितम् । "करम्बः कबरो मिश्रः" इत्यभिधानचिन्तामणिः (का० ६, श्लो० १०५) ॥ इति तुरीयवृत्तार्थः ॥ ४ । २१ । ८४ ॥

(५)

ध० टीका—विपक्षेति । 'विपक्षव्यूहं' शत्रुसन्दोहम् । 'वः' युष्माकम् । 'दलयतु' पिनष्टु । 'गदाक्षावलिधरा' गदां अक्षावलिं धारयति या सा । 'असमा' असदृशी । 'नालीकालीविशदचलना' नालीकाली-पद्मपङ्क्तिः तद्वद् विशदौ-उज्ज्वलौ चलनौ यस्याः सा । 'नालिकवरं' प्रधानपद्मम् । 'समध्यासीना' सम्यग् अधिरोहन्ती । 'अम्भोभृतघननिभा' जलभरितमेघप्रभाश्यामेत्यर्थः । 'अम्भोधितनयासमानाली' अम्भोधितनया-लक्ष्मीः तस्याः असमाना-अनन्यसमा आली-सखी या सा । 'काली' कालीसंज्ञिता । 'विशदचलनानालिकबरं' विशद्भिः-निलीयमानैः अचलैः-स्थिरैर्नानालिभिः-विचित्रमधुकरैः कबरं-कर्बुरं यत् तत् । नालिकवरं समध्यासीना काली विपक्षव्यूहं वो दलयतु इति योगः ॥ ४ । २१ । ८४ ॥

---

१. यथा प्रत्येकस्तुतिचतुष्टयसमाप्तौ पद्यं दृश्यते, तथाऽत्र न इति विशेषः ।

(६)

अवचूरिः

काली देवी वो-युष्माकं विपक्षव्यूहं-प्रतीपपटलं दलयतु-पिनष्टु । किंविशिष्टा ? । गदा-आयुधविशेषः अक्षावलिः-अक्षमाला च ते धरतीति । असमा-रूपैश्वर्यादिना अनन्यसदृक् । नालीकानां-कमलानामाली-श्रेणी तद्वद् विशदौ-निर्मलौ चलनौ-पादौ यस्याः सा । नालिकवरं-प्रधानकमलं समध्यासीना-अधिरोहन्ती अधिरूढा वा । अम्भोभृतः-पयःपूर्णो यो घनो-मेघस्तस्य निभा-कृष्णवर्णत्वात् समा । अम्भोधितनयासमाना-लक्ष्मीतुल्या आल्यः-सख्यो यस्याः (सा) । विशन्तो-लीयमाना अचलाः-स्थिरा नाना-बहुविधा येऽलयो-भ्रमरास्तैः कबरं-मिश्रं खचितमित्यर्थः । इदं नालिकवरस्य विशेषणम् ॥ ४ । २१ । ८४ ॥

२२. श्रीनेमिजिनस्तुतयः

अथ श्रीनेमिनाथाय नमस्कारः–

चिक्षेपोर्जितराजकं रणमुखे यो[१]ऽलक्ष्यसङ्ख्यं क्षणा-
दक्षामं जन[२] ! भासमानमहसं 'राजीमती' तापदम् ।
तं 'नेमिं' नम नम्रनिर्वृतिकरं चक्रे यदूनां च यो
दक्षामञ्जनभासमानमहसं राजीमतीतापदम् ॥ १ ॥ ८५ ॥

- शार्दूल०

(१)

ज०वि०—चिक्षेपोर्जितेति । हे जन ! त्वं तं नेमिं-नेमिनामानं जिनं नम-प्रणिपत इति क्रियाकारकसंयोजनम् । अत्र 'नम' इति क्रियापदम् । कः कर्ता ? 'त्वम्' । कं कर्मतापन्नम् ? 'नेमिम्' । कथंभूतं नेमिम् ? 'भासमानं' विराजमानम्, अथवा जनैर्भासमानं 'जनभासमानम्' । एतत्पक्षे सम्बोधनमध्याहृत्य वाच्यम् । पुनः कथं० ? 'अहसं' अविद्यमानहासम् । पुनः कथं० ? 'राजीमतीतापदं' राजीमती-उग्रसेनपृथिवीपतेः पुत्री तस्यास्तापदम्, सम्भोगमनोरथविफलीकरणात् तापदायिनम् । पुनः कथं० ? 'नम्रनिर्वृतिकरं' नम्राणां-नमनशीलानां निर्वृतिः-सौख्यं शिवं वा करोति स तथा तम् । पुनः

१. 'लक्षसङ्ख्यं' इत्यपि पाठः

२. 'जनभासमानं' इत्यपि संभवति ।

कथं० ? 'अञ्जनभासमानमहसं' अञ्जनभया-कज्जलकान्त्या समानं-सदृशं महः-तेजः यस्य स तथा तम्। तमिति तच्छब्दाविनाभावित्वाद् यच्छब्दघटनामाह - य ऊर्जितराजकं-वलवद्राजसमूहं रणमुखे-समरारम्भे क्षणाद्-वेगेन चिक्षेप-निरस्तवान् । अत्रापि 'चिक्षेप' इति क्रियापदम् । कः कर्ता ? 'यः' । किं कर्मतापन्नम् ? '(ऊर्जित)राजकम्' । कस्मिन् ? 'रणमुखे' । कथम् ? 'क्षणात्' । (ऊर्जित)राजकं कथंभूतम् ? 'लक्ष्यसङ्ख्यं' लक्ष्या सङ्ख्या यस्य तत् तथा । अथवा अकारप्रश्लेषेण अलक्ष्या-अविभाव्या सङ्ख्या-परिमाणं यस्य तत् तथा । पुनः कथं० ? 'अक्षामं' समर्थम् । पुनर्यच्छब्दयोजनामाह - च-पुनः यो यदूनां-यादवानां राजीं-श्रेणीं अतीतापदं-अतिक्रान्तविपदं चक्रे-कृतवान् । अत्रापि 'चक्रे' इति क्रियापदम् । कः कर्ता ? 'यः' । कां कर्मतापन्नाम् ? 'राजीम्' । केषाम् ? 'यदूनाम्' । राजीं कथंभूताम् ? 'अतीतापदम्' । पुनः कथंभूताम् ? 'दक्षां' असम्मूढाम् ॥

अथ समासः—राज्ञां समूहः राजकम् । ऊर्जितं च तद् राजकं च ऊर्जित० 'तत्पुरुषः' । तद् ऊर्जित० । रणस्य मुखं रणमुखं 'तत्पुरुषः' । तस्मिन् रणमुखे । लक्ष्या सङ्ख्या यस्य तद् लक्ष्यसङ्ख्यं 'बहुव्रीहिः' । अथवा न लक्ष्या अलक्ष्या 'तत्पुरुषः' । अलक्ष्या सङ्ख्या यस्य तद् अलक्ष्यसङ्ख्यं 'बहुव्रीहिः' । न क्षामं अक्षामं 'तत्पुरुषः' । तद् अक्षामम् । जनैर्भासमानः जन० 'तत्पुरुषः' । तं जन० । न विद्यते हसो यस्य सः अहसः 'बहुव्रीहिः' । तं अहसम् । तापं ददातीति तापदः 'तत्पुरुषः' । राजीमत्यास्तापदो राजी० 'तत्पुरुषः' । तं राजी० । निर्वृतिं करोतीति निर्वृतिकरः 'तत्पुरुषः' । नम्राणां निर्वृतिकरो नम्रनि० 'तत्पुरुषः' तं नम्र० । अञ्जनस्य भा अञ्जनभा 'तत्पुरुषः' । अञ्जनभया समानं अञ्जन० 'तत्पुरुषः' । अञ्जनभासमानं महो यस्य सः अञ्जनभासमानमहाः 'तत्पुरुषः' । तं अञ्जन० । अतीता आपदो यस्याः सा अतीतापत् 'बहुव्रीहिः' । तां अती० । इति काव्यार्थः ॥ ८५ ॥

(२)

सि० वृ०—चिक्षेपोर्जितेति । हे जन ! त्वं तं नेमिं-नेमिनामानं जिनं नम-प्रणिपत इत्यर्थः । 'णम प्रह्वत्वे शब्दे च' धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि परस्मैपदे मध्यमपुरुषैकवचनम् । अत्र 'नम' इति क्रियापदम् । कः कर्ता ? । त्वम् । कं कर्मतापन्नम् ? । 'नेमिं' धर्मचक्रस्य नेमिवन्नेमिः तं नेमिम् । नेमिशब्द इन्नन्तोऽप्यस्ति, "नेमिनं नौमि भक्त्या" इति प्रयोगात् । कथंभूतं नेमिम् ? । 'भासमानं' भासते-शोभते इति भासमानः तं भासमानं,यदिवा जनैर्भास(मा)नं जनभासमानम् । एतत्पक्षे संबोधनमध्याहृत्य वाच्यम् । पुनः कथंभूतम् ? । 'अहसं' न विद्यते हासो-हास्यं यस्य स तथा तम् । "[1]घर्घरो हासिका हास्यं, हासस्तु हसनं हसः" इति हैमः (का० २, श्लो० २१०) । पुनः कथंभूतम् ? ।

---

१. पूर्वापरीभावस्तु मुद्रिते अभिधानचिन्तामणिनामके ग्रन्थे ।

'राजीमतीतापदम्' राजीमती उग्रसेनधारिण्योः पुत्री तस्याः तापं ददातीति तापदः तम् । 'आतोऽनुपसर्गे कः' (पा० अ० ३, पा० २, सू० ३) । प्रव्रज्याग्रहणेन तन्मनोरथविफलीकरणादिति भावः । पुनः कथंभूतम् ? । 'नम्रनिर्वृतिकरं' नम्राणां-नमनशीलानां निर्वृतिं-सौख्यं शिवं वा करोतीति तथा तम् । पुनः कथंभूतम् ? । 'अञ्जनभासमानमहसं' अञ्जनं-कज्जलं तस्य भा-कान्तिः तथा समानं-सदृशं महः-तेजो यस्य स तथा तम् । "महश्चो(स्तू ?)त्सवतेजसोः" इत्यमरः (श्लो० २७९७) । श्यामशरीरत्वेन कज्जल-प्रभासाधर्म्यम् । तमिति तच्छब्दाविनाभावित्वाद् यच्छब्दघटनामाह-यो नेमिः ऊर्जितराजकं-बलवद्राजसमूहं रणमुखे-सङ्ग्रामारम्भे क्षणात्-क्षणमात्रेण चिक्षेप-निरस्तवानित्यर्थः । 'क्षिप प्रेरणे' धातोः परोक्षे परस्मैपदे प्रथमपुरुषैकवचनं णप् । 'द्विश्च' (सा० सू० ७१०) इति धातोर्द्वित्वम् । 'सस्वरादिर्द्विरद्विः' (सा० सू० ७११) इति कषयोर्मध्ये कस्य स्वरसहितस्य द्वित्वम् । तथा च किक्षि इति जाते 'कुहोश्चुः' (सा० सू० ७४६) इति चुत्वम् । 'उपधाया लघोः' (सा० सू० ७३५) इति गुणः । तथा च 'चिक्षेप' इति सिद्धम् । अत्र 'चिक्षेप' इति क्रियापदम् । कः कर्ता ? । यः । कं कर्मतापन्नम् ? । 'राजकं' राज्ञां समूहो राजकम् । 'गोत्रोक्षोष्ट्रोरभ्रराज०' (पा० अ० ४, पा० २, सू० ३९) इति वुञ् । ऊर्जो-बलं जातमस्य इति ऊर्जितं, ऊर्जितं च तद् राजकं चेति 'कर्मधारयः' । "स सम्राडथ राजकम् (श्लो० १४७४) । राजन्यकं च नृपति-क्षत्रियाणां गणे क्रमात्" इत्यमरः (श्लो० १४७५) । कस्मिन् ? । रणमुखे । "मुखं निःसरणे वक्रे प्रारम्भोपाययोरपि" इति विश्वः । राजकं कथंभूतम् ? । 'लक्षसङ्ख्यम्' लक्षाः सङ्ख्या-परिमाणं यस्य तत् तथा । अथवा अकारस्य प्रश्लेषः । अलक्ष्या-अविभाव्या सङ्ख्या यस्मात् तत् तथेत्यर्थः । पुनः कथंभूतम् ? । 'अक्षामं' न क्षामं अक्षामं, समर्थमित्यर्थः । 'क्षायो मः' (सा० सू० १३१३) इति निष्ठातकारस्य मकारः । पुनर्यच्छब्दं योजयति । च—पुनः यो यदूनां-यदुवंशोत्पन्नानां यादवानां राजीं-पङ्क्तिमतीतापदं चक्रे-कृतवानित्यर्थः । 'डुकृञ् करणे' धातोः कर्तरि परोक्षे आत्मनेपदे प्रथम-पुरुषैकवचनम् । 'द्विश्च' (सा० सू० ७१०) इति द्वित्वम् । 'रः' (सा० सू० ७६८) इति पूर्वऋकारस्याकारः । 'कुहोश्चुः' (सा० सू० ७४६) इति चुत्वम् । 'ऋ रं' (सा० सू० ३९) । 'स्वरहीनं०' (सा० सू० ३६) । तथा 'चक्रे' इति सिद्धम् । अत्र 'चक्रे' इति क्रियापदम् । कः कर्ता ? । यः । कां कर्मतापन्नाम् ? । राजीम् । केषाम् ? । यदूनाम् । कथंभूतां राजीम् ? । 'अतीतापदं' अतीता-अतिक्रान्ता आपदो-दुरवस्था यस्याः सा ताम् । पुनः कथंभूताम् ? । दक्षां-निपुणाम् ॥ ८५ ॥

(३)

सौ० वृ०—यो द्रव्यभावशत्रून् नामयति-वशीकरोति सः अरिष्टेषु-उपद्रवेषु नेमिः-चक्रमिव भवति तथा गर्भस्थे भगवति जनन्या अरिष्टरत्नमयं चक्रं शय्यापार्श्वे दृष्टम् । अनेन सम्बन्धेनायातस्य द्वाविंशतितमश्रीअरिष्ट(नेमि)नाम्नो जिनस्य स्तुतेर्व्याख्यानं लिख्यते-चिक्षेपोर्जितेति ।

हे जन !–हे भव्यलोक! त्वं तं नेमिं-नेमिजिनं नम इत्यन्वयः । 'नम' इति क्रियापदम् । कः कर्ता ? । 'त्वम्' । 'नम' प्रणम । कं कर्मतापन्नम् ? । ('नेमिं') नेमिनाथम् । किंविशिष्टं नेमिम् ? । नम्राणां-नमनशीलानां निर्वृतिः-मोक्षः सुख वा तं करोतीति 'नम्रनिर्वृतिकरम्' । पुनः किंविशिष्टं नेमिम् ? । 'अहसं' अपगतहास्यम् । पुनः किंविशिष्टं नेमिम् ? । राजीमत्यां-(उग्रसेन)पुत्र्यां तापदं-तापदायकं, काममनोरथविफलीकरणत्वात् । पुनः किंविशिष्टं नेमिम् ? । अञ्जनं-कज्जलं तस्य भा-कान्तिः तत्समानं-(सदृश्यं), श्यामवर्णमित्यर्थः । पुनः किंविशिष्टं नेमिम् ? । 'तं' तं प्रसिद्धम् । तच्छब्दो यच्छब्दमपेक्षते । तं कम् ? । यो नेमिः रणमुखे-सङ्ग्रामप्रारम्भे ऊर्जितराजकं-उत्कटराजसमूहं क्षणात्-वेगेन चिक्षेप इत्यन्वयः । 'चिक्षेप' इति क्रियापदम् । कः कर्ता ? । 'यः' । 'चिक्षेप' बभञ्ज-वित्रासयामास । किं कर्मतापन्नम् ? । ऊर्जितराजकम् । कस्मिन् ? । 'रणमुखे' किंविशिष्टं ऊर्जितराजकम् ? । 'लक्षसख्यं' लक्षशः संख्यात्मकं, यद्वा अकारप्रश्लेषे नास्ति लक्षशः (लक्ष्या) संख्या यत्र तद् अलक्ष्यसंख्यम् । पुनः किंविशिष्टं ऊर्जितराजकम् ? 'अक्षामं' न दुर्वलं, प्रौढपरिकरमित्यर्थः । च-पुनः यो नेमिः यदूनां-यादवानां राजीं-श्रेणिः अतीतापदं-गतविपदं चक्रे इत्यन्वयः । 'चक्रे' इति क्रियापदम् । कः कर्ता ? । 'यः' नेमिः । 'चक्रे' कृतवान् । कां कर्मतापन्नम् ? । 'राजीं' श्रेणिम् । केषाम् ? । 'यदूनाम्' किंविशिष्टां राजीम् ? । 'दक्षां' कुशलाम् । पुनः किंविशिष्टां राजीम् ? । अतीता-अतिक्रान्ता आपद्-विपद् यस्याः सा अतीतापत् तां 'अतीतापदम्' । पुनः किंविशिष्टां राजीम् ? । जनेषु-लोकेषु भासमानं दीप्यमानं महः-तेजो यस्याः सा 'जनभासमानमहसम्' । इदमपि विशेषणं नेमिमिति पदेऽपि लगति। एवंविधं श्रीनेमिजिनं भो भव्याः ! यूयं प्रणमत । इति पदार्थः ॥

अथ समासः–राज्ञां समूहो राजकं, ऊर्जितं-उद्धतं च तद् राजकं च ऊर्जितराजकम् । रणस्य मुखं रणमुखं, तस्मिन् रणमुखे । नास्ति लक्षशः (लक्ष्या) सङ्ख्या यस्मिंस्तद् अलक्षसंख्यम् । न क्षामं अक्षामं, तद् अक्षामम् । जनेषु भासमानं महो यस्य स जनभासमानमहाः, तं जनभासमानमहसम् । न विद्यते हसो-हासो यस्य सः अहसः, तं अहसम् । तापं ददातीति तापदः, राजीमत्याः तापदो राजीमतीतापदः, तं राजीमतीतापदम् । अञ्जनस्य भा अञ्जनभा, अञ्जनभया समानः अञ्जनभासमानः, तं अञ्जनभासमानम् । नमनशीला नम्राः, नम्राणां निर्वृतिः नम्रनिर्वृतिः, नम्रनिर्वृतिं करोतीति नम्रनिर्वृतिकरः, तं नम्रनिर्वृतिकरम् । अतीता-गता आपद् यस्याः सा अतीतापत्, तां अतीतापदम् । इति प्रथमवृत्तार्थः ॥ १ ॥ शार्दूलविक्रीडितम् ॥

(४)

दे० व्या०–चिक्षेपोर्जितेति । हे जन !–हे भव्यलोक ! तं नेमिं-नेमिनाथं त्वं नम-नमस्कुरु इत्यन्वयः । 'णम प्रह्वीभावे' धातुः । 'नम' इति क्रियापदम् । कः कर्ता ? । त्वम् । कं कर्मतापन्नम् ? ।

नेमिम् । किंविशिष्टं नेमिम् ? । 'नम्रनिर्वृतिकरम्' नम्राणां-प्रह्वीभूतानां निर्वृतिं-सुखं कैवल्यं वा करोतीति तथा (तम्) । पुनः किंविशिष्टम् ? । भासमानं-शोभमानम् । पुनः किंविशिष्टम् ? अहसं-हास्यरहितम् । पुनः किंविशिष्टम् ? । 'राजीमतीतापदम्' राजीमती-राजदुहिता तस्याः तापदं-दुःखप्रदम्, प्रव्रज्याग्रहणेन तन्मनोरथविफलीकरणात् । पुनः किंविशिष्टम् ? । 'अञ्जनभासमानमहसम्' अञ्जनं-कज्जलं तस्य भा-कान्तिः तया समानं-सदृशं महः-तेजो यस्य स तम्, श्यामशरीरत्वात् । यत्तदोर्नित्याभिसम्बन्धाद्, यो नेमिः यदूनां-यादवानां राजीं-पङ्क्तिम् अतीतापदं चक्रे-चकार । 'डुकृञ् करणे' धातुः । 'चक्रे' इति क्रियापदम्। कः कर्ता ? । नेमिः । कां कर्मतापन्नाम् ? । राजीम् । केषाम् ? । यदूनाम् । किंविशिष्टां राजीम् ? । 'अतीतापदम्' अतीता-अतिक्रान्ता आपद्-विपत्तिर्यस्याः सा ताम् । पुनः किंविशिष्टाम् ? । दक्षां-चतुराम् । च—पुनः यो नेमिः ऊर्जितराजकं-बलवद्राजसमूहं क्षणात्-क्षणमात्रेण रणमुखे-सङ्ग्राममुखे चिक्षेप-क्षेपयामास । 'क्षिप प्रेरणे' धातुः ।'चिक्षेप' इति क्रियापदम् । कः कर्ता ? । नेमिः । किं कर्मतापन्नम् ? ।'ऊर्जितराजकम्' राज्ञां समूहो राजकं, ऊर्जितं च तद् राजकं चेति, पश्चात् 'कर्मधारयः' । किंविशिष्टं ऊर्जितराजकम् ? । लक्षसङ्ख्यं-लक्षसङ्ख्याकम् । पुनः किंविशिष्टम् ? । अक्षामं-उपचितम् । न क्षामामक्षाममिति 'नञ्समासः' प्रचुरस्वसेवकजनोपेतत्वात् ।। इति प्रथमवृत्तार्थः ।। ८५ ।।

(५)

ध० टीका—चिक्षेपेति । 'चिक्षेप' निरस्तवान् । 'ऊर्जितराजकं' बलवद्राजसमूहम् । 'रणमुखे' समरारम्भे । 'यः' । 'लक्षसङ्ख्यं' लक्षाः संख्या यस्य तत्, अथवा अलक्षसंख्यम्-अविभाव्यपरिमाणम् । 'क्षणाद्' अक्षेपेण । 'अक्षामं' समर्थम् । 'जन !' इति लोकस्यामन्त्रणम् । 'भासमानं' विराजमानम् । अथवा जनैर्भासमानं जनभासमानम् । 'अहसं' अविद्यमानहासम् । 'राजीमतीतापदं' राजीमती-उग्रसेनराजपुत्री तस्या मनोरथविफलीकरणात् तापदं-सन्तापदायिनम् । 'तम्' । 'नेमिं' नेमिनामधेयम् । 'नम' प्रणिपत । 'नम्रनिर्वृतिकरं' नम्राणां निर्वृतिं-सौख्यं करोतीति । 'चक्रे' कृतवान् । 'यदूनां' यादवानाम् । 'च' । 'यः' । 'दक्षां' असंमूढाम् । 'अञ्जनभासमानमहसं' अञ्जनभया-कज्जलच्छायया समानं-समं महः-तेजो यस्य तम् । 'राजीं' सन्ततिम् । 'अतीतापदं' अतिक्रान्तविपदम् । य ऊर्जितराजकं चिक्षेप यश्च यदूनां राजीं अतीतापदं चक्रे तं नेमिं नमेति सम्बन्धः ।। ८५ ।।

(६)

अवचूरिः

यो नेमिजिनो लक्षसंख्यं-लक्षप्रमाणमूर्जितराजकं-बलवद्राजवृन्दं रणमुखे चिक्षेप-बभञ्ज । क्षणाद्-वेगेन । राजकं किंभूतम् ? । अक्षामं-उपचितम् । हे जन ! तं नेमिं नम । किंभूतम् ? ।

भासमानं-कान्तिकदम्बेन दीप्यमानं जनैर्भासमानं वा । अहसं-हास्यमुक्तम् । राजीमत्या-राजकन्यायाः प्रव्रज्याग्रहणेन मनोरथविफलीकरणात् तापदं पश्चात् तु मुक्तिसुखप्रदम् । नम्राणां निर्वृतिं-मुक्तिं सुखं वा करोतीति । यश्च स्वामी यदूनां-यादवानां दक्षां राजीं-श्रेणिं अतीता-अतिक्रान्ता आपदो यया सा तामतीतापदं चक्रे-कृतवान् । नेमिं किंभूतम् ? । अञ्जनस्य भया-कान्त्या समानं-तुल्यं महः-तेजो यस्य ।। ८५ ।।

जिनश्रेण्याः स्तुतिः—

प्राव्राजीज्जितराजका रज इव ज्यायोऽपि राज्यं जवाद्
या संसारमहोदधावपि हिता शास्त्री विहायोदितम् ।
यस्याः सर्वत एव सा हरतु नो राजी जिनानां भवा-
यासं सारमहो दधाव पिहिताशास्त्रीविहायोऽदितम् ।। २ ।। ८६ ।।

- शार्दूल०

(१)

ज०वि०— प्राव्राजीज्जितेति । सा जिनानां राजी-तीर्थकरश्रेणी नः-अस्माकं भवायासं-संसारखेदं हरतु-दूरीकरोतु इति क्रियाकारकसम्बन्धः । अत्र 'हरतु' इति क्रियापदम् । का कर्त्री ? 'राजी' । केषाम् ? 'जिनानाम्' । कं कर्मतापन्नम् ? 'भवायासम्' । केषाम् ? 'नः' । सेति तच्छब्दसाहचर्याद्यच्छब्दयोजनामाह-या जिनानां राजी प्राव्राजीत्-प्रव्रज्यामग्रहीत् । अत्रापि 'प्राव्राजीत्' इति क्रियापदम् । का कर्त्री ? 'या' । किं कृत्वा ? 'विहाय' त्यक्त्वा । किं कर्मतापन्नम् ? 'राज्यं' राजव्यापारम् । कस्मात् ? 'जवाद्' वेगात् । किमिव ? 'रज इव' रेणुमिव। राज्यं कथंभूतम् ? 'ज्यायोऽपि' महदपि । पुनः कथं० ? 'उदितं' प्राप्तोदयम् । या कथंभूता ? 'जितराजका' जितं-वशीकृतं राजकं-राजसमूहो यया सा तथा । पुनः कथं० ? 'हिता' श्रेयस्करी । कस्मिन्नपि ? 'संसारमहोदधावपि' भवमहार्णवेऽपि । पुनः कथं० ? 'शास्त्री' शिक्षयित्री, जीवाजीवादितत्त्वोपदेशदायिनीत्यर्थः । पुनर्यच्छब्दयोजनामाह-यस्याः-जिनानां राज्याः सारमहः-प्रधानतेजः सर्वत एव-समन्तादेव दधाव-वेगात् प्रससारेति क्रियाकारकयोगः । अत्र 'दधाव' इति क्रियापदम् । किं कर्तृ ? 'सारमहः' । कस्याः ? 'यस्याः' । कथम् ? 'सर्वत एव' । सारमहः कथंभूतम् ? 'पिहिताशास्त्रीविहायः' आशास्त्रियो-दिङ्नार्यः विहायः-गगनं एतानि पिहितानि-स्थगितानि येन तत् तथा । पुनः कथं० ? 'अदितं' अखण्डितम् ।।

अथ समासः—जितं राजकं यया सा जित० 'बहुव्रीहिः' । महांश्चासौ उदधिश्च महोदधिः 'कर्मधारयः' महोदधिरिव महोदधिः । संसारश्चासौ महोदधिश्च संसारमहो० 'कर्मधारयः' । तस्मिन् संसार० ।

भवस्यायासो भवायासः 'तत्पुरुषः' । तं भवायासम् । सारश्च तन्महश्च सारमहः 'कर्मधारयः' । स्त्रिय इव स्त्रियः । आशाश्च ताः स्त्रियश्च आशास्त्रियः 'कर्मधारयः' । आशास्त्रियश्च विहायश्च आशास्त्रीविहायः 'इतरेतरद्वन्द्वः' । पिहितानि आशास्त्रीविहायांसि येन तत् पिहिता० 'बहुव्रीहिः' । न दितं अदितं 'तत्पुरुषः' । इति काव्यार्थः ।। ८६ ।।

(२)

सि० वृ०—प्राव्राजीज्जितेति । सा जिनानां-तीर्थकृतां राजी-ततिः-श्रेणी नः-अस्माकं भवायासं-संसारखेदं हरतु-दूरीकरोतु इत्यर्थः । 'हृञ् हरणे' धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि परस्मैपदे प्रथमपुरुषैकवचनं तुप् । 'अप्०' (सा० सू० ६९१) । 'गुणः' (सा० सू० ६९२) इति गुणः । 'स्वरहीनं०' (सा० सू० ३६) । अत्र 'हरतु' इति क्रियापदम् । का कर्त्री ? । राजी । केषाम् ? । जिनानाम् । कं कर्मतापन्नम् ? । 'भवायासं' भवस्य आयासो भवायासस्तम् । केषाम् ? । नः । सेति तच्छब्दसाहचर्याद् यच्छब्दयोजनामाह । या जिनानां राजी प्राव्राजीत्-प्रव्रज्यामग्रहीत् । प्रपूर्वक् 'व्रज गतौ क्षेपणे च' धातोः कर्तरि भूते सौ परस्मैपदे प्रथमपुरुषैकवचनं दिप् । 'दिबादावट्' (सा० सू० ७०७) । 'भूते सिः' (सा० सू० ७२४) । 'सिसतासीस्यपामिट्' (सा० सू० ७२०) इति सेरिडागमः । सेरिति दिपः ईडागमः । 'इट ईटी' (सा० सू० ७३७) इति सेर्लोपः । 'सवर्णे दीर्घः' (सा० सू० ५२) । 'णित्पे' (सा० सू० ७५९) इति परस्मैपदे णित्वे । 'अत उपधायाः' (सा० सू० ७५७) इति वृद्धिः । 'स्वरहीनं०' (सा० सू० ३६) । तथा च 'प्राव्राजीत्' इति सिद्धम् । अत्र 'प्राव्राजीत्' इति क्रियापदम् । का कर्त्री ? । या । किं कृत्वा ? । संत्यज्य-त्यक्त्वा । किम् ? । राज्यं-साम्राज्यं, राज्यव्यापारमिति यावत् । 'राजश्वशुराद्यत्' (पा० अ० ४, पा० १, सू० १३७) इति यत् । कस्मात् ? । जवाद्-वेगात् । किमिव ? । रज इव-रेणुरिव । यथा वस्त्रविलग्नरजःपरिशाटने विलम्बो न भवति तथाऽविलम्बेन त्यक्तमिति भावः । "रेणुर्द्वयोः स्त्रियां धूली (लिः) पांशुर्ना न द्वयो रजः" इत्यमरः (श्लो० १६६४) । "अथ रजसि स्युर्धूलीपांशुरेणवः" इति हैमः (का० ४, श्लो० ३६) । रज्यन्ते वस्त्राण्यनेन इति रजः । 'रञ्ज रागे' '(सर्वधातुभ्यः) असुन्' (उणा० सू० ६२८) इत्यसुन् 'असि अके अने०' (वार्तिके ४०६७) 'घिनुणि च' (वार्तिके ४०६८) रञ्जेर्लोपो वाच्यः यद्वा 'भूरञ्जिभ्यां कित्' (उणा० सू० ६५६) इत्यसुन् । 'रजकरजनरजःसूपसङ्ख्यानम्' (वार्तिके ४०६९) इति नलोपः । रजसी रजांसि इत्यादि रूपाणि "रजेनापि रजः सम" मिति शब्दप्रभेदः । राज्यं कथंभूतमपि ? । ज्यायोऽपि-प्रशस्यमपि । 'ज्य च' (पा० अ० ५, पा० ३, सू० ६१) प्रशस्यशब्दस्य ज्यादेशः । 'ज्यादीयसिः'[1] इति ईयस ईकारस्याकारः । पुनः कथंभूतम् ? । उदितं-उत्कर्षं प्राप्तम् । (उत्पूर्वक) 'इणू गतौ' भावे क्तः । या कथंभूता ? । 'जितराजका' जितं-वशीकृतं राजकं-राज्ञां समूहो यया सा ।

१. 'ज्यादादीयसः' इति पाणिनीये (अ० ६, पा० ४, सू० १६०)

पुनः कथंभूता ? । हिताहितकारिणी । कस्मिन्नपि ? । 'संसारमहोदधावपि' संसरणं संसारः भावे घञ् स एव महान्-प्रकृष्टो यः उदधिः-समुद्रः तस्मिन् । पुनः कथंभूता ? । शास्त्री-शिक्षयित्री । 'शासु अनुशिष्टौ' शीलार्थे तृ(तृन्)प्रत्ययः । द्विसप्ततिकलायाः पूर्वं भगवता एव शिक्षणादिति भावः । यदिवा शास्त्री जीवादितत्त्वोपदेशदायिनीत्यर्थः । पुनर्यच्छब्दयोजनामाह च पुनर्यस्या-जिनराज्याः सारमहः-प्रधानतेजः सर्वत एव-समन्तादेव दधाव-वेगात् प्रससारेत्यर्थः । 'दधाव' इति 'सृ गतौ' इति धातोर्धावादेशे परोक्षे कर्तरि परस्मैपदे प्रथमपुरुषैकवचनं णप् । 'द्विश्च' (सा० सू० ७१०) इति धातोर्द्वित्वम् । 'ह्रस्वः' (सा० सू० ७१३) इति ह्रस्वः । 'झपानां जबचपाः' (सा० सू० ७१४) इति पूर्वधकारस्य दत्वम् । 'अत उपधायाः' (सा० सू० ७५७) इति वृद्धिः । तथा च 'दधाव' इति सिद्धम् । आदेशस्तु सार्वधातुके दृश्यते । आर्धधातुके तु तदभावाद् दधावेति चिन्त्यमिव प्रतिभाति[1] । अत्र 'दधाव' इति क्रियापदम् । किं कर्तृ ? 'सारमहः' सारं च तन्महश्च सारमहः । कस्याः ? । 'यस्याः' । कथम् ? । सर्वत एव । कथंभूतं सारमहः ? । 'पिहिताशास्त्रीविहायः' आशास्त्रियो-दिगङ्गनाः विहायो-गगनं, आशास्त्रियश्च विहायश्च आशास्त्री-विहायांसि, एतानि पिहितानि-आच्छादितानि येन तत् तथा । विजहाति सर्वमिति विहायः । असुनि साधुः । पुनः कथंभूतम् ? । 'अदितं न दितं अदितं' अखण्डितम् । 'दो अवखण्डने' 'द्यतिस्यतिमास्था०' (पा० अ० ७, पा० ४, सू० ४०) इति इकारोन्तादेशः ॥ ८६ ॥

(३)

सौ० वृ०—प्राव्राजीज्जितेति । सा जिनानां राजी-तीर्थकृतां श्रेणिः नः-अस्माकं भवायासं संसारखेदं हरतु इत्यन्वयः । 'हरतु' इति क्रियापदम् । का कर्त्री ? । 'राजी' । केषाम् ? 'जिनानाम्' । 'हरतु' अपनयतु । कं कर्मतापन्नम् ? । 'भवायासम्' । केषाम् ? । 'नः' अस्माकम् । कथंभूता जिनानां राजी ? । 'सा' सा-प्रसिद्धा । तच्छब्दो यच्छब्दमपेक्षते । सा का ? । या जिनानां राजी प्राव्राजीदित्यन्वयः । 'प्राव्राजीद्' इति क्रियापदम् । का कर्त्री ? । 'या' । 'प्राव्राजीद्' दीक्षामग्रहीत् । किं कृत्वा ? । 'विहाय' त्यक्त्वा । किं कर्मतापन्नम् ? । 'राज्यं' नृपत्वम् । कथम् ? । 'जवात्' वेगेन । किमिव ? । 'रज इव' यथा रजः वेगेन त्यज्यते । किंविशिष्टं राज्यम् ? । 'ज्यायोऽपि' महदपि । किंविशिष्टा राजी ? । [तं] पराजितं राजकं-राजसमूहो यया सा 'जितराजका' । पुनः किंविशिष्टा राजी ? । 'हिता' हितकारिणी । कस्मिन् ? । 'संसारमहोदधौ अपि' संसारसमुद्रेऽपि । पुनः किंविशिष्टा जिनानां राजी ? । 'शास्त्री' शिक्षयित्री, जीवाजीवादितत्त्वोपदेशदायिनीत्यर्थः । पुनः किंविशिष्टा राजी ? । पुनर्यच्छब्दमपेक्षते । यस्याः राज्याः सारमहः-प्रधानं तेजः सर्वत एव-सर्वस्मिन्नपि जगति दधाव इत्यन्वयः । 'दधाव' इति क्रियापदम् । किं कर्तृ ? । 'सारमहः' । 'दधाव' प्रससार । कस्याः ? । 'यस्याः' । कथम् ? । 'सर्वत

१. चिन्त्यमेतद् 'धावु गतिशुद्ध्यो'रित्यस्य धातोः सद्भावात् ।

एव' सर्वत्र । किंविशिष्टं सारमहः ? । पिहितानि स्थगितानि आशा-दिशः स्त्रियो-योषितः विहायः-आकाशं येन तत् पिहिताशास्त्रीविहायः' । पुनः किंविशिष्टं सारमहः ? । 'अदितं' अखण्डितं, परिपूर्णमित्यर्थः । इति पदार्थः ।

अथ समासः—राज्ञां समूहो राजकं, जितं राजकं यया सा जितराजका । अतिशयेन वृद्धं ज्यायः, तद् ज्यायः । राज्ञो भावो राज्यं, तद् राज्यम् । संसरणं संसारः, उदकानि धीयन्ते-स्थाप्यन्ते अस्मिन् इति उदधिः, महांश्चासौ उदधिश्च महोदधिः, संसार एव महोदधिः संसारमहोदधिः, तस्मिन् संसारमहोदधौ । शास्ति-शिक्षयतीति शास्त्री । भवस्य आयासः भवायासः, तं भवायासम् । सारं च तन्महश्च सारमहः । आशाश्च स्त्रियश्च विहायश्च आशास्त्रीविहायांसि, पिहितानि आशास्त्रीविहायांसि येन तत् पिहिताशास्त्रीविहायः । न दितं अदितम् । पक्षे उदितं उदयप्राप्तं राज्यमित्यर्थः । इति द्वितीयवृत्तार्थः ॥ ८६ ॥

(४)

दे० व्या०—प्राव्राजीज्जितेति । सा जिनानां राजी-ततिः नः-अस्माकं भवायासं-संसारपरिश्रमं हरतु-नाशयतु इत्यन्वयः । 'हृञ् हरणे' धातुः । 'हरतु' इति क्रियापदम् । का कर्त्री ? । राजी । केषाम् ? । जिनानाम् । कं कर्मतापन्नम् ? । भवायासम् । भवस्य आयासं भवायासं इति ('तत्पुरुष') समासः । केषाम् ? । नः । किंविशिष्टा जिनानां राजी ? । 'जितराजका' जितं भग्नं राजकं-राज्ञां समूहो यया सा तथा । "स्याद् राजपुत्रकं राजन्यकं राजकमाजकं" इत्यभिधानचिन्तामणिः (का० ६, श्लो० ५३) । पुनः किंविशिष्टा ? । हिता-हितकारिणी । कस्मिन् ? । 'संसाराम्भोधौ' संसरणं संसारः भावे घञ् स एव महान् प्रकृष्टो यः उदधिः-समुद्रः तस्मिन् । पुनः किंविशिष्टा ? । शास्त्री-शिक्षयित्री, द्विसप्ततिकलायाः पूर्वं भगवतैव शिक्षणात् । यत्तदोर्नित्याभिसम्बन्धाद् या जिनानां राजी जवात्-शीघ्रं प्राव्राजीत्-प्रव्रज्यामग्रहीत् । 'प्राव्राजीद्' इति क्रियापदम् । का कर्त्री ? । जिनानां राजी । किं कृत्वा ? । विहाय-सन्त्यज्य । किम् ? । राज्यं साम्राज्यम् । कथम् ? । जवाद्-अविलम्बेन यथा स्यात् तथेति क्रियाविशेषणम् । किमिव ? । रज इव । यथा रजस्त्यागे विलम्बो न भवति तथा अविलम्बेन राज्यं त्यक्तमित्यभिप्रायः । च-पुनः यस्याः-जिनराज्याः 'सारमहः' सारं-प्रधानं महः-तेजः सर्वतः-समन्तात् दधाव-प्रससारेत्यन्वयः । 'दधाव' इति क्रियापदम् । किं कर्तृ ? । 'सारमहः' सारं प्रधानं महः-तेजः । कथम् ? । किंविशिष्टं सारमहः ? । 'पिहिताशास्त्रीविहायः' आशास्त्री-दिग्वनिता विहायः-आकाशं अनयोः 'द्वन्द्वः', ततः पिहिते आच्छादिते आशास्त्रीविहायसी येनेति । अदितं-अखण्डितम् । न दितं अदितमिति नञ्समासः । पुनः किंविशिष्टम् ? । उदितं-उदयं प्राप्तम् । किंविशिष्टं राज्यम् ? । प्रशस्यमिति (मपि?) श्लाघनीयमपि । पुनः किंविशिष्टम् ? । उदितं गतार्थमेतत् । इति द्वितीयवृत्तार्थः ॥ ८६ ॥

(५)

ध० टीका—प्राव्राजीदिति । 'प्राव्राजीत्' प्रव्रज्यां अग्रहीत् । 'जितराजका' वशीकृतराजसमूहा । 'रज इव' रेणुमिव । 'ज्यायोऽपि' प्रशस्यमपि । 'राज्यं' राजव्यापारम् । 'जवाद्' वेगात् । 'या' । 'संसारमहोदधावपि' भवमहार्णवेऽपि । 'हिता' श्रेयस्करी । 'शास्त्री' शिक्षयित्री । 'विहाय' त्यक्त्वा । 'उदितं' प्राप्तोदयम् । 'यस्याः' । 'सर्वत एव' समन्तादेव । 'सा' । 'हरतु' अपनयतु । 'नः' अस्माकम् । 'राजी' परिपाटिः । 'जिनानां' अर्हताम् । 'भवायासं' संसारखेदम् । 'सारमहः' महार्हत् तेजः । 'दधाव' वेगात् प्रससार । 'पिहिताशास्त्रीविहायः' पिहिताः-स्थगिताः आशास्त्रियो-दिग्वनिताः विहायो-व्योम च येन तत् । 'अदितं' अखण्डितम् । या राज्यं विहाय प्राव्राजीत् यस्याः सारमहः सर्वत एव दधाव, सा जिनानां राजी भवायासं हरतु नः इत्यन्वयः ॥ ८६ ॥

(६)

अवचूरिः

या उदितम्-उदयं प्राप्तं ज्यायोऽपि-अतिप्रौढमपि राज्यं रज इव विहाय प्राव्राजीत्-प्रव्रज्यामग्रहीत् । किंभूता ? । जितं राजकं-राजसमूहो यया सा । संसारमहोदधौ-भवमहार्णवेऽपि हिता-सुखकारिणी । शास्त्री-शिक्षयित्री । यस्माच्च सर्वतः-सर्वासु दिक्षु सारमहो-सारतेजो दधाव-प्रससार । किंभूतम् ? । पिहिता-आच्छादिता आशास्त्रियो-दिग्वनिता विहायः-आकाशं च येन तत् । अदितम्-अखण्डितम् । सा जिनानां राजी भवायासं-संसारक्लेशं नः-अस्माकं हरतु ॥ ८६ ॥

जिनवाणीगौरवम्—

कुर्वाणाऽणुपदार्थदर्शनवशाद् भास्वत्प्रभायास्त्रपा—
मानत्या जनकृत्तमोहरत ! मे शस्ताऽदरिद्रोहिका ।
अक्षोभ्या तव भारती जिनपते ! प्रोन्मादिनां वादिनां
मानत्याजनकृत् तमोहरतमेश ! स्तादरिद्रोहिका ॥ ३ ॥ ८७ ॥

- शार्दूल०

(१)

ज० वि०—कुर्वाणेति । हे जिनपते !-जिनराज ! तव-भवतः भारती-वाक् मे-मम अरिद्रोहिका-अरीणां द्रोहकारिणी स्तात्-भवतु इति क्रियाकारकान्वयः । अत्र 'स्तात्' इति क्रियापदम् । का कर्त्री ?

'भारती' । कस्य ? 'तव' । कथंभूता ? 'अरिद्रोहिका' । कस्य ? 'मे' । न चायं मेशब्दो युष्मच्छब्द[1]विशेषादेशत्वात् सम्बोधनपदाग्रे कथं प्रयुक्तः "सम्बोधनपदादग्रे न भवन्ति वसादयः" (सा० सू० ३४५) इत्याशङ्कनीयम् । मे इत्यस्य षष्ठ्यन्तप्रतिरूपाव्ययत्वात् निपातत्वेन युष्मच्छब्द[2]विशेषादेशत्वाभावादिति । भारती किं कुर्वाणा ? 'कुर्वाणा' विदधाना । कां कर्मतापन्नाम् ? 'त्रपां' लज्जाम् । कस्याः ? 'भास्वत्प्रभायाः' । कस्मात् ? 'अणुपदार्थदर्शनवशात्' अणवः-सूक्ष्माः ये पदार्थाः-परमाण्वादयः तेषां यद् दर्शनं-व्यक्तीकरणं तद्वशात्-तदायत्तभावत्वात् । इयं अणूनपि पदार्थान् दर्शयति, न त्वहम्; अतो जिताऽस्मीत्येवंरूपां भास्वत्प्रभायास्त्रपां करोतीति हार्दम् । भारती कथंभूता ? 'शस्ता' प्रशस्ता । पुनः कथं० ? 'अदरिद्रोहिका' अदरिद्रा-अतुच्छा ऊहा यस्याः सा तथा । अत्र स्वार्थे कन् । पुनः कथं० ? 'अक्षोभ्या' अचालनीया । पुनः कथं० ? 'मानत्याजनकृत्' अभिमानमोक्षणकारिणी । केषाम् ? 'वादिनां' परतीर्थिकानाम् । कथंभूतानाम् ? 'प्रोन्मादिनां' प्रकर्षेणोन्मादवताम्, दर्पादसमञ्जसचेष्टानामित्यर्थः । पुनः कथंभूता भारती ? 'तमोहरतमा' अतिशयेन तमोहरा-अज्ञानविनाशिनी । अवशिष्टे च द्वे जिनपतेः सम्बोधने, तद्व्याख्या यथा-हे 'जनकृत्तमोहरत !' मोहः-मोहनीयं कर्म रतं-कामकेलिः, ततः जनानां-लोकानां कृत्ते-छिन्ने-सर्वथा निरस्ते मोहरते येन स तथा तत्सम्बोधनं हे जन० । कया हेतुभूतया ? 'आनत्या' प्रणामेन । हे 'ईश !' स्वामिन् ! ॥

अथ समासः—अणवश्च ते पदार्थाश्च अणुपदार्थाः 'कर्मधारयः' । अणुपदार्थानां दर्शनं अणु० 'तत्पुरुषः' । अणुपदार्थदर्शनस्य वशः अणु० 'तत्पुरुषः' । तस्मादणु० । भास्वतः प्रभा भास्वत्प्रभा 'तत्पुरुषः' । तस्याः भास्वत्प्रभायाः । मोहश्च रतं च मोहरते 'इतरेतरद्वन्द्वः' । कृत्ते मोहरते येन स कृत्त० 'बहुव्रीहिः' । जनानां कृत्तमोहरतः जनकृत्त० 'तत्पुरुषः' । तत्सम्बो० हे जनकृत्त० । न दरिद्रा अदरिद्राः 'तत्पुरुषः' । अदरिद्रा ऊहा यस्या सा अदरिद्रो० 'बहुव्रीहिः' । न क्षोभ्या अक्षोभ्या 'तत्पुरुषः' । जिनानां जिनेषु वा पतिः जिनपतिः 'तत्पुरुषः' । तत्सम्बो० हे जिन० । प्रकर्षेणोन्मादिनः प्रोन्मादिनः 'तत्पुरुषः' । तेषां प्रोन्मा० । मानस्य त्याजनं मान० 'तत्पुरुषः' । मानत्याजनं करोतीति मान० 'तत्पुरुषः' । तमो हरतीति तमोहरा 'तत्पुरुषः' । अतिशयेन तमोहरा तमो० । अरीणां द्रोहिका अरि० 'तत्पुरुषः' । इति काव्यार्थः ॥ ८७ ॥

(२)

सि० वृ०—कुर्वाणेति । हे जिनपते !-हे जिननायक ! तव-भवतः भारती-वाणी मे-मम अरिद्रोहिका-अरीणां द्रोहकारिणी स्ताद्-भवतु इत्यर्थः । 'अस् भुवि' धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि परस्मैपदे प्रथमपुरुषैकवचनम् । अत्र 'स्ताद्' इति क्रियापदम् । का कर्त्री ? भारती । बिभर्तीति भारती पृषोदरादिः । कस्य ? । तव । कथंभूता ? । अरिद्रोहिका । कस्य ? । मे-मम । न चायं मेशब्दः

1. भ्रान्तिरियम्, अत्र अस्मदित्यावश्यकम्, अस्मदो 'मे' इत्यादेशत्वात् ।
2. अत्राऽपि 'अस्मद्' इत्युचितम् पूर्ववत् ।

युष्मच्छब्दविशेषादेशत्वात् सम्बोधनपदादग्रे कथं प्रयुक्तः ? [यदुक्तम्] "सम्बोधनपदादग्रे न भवन्ति वसादयः" (सा० सू० ३४४) इत्याशङ्कनीयम् । मे इत्यस्य षष्ठ्यन्तप्रतिरूपाव्ययत्वात् निपातत्वेन युष्मच्छब्दविशेषादेशाभावादिति । भारती किं कुर्वाणा ? । 'कुर्वाणा' कुरुत इति कुर्वाणा-विदधाना । काम् ? । त्रपां-लज्जाम् । कस्याः ? । 'भास्वत्प्रभायाः' भास्वान्-सूर्यः तस्य प्रभा-प्रकाशः तस्याः । कस्मात् ? । 'अणुपदार्थदर्शनवशात्' अणवः-सूक्ष्मा ये पदार्थाः-निगोदजीवपरमाण्वादयः तेषां दर्शनं-व्यक्तीकरणं तस्माद् । भारती सूक्ष्मानपि पदार्थान् दर्शयति, न त्वहं तद्दर्शने समर्थेति तया जिताऽस्मीत्येवंशीला भास्वत्प्रभायास्त्रपां करोतीति भावः । भारती कथंभूता ? । शस्ता-प्रशस्ता । पुनः कथंभूता ? । 'अदरिद्रोहिका' अदरिद्रा-अतुच्छा ऊहा यस्यां सा । स्वार्थे कन् । पुनः कथंभूता ? । 'अक्षोभ्या' न क्षोभयितुं-चालयितुं शक्या-अक्षोभ्या । पुनः कथंभूता ? । 'मानत्याजनकृत्' मानः-अभिमानः तस्य त्याजनं-मोक्षणं करोतीति तथा । 'क्विप्' (सा० सू० १२४९) । 'ह्रस्वस्य पिति कृति०' (सा० सू० १२४६) इति तुक् । केषाम् ? । वादिनां-परतीर्थिकानाम् । कथंभूतानां वादिनाम् ? । 'प्रोन्मादिनां' प्रकर्षेण उन्मादः-चित्तविप्लवो येषां ते तथा तेषाम्, प्रकर्षेणोन्मादवतामित्यर्थः, दर्पादसमञ्जसचेष्टावतामिति भावः । पुनः कथंभूता भारती ? । 'तमोहरतमा' अतिशयेन तमः-अज्ञानं हरति-नाशयतीति तथा । अतिशयार्थे तमप् । अवशिष्टे च द्वे जिनपतेः सम्बोधने, तयोस्त्वेवं व्याख्या हे 'जनकृत्तमोहरत ! जनानां-लोकानां कृत्ते-छिन्ने मोहरते येन स तथा तस्य सम्बो० हे जन० । मोहो-मोहनीयं कर्म रतं-कामकेलिः, मोहश्च रतं च मोहरते 'इतरेतरद्वन्द्वः' । हे ईश !-स्वामिन् ! कया कृत्वा ? । आनत्या-प्रणामेन ॥ ८७ ॥

(३)

सौ० वृ०—कुर्वाणेति । हे जिनपते !-हे जिनराज ! हे ईश !-स्वामिन् ! पुनर्जनानां-लोकानां कृत्ते-छेदिते मोहः-अज्ञानं रतं-सुरतं येन स जनकृत्तमोहरतः तस्य सं० हे जनकृत्तमोहरत ! तव-भवतः भारती-वाणी मे-मम अरिद्रोहिका-शत्रुविनाशिनी स्तादित्यन्वयः । 'स्ताद्' इति क्रियापदम् । का कर्त्री ? । 'भारती' । 'स्ताद्' भवतु । भारती कस्य ? । 'तव' । किंविशिष्टा ? 'अरिद्रोहिका' । कस्य ? । 'मे' मम । किंविशिष्टा भारती ? । 'शस्ता' प्रशस्ता । पुनः किंविशिष्टा भारती ? । 'कुर्वाणा' विदधाना । कां कर्मतापन्नाम् ? । 'त्रपां' लज्जाम् । कस्याः ? । भास्वान्-सूर्यः तस्य प्रभा-कान्तिः तस्याः 'भास्वत्प्रभायाः', सूर्यकान्तेरपि लज्जां कुर्वतीत्यर्थः । कस्मात् ? । अणुः-परमाणुः स एव पदार्थः द्रव्यरूपतया (तस्य) दर्शनं-अवलोकनं तस्य वशः-स्वायत्तीकरणं ज्ञानेन तस्माद् 'अणुपदार्थदर्शनवशात्' तद्वशात्-तदायत्तभावत्वात् । इयमणुपदार्थान् दर्शयति न तु अहं, अतोऽहं जिताऽस्मि इत्येवंरूपां भास्वत्प्रभायास्त्रपां करोतीति । पुनः किंविशिष्टा भारती ? । तमः-अज्ञानं तत् प्रति हरतीति तमोहरा,

१./२. पूर्ववदत्राऽपि 'अस्मद्' इत्यावश्यकम्, एवमग्रेऽप्युन्नेयम् ।

अतिशयेन तमोहरा 'तमोहरतमा' । पुनः किंविशिष्टा भारती ? । अदरिद्रा-सम्पूर्णा ऊहा-वितर्का यस्यां सा 'अदरिद्रोहिका' । स्वार्थे कन् । पुनः किंविशिष्टा भारती ? । मानो-दर्पः अहंकारो वा तस्य त्याजनं-त्यागः तं करोतीति 'मानत्याजनकृत्' । कया ? । 'आनत्या' प्रणतिभावेन । पुनः किंविशिष्टा भारती ? । 'अक्षोभ्या' न क्षोभयितुं शक्या । केषाम् ? । 'वादिनां' कुतीर्थिकानाम् । किंविशिष्टानां वादिनाम् ? । 'प्रोन्मादिनां' प्रकर्षेण यथा तथा जल्पनशीलानाम् । अत्र मे इति युष्मच्छब्दस्य विशेषादेशरूपं संबोधनपदादग्रे बद्धं तन्न भवति "संबोधनपदादग्रे न भवन्ति वसादयः" (सा० सू० ३४५) इति वचनात् कथं घटते तदाह-मे इत्यस्य षष्ठ्यन्तप्रतिरूपाव्ययत्वात् अस्मच्छब्दस्य विशेषार्थत्वान्निपातत्वेन विशेषादेशाभावात् इति न वसादयः । इति पदार्थः ॥

अथ समासः—कुरुते इति कुर्वाणा । अणवश्च ते पदार्थाश्च अणुपदार्थाः, अणुपदार्थानां दर्शनं अणुपदार्थदर्शनं, अणुपदार्थदर्शनस्य वशः-आयत्तः अणुपदार्थदर्शनवशः, तस्माद् अणुपदार्थदर्शनवशात् । भाः-कान्तिः विद्यते यस्यासौ भास्वान्, भास्वतः प्रभा भास्वत्प्रभा, तस्याः भास्वत्प्रभायाः । मोहश्च रतं च मोहरते, जनानां कृत्ते मोहरते येन स जनकृत्तमोहरतः, तस्य सं० हे जनकृत्तमोहरत ! । न दरिद्रा अदरिद्राः, अदरिद्रा ऊहा यस्यां सा अदरिद्रोहिका । क्षोभयितुं योग्या क्षोभ्या, न क्षोभ्या अक्षोभ्या । जिनानां पतिः जिनपतिः, तस्य सं० हे जिनपते ! । प्रकृष्ट उन्मादो येषां ते प्रोन्मादिनः, तेषां प्रोन्मादिनाम् । वदनं वादः, वादः अस्ति ए(ये)षां इति वादिनः, तेषां वादिनाम् । मानस्य त्याजनं मानत्याजनं, मानत्याजनं करोतीति मानत्याजनकृत् । तमांसि हरतीति तमोहरा, अतिशयेन तमोहरा (तमोहरतमा) । अरीणां द्रोहः अरिद्रोहः, तं अरिद्रोहं करोतीति [1]अरिद्रोहकारिका ॥ इति तृतीयपदार्थः ॥ ८७ ॥

(४)

दे० व्या०—कुर्वाणेति । हे जिनपते ! [2]गतार्थम् । हे ईश !-स्वामिन् ! ते-तव भारती मे-मम अरिद्रोहिका-शत्रुक्षयकारिणी स्तादित्यन्वयः । 'स्तात्' इति क्रियापदम् । का कर्त्री ? । भारती-वाणी । "वाग् ब्राह्मी भारती गौर्गीः" इत्यभिधानचिन्तामणिः (का० २, श्लो० १५५) । कस्य ? । ते-तव । किंविशिष्टा भारती ? । अरिद्रोहिका । कस्य ? । मे-मम । पुनः किंविशिष्टा ? । शस्ता-प्रशस्ता, अविसंवादित्वात् । पुनः किंविशिष्टा ? । 'अदरिद्रोहिका' न सन्ति दरिद्रा-अर्थशून्या ऊहाः-तर्का यस्याः सा तथा । पुनः किंविशिष्टा ? । अक्षोभ्या-अचालनीया । न क्षोभ्या अक्षोभ्या इति समासः । पुनः किंविशिष्टा ? । 'मानत्याजनकृत्' मानस्य अहङ्कारस्य त्याजनं करोतीति तथा । 'क्विप्०' (पा० अ० ३, पा० २, सू० ७६), 'ह्रस्वस्य पिति कृति तुक्' (पा० अ० ६, पा० १, सू० ७१) । केषाम् ? । 'वादिनां'-

१. 'अरिद्रोहिका' इति पदं मूलकाव्ये, तस्मादयं विग्रहो भ्रान्तिमूलकः ।

२. असम्बद्धमप्राकरणिकम्पदमिदम् ।

परतीर्थिकानाम् । किंविशिष्टानां वादिनाम् ? 'प्रोन्मादिनां' प्रकर्षेण-उन्मादः-चित्तविप्लवो येषां ते तथा । "उन्मादश्चित्तविप्लवः" इत्यभिधानचिन्तामणिः (का० २, श्लो० २३४) । पुनः किंविशिष्टा ? । 'तमोहरतमा' तमः-अज्ञानं हरतीति तमोहरा, अतिशयेन तमोहरा तमोहरतमा । अतिशयेऽर्थे तमप्प्रत्ययः । किं कुर्वाणा भारती ? । कुर्वाणा । काम् ? । त्रपां लज्जाम् । कस्याः ? । 'भास्वत्प्रभायाः' भास्वतः-सूर्यस्य प्रभा-कान्तिः तस्याः । (कस्मात् ?) 'अणुपदार्थदर्शनवशात्' अणवः-अत्यन्तं सूक्ष्माः चक्षुरग्राह्या इति यावत् ते च ते पदार्थाः-जीवादिनवपदार्थाः तेषां यद् दर्शनं-व्यक्तीकरणं तस्मात्, हेत्वर्थे पञ्चमी । "प्रमितिविषयाः पदार्थाः" इति वैशेषिकादयः । "परस्पराविनिर्लुठिमक्षणक्षयिलक्षणनिरंशाः परमाणवः पदार्थाः" इति बौद्धाः । 'जनकृत्तमोहरत !' इति । मोहश्च रतं चेति पूर्वं 'द्वन्द्वः', ततः जनानां-भव्यप्राणिनां कृत्ते-छिन्ने मोहरते-अज्ञानसुरते येन इति 'तृतीयाबहुव्रीहिः' तस्यामन्त्रणम् । भगवतः ननु अपुरुषार्थोऽयम् । सुखस्यापि हानेरिति चेन्न, बहुतरदुःखानुविद्धतया सुखस्यापविद्धेयत्वात्, मधुविषसंसक्तान्नभोजनजन्यसुखवत् । यद्वा कृत्तं मोहरतं-अज्ञानस्य सुखं येनेति विवक्षणे न कोऽपि दोषः । कया ? । आनत्या-प्रणामेन । इति तृतीयवृत्तार्थः ॥ ८७ ॥

(५)

ध० टीका—कुर्वाणेति । 'कुर्वाणा' जनयन्ती । 'अणुपदार्थदर्शनवशात्' अणवः-सूक्ष्माः ये-पदार्थास्तेषां यद् दर्शनं-व्यक्तीकरणं तद्वशात्-तदायत्तभावत्वात् । 'भास्वत्प्रभायाः' भानुदीप्तेः । 'त्रपां' लज्जाम् । इयमणूनपि पदार्थान् दर्शयति न त्वहं, अतो जितोऽस्मीत्येवंनिमित्तम् । 'आनत्या' प्रणामेन हेतुना । 'जनकृत्तमोहरत !' जनानां कृत्तः-छिन्नो मोहश्च रतं च येन असौ सम्बोध्यते । 'मे' मम । 'शस्ता' प्रशस्ता । 'अदरिद्रोहिका' न दरिद्राः-तुच्छरूपाः ऊहा यस्याः सा । अत्र स्वार्थे कन् । 'अक्षोभ्या' अचालनीया । 'तव' भवतः । 'भारती' वाक् । 'जिनपते !' जिननाथ ! । 'प्रोन्मादिनां' प्रकर्षेण उन्मादवताम्, दर्पासमञ्जसचेष्टानामित्यर्थः । 'वादिनां' परतीर्थिकानाम् । 'मानत्याजनकृत्' मानस्य-स्तब्धतायाः त्याजनं-मोक्षणं करोति या सा । 'तमोहरतमा' अतिशयेन तमोहरा । 'ईश !' स्वामिन् ! । 'स्ताद्' भवतु । 'अरिद्रोहिका' अरीणां द्रोहकारिका । हे जिनपते ! तव भारती मे अरिद्रोहिका स्तादित्यादि योगः ॥ ८७ ॥

(६)

अवचूरिः

हे जिनपते ! तव भारती-वाणी मे-मम अरिद्रोहिका-बाह्याभ्यन्तरशत्रुजयकारिणी स्ताद्-भूयात् । किंविशिष्टा ? । अणवः-सूक्ष्माः पदार्था-जीवाजीवादयस्तेषां दर्शनवशात्-प्रकाशनाद् भास्वत्प्रभायाः-

सूर्यकान्तेस्त्रपां-लज्जां कुर्वाणा । आनत्या-प्रणामेन हेतुभूतया जनानां कृत्तः-छिन्नो मोहो रतं च येन तस्य संबोधनम् । शस्ता-प्रकृष्टा । अदरिद्रा-आढ्या ऊहाः-तर्का यस्याः सा अदरिद्रोहिका । अक्षोभ्या-अपराभवनीया । प्रोन्मादिनां-दर्पवतां परवादिनां मानस्य-अहंकारस्य त्याजनं-मोक्षणं करोतीति । अतिशयेन तमो हरतीति तमोहरतमा । हे ईश !-नेतः ! ॥ ८७ ॥

अम्बादेव्याः स्तुतिः—

हस्तालम्बितचूतलुम्बिलतिका[1] यस्या जनोऽभ्यागमद्
विश्वासेविततामप्रपादपरतां वाचा रिपुत्रासकृत् ।
सा भूतिं वितनोतु नोऽर्जुनरुचिः सिंहेऽधिरूढोल्लसद्—
विश्वासे विततामप्रपादपरता'ऽम्बा' चारिपुत्राऽसकृत् ॥ ४ ॥ ८८ ॥

- शार्दूल०

(१)

ज० वि०—हस्तेति । सा अम्बा-अम्बिका देवी, अत्रापि बवयोरैक्यं यमकवशादेव, नः-अस्माकं भूतिं-सम्पत्तिं वितनोतु-विस्तारयतु इति क्रियाकारकयोगः । अत्र 'वितनोतु' इति क्रियापदम् । का कर्त्री ? 'अम्बा' । कां कर्मतापन्नाम् ? 'विभूतिम्' । केषाम् ? 'नः' । अम्बा कथंभूता ? 'हस्तालम्बितचूत-लुम्बिलतिका' हस्ताग्रे आलम्बिता-अवलम्बिता-लोलायमाना चूतस्य-आम्रद्रुमस्य लुम्बिरूपा लतिका यस्याः सा तथा । पुनः कथं० ? 'रिपुत्रासकृत्' वैरिणां त्रासकारिणी । कया ? 'वाचा' गिरा, हक्कारवेणेत्यर्थः । पुनः कथं० ? 'अर्जुनरुचिः' चामीकरच्छविः । पुनः कथं० ? 'अधिरूढा' आसीना । कस्मिन् ? 'सिंहे' केसरिणि । कथंभूते केसरिणि (सिंहे) ? 'उल्लसद्विश्वासे' उल्लसन् विश्वासो-विश्रम्भो यस्य स तथा तस्मिन् । पुनः कथंभूता अम्बा ? 'विततामप्रपादपरता' विततः-विस्तीर्णः य आम्रपादपः-चूतवृक्षः तत्र रता-आसक्तचित्ता । पुनः कथं० ? 'चारिपुत्रा' चारिणौ-विहरणशीलौ पुत्रौ यस्याः सा तथा । सेति तच्छब्दसम्बद्धत्वाद् यच्छब्दघटनामाह-यस्याः अम्बायाः जनः-लोकः 'विश्वासेविततामप्रपादपरतां' विश्वेन-जगता [आ] सेवितौ-आराधितौ ताम्रौ-रक्तौ ईदृशौ यौ पादौ-चरणौ तयोः परतां-तदेकशरणतां अभ्यगात्-जगाम । अत्रापि 'अभ्यगात्' इति क्रियापदम् । कः कर्ता ? 'जनः' । कां कर्मतापन्नाम् ? 'विश्वासेविततामप्रपादपरताम्' । कथम् ? 'असकृत्' अनारतम् ॥

१. 'लम्बि०' इत्यपि पाठः ।

अथ समासः—हस्ते आलम्बिता हस्तालम्बिता 'तत्पुरुषः' । चूतस्य लुम्बिः चूत० 'तत्पुरुषः' । लतिकेव लतिका । चूतलुम्बिश्चासौ लतिका च चूत० 'कर्मधारयः' । हस्तालम्बिता चूतलुम्बिलतिका यस्याः सा हस्ता० 'बहुव्रीहिः' । विश्वेनासेवितौ विश्वासेवितौ 'तत्पुरुषः' । ताम्रौ च तौ पादौ च ताम्रपादौ 'कर्मधारयः' । विश्वासेवितौ च तौ ताम्रपादौ च विश्वासे० 'कर्मधारयः' । विश्वासेविततामप्रपादयोः परता विश्वासेवित० 'तत्पुरुषः' । तां विश्वासेवित० । त्रासं करोतीति त्रासकृत् 'तत्पुरुषः' । रिपूणां त्रासकृत् रिपुत्रा० 'तत्पुरुषः' । अर्जुनस्येव रुचिर्यस्याः सा अर्जुन० 'बहुव्रीहिः' । उल्लसन् विश्वासो यस्य स उल्लसद्विश्वासः 'बहुव्रीहिः' । तस्मिन् उल्लस० । आम्रश्चासौ पादपश्च आम्रपादपः 'कर्मधारयः' । विततश्चासौ आम्रपादपश्च वितता० 'कर्मधारयः' । विततामप्रपादपे रता वितता० 'तत्पुरुषः' । चारिणौ पुत्रौ यस्याः सा चारिपुत्रा 'बहुव्रीहिः' । इति काव्यार्थः ।

॥ इति श्रीशोभनस्तुतिवृत्तौ श्रीनेमिजिनेन्द्रस्य स्तुतेर्व्याख्या ॥ ४ । २२ । ८८ ॥

(२)

सि० वृ०—हस्तेति । सा अम्बा-अम्बिकादेवी, अत्रापि बवयोरैक्यं यमकवशादेव, नः-अस्माकं भूतिं-सम्पदं वितनोतु-विस्तारयत्वित्यर्थः । विपूर्वक 'तनु विस्तारे' धातोः आशीःप्रेरणयोः' (सा० सू० ७०३) लोटि कर्तरि परस्मैपदे प्रथमपुरुषैकवचनम् । अत्र 'वितनोतु' इति क्रियापदम् । का कर्त्री ? । अम्बा । कां कर्मतापन्नाम् ? । भूतिम् । "भूतिर्भस्मानि सम्पदि" इत्यमरः (श्लो० २४७३) । केषाम् ? । 'नः' । कथंभूता अम्बा ? । 'हस्तालम्बितचूतलुम्बिलतिका' हस्ताग्रे आलम्बिता-अवलम्बिता-लोलायमाना स्थिता चूतस्य-आम्रस्य लुम्बिरूपा लतिका-शाखा यया सा तथा । "शिखाशाखालताः समाः" इति हैमः (का० ४, श्लो० १८५) । पुनः कथंभूता ? । 'रिपुत्रासकृत्' रिपूणां-वैरिणां त्रासं-भयं आकस्मिकभयं वा करोतीति रिपुत्रासकृत् । कया ? । वाचा-गिरा, हक्कारवेणेत्यर्थः । पुनः कथंभूता ? । 'अर्जुनरुचिः' अर्जुनस्येव-सुवर्णस्येव रुचिः-दीप्तिः यस्याः सा तथा । "तपनीयचामीकरचन्द्रभर्मार्जुननिष्ककार्तस्वर-कर्बुराणि" इति हैमः (का० ४, श्लो० ११०) । पुनः कथंभूता ? । अधिरूढा-आसीना । कस्मिन् ? । सिंहे केसरिणि । कथंभूते सिंहे ? । 'उल्लसद्विश्वासे' उल्लसन्-उल्लासं प्राप्नुवन् विश्वासो-विस्रम्भो यस्य स तथा तस्मिन् । पुनः कथंभूता अम्बा? । 'विततामप्रपादपरता' विततो-विस्तीर्णो यः आम्रपादपः-चूतवृक्षः तत्र रता-आसक्तचित्ता । पुनः कथंभूता ? । 'चारिपुत्रा' चारिणौ-विहरणशीलौ पुत्रौ-सुतौ यस्याः सा तथा । प्राग्भवापेक्षयैतद् विशेषणं, षष्ठांगः-ज्ञाताधर्मकथांगस्तस्मादस्याः पूर्वजन्मवक्तव्यता बोद्धव्या[1] । यत्त-दोर्नित्यसम्बन्धात् यस्याः अम्बायाः जनः-लोकः विश्वासेविततामप्रपादपरतां अभ्यगात्-जगामेत्यन्वयः । 'इण् गतौ' धातोः कर्तरि भूते सौ परस्मैपदे प्रथमपुरुषैकवचनं दिप् । 'भूते सिः' (सा० सू० ७२४) इति

१. अयमुल्लेखश्चिन्तनीयः, मुद्रितषष्ठाङ्गे तदनुपलब्धेः ।

सिः ।'दादेः पे' (सा० सू० ७२५) इति सिलोपः ।'ईणः सिलोपे गादेशो वक्तव्यः'[1] इति गादेशः ।'दिबादावट्' (सा० सू० ७०७) ।'इ यं स्वरे' (सा० सू० ३३) ।'स्वरहीनं०' (सा० सू० ३६) । तथा-च 'अभ्यगात्' इति सिद्धम् । अत्र 'अभ्यगात्' इति क्रियापदम् । कः कर्ता ? । 'जनः' । कां कर्मतापन्नाम् ? । 'विश्वासेविततताम्रपादपरताम्' विश्वेन-जगता सेवितौ अर्चितौ वा ताम्रौ-रक्तवर्णौ पादौ-चरणौ तयोः परतां-तदेकशरणताम् । कथम् ? । 'असकृत्'-निरन्तरम् । शार्दूलविक्रीडितं छन्दः । लक्षणं तु पूर्वमेवोक्तम् ।

॥ इति महोपाध्यायश्रीभानु० श्रीनेमिनाथजिनस्य स्तुतिवृत्तिरियम् ॥ ४ । २२ । ८८ ॥

(३)

सौ० वृ०—हस्तेति । सा अम्बानाम्नी देवी नः-अस्माकं भूतिं-लक्ष्मीं वितनोतु इत्यन्वयः । 'वितनोतु' इति क्रियापदम् । का कर्त्री ? । 'अम्बा' । 'वितनोतु' विस्तारयतु । कां कर्मतापन्नाम् ? । 'भूतिम्' । केषाम् ? । 'नः' अस्माकम् । किंविशिष्टा अम्बा ? । 'अर्जुनरुचिः' सुवर्णच्छविः । पुनः किंविशिष्टा अम्बा ? । विततः-विस्तीर्णो य आम्रपादपः-सहकारतरुः तत्र रता-आसक्ता 'विततआम्रपादपरता', सहकारतरुनिवासिनीत्यर्थः । पुनः किंविशिष्टा अम्बा ? । रिपूणां-वैरिणां त्रासं-अकस्माद्भयं करोतीति 'रिपुत्रासकृत्' रिपुभयकारिणीत्यर्थः । कया ? । 'वाचा' हुङ्कारेण । पुनः किंविशिष्टा अम्बा ?' हस्ते-करे आलम्बिता-लोलायमाना चूतस्य-सहकारस्य लुम्बिः-प्रलम्बा(?) लतिका यया सा 'हस्तालम्बित-चूतलुम्बिलतिका' । पुनः किंविशिष्टा अम्बा ? । 'अधिरूढा' अध्यारूढा । कस्मिन् ? । 'सिंहे' कण्ठीरवे । किंविशिष्टे सिंहे ? । उल्लसन्-जाग्रद् विश्वासः-प्रतीतिलक्षणो यस्य स उल्लसद्विश्वासः तस्मिन् 'उल्लसद्विश्वासे' । पुनः किंविशिष्टा अम्बा ? । 'सा' सा-प्रसिद्धा । तच्छब्दो यच्छब्दमपेक्षते । सा का ? । जनो-लोको यस्याः अम्बाया विश्वं-जगत् तेन आसेवितौ-आराधितौ ताम्रौ-रक्तौ पादौ-चरणौ तयोः परतां-तत्परतां 'विश्वासेविततताम्रपादपरतां' अभ्यागमत् इत्यन्वयः । 'अभ्यागमत्' इति क्रियापदम् । कः कर्ता ? । 'जनः' । 'अभ्यागमत्' प्रापत् । कां कर्मतापन्नाम् ? । 'विश्वासेविततताम्रपादपरतां' जगदाराधितताम्रचरणसंगतिम् । कथम् ? । 'असकृत्' नित्यशः । कस्याः ? । 'यस्याः' देव्याः । पुनः किंविशिष्टा अम्बा ? । चारिणौ-विहरणशीलौ पुत्रौ यस्याः सा 'चारिपुत्रा', बवयोरैक्यं यमकत्वात् । एतादृशी अम्बा नः-अस्माकं भूतिं वितनोतु । इति पदार्थः ॥

अथ समासः—चूतस्य लुम्बिः चूतलुम्बिः चूतलुम्बिः एव लतिका चूतलुम्बिलतिका, हस्ते आलम्बिता हस्तालम्बिता, हस्तालम्बिता चूतलुम्बिलतिका यया सा हस्तालम्बितचूतलुम्बिलतिका । विश्वेन आसेवितौ विश्वासेवितौ, ताम्रौ च तौ पादौ च ताम्रपादौ, विश्वासेवितौ च तौ ताम्रपादौ च

१. 'इणिकोः सिलोपे गा वक्तव्यः' इति सारस्वते (सू० ८१५) ।

विश्वासेवितताम्रपादौ, परस्य भावः परता, विश्वासेवितताम्रपादयोः परता विश्वासेवितताम्रपादपरता, तां विश्वासेवितताम्रपादपरताम् । चारिणौ पुत्रौ यस्याः सा चारिपुत्रा । न सकृत् असकृत् । अर्जुनवद् रुचिर्यस्या असौ अर्जुनरुचिः । हिनस्तीति सिंहः, वर्णविपर्यये, तस्मिन् सिंहे । उल्लसंश्चासौ विश्वासश्च उल्लसद्विश्वासः, तस्मिन् उल्लसद्विश्वासे, यद्वा उल्लसन् विश्वासो यस्य स उल्लसद्विश्वासः । आम्रश्चासौ पादपश्च *आम्रपादपः*, विततश्चासौ आम्रपादपश्च विततामप्रपादपः, विततामप्रपादपे रता विततामप्रपादपरता । रिपूणां त्रासो रिपुत्रासः, रिपुत्रासं करोतीति रिपुत्रासकृत् ।। इति चतुर्थवृत्तार्थः ।

श्रीमन्नेमिजिनेन्द्रस्य, स्तुतेरर्थो लिपीकृतः ।
सौभाग्यसागराख्येण, सूरिणा ज्ञानसेविना ।।

।। इति श्रीद्वाविंशति(तम)श्रीनेमिनाथस्य स्तुतेर्व्याख्यानम् ।।४।२२।८८।।

(४)

दे० व्या०—हस्तेति । सा अम्बिका देवी नः-अस्माकं भूतिं-ऋद्धिं तनोतु-विस्तारयतु इति सम्बन्धः । 'तनु विस्तारे' धातुः । 'तनोतु' इति क्रियापदम् । का कर्त्री ? । अम्बिका । कां कर्मतापन्नाम् । भूतिम् ? । "ऋद्धिः विभूतिः सम्पत्तिः" इत्यभिधानचिन्तामणिः (का० ३, श्लो० २१) । केषाम् ? । नः । किंविशिष्टा अम्बिका ? । 'अर्जुनरुचिः' अर्जुनः(नं?)-सुवर्णं तद्वद् रुचिः-कान्तिः यस्याः सा तथा । पुनः किंविशिष्टा ? । अधिरूढा-आरूढा । कस्मिन् ? । सिंहे-हर्यक्षे । किंविशिष्टे सिंहे ? । 'उल्लसद्विश्वासे' उल्लसन्-उल्लासं प्राप्नुवन् विश्वासो यस्मिन् स तस्मिन् । पुनः किंविशिष्टा ? । 'विततामप्रपादपरता' विततो-विस्तीर्णो य आम्रपादपः-सहकारवृक्षः तस्मिन् रता-आसक्ता, दत्तचित्ता इति यावत् । पुनः किंविशिष्टा ? । 'चारिपुत्रा' चारिणौ-गमनशीलौ पुत्रौ-अङ्गजौ यस्याः सा तथा। पूर्वभवापेक्षयैतद् विशेषणम् । पुनः किंविशिष्टा ? । 'रिपुत्रासकृत्' रिपूणां त्रासं करोतीति तथा । "त्रासस्त्वाकस्मिकं भयं" इत्यभिधान-चिन्तामणिः (का० २, श्लो० २३५) । 'वाचा' शापेन वचनव्यापारेण वा । पुनः किंविशिष्टा ? । 'हस्तालम्बितचूतलुम्बिलतिका' हस्ते-करे आलम्बिता-गृहीता चूतस्य-आम्रस्य (लुम्बिरूपा) लतिका-शाखा यया सा तथा । "शिखाशाखालताः समाः" इत्यभिधानचिन्तामणिः (का० ४, श्लो० १८५) । यत्तदोर्नित्याभिसम्बन्धाद् यस्याः अम्बिकाया जनः-लोकः असकृत्-निरन्तरं विश्वासेवितताम्रपादपरतां अभ्यागमत्-आययौ । 'अभ्यागमत्' इति क्रियापदम् । कः कर्ता ? । जनः । कां कर्मतापन्नाम् ? । 'विश्वासेवितताम्रपादपरतां' विश्वेन-जगता आ-समन्तात् सेवितौ-सपर्याविषयीकृतौ ताम्रपादौ-ताम्रवर्णक्रमौ तयोः परतां तदाधीनतामित्यर्थः ।। इति चतुर्थवृत्तार्थः । शार्दूलविक्रीडितं छन्दः ।। तल्लक्षणं तु प्रागेव प्रदर्शितम् ।। ४ । २२ । ८८ ।।

(५)

ध० टीका—हस्तेति । 'हस्तालम्बितचूतलुम्बिलतिका' हस्तात् (हस्ते?) आलम्बिता चूतलुम्बिरेव लतिका यस्याः सा । 'यस्याः' । 'जनः' लोकः । 'अभ्यागमत्' आगतवान् । 'विश्वासेविततामप्रपादपरतां' विश्वेन-जगता आसेवितयोस्ताम्रयोः पादयोः परतां-तदेकशरणताम् । 'वाचा' गिरा । 'रिपुत्रासकृत्' रिपूणां त्रासकारिणी । 'सा' । 'भूतिं' संपत्तिम् । 'वितनोतु' विस्तारयतु । 'नः' अस्माकम् । 'अर्जुनरुचिः' चामीकरच्छविः । 'सिंहे' केसरिणि । 'अधिरूढा' आसीना । 'उल्लसद्विश्वासे' उल्लसद्विश्वासो-विश्रम्भो यस्य तस्मिन् । 'विततामप्रपादपरता' विततो-विस्तीर्णो यः आम्रपादपः-चूतवृक्षः तत्र रता-आसक्तचित्ता । 'अम्बा' अम्बिकादेवी । 'चारिपुत्रा' चारिणौ-विहरणशीलौ पुत्रौ यस्याः सा । 'असकृत्' अनारतम् । यस्या विश्वासेविततामप्रपादपरतां जनोऽभ्यागमत् सा अम्बा भूतिं वितनोतु इति सम्बन्धः ॥ ४ । २२ । ८८ ॥

(६)

अवचूरिः

यस्या अम्बाया जनो-लोको विश्वेन-जगता सेवितयोस्ताम्रयो-रक्तयोः पादयोः-चरणयोः परतां-तदेकशरणतामभ्यागमत्-जगाम साऽम्बा नः-अस्माकं भूतिं-संपदं वितनोतु । किंभूता ? । हस्ते आलम्बिता चूतलुम्बिरेव लतिका यया सा । वाचा-वाण्या रिपूणां त्रासं करोतीति । अर्जुनं-काञ्चनं तद्वद् रुचिः-कान्तिर्यस्याः सा । सिंहे-कण्ठीरवेऽधिरूढा-आसीना । उल्लसन्-प्रसरन् विश्वासो यस्माद् यस्य वा । विततो-विपुलो य आम्रपादपः-चूतवृक्षस्तत्र रता । चारिणौ-विहरणशीलौ पुत्रौ यस्याः सा । असकृत्-निरन्तरम् ॥ ४ । २२ । ८८ ॥

२३. श्रीपार्श्वजिनस्तुतयः

अथ श्रीपार्श्वनाथाय प्रार्थना—

मालामालानबाहुर्दधददधदरं यामुदारा मुदाऽऽरा—
ल्लीनाऽलीनामिहाली मधुरमधुरसा सूचितोमाचितो मा
पातात् पातात् स 'पार्श्वो' रुचिररुचिरदो देवराजीवराजी—
पत्राऽऽपत्त्रा यदीया तनुरतनुरवो नन्दको नोदको नो ॥ १ ॥ ८९ ॥

- स्रग्धरा (७,७,७)

(१)

ज० वि०—मालेति । स पार्श्वः-पार्श्वनामा जिनः, माशब्दोऽस्मच्छब्दस्य द्वितीयैकवचनान्तो विशेषादेशसिद्धो मामित्यस्यार्थे वर्तते, पातात्-नरकादिषु पतनात् पातात्-रक्षताद् इति क्रियाकारकयोजनम्। अत्र 'पातात्' इति क्रियापदम् । कः कर्ता ? 'पार्श्वः' । पार्श्वः किं कुर्वन् ? 'दधत्' धारयन् । कां कर्मतापन्नाम् ? 'मालां' स्रजम् । अत्राऽग्रे यामिति यच्छब्दस्य सत्त्वात् तामिति तच्छब्दोऽप्यध्याह्रियते । यां मालामलीनां-भ्रमराणामाली-श्रेणी आराद्-अन्तिके लीना-श्लिष्टा सती अदधत्-पीतवती । अत्रापि 'अदधत्' इति क्रियापदम् । का कर्त्री ? 'आली' । केषाम् ? 'अलीनाम्' । कां कर्मतापन्नाम् ? 'याम्' । कथम् ? 'आरात्' । कुत्र ? 'इह' अत्र जगति । पुनः कथं० ? 'अरं' शीघ्रम् । कया ? 'मुदा' हर्षेण । अलीनामाली कथंभूता ? 'उदारा' प्रचुरा । पुनः कथंभूता ? 'मधुरमधुरसा' मधुरे-सुस्वादे मधुनि-

मकरन्दे रसः-तीव्राभिलाषो यस्याः सा तथा। पार्श्वः कथंभूतः ? 'आलानबाहुः' आलानाविव-गजबन्धनस्तम्भाविव बाहू-भुजौ यस्य स तथा । पुनः कथं० ? 'सूचितोमाचितः' सूचिता-सुष्ठूचिता या उमा-कीर्तिः तया आचितः-संयुक्तः । पुनः कथं० ? 'रुचिररुचिरदः' रुचिररुचयः-कान्तद्युतयः रदाः-दन्ताः यस्य स तथा । पुनः कथं० ? 'अतनुरवः' अतनुः-अनल्पः रवः-ध्वनिर्यस्य स तथा । पुनः कथं० ? 'नन्दकः' आनन्दयिता । पुनः कथं० ? 'नोदको नो' नोदकः-क्षेपकः, नो इति निषेधार्थे । स पार्श्वे इत्यत्र तच्छब्दसम्बद्धत्वाद् यच्छब्दघटनामाह-यदीया तनुः-यस्य पार्श्वप्रभोः तनुः-शरीरं आपत्त्रा-आपद्भ्य-स्त्राणकारिणी । 'अस्ति' इति क्रियाऽध्याह्रियते । ततः 'अस्ति' इति क्रियापदम् । का कर्त्री ? 'तनुः' । किमीया ? 'यदीया आपत्त्रा' । पुनः कथं० ? 'देवराजीवराजीपत्रा' देवसम्बन्धिनी या राजीवराजी-देव(कमल)पंक्तिः सैव पत्रं-वाहनं यस्याः सा तथा ॥

अथ समासः—आलानाविव आलानौ । आलानौ बाहू यस्य स आलानबाहुः 'बहुव्रीहिः' । मधुरं च तद् मधु च मधुरमधु 'कर्मधारयः' । मधुरमधुनि रसो यस्याः सा मधुर० 'बहुव्रीहिः' । सुष्ठु उचिता सूचिता 'तत्पुरुषः' । सूचिता चासौ उमा च सूचितोमा 'कर्मधारयः' । सूचितोमया चित्तः सूचितो० 'तत्पुरुषः' । रुचिरा रुचिर्येषां ते रुचिररुचयः 'कर्मधारयः' । रुचिररुचयो रदा यस्य स रुचि० 'बहुव्रीहिः' । देवानां राजीवानि देव० 'तत्पुरुषः' । देवराजीवानां राजी देव० 'तत्पुरुषः' । पत्रमिव पत्रम् । देवराजीवराजी पत्रं यस्याः सा देव० 'बहुव्रीहिः' । आपद्भ्यस्त्रायत इत्यापत्त्रा 'तत्पुरुषः' । न तनुः अतनुः 'तत्पुरुषः' । अतनुः रवो यस्य सः अतनुरवः 'बहुव्रीहिः' । इति काव्यार्थः ॥ ८९ ॥

(२)

सि० वृ०—मालेति । स पार्श्वः-पार्श्वाभिधानो जिनः मा-मां पातात्-अवतादित्यर्थः । 'पा रक्षणे' धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि परस्मैपदे प्रथमपुरुषैकवचनं तुप् । 'अप्०' (सा० सू० ६९१) । तुपस्तातङादेशः । अत्र 'पातात्' इति क्रियापदम् । कः कर्ता ? । 'पार्श्वः' । स्पृशति-जानाति सर्वं ज्ञानेन इति पार्श्वः । 'स्पृश संस्पर्शने' । पृषोदरादिः । गर्भस्थेऽस्मिन् माता शयनीयस्था निशि तमस्यपि कृष्णसर्पमपश्यत् इति पार्श्वः इति ज्ञानेन सर्वान् भावान् पश्यतीति वा पार्श्वः-पार्श्वनामा यक्षोऽस्य वैयावृत्त्यकरो-सेवकोऽस्यास्तीति वा पार्श्वः । 'अर्श आदिभ्योऽच्' (पा० अ० ५, पा० २, सू० १२७) पार्श्वनाथस्यैकदेशः पार्श्वो वा इति यथा । कं कर्मतापन्नम् ? । 'मा' माशब्दोऽस्मच्छब्दस्य द्वितीयैकवचनान्तो विशेषादेशसिद्धौ मामित्यस्यार्थे वर्तते । पातात् कस्मात् ? । 'पातात्' पतनं-पातस्तस्मात्, नरकादिषु पतनादित्यर्थः । पार्श्वः किं कुर्वन् ? । दधत्-धारयन् । कां कर्मतापन्नाम् ? । मालां-स्रजम् । अत्राग्रे यामिति शब्दस्य सत्त्वात् तामिति तच्छब्दोऽप्यध्याह्रियते । यां मालामलीनां-मधुकराणां आली-लेखा आराद्-अन्तिके-समीपे लीना-आश्लिष्टा सती अदधत्-पपौ, पीतवतीत्यर्थः ।

'धेट् पाने' धातोः भूते सौ कर्तरि परस्मैपदे प्रथमपुरुषैकवचनम् । क्रियासाधनिका पूर्ववज्ज्ञेया । अत्र 'अदधत्' इति क्रियापदम् । का कर्त्री ? । आली । केषाम् ? । अलीनाम् । कथम् ? । आराद् । "आराद् दूरसमीपयोः" इति विश्वः । कुत्र ? । इह-जगति । पुनः कथम् ? । अरं-शीघ्रम् । कया ? । मुदा-हर्षेण । कथंभूता अलीनामाली ? । 'उदारा' प्रचुरा-महती । "उदारो दातृमहतोः" इत्यमरः (श्लो० २७१९) । पुनः कथंभूता ? । 'मधुरमधुरसा' मधुरं-मिष्टं यन्मधु-पुष्परसः तस्मिन् रसः-तीव्राभिलाषो रागो वा यस्याः सा । "मधु मद्ये पुष्परसे" इत्यमरः (श्लो० २५४०) । "शृङ्गारादौ विषे वीर्ये, गुणे रागे द्रवे रसः" इत्यमरः (श्लो० २७८९) । कथंभूतः पार्श्वः ? । 'आलानबाहुः' आलानाविव गजबन्धनस्तम्भाविव बाहू-भुजौ यस्य स तथा । पुनः कथंभूतः ? । 'सूचितोमाचितः' सुष्ठु उचिता या उमा-कीर्तिस्तया चितो-व्याप्तः । "उमा सीता हैमवती हरिद्राकीर्तिकान्तिषु" इति विश्वः । पुनः कथंभूतः ? । 'रुचिररुचिरदः' रुचिरा-मनोहरा रुचिः-ज्योतिर्येषां ते रुचिररुचयः, एतादृशा रदाः-दन्ता यस्य स तथा । "रोचिरुस्ररुचि-शोचिरंशुगो ज्योतिरर्चिरुपधृत्यभीशवः" इति अभिधानचिन्तामणौ (का० २, श्लो० १३) । पुनः कथंभूतः ? । 'अतनुरवः' अतनुः-अनल्पः रवो-ध्वनिर्यस्य स तथा, वाण्या योजनगामित्वात् । पुनः कथंभूतः ? । नन्दकः-नन्दयिता । पुनः कथंभूतः ? । नोदकः-क्षेपकः । नो इति निषेधार्थे । स पार्श्व इति स कः ? । यदीया तनुः-यस्य पार्श्वप्रभोः तनुः-शरीरं आपत्त्रा-आपद्भयस्त्राणकारिणी, अस्तीति क्रियाध्याहारः । ततः 'अस्ति' इति क्रियापदम् । का कर्त्री ? । तनुः । कथंभूता ? । यदीया । पुनः कथंभूता ? । 'आपत्त्रा' आपद्भयस्त्राति-रक्षतीति आपत्त्रा । 'सुपि०' (पा० अ० ३, पा० २, सू० ४) इति योगविभागात् कः । पुनः कथंभूता ? । 'देवराजीवराजीपत्रा' देवसम्बन्धिनी या राजीवानां-कमलानां राजी-श्रेणी सैव पत्रं-वाहनं यस्याः सा तथा । "पत्रं वाहनपक्षयोः" इत्यमरः (श्लो० २६९३) ॥ ८९ ॥

(३)

सौ० वृ०—यो रिष्टेषु-विघ्नेषु नेमिः-चक्रं भवति तस्य पार्श्वं सद्भिः सदा सेव्यमानं भवति । यद्वा गर्भस्थे भगवति जनन्या स्वप्ने शय्यापार्श्वे कृष्णसर्पदर्शनात् तथा पार्श्वनागकुमारशासनाधिष्ठायकत्वात् । अनेन सम्बन्धेनायातस्य त्रयोविंशतितमजिनस्य श्रीपार्श्वनाथस्य स्तुतिव्याख्यानं लिख्यते-मालेति ।

स (पार्श्वः) पार्श्वनाथजिनः मा पातादित्यन्वयः । 'पातात्' इति क्रियापदम् । कः कर्ता ? । ('पार्श्वः') पार्श्वजिनः । 'पातात्' रक्षतात् । कं कर्मतापन्नम् ? । 'मा' विशेषादेशे अस्मच्छब्दस्य द्वितीयैकवचनस्य मा इत्यस्य मा इति निपातः । कस्मात् ? । 'पातात्' नरकादिपा(ता)त् । पार्श्वः किं कुर्वन् ? । 'दधत्' बिभ्रत् । कां कर्मतापन्नाम् ? । 'मालां' स्रजम् । किंविशिष्टः पार्श्वः ? । आलानौ-गजबन्धनस्तम्भौ तद्वद् बाहू-भुजौ यस्य सः 'आलानबाहुः' । पुनः अलीनां-भ्रमराणामाली-श्रेणिः यां मालामारात्-अन्तिके अरं-अत्यर्थं मुदा हर्षेण अदधदित्यन्वयः । 'अदधत्' इति क्रियापदम् । का

कर्त्री ? । 'आली' । केषाम् ? । 'अलीनाम्' । 'अदधत्' पीतवती, धेटो दधादेशः अनद्यतन्याम् । कां कर्मतापन्नाम् ? । 'यां' मालाम् । कथम् ? । 'अरं' अत्यर्थम् । कया ? । 'मुदा' हर्षेण । कथंभूता अलीनां आली ? । 'उदारा' प्रधाना-महती । पुनः किंविशिष्टा अलीनामाली ? । मधुरः-सुस्वादुः मधुः-मकरन्दः तस्य रसो-हर्षो यस्याः सा 'मधुरमधुरसा' "रसो हर्षे जले दुग्धे, शृङ्गारादौ रसाधरा" इति महीपः । पुनः किंविशिष्टः पार्श्वः ? । सु-शोभना उचिता-योग्या उमा-कीर्तिः तया चितः-व्याप्तः 'सूचितोमाचितः' । "उमा धान्यविशेषे स्याद्, गौरी श्रीकीर्तिकान्तिषु" इति सुधाकलशवचनात् । पुनः किंविशिष्टः पार्श्वः ? । रुचिरा-मनोहरा रुचिः-कान्तिर्येषां ते तादृशा रदा-दशना यस्य सः 'रुचिररुचिरदः' । पुनः किंविशिष्टः पार्श्वः ? । 'सः' सः-प्रसिद्धः । तच्छब्दो यच्छब्दमपेक्षते । सः कः ? यदीया तनुः-यस्य मूर्त्तिः-यस्य शरीरं आपत्त्रा विपद्रक्षका अस्ति इत्यन्वयः । 'अस्ति' इत्यध्याहार्यम् । 'अस्ति' इति क्रियापदम् । का कर्त्री ? । 'तनुः' । 'अस्ति' विद्यते । किंविशिष्टा तनुः ? । 'यदीया' श्रीपार्श्वनाथसम्बन्धिनी । पुनः किंविशिष्टा तनुः ? । 'आपत्त्रा' । पुनः किंविशिष्टा तनुः ? । देवानां-सुराणां[वा]राजीवानि-कमलानि तेषां राजी-श्रेणिः सा एव पत्रं-वाहनं यस्याः सा 'देवराजीवराजीपत्रा' । पुनः किंविशिष्टः पार्श्वः ? । अतनुः-महान् रवः-शब्दो यस्य सः 'अतनुरवः', देशनासमये योजनगामीश्वरः (रवः?) इत्यर्थः । पुनः किंविशिष्टः पार्श्वः ? । 'नन्दकः' आनन्दकारी । पुनः किंविशिष्टः पार्श्वः ? । 'नोदकः' क्षेपकः-क्लिष्टकारी । कथम् ? । 'नो' निषेधे । इति पदार्थः ।

अथ समासः—आलानाविव बाहू यस्य स आलानबाहुः । मधुरश्चासौ मधुश्च मधुरमधुः, मधुरमधौ रसो यस्याः सा मधुरमधुरसा । सु-शोभना उचिता सूचिता, सूचिता चासौ उमा च सूचितोमा सूचितोमया चितः सूचितोमाचितः । रुचिरा रुचिः येषां ते रुचिररुचयः, रुचिररुचयो रदा यस्य स रुचिररुचिरदः । देवैर्निर्मितानि राजीवानि देवराजीवानि, देवराजीवानां राजी देवराजीवराजी, देवराजीवराजी एव पत्रं यस्याः सा देवराजीवराजीपत्रा । आपदः-विपदः त्रायते इति आपत्त्रा । यस्य इयं यदीया । न तनुः अतनुः, अतनुः रवो यस्य सः अतनुरवः । नन्दयतीति नन्दकः । इति प्रथमवृत्तार्थः । एकविंशतिवर्णमयी-स्रग्धराच्छन्दसा स्तुतिरियम् ॥ ८९ ॥

(४)

दे० व्या०—मालेति । स पार्श्वः-पार्श्वनाथः मां अवताद्-रक्षतादित्यन्वयः । 'अव रक्षणे' धातुः । 'अवतात्' इति क्रियापदम् । कः कर्ता ? । (पार्श्वः) पार्श्वनाथः । कं कर्मतापन्नम् ? । माम् । कस्मात् ? । 'पातात्' पतनं पातः तस्मात् । पतनं पदात् परिभ्रंशः । किंविशिष्टः पार्श्वनाथः ? । 'आलानबाहुः' आलानं-गजबन्धनस्तम्भः तद्वद् बाहू-भुजौ यस्य स तथा । "तोत्रं वेणुकमालानं, बन्धस्तम्भोऽङ्कुशः

सृणिः” इत्यभिधानचिन्तामणिः (का० ४, श्लो० २९६) । पुनः किंविशिष्टः ? । ‘सूचितोमाचितः’ सुतरां सुष्ठु वा उचिता-योग्या या उमा-कीर्तिः तया चितो-व्याप्तः । पुनः किंविशिष्टाः ? ‘रुचिररुचिरदः’ रुचिरा-मनोहरा रुचिः-कान्तिर्येषां ते एवंविधा रदा-दन्ता यस्य स तथा । पुनः किंविशिष्टः ? । ‘अतनुरवः’ अतनुः-अनल्पो रवः-शब्दो यस्य स तथा, मेघगम्भीरघोषत्वात् । पुनः किंविशिष्टः ? । नन्दकः-आनन्दजनकः समृद्धिकारक इति प्राञ्चः । नो निषेधे । पुनः किंविशिष्टः ? नोदकः-प्रेरकः । किं कुर्वन् पार्श्वनाथः ? । दधत्-धारयत् । काम् ? । मालां-पुष्पस्रजम् । इह-अस्मिल्ँलोके यां मालाम् अलीनां-भ्रमराणां आली-पंक्तिः मुदा-हर्षेण अदधत्-पपौ । ‘धेट् पाने’ धातुः । ‘अदधत्’ इति क्रियापदम् । का कर्त्री ? । ‘आली’ । केषाम् ? । अलीनाम् । कां कर्मतापन्नाम् ? । मालाम् । कया ? । मुदा । कथम् ? । अरम्-अत्यर्थं यथा स्यात् तथेति क्रियाविशेषणम् । किंविशिष्टा आली ? । उदारा-स्फारा । पुनः किंविशिष्टा ? । लीना-आश्लिष्टा । कथम् ? । आरात्-शीघ्रम्, आगत्येतिशेषः । किंविशिष्टां मालाम् ? । ‘मधुरमधुरसाम्’ मधुरं-मिष्टं यन्मधु-मकरन्दः तस्य रसः-पुष्पनिर्यासो यस्यां सा ताम् । आल्या विशेषणमिति कश्चित् तच्चिन्त्यम् । यत्तदोर्नित्याभिसम्बन्धाद् यदीया तनुः-शरीरं ‘आपत्त्रा’ आपद्-विपत्तिः तस्याः सकाशात् त्रायते इति आपत्त्रा, वर्तत इति शेषः । किंविशिष्टा तनुः ? । ‘देवराजीवराजीपत्रा’ देवैर्निर्मिता या ‘राजीवराजी’ राजीवानि-कमलानि तेषां राजी-पंक्तिः सैव पत्रं-वाहनं यस्याः सा तथा, तदुपरि चरणविन्यासादिति भावः । “यानं युग्यं पत्रं वाहं (ह्यं)” इत्यभिधानचिन्तामणिः (का० ३, श्लो० ४२३) । इति प्रथमवृत्तार्थः ॥ ८९ ॥

(५)

ध० टीका—मालामिति । ‘मालां’ स्रजम् । ‘आलानबाहुः’ आलानाविव बाहू यस्यासौ । ‘दधत्’ धारयत् । ‘अदधत्’ पीतवती । ‘अरं’ शीघ्रम् । ‘याम्’ । ‘उदारां’ प्रचुराम् । ‘मुदा’ हर्षेण । ‘आराद्’ अन्तिके । ‘लीना’ श्लिष्टा । ‘अलीनां’ भृङ्गाणाम् । ‘इह’ अत्र । ‘आली’ श्रेणिः । ‘मधुरमधुरसां’ मधुरो मधुरसो-मकरन्दद्रव्यो यत्र ताम् । ‘सूचितोमाचितः’ सूचिता-सुष्ठु उचिता या उमा-कीर्तिः तयाचितः-संयुक्तः । माशब्दो मामित्यस्यार्थे । ‘पातात्’ भ्रंशात् । ‘पातात्’ रक्षतु । ‘सः’ । ‘पार्श्वः’ जिनः । ‘रुचिररुचिरदः’ रुचिररुचयः-कान्तद्युतयो रदा-दन्ता यस्य सः । ‘देवराजीवराजीपत्रा’ देवानां सम्बन्धिनी या राजीवराजी-सरोजपङ्क्तिः सैव पत्रं-वाहनं यस्याः सा । ‘आपत्त्रा’ आपदः सकाशात् त्रायते या सा । ‘यदीया’ यस्य सम्बन्धिनी । ‘तनुः’ मूर्तिः । ‘अतनुरवः’ अनल्पध्वनिः । ‘नन्दकः’ आनन्दयिता । ‘नोदको नो’ क्षेपको न भवति । यां अलीनामाली लीना अदधत् तां मालां दधत् स पातात् यदीया तनुरापत्त्रा इति सम्बन्धः ॥ ८९ ॥

(६)

अवचूरिः

मा-मां पातात्-नरकादिपतनात् पाताद्-रक्षतात् । स पार्श्वः-त्रयोविंशो जिनः । किंविशिष्टः ? । मालां-स्रजं दधत्-दधानः । यां मालामलीनां-भ्रमराणामाली-पटली उदारा-प्रचुरा मुदा-हर्षेण आराद्-अन्तिके अरम्-अत्यर्थं लीना-श्लिष्टा सती अदधत्-पीतवती । किंभूताम् ? । मधुरो मधुः-मकरन्दरसो यस्याः सा ताम् । पार्श्वः किंभूतः ? । आलानवद् बाहू यस्य सः । सुष्ठु उचिता या उमा-कीर्तिस्तया चितो-व्याप्तः । रुचिररुचयोः-रम्यकान्तयो रदा-दन्ता यस्य सः । तथा यस्येयं यदीया तनुः-शरीरं आपत्त्रा-विपदो रक्षिका । किंभूता ? । देवानां संबन्धिनी या राजीवराजी-स्वर्णाम्बुजश्रेणी सैव पत्रं-वाहनं यस्याः सा । पार्श्वः किंभूतः ? । अतनुर्योजनप्रमाणभूमौ श्रूयमाणत्वात् प्रौढो रवो-देशनाध्वनिर्यस्य सः । नन्दकः-समृद्धिजनकः नन्दयिता वा । नोदको नो-प्रेरको न भवतीत्यर्थः ।। ८९ ।।

जिनेश्वराणां स्तुतिः—

राजी राजीववक्त्रा तरलतरलसत्केतुरङ्गत्तुरङ्ग—
व्यालव्यालग्नयोधाचितरचितरणे भीतिहृद् याऽतिहृद्या ।
सारा साऽऽराज्जिनानामलममलमतेर्बोधिका माऽधिकामा—
दव्यादव्याधिकालाननजननजरात्रासमानाऽसमाना ।। २ ।। ९० ।।

- स्रग्०

(१)

ज० वि०—राजीति । सा जिनानां-तीर्थकृतां राजी-श्रेणी, माशब्दोऽस्मच्छब्दस्य द्वितीयैकवचनान्तो विशेषादेशे सिद्धो मामित्यस्यार्थे वर्तते, 'अधिकामात्' अधिक-उत्कटो य आमो-रोगस्तस्मात्, अथवा आधिः-मनःपीडा, कामः-कन्दर्पः तस्मात् (अलम्) अव्यात्-पायात् इति क्रियाकारकयोगः । अत्र 'अव्यात्' इति क्रियापदम् । का कर्त्री ? 'राजी' । केषाम् ? 'जिनानाम्' । कं कर्मतापन्नम् ? 'मा' । कस्मात् ? 'अधिकामात्' 'आधिकामाद् वा' । जिनानां राजी कथंभूता ? 'राजीववक्त्रा' कमलवदना । पुनः कथं० ? 'अतिहृद्या' अतिशयेन हृदयङ्गमा । पुनः कथं० ? 'सारा' उत्कृष्टा । पुनः कथं० ? 'बोधिका' बोधिजनका । कस्य ? 'अमलमतेः' निर्मलधियो जनस्य । पुनः कथं० ? 'अव्याधिकालाननजननजरात्रासमाना' *व्याधिः-रोगः, कालाननं-यममुखं, जननं-जन्म, जरा-वार्धकं, त्रास-आकस्मिकं भयं,* मानः-अहङ्कारः,

एते न विद्यन्ते यस्याः सा । पुनः कथं० ? 'असमाना' असदृशा । सेति तच्छब्दसंयोगाद् यच्छब्दयोजनामाह-या जिनानां राजी भीतिहृद्-भयापहारिणी । अत्र [अपि] 'अस्ति' इति क्रिया अध्याह्रियते । ततश्च 'अस्ति' इति क्रियापदम् । का कर्त्री ? 'या' । कथंभूता ? 'भीतिहृत्' । कस्मिन् ? 'तरलतरलसत्केतुरङ्गत्तुरङ्ग-व्यालव्यालग्नयोधाचितरचितरणे' तरलतराः-कम्प्रतराः लसन्तः-दीप्यमानाः केतवो-ध्वजा येषां ते तथा रङ्गन्तः-चलन्तः ये तुरङ्गाः-अश्वाः व्यालाः-दुष्टदन्तिनः तेषां व्यालग्ना-भेटिताः कृताधिरोहणा वा एवंविधा ये योधाः-भटाः तैराचितः-आकीर्णः रचितो-विहितो यो रणः-सङ्ग्रामः तस्मिन् । कथम् ? 'आराद्' दूरात् अन्तिकाद् वा ॥

अथ समासः—राजीवमिव राजीवम् । राजीवं वक्त्रं यस्याः सा राजीव० 'बहुव्रीहिः' । लसन्तश्च ते केतवश्च लसत्० 'कर्मधारयः' । अतिशयेन तरलास्तरलतराः । तरलतरा लसत्केतवो येषां ते तरल० 'बहुव्रीहिः' । रङ्गन्तश्च ते तुरङ्गाश्च रङ्गत्तु० 'कर्मधारयः' । रङ्गत्तुरङ्गाश्च व्यालाश्च रङ्गत्तु० 'इतरेतरद्वन्द्वः' । रङ्गत्तुरङ्गव्यालानां व्यालग्ना रङ्गत्तु० 'तत्पुरुषः' । रङ्गत्तुरङ्गव्यालव्यालग्नाश्च ते योधाश्च तरलतरल-सत्केतुरङ्गत्तु० 'कर्मधारयः' । तरलतरलसत्केतवश्च ते रङ्गत्तुरङ्गव्यालव्यालग्नयोधाश्च तरल० 'कर्म-धारयः' । तरलतरलसत्केतुरङ्गत्तुरङ्गव्यालव्यालग्नयोधैराचितः तरल० 'तत्पुरुषः' । रचितश्चासौ रणश्च रचित० 'कर्मधारयः' । तरलतरलसत्केतुरङ्गत्तुरङ्गव्यालव्यालग्नयोधाचितश्चासौ रचितरणश्च तरल० 'कर्मधारयः' । तस्मिन् तरल० । भीतिं हरतीति भीतिहृत् 'तत्पुरुषः' । अतिशयेन हृद्या अतिहृद्या 'तत्पुरुषः' । न विद्यते मलो यस्यां सा अमला 'बहुव्रीहिः' । अमला मतिर्यस्य सोऽमलमतिः 'बहुव्रीहिः' । तस्यामलमतेः । अधिकश्चासावामश्च अधिकामः 'कर्मधारयः' । तस्मादधिकामात् । अथवा आधिश्च कामश्चाधिकामं 'समाहारद्वन्द्वः' । तस्मादाधिकामात् । कालस्याननं कालाननं 'तत्पुरुषः' । व्याधिश्च कालाननं च जननं च जरा च त्रासश्च मानश्च व्याधिकाला० 'इतरेतरद्वन्द्वः' । न विद्यन्ते व्याधिकालाननजननजरात्रासमाना यस्यां सा अव्याधिकाला० 'बहुव्रीहिः' । न समाना असमाना 'तत्पुरुषः' इति काव्यार्थः ॥ ९० ॥

(२)

सि० वृ०—राजीति । सा जिनानां राजी-तीर्थकृतां पङ्क्तिः, माशब्दोऽस्मच्छब्दस्य द्वितीयैकवचनान्तो विशेषादेशे सिद्धो मामित्यस्यार्थे वर्तते, 'अधिकामात्' अधिकः-उत्कृष्टः यः आमो-रोगः तस्मात्, अथवा आधिः-मानसी व्यथा, कामः-कन्दर्पः तस्मात् (अलम्) अव्यात्-पायाद् इत्यर्थः । 'अव रक्षणे' धातोः आशिषि कर्तरि परस्मैपदे प्रथमपुरुषैकवचनं यात् । अत्र 'अव्यात्' इति क्रियापदम् । का कर्त्री ? । राजी । केषाम् ? । जिनानाम् । कं कर्मतापन्नम् ? । मा । कस्मात् ? । अधिकामात् ।

जिनानां राजी कथंभूता ? । 'राजीववक्त्रा' राजीवानि-कमलानि तद्वद् वक्त्रं-मुखं यस्याः सा । "परं शतसहस्राभ्यां, पत्रं राजीवपुष्करे" इति हैमः (का० ४, श्लो० २२७) । पुनः कथंभूता ? । अतिहृद्या-अतिशयेन हृदयङ्गमा । पुनः कथंभूता ? । सारा-उत्कृष्टा । पुनः कथंभूता ? । बोधिका-बोधजनका । कस्य ? । 'अमलमतेः' अमला-निर्मला मतिः-प्रज्ञा यस्य स तथा तस्य । पुनः कथंभूता ? । 'अव्याधि-कालाननजननजरात्रासमाना' व्याधिः-रोगः, कालाननं-यममुखं, जननं-जन्म, जरा-विस्रसा, त्रासः-भयं मानः-अभिमानः, व्याधिश्च कालाननं च जननं च जरा च त्रासश्च मानश्च व्याधिकालान-नजननजरात्रासमानाः 'इतरेतरद्वन्द्वः', एते न विद्यन्ते यस्याः सा तथा । पुनः कथंभूता ? । 'असमाना' न विद्यते समानः-सदृशः कोऽपि यस्याः सा असमाना । सेति सा का ? । या जिनानां राजी भीतिहृत्-भयापहारिणी, अस्तीति क्रियाध्याहारः । ततः 'अस्ति' इति क्रियापदम् । का कर्त्री ? । या । कथंभूता ? । 'भीतिहृत्' । कस्मिन् ? । 'तरलतरलसत्केतुरङ्गत्तुरङ्गव्यालव्यालग्नयोधाचितरचितरणे' अतिशयेन तरलाः तरलतराः ते च ते लसन्तो-दीप्यमानाः केतवः-ध्वजा येषां ते तथा रङ्गन्तः-चलन्तो ये तुरङ्गाः-अश्वाः व्यालाः-दुष्टदन्तिनः तेषां व्यालग्नाःभेटिताः कृताधिरोहणा वा, एवंविधा ये योधा-भटाः तैः आचितः-आकीर्णः रचितो-विहितो यो रणः-सङ्ग्रामः तस्मिन् । कथम् ? । आरात् दूरात् अन्तिकाद् वा । लसन्तश्च ते केतवश्च लसत्केतव इति 'कर्मधारयः', तरलतरा लसत्केतवो येषां ते तरलतरलसत्केतवः 'बहुव्रीहिः', रङ्गन्तश्च ते तुरङ्गाश्च रङ्गत्तुरङ्गाः 'कर्मधारयः', रङ्गत्तुरङ्गाश्च व्यालाश्च रङ्गत्तुरङ्गव्यालाः 'इतरेतरद्वन्द्वः', रङ्गत्तुरङ्गव्यालानां व्यालग्नाः रङ्गत्तु० 'तत्पुरुषः', रङ्गत्तुरङ्गव्यालव्यालग्नाश्च ते योधाश्च रङ्ग० 'कर्मधारयः', तरलतरलसत्केतवश्च ते रङ्गत्तुरङ्गव्यालव्यालग्नयोधाश्च तरल० 'कर्मधारयः', तैः आचितः तरल० 'तत्पुरुषः', रचितश्चासौ रणश्च रचितरणः 'कर्मधारयः' । तरलतरलसत्केतुरङ्गत्तुरङ्ग-व्यालव्यालग्नयोधाचितश्चासौ रचितरणश्च तरलतरलसत्केतुरङ्गत्तुरङ्गव्यालव्यालग्नयोधाचितरचितरणः तस्मिन् । भीतिं हरतीति भीतिहृत् ।। ९० ।।

(३)

सौ० वृ०—राजीति । सा जिनानां राजी-तीर्थकृतां श्रेणिः अधिकः-उत्कृष्टः आमो-रोगः तस्माद् अधिकामात्, यद्वा आधिः-मानसी व्यथा, कामो-विषयः तस्माद् आधिकामात् मा-मां प्रति अव्याद् इत्यन्वयः । 'अव्यात्' इति क्रियापदम् । का कर्त्री ? । 'राजी' । केषाम् ? । 'जिनानाम्' । 'अव्यात्' पायाद्-रक्षतात् । कं कर्मतापन्नम् ? 'मा' । अस्मच्छब्दस्य द्वितीयैकवचनं मा इत्यस्य विशेषादेशे मा इति निपातः । 'त्वा मामा' इति सूत्रेण । कस्मात् अव्यात् ? । 'अधिकामात्' वा 'आधिकामात्' । किंविशिष्टा जिनानां राजी ? । राजीवानि-पद्मानि तद्वत् वक्त्राणि-मुखानि यस्याः (सा) 'राजीववक्त्रा', पद्मवदनेत्यर्थः । पुनः किंविशिष्टा जिनानां राजी ? । 'सारा' प्रधाना । पुनः किंविशिष्टा जिनानां राजी ? । 'बोधिका'

बोधिदातृ(का) । कस्य ? । अमला-निर्मला मतिर्यस्य सः अमलमतिः तस्य अमलमतेः, निर्मलबुद्धिजनस्येत्यर्थः । कथम् ? । 'अलं' अत्यर्थम् । पुनः किंविशिष्टा जिनानां राजी ? । नास्ति व्याधिः-रोगः, कालाननं-यममुखं-मरणं, जननं-जन्म, जरा-वयोहानिः-वार्धक्यं, त्रासः-आकस्मिकं भयं, मानः-अहंकारः एतानि यस्याः सा 'अव्याधिकालाननजननजरात्रासमाना' । पुनः किंविशिष्टा जिनानां राजी ? । 'असमाना' अनन्यसदृशा । पुनः किंविशिष्टा जिनानां राजी ? । 'अतिहृद्या' अतिमनोहरा । पुनः किंविशिष्टा जिनानां राजी ? । 'सा' सा-प्रसिद्धा । तच्छब्दो यच्छब्दमपेक्षते । सा का ? । या जिनानां राजी भीतिहृत्-भयहर्त्री अस्ति । 'अस्ति' इति पदमध्याहार्यम् । 'अस्ति' इति क्रियापदम् । का कर्त्री ? । 'या' जिनानां राजी । 'अस्ति' विद्यते । किंविशिष्टा या ? । 'भीतिहृत्' । कस्मिन् ? । तरलतरा-अतिशयेन चपलतरा लसन्तः-दीप्यन्तः ये केतवः-ध्वजाः रङ्गन्तो-वल्गन्तो ये तुरङ्गा-अश्वा येषु व्याला-दुष्टगजाः तेषु व्यालग्ना-आरूढा भेदि(टि)ता वा ये योधाः-सुभटाः तैः [आचितरं-प्रकटीकृतं यद् वितरं-प्रचुरं] (आचितं-व्याप्तं यद् रचितं) रणं-युद्धं तस्मिन् 'तरलतरलसत्केतुरङ्गत्तुरङ्गव्यालव्यालग्नयोधाचित-रचितरणे' । एतादृशा रणभयहर्त्री जिनानां राजी मामारात्-दूराद् अन्तिके वा पायात् । इति पदार्थः ॥

अथ समासः—राजीवानीव वक्त्राणि यस्याः सा राजीववक्त्रा । अतिशयेन तरलाः तरलतराः, लसन्तश्च ते केतवश्च लसत्केतवः, तरलतराश्च ते लसत्केतवश्च तरलतरलसत्केतवः, रङ्गन्तश्च ते तुरङ्गाश्च रङ्गत्तुरङ्गाः, तरलतरलसत्केतवश्च रङ्गत्तुरङ्गाश्च येषु ते तरलतरलसत्केतुरङ्गत्तुरङ्गाः, तरलतरलसत्केतुरङ्गत्तुरङ्गाश्च व्यालाश्च तरलतरलसत्केतुरङ्गत्तुरङ्गव्यालाः, तरलतरलसत्केतुरङ्गत्तुरङ्गव्यालैः व्यालग्नाः तरलतरलसत्केतुरङ्गत्तुरङ्गव्यालव्यालग्नाः, तरलतरलसत्केतुरङ्गत्तुरङ्गव्यालव्यालग्नाश्च ते योधाश्च तरलतरलसत्केतुरङ्गत्तुरङ्गव्यालव्यालग्नयोधाः, तरलतरलसत्केतुरङ्गत्तुरङ्गव्यालव्यालग्नयोधैः आचितः-आकीर्णः तरलतरलसत्केतुरङ्गत्तुरङ्गव्यालव्यालग्नयोधाचितः, रचितश्चासौ रणश्च रचितरणः, तरलतरलसत्केतुरङ्गत्तुरङ्गव्यालव्यालग्नयोधाचितश्चासौ रचितरणश्च तरलतरलसत्केतुरङ्गत्तुरङ्गव्यालव्यालग्नयोधाचितरचितरणः, तस्मिन् तरलतरलसत्केतुरङ्गत्तुरङ्गव्यालव्यालग्नयोधाचितरचितरणे । भीतिं हरतीति भीतिहृत् । हृदि भवा हृद्या, हृदि हिता वा हृद्या, अतिशयेन हृद्या अतिहृद्या । अमला मतिर्यस्य सः अमलमतिः, तस्य अमलमतेः । बोधिं करोति कथयति वा बोधिका । अधिकश्चासौ आमश्च अधिकामः, आधिश्च कामश्च आधिकामम् [अधिकामाधिकामः] तस्मात् (अधिकामात्) आधिकामात् (वा) । व्याधिश्च कालाननं च जननं च जरा च त्रासश्च मानश्च व्याधिकालाननजननजरात्रासमानाः, न विद्यन्ते व्याधिकालाननजननजरात्रासमाना यस्यां सा अव्याधिकालाननजननजरात्रासमाना । नास्ति समानः-तुल्यो यस्याः सा असमाना । इति द्वितीयवृत्तार्थः ॥ ९० ॥

(४)

दे० व्या०—राजीति । सा जिनानां-तीर्थंकराणां राजी-पङ्क्तिः अलम्-अत्यर्थं यथा स्यात् तथा मां अव्याद्-रक्षतादित्यन्वयः । 'अव रक्षणे' धातुः । 'अव्यात्' इति क्रियापदम् । का कर्त्री ? । राजी । केषाम् ? । जिनानाम् । कं कर्मतापन्नम् ? । माम् । किंविशिष्टा जिनानां राजी ? । 'राजीववक्त्रा' राजीवं-कमलं तद्वद् वक्त्रं-मुखं यस्याः सा तथा । "पत्रं राजीवपुष्करे" इत्यभिधानचिन्तामणिः (का० ४, श्लो० २२७) । पुनः किंविशिष्टा ? । 'अतिहृद्या' अतिशयेन हृदयङ्गमा । पुनः किंविशिष्टा ? । बोधिका-बोधजनका । कस्य ? । 'अमलमतेः' अमला-निर्मला मतिः-बुद्धिः यस्य स तस्य । पुनः किंविशिष्टा ? । 'अव्याधिकालाननजननजरात्रासमाना', व्याधिः-पीडा, कालाननं-यममुखं मरणमिति यावत्, जननं-उत्पत्तिः, जरा-विस्रसा, त्रासः-आकस्मिकं भयं, मानः-स्मयः, एतेषां पूर्वं 'द्वन्द्वः' ततो न विद्यन्ते व्याधिकालाननजननजरात्रा-समाना यस्याः सा तथेति समासः । पुनः किंविशिष्टा ? । 'असमाना' (नास्ति) सदृशो यस्याः सा तथा, धर्मचक्रवर्तित्वात् । यत्तदोर्नित्याभिसम्बन्धात् । (या) जिनानां राजी भीतिहृत्, वर्तत इत्यध्याहारः । 'वर्तते' इति क्रियापदम् । का कर्त्री ? । जिनानां राजी । किंविशिष्टा जिनानां राजी ? । 'भीतिहृत्' भीतिं हरतीति भीतिहृत् । कस्मिन् ? । 'तरलतरलसत्केतुरङ्गत्तुरङ्गव्याल-व्यालग्नयोधाचितरचितरणे' अतिशयेन तरलाः तरलतराः चञ्चला इत्यर्थः, ते च ते लसन्तो-राजमानाः केतवः-पताका येषु एतादृशां रङ्गतां-चलतां तुरङ्गाणां व्यालानां-दुष्टदन्तिनां च विशेषेण लग्ना ये योधाः-सुभटाः तैः चितो-व्याप्तो रचितः-प्रारब्धो यो रणः-संग्रामः तस्मिन् ॥ इति द्वितीयवृत्तार्थः ॥ ९० ॥

(५)

ध० टीका—राजीति । 'राजी' परम्परा । 'राजीववक्त्रा' कमलानना । 'तरलतरलसत्केतुरङ्गत्तुरङ्ग-व्यालव्यालग्नयोधाचितरचितरणे' तरलतरलसत्केतवः-कम्प्रतरविलसच्चिह्नका रङ्गतां-चलतां तुरङ्गाणां व्यालानां च-दुष्टदन्तिनां व्यालग्ना-भिटिताः[1] कृताधिरोहणा वा ये योधाः-सुभटास्तैराचित-आकीर्णो रचितः-कृतो यो रणः-सङ्ग्रामः तत्र । 'भीतिहृत्' भयहरा । 'या' । 'अतिहृद्या' अतीव हृदयङ्गमा । 'सारा' उत्कृष्टा । 'सा' । 'आरात्' दूरात् अन्तिकाद् वा । 'जिनानां' तीर्थकृताम् । 'अलं' अत्यर्थम् । 'अमलमतेः' निर्मलधियः । 'बोधिका' बोधिजनका । 'मा' शब्दो मामित्यस्यार्थे । 'अधिकामात्' अधिकः-उत्कटो य आमो-रोगस्तस्मात्, अथवा आधिश्च कामश्च आधिकामं तस्मात् । 'अव्यात्' पायात् । 'अव्याधिकालाननजननजरात्रासमाना' कालाननं-यममुखं मरणमित्यर्थः, न विद्यते व्याधिश्च कालाननं च जननं च जरा च त्रासश्च मानश्च यस्याः सा । 'असमाना' असदृशी । या इत्थंभूते रणे भीतिहृत् सा जिनानां राजी मा अधिकामादव्यादित्यन्वयः ॥ ९० ॥

---

१. इदं विचारणीयम् ।

(६)

अवचूरिः

राजी-श्रेणी राजीववत्-कमलवद्वक्त्रं यस्याः सा । तथा तरलतरलसत्केतवः-कम्प्रविराजमानध्वजा रङ्गतां-चलतां तुरङ्गाणां व्यालानां-दुष्टदन्तिनां व्यालग्ना-अभिघटिताः कृताधिरोहणा वा ये योधाः-सुभटास्तैराचित-आकीर्णो रचितः-कृतश्च यो रणः-सङ्ग्रामस्तत्र या भीतिर्भयं तां हरतीति सा । या अतिहृद्या-अत्यन्तहृदयङ्गमा । सारा-उत्कृष्टा । सा यच्छब्दनिर्दिष्टा । आराद्-दूरादन्तिकाद् वा । जिनानां-सर्वज्ञानाम् । अलम्-अत्यर्थम् ।अमला मतिर्यस्य तस्य । बोधिका-बोधजनका । मा-माम् अधिको यो आमो-रोगस्तस्मात् यद्वा आधिश्च कामश्च तस्मात् । व्याधिश्च कालाननं-यममुखं मरणं च जननं च जरा च त्रासश्च मानश्च न विद्यन्ते व्याध्यादयो यस्यां सा । असमाना-गुणैरसदृशा या जिनानां राजी रणे भीतिहृत् सा अव्यादिति संबन्धः ।। ९० ।।

जिनवाण्या विचारः-

सद्योऽसद्योगभिद् वागमलगमलया जैनराजीनराजी–
नूता नूतार्थधात्रीह ततहततमःपातकाऽपातकामा ।
[1]शास्त्री शास्त्री नराणां हृदयहृदयशोरोधिकाऽबाधिका वा–
ऽऽदेया देयान्मुदं ते मनुजमनु जरां त्याजयन्ती जयन्ती ।। ३ ।। ९१ ।।

- स्रग्०

(१)

ज० वि०—सद्योऽसद्योगेति । जैनराजी-जिनसम्बन्धिनी वाक्-वाणी ते-तव मुदं-हर्षं देयात्-वितीर्यादिति क्रियाकारकान्वयघटना । अत्र 'देयात्' इति क्रियापदम् । का कर्त्री ? 'वाक्' । कां कर्मतापन्नाम् ? 'मुदम्' । कुत्र ? 'इह' अत्र जगति । कथम् ? 'सद्यः' तत्क्षणम् । वाक् किमीया[2] ? 'जैनराजी' । कथंभूता ? 'असद्योगभित्' असन्-अशोभनो यो योगः-अकार्यादिव्यापारः तं भिनत्ति सा तथा । अथवा असन्तः-असाधवः तैर्योगः-संसर्गः तं भिनत्ति सा तथा । पुनः कथं० ? 'अमलगमलया' अमला-निर्मला ये गमाः-सदृशपाठाः तेषां लयः-श्लेषो यस्यां सा तथा । पुनः कथं० ? 'इनराजीनूता' इनाः-चक्रवर्तिवासुदेवादयः पतयः सूर्या वा तेषां राजी-श्रेणी तया नूता-स्तुता । पुनः कथं० ?

---

१. 'शास्त्रीशा स्त्रीनराणां' इत्यपि पदच्छेदः

२. भ्रान्तम्पदमिदम्, 'काऽसौ' इत्युचितमत्र ।

'नूतार्थधात्री' नूताः-नवीना ये अर्थाः-भावास्तेषां धात्री-धारणशीला । पुनः कथं० ? 'ततहततमः-पातकापातकामाः' तताः-प्रसृताः, हताः-क्षयं नीताः, तमः-अज्ञानं, पातकं-पापं, अपातः-पातरहितः, कामः-कन्दर्पः, तता हतास्तमःपातकापातकामा यया सा तथा । ततहततमःपातका अपातकामा चेति विशेषणद्वयं पृथग् व्याख्यायते तदापि युक्तमेव । तथा चायमर्थः-तते हते तमःपातके यया सा तथा, न विद्येते पातकामौ यस्याः सा तथेति । पुनः कथं० ? 'शास्त्री' शास्त्रसम्बन्धिनी । पुनः कथं० ? 'शास्त्री' शासिका । केषाम् ? 'नराणाम्' । पुनः कथं० ? 'हृदयहृत्' मनोहारी । अथवा शास्त्रीशेत्येकं विशेषणम् । स्त्रीनराणां हृदयहृदिति चैकं विशेषणमिति विशेषणद्वयं व्याख्येयम् । तथा हि शास्त्रिणः-शास्त्रवन्तः बहुश्रुता इत्यर्थः, तेषामीशा-स्वामिनी, तैः सेवनीयत्वात् । स्त्रीणां-योषितां नराणां-पुंसां हृदयहृत्-मनोहरा । पुनः कथं० ? 'अयशोरोधिका' अयशसां-अकीर्तीनां रोधिका-प्रसरविघातकारिका । पुनः कथं० ? 'अबाधिका' न बाधाजनिका । 'वा' शब्दश्चार्थः स च समुच्चयार्थो ज्ञेयः । पुनः कथं० ? 'आदेया' ग्राह्या । वाक् किं कुर्वती ? 'त्याजयन्ती' मोचयन्ती । कां कर्मतापन्नाम् ? 'जरां' विस्रसाम् । कथम् ? 'मनुजमनु' मानवमनु-लक्षीकृत्य । मनुजानां जरां विनाशयतीति फलितार्थः । पुनः किं कुर्वती ? 'जयन्ती' जयमासादयन्ती, केनाप्यपरिभूयमानत्वात् ॥

अथ समासः—न सन् असन् 'तत्पुरुषः' । असंश्चासौ योगश्च असद्योगः 'कर्मधारयः' । अथवा न सन्तः असन्तः 'तत्पुरुषः' । असद्भिर्योगः असद्योगः 'तत्पुरुषः' । असद्योगं भिनत्तीत्यसद्योगभित् 'तत्पुरुषः' । न विद्यते मलो येषां ते अमलाः 'बहुव्रीहिः' । अमलाश्च ते गमाश्च अमलगमाः 'कर्मधारयः' । अमलगमानां लयो यस्यां सा अमलगम० 'बहुव्रीहिः' । जिनानां जिनेषु वा राजानः जिनराजाः 'तत्पुरुषः' । जिनराजानामियं जैनराजी । इनानां राजी इनराजी 'तत्पुरुषः' । इनराज्या नूता इनरा० 'तत्पुरुषः' । नूताश्च तेऽर्थाश्च नूतार्थाः 'कर्मधारयः' । नूतार्थानां धात्री नूता० 'तत्पुरुषः' । ताताश्च ते हताश्च ततहताः 'कर्मधारयः' । न विद्यते पातो यस्य सोऽपातः 'बहुव्रीहिः' । अपातश्चासौ कामश्च अपातकामः 'कर्मधारयः' । तमश्च पातकं च अपातकामश्च तमःपा० 'इतरेतरद्वन्द्वः' । ततहतास्तमः-पातकापातकामा यया सा ततहत० 'बहुव्रीहिः' । पृथग्विशेषणपक्षे तु तते च ते हते च ततहते 'कर्मधारयः' । तमश्च पातकं च तमःपातके 'इतरेतरद्वन्द्वः' । ततहते तमःपातके यया सा ततह० 'कर्मधारयः' । पातश्च कामश्च पातकामौ 'इतरेतरद्वन्द्वः' । न विद्येते पातकामौ यस्याः सा अपा० 'बहुव्रीहिः' । शास्त्रीणामीशा शास्त्रीशा 'तत्पुरुषः' । स्त्रियश्च नराश्च स्त्रीनराः 'इतरेतरद्वन्द्वः' । तेषां स्त्रीनराणाम् । हृदयं हरतीति हृदयहृत् 'तत्पुरुषः' । न यशांसि अयशांसि 'तत्पुरुषः' । अयशसां रोधिका अयशो० 'तत्पुरुषः' । न बाधिका अबाधिका 'तत्पुरुषः' । इति काव्यार्थः ॥ ९१ ॥

(२)

सि० वृ०—सद्योऽसद्योगेति । सा जिनराजानामियं जैनराजी जिनराजसंबन्धिनीत्यर्थः वाक्-वाणी ते-तव मुदं-हर्षं देयाद्-वितीर्यादित्यर्थः । 'डुदाञ् दाने' धातोः कर्तरि परस्मैपदे प्रथमपुरुषैकवचनं यात् । 'दादेरे' (सा० सू० ८०७) इत्याकारस्यैकारः । तथा च 'देयाद्' इति सिद्धम् । अत्र 'देयाद्' इति क्रियापदम् । का कर्त्री ? । वाक्[1] । कां कर्मतापन्नाम् ? । मुदं-हर्षम् । कुत्र ? । इह-अत्र जगति । कथम् ? । सद्यः-तत्क्षणम् । वाक् किमीया ? । जैनराजी । कथंभूता वाक् ? । 'असद्योगभित्' असत्-अशोभनो यो योगः-असद्व्यापारः तं भिनत्ति सा तथा । यदि वा असन्तो-असाधवः तैः योगः-संसर्गः तं भिनत्तीति तथा । असद्योगं मनोवाक्कायव्यापारं भिनत्तीत्यर्थो वा । पुनः कथंभूता ? । 'अमलगमलया' अमला-निर्मला ये गमाः-सदृशपाठाः तेषां लयः-श्लिष्टता यत्र सा तथा । पुनः कथंभूता ? । 'इनराजीनूता' इनाः-चक्रवर्त्यादयः प्रभवः सूर्या वा तेषां राजी-श्रेणी तया नूता-स्तुता । "इनः[2] प्रभौ च सूर्ये च" इत्यमरः (?) । कथंभूता ? । 'नूतार्थधात्री' नूतना-नवीना ये अर्था-भावाः तेषां धात्री-धारणशीला, यदिवा नूतान्-नवान् अभिधेयान् प्रयोजनानि वा दधातीति नूतार्थधात्री । "अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु" इत्यमरः (श्लो० २५०६) । पुनः किंविशिष्टा ? । 'ततहततमःपातकापातकामा' तमः-अज्ञानं पातकं-पापं अपातः-पातरहितः कामः-कन्दर्पः, तमश्च पातकं च अपातकामश्च 'इतरेतरद्वन्द्वः', तता हताः तमःपातकापातकामा यया सा तथा,। अपातकामेति पृथग् विशेषणं वा । पातः-पतनं कामः-स्मरः अनयो 'द्वन्द्वः' । तथा च न विद्येते पातकामौ यस्याः सा तथेति । पुनः कथंभूता ? । शास्त्री-शास्त्रसम्बन्धिनी-त्यर्थः । 'तस्येदम्' (पा० अ० ४, पा० ३, सू० १२०) इत्यण् । 'टिड्ढाणञ्०' (पा० अ० ४, पा० १, सू० १५) इति ङीप् । "निदेशग्रन्थयोः शास्त्रं" इत्यमरः (श्लो० २६९४) । पुनः कथंभूता ? । शास्त्री-शिक्षयित्री । केषाम् ? । नराणाम् । पुनः कथंभूता ? । 'हृदयहृत्' हृदयं हरति-वशीकुरुते इति हृदयहृत् । अथवा शास्त्रीशेत्येकं विशेषणं, स्त्रीनराणां हृदयहृदिति चैकं विशेषणमिति विशेषणद्वयं ज्ञातव्यम् । तथाहि-कथंभूता वाक् ? । शास्त्रीशा-शास्त्रं जानन्ति ते शास्त्रिणः-बहुश्रुताः तेषां ईशा-स्वामिनी, तैः सेवनीयत्वात् । पुनः कथंभूता ? । 'स्त्रीनराणां हृदयहृत्' स्त्रीणां-योषितां नराणां-पुंसां हृदयहृत्-मनोहरा । पुनः कथंभूता ? । 'अयशोरोधिका' अयशसां-अपकीर्तीनां रोधिका-प्रसरविघातकारिका । पुनः कथंभूता ? । 'अबाधिका' न बाधत इत्यबाधिका, सर्वेषां सुखजनकत्वात् । पुनः किंविशिष्टा ? । 'आदेया' आदीयते इत्यादेया, ग्रहणयोग्येत्यर्थः । अविसंवादित्वेन सर्वैरपि तद्ग्रहणादिति भावः । वाक् किं कुर्वती ? । त्याजयन्ती-मोचयन्ती । काम् ? । जरां-विस्रसाम् । कथम् ? । 'मनुजमनु' मानवमनु-लक्षीकृत्य, मनुजानां जरां विनाशयतीति फलितार्थः । किं कुर्वती ? । जयन्ती-जयमासादयन्ती, केनाप्यपरिभूयमानत्वात् ।। ९१।।

---

१. 'काऽसौ' इत्यत्रोचितम् ।

२. "इनः सूर्ये प्रभौ राजा" इति अमरकोशे (श्लो० २५५७) ।

(३)

सौ० वृ०—सद्योऽसद्योगेति । जैनराजी-तीर्थङ्करसम्बन्धिनी वाक्-वाणी [यस्याः सा] ते-तव मुदं-हर्षं देयादित्यन्वयः । 'देयाद्' इति क्रियापदम् । का कर्त्री ? । 'वाग्' वाणी । 'देयाद्' वितीर्यात्, ददातु इत्यर्थः । कां कर्मतापन्नाम् ? । 'मुदं' हर्षम् । कस्य ? । 'ते' तव । कुत्र ? । 'इह' संसारे । कथम् ? । 'सद्यः' शीघ्रम् । किंविशिष्टा वाक् ? । 'जैनराजी' तीर्थकरसत्का । पुनः किंविशिष्टा वाणी ? । असन्तः-अशोभनाः दुष्टा योगा-मनोवाक्कायव्यापारास्तान् भिनत्तीति 'असद्योगभित्', यद्वा असन्तः-असाधवः तेषां योगः-संयोगस्तं प्रति भिनत्तीति 'असद्योगभित्' । पुनः किंविशिष्टा वाक् ? । अमला-निर्मला सदर्थत्वात् गमाः-सदृशपाठालापकाः तेषां लयः-स्थानं यस्याः सा 'अमलगमलया' । पुनः किंविशिष्टा वाक् ? । इनाः-स्वामिनः चक्रवर्तिबलदेववासुदेवादयः यद्वा इनाः-सूर्यादयः इन्द्रादयो वा तेषां राजी-श्रेणिः तया नूता-स्तुता 'इनराजीनूता' । पुनः किंविशिष्टा वाक् ? । नूतः-स्तुतः नवीनो वा योऽर्थः-सूत्रभाषणं तस्य धात्री-धरणीव धरणी वा मातेव माता 'नूतार्थधात्री' । पुनः किंविशिष्टा वाक् ? । ततं-विस्तीर्णं हतं-निरस्तं तमः अज्ञानं [वा] पातकं-पापं यया सा 'ततहततमःपातका' । पुनः किंविशिष्टा वाक् ? । निराकृतः पातः कामो-मदनो यया सा 'अपातकामा', यद्वा नास्ति पातकं-पापं आमो रोगो यस्याः सा 'अपातकामा' । एतद्विशेषणद्वयमपि एकपदमप्यस्ति । पुनः किंविशिष्टा वाक् ? । 'शास्त्री' शिक्षयित्री, यद्वा शास्त्राणां-ग्रन्थानां ईशा-स्वामिनी । पुनः किंविशिष्टा वाक् ? । हृदयं-चित्तं हरतीति 'हृदयहृत्', हृदयङ्गमा इत्यर्थः । केषाम् ? । 'स्त्रीनराणां' योषित्पुरुषाणाम् । पुनः किंविशिष्टा वाक् ? । अयशः-अकीर्तिः तं (तद्) रोधते इति 'अयशोरोधिका' । पुनः किंविशिष्टा वाक् ? । नास्ति बाधा-पीडा यस्याः सा 'अबाधिका' । वाशब्दः समुच्चयार्थे । पुनः किंविशिष्टा वाक् ? । 'आदेया' सर्वभव्यासुमतां ग्राह्यवचना, हितकारिणी इत्यर्थः । पुनः वाक् किं कुर्वती ? । 'त्याजयन्ती' अपनयन्ती । कां कर्मतापन्नाम् ? । 'जरां' विस्रसाम् । कथम् ? । 'अनु' लक्षीकृत्य । कं कर्मतापन्नम् ? । 'मनुजं' मानवम् । पुनः वाक् किं कुर्वती ? । 'जयन्ती' जयनशीला, न कैरपि पराजिता । एतादृशी जैनी वाग् युष्माकं मुदं देयादिति पदार्थ : ॥

अथ समासः—असन्तश्च ते योगाश्च असद्योगाः, असद्योगान् भिनत्तीति असद्योगभिद्, यद्वा न सन्तः असन्तः, असतां योगः असद्योगः, असद्योगं भिनत्तीति असद्योगभित् । उच्यते इति वाक् । न मला अमलाः, अमलाश्च ते गमाश्च अमलगमाः,स अमलगमानां लयः-स्थानं यस्याः सा अमलगमलया । जिनेषु राजानः जिनराजाः, जिनराजानां इयं जैनराजी । इनानां राजयः इनराजयः, इनराजिभिः नूता इनराजिनूता । नूताश्च ते अर्थाश्च नूतार्थाः, नूतार्थानां धात्री नूतार्थधात्री । तमश्च पातकं च तमःपातके, हते च ते तमःपातके च हततमःपातके, तते हततमःपातके यया सा ततहततमःपातका । पातश्च कामश्च

पातकामौ, न स्तः पातकामौ यस्याः सा अपातकामा, यद्वा ततहततमःपातकाश्च अपातकामाश्च यस्यां सा ततहततमःपातकापातकामा । शास्ति-शिक्षयतीति शास्त्री । यद्वा शास्त्राणां ईशा शास्त्रीशा । स्त्रियश्च नराश्च स्त्रीनराः, तेषां स्त्रीनराणाम् । हृदयं हरतीति हृदयहृत् । न यशांसि अयशांसि, अयशसां रोधिका अयशोरोधिका । न विद्यते बाधा यस्यां सा अबाधिका [वा] । आदातुं योग्या आदेया । इति तृतीयवृत्तार्थः ॥ ९१ ॥

(४)

दे० व्या०—सद्योऽसद्योगेति । सा जैनराजी वाग्-वाणी इह-अस्मिन् लोके ते-तुभ्यं सद्यः-तत्कालं मुदं-हर्षं देयाद्-दद्यादित्यन्वयः । 'दा दाने' धातुः । 'देयाद्' इति क्रियापदम् । का कर्त्री ? । वाक् । कां कर्मतापन्नाम् ? । मुदम् । कस्य ? । ते-तव । कस्मिन् ? । इह । कथम् ? । सद्यः । किंविशिष्टा वाक् ? । 'जैनराजी' जिनराजानामियं जैनराजी । पुनः किंविशिष्टा ? । 'असद्योगभित्' असन्तम्-अशोभनं योगं-कायादिव्यापारं यद्वा असद्भिः-असाधुभिः योगं-सम्बन्धं भिनत्तीति तथा । पुनः किंविशिष्टा ? । 'अमलगमलया' अमला-निर्मला ये गमाः-सदृशपाठाः तेषां लयः-श्लिष्टता यत्र सा तथा । पुनः किंविशिष्टा ? । 'इनराजीनूता' इनानां-राज्ञां सूर्याणां वा राजी-पंक्तिः तया नूता-स्तुता । पुनः किंविशिष्टा ? । 'नूतार्थधात्री' नूता-नवीना ये अर्थास्तेषां धात्री-धरणशीला । पुनः किंविशिष्टा ? । 'ततहततमःपातका' तमः-अज्ञानं पातकं-पापं अनयोः 'द्वन्द्वः', पश्चात् तते-विस्तृते हते-नाशिते तमःपातके ययेति विग्रहः । पुनः किंविशिष्टा ? । 'अपातकामा' नास्ति पातः-च्यवनं कामः-कन्दर्पो यस्यां सा तथा । पातश्च कामश्चेति पूर्वं 'द्वन्द्वः' । पुनः किंविशिष्टा ? । शास्त्री-शास्त्रसम्बन्धिनी । शास्त्री-शासिका । 'शासु अनुशिष्टौ' । 'तस्येदम्' (पा० अ० ४, पा० ३, सू० १२०) । पुनः किंविशिष्टा ? । 'हृदयहृत्' हृदयं हरतीति हृदयहृत्, मनोहारिणीत्यर्थः । केषाम् ? । नराणां-मनुष्याणाम् । पुनः किंविशिष्टा ? । 'अयशोरोधिका' न यशः अयशः इति 'नञ्समासः', तस्य रोधिका-प्रसरणविघातिनी । पुनः किंविशिष्टा ? । 'अबाधिका' बाधा-पीडा तां न करोतीत्यबाधिका, सर्वेषां सुखजनकोपदेशदातृत्वात् । पुनः किंविशिष्टा ? । 'आदेया' आदातुं योग्या आदेया, ग्रहणयोग्येत्यर्थः, अविसंवादित्वेन सर्वैरपि तद्ग्रहणात् । वाक् किं कुर्वती ? । त्याजयन्ती-मोचयन्ती । काम् ? । जरां-वयोहानिम् । कथम् ? । 'मनुजमनु' पुमांसं पुमांसं अनु-लक्षीकृत्य । पुनः किं कुर्वती ? । जयन्ती-जयमासादयन्ती । इति तृतीयवृत्तार्थः ॥ ९१ ॥

(५)

ध० टीका—सद्य इति । 'सद्यः' तत्क्षणम् । 'असद्योगभित्' असन्तं-अशोभनं योगं-कायादिव्यापारं, असद्भिर्वा-असाधुभिर्योगं-सम्बन्धं भिनत्ति या सा । 'वाक्' वाणी । 'अमलगमलया' अमलो गमानां लयः-

शिलष्टता यत्र सा । 'जैनराजी' जिनराजसम्बन्धिनी । 'इनराजीनूता' इना-ईश्वरा आदित्या वा तेषां राज्या-पङ्क्त्या नूता-स्तुता । 'नूतार्थधात्री' नूला-नवा ये अर्थाः तेषां धात्री-धरणशीला । 'इह' अत्र । 'ततहततमःपातकापातकामा' तताः-प्रसृता, हताः तमश्च पातकं च अपातः-पतनरहितः कामश्च यया सा । अपातकामेति पृथग् वा विशेषणम् । नास्ति पातश्च कामश्च यस्यामिति । 'शास्त्री' शास्त्रसम्बन्धिनी । 'शास्त्री' शासिका । 'नराणाम्' । अथवा 'शास्त्रीशा' शास्त्रिणां ईशा-स्वामिनी । 'स्त्रीनराणां' च (स्त्रीणां नराणां) 'हृदयहृत्' मनोहारिणी । 'अयशोरोधिका' अयशसां रोधिका-प्रचारविघातकारिका । 'अवाधिका' अबाधाजनिका । 'वा' शब्दश्चार्थे । 'आदेया' ग्राह्या । 'देयाद्' वितीर्यात् । 'मुदं' प्रमोदम् । 'ते' तुभ्यम् । 'मनुजमनु जरां' पुमांसं लक्षणीकृत्य[1] जरां-वयोहानिम् । 'त्याजयन्ती' मोचयन्ती । 'जयन्ती' जयमासादयन्ती । या असद्योगभित् सा जैनराजी वाक् मुदं ते देयात् इति सम्बन्धः ॥ ९१ ॥

(६)

अवचूरिः

जिनराजानां संबन्धिनी जैनराजी वाग्-वाणी ते-तुभ्यं मुदं देयात् । किंविशिष्टा ? । सद्यः-शीघ्रं असन्तो ये योगा-मनोवाक्कायव्यापारास्तान् भिनत्तीति सा । अमलानां गमानां लयो यत्र सा । इना-इभ्याः सूर्या वा तेषां राज्या नूता-स्तुता । नूतान्-नवीनानर्थान् दधातीति सा । इह-पृथिव्याम् । ततं-विपुलं, हतं-ध्वस्तं तमः-अज्ञानं पातकं-पाप्मा । अपातः-पतनरहितः कामश्च यया [यद्वा पृथग् विशेषणम् । न विद्यते पातकामौ यस्याः सा । शास्त्री-शास्त्रसंवन्धिनी । नराणां शास्त्री-शासिका । यद्वा शास्त्रीणामीशा-स्वामिनी । स्त्रियो-नार्यो नरा-मर्त्यास्तेषां हृदयं हरतीति । अयशो रुणद्धीति । न बाधते इत्यबाधिका । वा समुच्चये । आदेया-ग्राह्या । मनुजं-मानवमनु-लक्ष्यीकृत्य जरां-विस्रसां त्याजयन्ती-विनाशयन्ती । जयन्ती केनाप्यपरिभूतत्वात् ॥ ९१ ॥

श्रीवैरोट्यायाः स्तुतिः—

याता या तारतेजाः सदसि सदसिभृत् कालकान्तालकान्ता—
ऽपारिं पारिन्द्रराजं सुरवसुरवधूपूजिताऽरं जितारम् ।
सा त्रासात् त्रायतां त्वामविषमविषभृद्भूषणाऽभीषणा भी—
हीनाऽहीनाग्र्यपत्नी कुवलयवलयश्यामदेहाऽमदेहा ॥ ४ ॥ ९२ ॥

- स्रग्०

१. स्खलितमिदम्, अत्र लक्षीकृत्येत्युचितम् ।

(१)

ज० वि०—यातेति । हे भव्यात्मन् ! सा 'अहीनाग्र्यपत्नी' अहीनः-धरणेन्द्रः तस्य अग्र्यपत्नी-पट्टराज्ञी वैरोट्यादेवीत्यर्थः, त्वां-भवन्तं त्रासाद्-भयाद् त्रायतां-रक्षत्विति क्रियाकारकप्रयोगः । अत्र 'त्रायताम्' इति क्रियापदम् । का कर्त्री ? 'अहीनाग्र्यपत्नी' । कं कर्मतापन्नम् ? 'त्वाम्' । कस्मात् ? 'त्रासात्' । सेति तच्छब्दयोगाद् यच्छब्दयोजनामाह-या अहीनाग्र्यपत्नी पारिन्द्रराजं-गजेन्द्रं (अजगेरन्द्रं?) याता-गता प्राप्तेति यावत् । अत्र 'अस्ति' इति क्रियापदम् । का कर्त्री ? 'या' । या कथंभूता ? 'याता' । कं कर्मतापन्नम् ? 'पारिन्द्रराजम्' । कथंभूतं पारिन्द्रराजम् ? 'अपारिं' अपगतवैरिणम् । यतः पुनः कथं० ? 'जितारं' जितं-पराजितं आरं-अरीणां समूहो येन स तथा तम् । अहीनाग्र्यपत्नी पुनः कथंभूता ? 'तारतेजाः' उज्ज्वलप्रभा । कस्याम् ? 'सदसि' सभायाम् । पुनः कथं० ? 'सदसिभृत्' शोभनतरवारिधरा । पुनः कथं० ? 'कालकान्तालकान्ता' कालाः-श्यामाः कान्ताः-कमनीयाः अलकान्ताः-कुरलाग्राणि यस्याः सा तथा । पुनः कथं० ? 'सुरवसुरवधूपूजिता' सुरवाः - सुस्वराः याः सुरवध्वो-देवाङ्गनास्ताभिः पूजिता-महिता । (कथम्?) 'अरं' अत्यर्थम् । पुनः कथं० ? 'अविषमविषभृद्भूषणा' अविषमाः-सौम्याः विषभृतः-सर्पाः त एव भूषणं-शृङ्गारो यस्याः सा तथा । पुनः कथं० ? 'अभीषणा' अरौद्रा । पुनः कथं० ? 'भीहीना' भयरहिता । पुनः कथं० ? 'कुवलयवलयश्यामदेहा' कुवलयानि-नीलोत्पलानि तेषां वलयं-समूहस्तद्वत् श्यामो देहो यस्याः सा तथा । पुनः कथं० ? 'अमदेहा' अमदा-मदरहिता ईहा-चेष्टा यस्याः सा तथा ॥

अथ समासः—तारं तेजो यस्याः सा तार० 'बहुव्रीहिः' । संश्चासावसिश्च सदसिः 'कर्मधारयः' । सदसिं बिभर्तीति सद० 'तत्पुरुषः' । अलकानामन्ता अलकान्ताः 'तत्पुरुषः' । अपगता अरयो यस्य सोऽपारिः 'बहुव्रीहिः' । तमपारिम् । पारिन्द्राणां पारिन्द्रेषु वा राजा पारिन्द्र० 'तत्पुरुषः' । तं पारि० । शोभनो रवो यासां ताः सुरवाः 'बहुव्रीहिः' । सुराणां वध्वः सुरवध्वः 'तत्पुरुषः' । सुरवाश्च ताः सुरवध्वश्च सुर० 'कर्मधारयः' । सुरवसुरवधूभिः पूजिता सुरवसुर० 'तत्पुरुषः' । अरीणां समूहः आरं 'तत्पुरुषः' । जितं आरं येन स जितारः 'बहुव्रीहिः' । तं जितारम् । विषं बिभर्तीति विषभृत् 'तत्पुरुषः' । न विषमा अविषमाः 'तत्पुरुषः' । अविषमाश्च ते विषभृतश्च अविषम० 'कर्मधारयः' । अविषमविषभृतो भूषणं यस्याः सा अविषम० 'बहुव्रीहिः' । (न भीषणा अभी० 'तत्पुरुषः' ।) भिय हीना भीहीना 'तत्पुरुषः' । अहीनां इनः अहीनः 'तत्पुरुषः' । अग्र्या चासौ पत्नी च अग्र्यपत्नी 'कर्मधारयः' । अहीनस्याग्र्यपत्नी अहीना० 'तत्पुरुषः' । कुवलयानां वलयं कुवलय० 'तत्पुरुषः' । कुवलयवलयवत् श्यामः कुवल० 'तत्पुरुषः' । कुवलयवलयश्यामो देहो यस्याः सा कुवल० 'बहुव्रीहिः' । न विद्यते मदो यस्याः सा अमदा 'बहुव्रीहिः' । अमदा ईहा यस्याः सा अमदेहा 'बहुव्रीहिः' । इति काव्यार्थः ॥ ९२ ॥

॥ इति श्रीशोभनस्तुतिवृत्तौ श्रीपार्श्वपरमेश्वरस्य स्तुतेर्व्याख्या ॥ ४ । २३ । ९२ ॥

(२)

सि० वृ०—यातेति । हे भव्यात्मन् ! सा अहीनाग्र्यपत्नी अहीनो-धरणेन्द्रः तस्याग्र्यपत्नी-मुख्यराज्ञी वैरोट्यादेवीत्यर्थः । पद्मावतीत्यपि स्तुतिस्तोत्रादौ धरणेन्द्रपत्नीति दृश्यते [सिद्धसेनसूरिणा[1] मतैकाधिक्य-विंशतिस्थानप्रकरणे (विंशे स्थाने)

"देवीओ चक्केसरी १ अज(जि)या २ दुरिया(रि) ३ कालि ४ महाकाली ५ ।
अच्चुअ[2] ६ संता ७ जलो(जाला) ८ सुतारया ९ सोअ १० स(सि)रिवच्छा ११ ।।
पवरा १२ पि(विज)यं १३ कूसा १४ पन्नयत्ति(ण्णत्ती) १५ निव्वाणि १६ अच्चुया १७ धरणी १८ ।
वैरुट्ट १९ द(छु)त्त २० गंधारी २१ अंबा(ब) २२ पउमावई २३ सिद्धा २४ ।।"

इति वचनात् तथा हेमाचार्येणाप्येवमुक्तम् (अभि० का० १, श्लो० ४६)—

"नरदत्ताऽथ गान्धार्य-म्बिका पद्मावती तथा ।
सिद्धायिका चेति जैन्यः, क्रमाच्छासनदेवताः ।।"

इति] परं श्रीभगवतीसूत्र-प्रवचनसारोद्धार-पार्श्वचरित्रादौ कुत्रापि तथा दर्शनाभावात् धरणेन्द्रस्य पद्मावती पत्नीति न प्रतिभाति । तेनैतद् विचार्यमार्यधुर्यैरिति । [पञ्चमाङ्गस्य दशमशतकस्य पञ्चमोद्देशके इत्युक्तम्—"धरणस्स णं भंते ! नागकुमारिंदस्स नागकुमाररण्णो कति अग्गमहिसीओ पन्नत्ताओ ? (अज्जो ! छ अग्गमहिसीओ पन्नत्ताओ) तंजहा-अला १ सक्का २ सतेरा ३ सोदामणी ४ इंदा ५ घणविजुत्ता ६, तत्थ णं एगमेगाए देवीए छ छ देविसहस्सा परिवारो प०, पभूणं ताओ एगमेगाए देवीए अन्नाइं छ छ देविसहस्साइं परियारं विउव्वित्तए" इत्याद्युक्तम् ।] त्वां—भवन्तं त्रासाद्-भयात् त्रायतां-रक्षतु इत्यर्थः । 'त्रैङ् दैङ् पालनयोः' इति धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि आत्मनेपदे प्रथम-पुरुषैकवचनं ताम् । 'अप्०' (सा० सू० ६९१) । 'ऐ आय्' (सा० सू० ४७) । 'स्वरहीनं०' (सा० सू० ३६) । तथा च 'त्रायताम्' इति सिद्धम् । अत्र 'त्रायताम्' इति क्रियापदम् । का कर्त्री ? । अहीनाग्र्यपत्नी । कं कर्मतापन्नम् ? । त्वाम् । कस्मात् ? । त्रासात् । सेति तच्छब्दयोगाद् यच्छब्दयोजनामाह-या अहीनाग्र्यपत्नी पारिन्द्रराजं-अजगरेन्द्रं याता-गता प्राप्तेति यावत् । अत्र 'अस्ति' इति क्रियापदम् । का कर्त्री ? । 'या' । किं कर्मतापन्नम् ? । 'पारिन्द्रराजम्' पारिन्द्राणाम्-अजगराणां राजा पारिन्द्रराजः, 'राजाहःसखिभ्यष्टच्' (पा० अ० ५, पा० ४, सू० ९१) इति टच्, तम् । "चक्रमण्डल्यजगरः पारिन्द्रो वाहसः शयुः" इति हैमः (का० ४, श्लो० ३७१) । कथंभूतं पारिन्द्र-

१. कोऽयं सूरिरिति जिज्ञासातृप्त्यर्थं द्रष्टव्या श्रीएकविंशतिस्थानप्रकरणस्य मुनिश्रीदेवविजयलिखिता प्रस्तावना (पृ० १-२) ।
२. 'सामा' इति पाठस्तत्रस्थः ।

राजम् ? ।'अपारिम्' अपगता-दूरीभूता अरयः-विपक्षा यस्य स तथा तम् । पुनः कथंभूतम् ? ।'जितारं' जितं-भग्नं आरं-अरीणां समूहो येन स तथा तम् । कथंभूता अहीनाग्र्यपत्नी ? ।'तारतेजाः' तारं-उज्ज्वलं तेजो यस्याः सा तारतेजाः । कस्याम् ? । सदसि-सभायाम् । पुनः कथंभूता ? ।'सदसिभृत्' सन्-शोभनो यः असिः-खड्गः तं बिभर्तीति सदसिभृत्, क्विबन्तः । "तरवारिकौक्षेयकमण्डलाग्रा-असीऋष्टिरिष्टी" इति हैमः (का० ३, श्लो० ४४६) । पुनः कथंभूता ? ।'कालकान्तालकान्ता' कालाः-श्यामाः कान्ताः-कमनीयाः अलकान्ताः-कुन्तलाग्राणि यस्याः सा तथा । "अन्तः प्रान्तेऽन्तिके नाशे, स्वरूपेऽतिमनोहरे" इति विश्वः । पुनः कथंभूता ? । 'सुरवसुरवधूपूजिता' सुरवाः-सुस्वराः याः सुरवध्वः-देवाङ्गनास्ताभिः पूजिता-महिता । अरं-अत्यर्थम् । पुनः कथंभूता ? ।'अविषमविषभृद्भूषणा' न विषमा अविषमाः-सौम्याः ये विषभृतः-विषधराः-सर्पास्त एव भूषणं-शृङ्गारो यस्याः सा तथा । पुनः कथंभूता ? । अभीषणा-न भयानका । न भीषणा अभीषणा, अरौद्रेत्यर्थः । पुनः कथंभूता ? ।'भीहीना' भिया-भयेन हीना-रहिता [भीहीना] । पुनः कथंभूता ? ।'कुवलयवलयश्यामदेहा' कुवलयानि-नीलोत्पलानि तेषां वलयं-समूहः तद्वत् श्यामो-नीलो देहः-शरीरं यस्याः सा तथा । पुनः कथंभूता ? ।'अमदेहा' अमदा-मदरहिता ईहा-चेष्टा यस्याः सा तथा ।। ४ ।। स्रग्धरेयं छन्दः । लक्षणं तु प्राक् प्रतिपादितम् ।। ९२ ।।

।। इति महोपाध्यायश्रीभानुचन्द्रगणिविरचित० श्रीपार्श्वनाथस्तुतिवृत्तिः ।। ४ । २३ । ९२ ।।

(३)

सौ० वृ०—यातेति । सा 'अहीनाग्र्यपत्नी' अहयः-सर्पाः तेषां इनः-स्वामी धरणेन्द्रः तस्य अग्र्या-प्रधाना पत्नी-वैरोट्यानाम्नी देवी त्वां त्रासाद्-अकस्माद् भयात् त्रायताम् इत्यन्वयः । 'त्रायताम्' इति क्रियापदम् । का कर्त्री ? ।'अहीनाग्र्यपत्नी' ।'त्रायतां' रक्षताम् । कं कर्मतापन्नम् ? ।'त्वां' भवन्तम् । कस्मात् ? ।'त्रासात्' । किंविशिष्टा अहीनाग्र्यपत्नी ? ।'सा' सा-प्रसिद्धा । तच्छब्दो यच्छब्दमपेक्षते । सा का ? । या अहीनाग्र्यपत्नी पारिन्द्रराजं याता इत्यन्वयः ।'याता' इति क्रियापदम् । का कर्त्री ? । या ।'याता' प्राप्ता । कं कर्मतापन्नम् ? ।'पारिन्द्रराजं' पारिन्द्रः-अलगर्दव्यालः तस्य राजा तं पारिन्द्रराजम्-अजगरं प्रति गता-प्राप्ता, तस्या वाहनमित्यर्थः । किंविशिष्टं पारिन्द्रराजम् ? ।'अपारिं' अपगतवैरिम् । पुनः किंविशिष्टा या ? । तारं-देदीप्यमानं तेजो यस्याः सा 'तारतेजाः' । कस्याम् ? ।'सदसि' सभायां सुरपर्षदि । पुनः किंविशिष्टा या ? । सन्-शोभनः असिः-खड्गः तं प्रति बिभर्तीति 'सदसिभृत्' । पुनः किंविशिष्टा या ? । कालाः-श्यामाः कान्ता-मनोज्ञा अलकानां-चिकुराणां अन्ता-अग्रभागा यस्याः सा 'कालकान्तालकान्ता' । पुनः किंविशिष्टा या ? । सु-शोभनो रवः-शब्दो यासां तास्तादृश्यो याः सुरवध्वः-देवस्त्रियः ताभिः पूजिता-अर्चिता 'सुरवसुरवधूपूजिता' । कथम् ? ।'अरं' अत्यर्थम् । पुनः किंविशिष्टा या ? ।'जिता' जयनशीला । किं कर्मतापन्नम् ? ।'आरम्' अरिवृन्दम् । यद्वा 'जितारं' पारिन्द्रराजस्यापि

विशेषणं क्रियते । पुनः किंविशिष्टा या ? । अविषमा-सौम्या विषभृतः-सर्पाः त एव तेषां वा भूषणानि यस्याः सा 'अविषमविषभृद्भूषणा' । पुनः किंविशिष्टा या ? । 'अभीषणा' अक्रूरा । पुनः किंविशिष्टा या ? । भीः-भयं तेन (तया) हीना-रहिता । पुनः किंविशिष्टा या ? । 'कुवलयं-नीलोत्पलं[1], तस्य वलयं-मण्डलं तद्वत् श्यामो-नीलो देहो यस्याः सा 'कुवलयवलयश्यामदेहा' नीलकृष्णयोरैक्यत्वात्[2] । पुनः किंविशिष्टा या ? । अमदा-अनौद्धत्यकारिणी ईहा-चेष्टा इच्छा-वाञ्छा वा यस्याः सा 'अमदेहा' । एतादृशी वैरोट्या त्वां तर्याद् (त्रासाद्?) रक्षताम् । इति पदार्थः ।।

अथ समासः—तारं तेजो यस्याः सा तारतेजाः । सन् चासौ असिश्च सदसिः, सदसिं बिभर्तीति सदसिभृत् । अलकानां अन्ताः अलकान्ताः, कान्ताश्च ते अलकान्ताश्च कान्तालकान्ताः, कालाः कान्तालकान्ता यस्याः सा कालकान्तालकान्ता । अपगता अरयो यस्मात् स अपारिः, तमपारिम् । पारिन्द्राणां राजा इति पारिन्द्रराजः, तं पारिन्द्रराजम् । 'राजाहःसखिभ्यष्टच्' (पा० अ० ५, पा० ४, सू० ९१) । "पारिन्द्रो वाहसः शयुः" इति हैमकोषः (का० ४, श्लो० ३७१) । सुष्ठु रवो यासां ताः सुरवाः, सुराणां वध्वः सुरवध्वः, सुरवाश्च ताः सुरवध्वश्च सुरवसुरवध्वः, सुरवसुरवधूभिः पूजिता सुरवसुरवधुपूजिता । अरीणां समूहः आरं, आरं जितं येन स जितारः, तं जितारम् । न विषमः अविषमः, विषं बिभर्तीति विषभृत्, अविषमश्चासौ विषभृत् अविषमविषभृत्, एवं (स एव) भूषणं यस्याः सा अविषमविषभृद्भूषणा; यद्वा अविषमविषभृतः भूषणं यस्याः सा अविषमविषभृद्भूषणा । न भीषणा अभीषणा । भिया हीना भीहीना । अहीनां इनः अहीनः, अग्र्या चासौ पत्नी च अग्र्यपत्नी, अहीनस्य अग्र्यपत्नी अहीनाग्र्यपत्नी । कुवलयानां वलयं कुवलयवलयं, कुवलयवलयवत् श्यामो देहो यस्याः सा कुवलयवलयश्यामदेहा । न मदा अमदाः, अमदा ईहा यस्याः सा अमदेहा । अस्यां स्तुतौ सर्वपदेषु चित्रयमकालङ्कारः । इति तुर्यवृत्तार्थः ।। ९२ ।।

श्रीमत्पार्श्वजिनेन्द्रस्य, स्तुतेरर्थो लिपीकृतः ।
सौभाग्यसागराख्येन, सूरिणा ज्ञानसेविना ।।

त्रयोविंशतितमश्रीपार्श्वजिनस्तुतिः ।।४।२३।९२।।

(४)

दे० व्या०—यातेति । सा वैरोट्या देवी त्वां-भवन्तं त्रासाद्-आकस्मिकभयाद् अरं-शीघ्रं यथा स्यात् तथा त्रायतां-रक्षतादित्यन्वयः । 'त्रा रक्षणे' धातुः । 'त्रायताम्' इति क्रियापदम् । का कर्त्री ? । वैरोट्या देवी । कं कर्मतापन्नम् ? । त्वाम् । (कस्मात्?) त्रासात् । किंविशिष्टं त्वाम् ? । 'जितारं' अरीणां समूहः

१. 'कुवलयानि-नीलोत्पलानि तेषां वलयं' इति प्रतिभाति ।
२. 'ऐक्यत्वाद्' इत्यनुचितम्, 'ऐक्याद्' इत्यत्रोचितम् ।

आरं, जितं-भग्नं आरं येन स तम् । यत्तदोर्नित्याभिसम्बन्धाद् या वैरोट्या देवी सदसि-सभायां तारतेजाः-उत्कृष्टतेजाः वर्तते इत्यनुषङ्गः । किंविशिष्टा देवी ? । याता-आरूढा । कम् ? । पारिन्द्रराजं-अजगराधीशं, पारिन्द्राणां राजा तं पारिन्द्रराजमिति 'षष्ठीतत्पुरुषः' । 'राजाहःसखिभ्यष्टच्' (पा० अ० ५, पा० ४, सू० ९१) इति टच्प्रत्ययेन रूपसिद्धिः । "चक्रमण्डल्यजगरः पारिन्द्रो वाहसः शयुः" इत्यभिधान-चिन्तामणिः (का० ४, श्लो० ३७१) । किंविशिष्टं पारिन्द्रराजम् ? । 'अपारिं' अपगता अरयः-शत्रवो यस्य स तम् । पुनः किंविशिष्टा देवी ? । 'सदसिभृत्' सन्तं खड्गं बिभर्तीति तथा । क्विप्प्रत्ययान्तम् । पुनः किंविशिष्टा ? । 'कालकान्तालकान्ता' कालाः-कृष्णाः कान्ताः-मनोज्ञाः अलकानां-केशानां अन्ता यस्या सा तथा । पुनः किंविशिष्टा ? । 'सुरवसुरवधूपूजिता' सुष्ठु-शोभनो रवः-शब्दो यासां तास्तथा सुराणां वध्वः सुरवध्वः इति पूर्वं 'षष्ठीतत्पुरुषः', ततः सुरवाश्च ताः सुरवध्वश्चेति 'कर्मधारयः', ताभिः पूजिता-अर्चिता । स्तुतिपूर्वकं अमराङ्गनाभिः पूजिता इति तु निष्कर्षः । पुनः किंविशिष्टा ? । 'अविषमविषभृत्' न विषमा अविषमा इति पूर्वं 'नञ्समासः', सौम्या इत्यर्थः, ततः ते च ते विषभृतश्चेति 'कर्मधारयः', विषभृतः-सर्पाः त एव भूषणं-आभरणं यस्याः सा तथा । पुनः किंविशिष्टा ? । 'अभीषणा' न भीषणा अभीषणा इति 'नञ्समासः' । अरौद्रा इति निष्कर्षः । पुनः किंविशिष्टा ? । 'भीहीना' भिया हीना भीहीना इति 'तृतीयातत्पुरुषः' । भयरहितेति निष्कर्षः । पुनः किंविशिष्टा ? । 'अहीनाग्र्यपत्नी' अहीनो-धरणेन्द्रः तस्य अग्र्यपत्नी-मुख्यललना । अग्र्या चासौ पत्नी चेति पूर्वं 'कर्मधारयः' । पुनः किंविशिष्टा ? । 'कुवलयवलयश्यामदेहा' कुवलयानि-उत्पलानि तेषां वलयं-समूहः तद्वत् श्यामो-नीलो देहः-शरीरं यस्याः सा तथा । "उत्पलं स्यात् कुवलयं" इत्यभिधानचिन्तामणिः (का० ४, श्लो० २२९) । पुनः किंविशिष्टा ? । 'अमदेहा' अमदा-मदरहिता ईहा-चेष्टा यस्याः सा तथा ।। इति तुरीयवृत्तार्थः ॥ ४ । २३ । ९२ ॥

(५)

ध० टीका—यातेति । 'याता' गता । 'या' । 'तारतेजाः' उज्ज्वलप्रभा । 'सदसि' सभायाम् । 'सदसिभृत्' सन्तं-शोभनं असिं बिभर्ति या सा । 'कालकान्तालकान्ता' कालाः-कृष्णाः कान्ता-रुचिरा अलकान्ताः-कुरुलाग्राणि यस्या सा । 'अपारिं' अपगतारिम् । 'पारिन्द्रराजं' अजगरेन्द्रम् । 'सुरवसुरवधूपूजिता' सुरवाः-शोभनरवा याः सुरवध्वः-देवाङ्गनाः ताभिः पूजिता । 'अरं' शीघ्रम् । 'जितारं' जितं आरं-अरिसमूहो येन तम् । 'सा' । 'त्रासात्' भयात् । 'त्रायतां' रक्षतु । 'त्वां' भवन्तम् । 'अविषमविषभृद्भूषणा' अविषमाः-सौम्या विषभृतः-सर्पा भूषणं यस्याः सा । 'अभीषणा' अरौद्रा । 'भीहीना' भयरहिता । 'अहीनाग्र्यपत्नी' अहीनां-नागानां इनः-प्रभुः धरणेन्द्रः तस्याग्र्यपत्नी-प्रधानकलत्रम्, वैरोट्या देवीत्यर्थः । 'कुवलयवलयश्यामदेहा' कुवलयानि-नीलोत्पलानि तेषां वलयं-समूहस्तद्वत्

श्यामदेहा । 'अमदेहा' अमदा-मदरहिता ईहा-चेष्टा यस्याः सा । या सदसि सारतेजाः पारिन्द्रराजं याता सा त्वां त्रासात् त्रायतामिति योगः ॥ ४ । २३ । ९२ ॥

(६)

अवचूरिः

याता-प्राप्ता देवी । तारम्-उज्ज्वलं तेजो यस्याः सा । सदसि-सभायाम् । सन्तं-शोभनमसिं बिभर्ति सा । कालाः-कृष्णा कान्ता-रुचिरा अलकानामन्ताः-प्रान्ता यस्याः सा । अपगता अरयो यस्मात् तमपारिम् । पारिन्द्रराजम्-अजगरेन्द्रम् । सुरवाः-सुशब्दा या सुरवध्वो-देवकान्तास्ताभिः पूजिता । अरं-शीघ्रं जितमारम्-अरिसमूहो येन । सा यच्छब्दादिष्टा त्रासाद्-भयात् त्रायतां-रक्षताम् । त्वां-भवन्तम् । अविषमाः-सौम्या विषभृतः-सर्पा भूषणं यस्याः सा । तथा अभीषणा-अरौद्राकारा । भिया-भयेन हीना-त्यक्ता । अहीनो-नागपतिस्तस्याग्र्या-प्रधाना पत्नी अग्र्यमहिषी । वैरोट्येत्यर्थः । कुवलयानां वलयं-समूहस्तद्वच्छ्यामो देहो यस्याः सा । अमदा-मदरहिता ईहा-चेष्टा यस्याः सा । या सदसि पारिन्द्रराजं (याता-) प्राप्ता सा अहीनाग्र्यपत्नी त्रासात् त्रायतामिति संबन्धः ॥ ४ । २३ । ९२ ॥

२४. श्रीवीरजिनस्तुतयः

अथ श्रीवीरनाथाय विज्ञप्तिः—

नमदमरशिरोरुहस्रस्तसामोदनिर्निद्रमन्दारमालारजोरञ्जितांहे ! धरित्रीकृता—
वन ! [1]वरतमसङ्गमोदारतारोदितानङ्गनार्यावलीलापदेहेक्षितामोहिताक्षो भवान् ।
मम वितरतु 'वीर !' निर्वाणशर्माणि जातावतारो धराधीश 'सिद्धार्थ' धाम्नि क्षमालङ्कृता—
वनवरतमसङ्गमोदारतारोदितानङ्गनार्याव ! लीलापदे हे क्षितामो हिताक्षोभवान् ॥ १ ॥ ९३॥

- अर्णवदण्डकः

(१)

ज० वि०—नमदमरेति । हे वीर !-महावीर ! । हे शब्द आभिमुख्याभिव्यक्तये सम्बोधनानां प्राक् प्रयुज्यते । भवान्-त्वं मम-मे निर्वाणशर्माणि-मोक्षसुखानि वितरतु-प्रयच्छतु इति क्रियाकारकसम्बन्धः । अत्र 'वितरतु' इति क्रियापदम् । कः कर्ता ? 'भवान्' । कानि कर्मतापन्नानि ? 'निर्वाणशर्माणि' । कस्य ? 'मम' । भवान् कथंभूतः ? 'वरतमसङ्गमोदारतारोदितानङ्गनार्यावलीलापदेहेक्षितामोहिताक्षः' वरतमा-प्रधानतरा सङ्गम[क]स्य-सङ्गमकनाम्नो वैमानिकस्य अथवा वरतमः सङ्गमो यस्याः सा तथा उदारतारा-अदीनलोचनकनीनिका उदितानङ्गा-उद्गतस्मरा एवंविधा या नार्यावली-स्त्रीश्रेणी तस्या लापो-जल्पनं, देहः-शरीरं, ईक्षितं-विलोकितं, तैरमोहितानि-अनासक्तानि अक्षाणि-इन्द्रियाणि यस्य स तथा । पुनः

१. 'वरतम ! सङ्गमो०' इत्यपि पाठः ।

कथं० ? 'जातावतारः' अवतीर्णः, उत्पन्न इत्यर्थः । कस्मिन् ? 'धराधीशसिद्धार्थधाम्नि' धराधीशः-क्षितिपतिः सिद्धार्थाभिधस्तस्य धाम्नि-गेहे । कथंभूते ? 'क्षमालङ्कृतौ' क्षमायाः-भुवः अलङ्कृतौ-अलङ्कारभूते । पुनः कथंभूते ? 'लीलापदे' विलासस्थाने । भवान् पुनः कथंभूतः ? 'क्षितामः' क्षपितरोगः । पुनः कथंभूतः ? 'अक्षोभवान्' क्षोभवर्जितः । शेषाणि सर्वाण्यपि श्रीवीरस्य सम्बोधनानि, तद्व्याख्या चैवम्-हे 'नमदमरशिरोरुहस्रस्तसामोदनिर्निद्रमन्दारमालारजोरञ्जितांहे !' नमन्तः-प्रणमन्तो ये अमरा-देवाः तेषां ये शिरोरुहाः-केशास्तेभ्यः स्रस्ताः-गलिताः सामोदाः-सुरभयः एवंविधा या निर्निद्राणां-विकसितानां मन्दाराणां-देवद्रुमविशेषाणां कुसुमानां मालाः-स्रजः तासां यद् रजः-परागः तेन रञ्जितौ-पाटलितौ अंह्री-चरणौ यस्य स तथा, तत्सम्बो० हे नमद० । हे 'धरित्रीकृतावन !' धरित्र्याः-भुवः कृतावन !-विहितत्राण ! । अत्र धरित्रीशब्देन धरित्रीगता लोका ज्ञेयाः, आधाराधेययोः कथञ्चिदभेदोपचारात् । हे 'असङ्गमोद !' सङ्गः-द्व्यादिसंसर्गः मोदो-धनादिप्राप्त्या प्रीतिः ताभ्यां रहितः, अथवा सङ्गाद् यो मोदस्तेन रहितः, (तत्सं० अस०) स्वतन्त्रसुखेत्यर्थः । कथम् ? 'अनवरतम्' निरन्तरम् । हे 'अरत !' असक्त ! । हे 'अरोदित !' रोदनवर्जित ! । हे 'अनङ्गन !' अङ्गनाः-नार्यस्ताभी रहित ! । हे 'आर्याव !' आर्यान्-आर्यलोकान् अवति-रक्षति यः स तथा तत्सम्बो० हे आर्याव ! । हे 'हित !' हितकारिन् ! ॥

अथ समासः—नमन्तश्च ते अमराश्च नमद० 'कर्मधारयः' । शिरसि रोहन्तीति शिरोरुहाः 'तत्पुरुषः' । नमदमराणां शिरोरुहाः नमद० 'तत्पुरुषः' । नमदमरशिरोरुहेभ्यः स्रस्ता नमद० 'तत्पुरुषः' । सह आमोदेन वर्तन्त इति सामोदाः 'तत्पुरुषः' । निर्गता निद्रा येभ्यस्ते निर्निद्राः 'बहुव्रीहिः' । सामोदाश्च ते निर्निद्राश्च सामो० 'कर्मधारयः' । सामोदनिर्निद्राश्च ते मन्दाराश्च सामोद० 'कर्मधारयः' । नमदमरशिरोरुहस्रस्ताश्च ते सामोदनिर्निद्रमन्दाराश्च नमद० 'कर्मधारयः' । नमदमरशिरोरुहस्रस्तसामोदनिर्निद्रमन्दाराणां माला नमद० 'तत्पुरुषः' । नमदमरशिरोरुहस्रस्तसामोदनिर्निद्रमन्दारमालानां रजः नमद० 'तत्पुरुषः' । नमदमरशिरोरुहस्रस्तसामोदनिर्निद्रमन्दारमालारजसा रञ्जितौ नमद० 'तत्पुरुषः' । नमदमरशिरोरुहस्रस्तसामोदनिर्निद्रमन्दारमालारजोरञ्जितौ अंह्री यस्य स नमद० 'बहुव्रीहिः' । तत्सम्बोधनं हे नमद० । कृतमवनं येन स कृतावनः 'तत्पुरुषः' । धरित्र्याः कृतावनो धरित्री० 'तत्पुरुषः' । तत्सम्बो० हे धरि० । अतिशयेन वरा वरतमा । नारीणामावली नार्यावली 'तत्पुरुषः' । उदारा तारा यस्याः सा उदार० 'बहुव्रीहिः' । उदितोऽनङ्गो यस्याः सा उदिता० 'बहुव्रीहिः' उदितानङ्गा चासौ नार्यावली च उदिता० 'कर्मधारयः' । उदारतारा चासावुदितानङ्गनार्यावली च उदार० 'कर्मधारयः' । सङ्गमस्योदारतारोदितानङ्गनार्यावली सङ्गमो० 'तत्पुरुषः' । वरतमा चासौ सङ्गमोदारतारोदितानङ्गनार्यावली च वरतम० 'कर्मधारयः' । अथवा वरतमः सङ्गमो यस्याः सा वरतम० 'बहुव्रीहिः' । वरतमसङ्गमा चासावुदारतारोदितानङ्गनार्यावली च वरतम० 'कर्मधारयः' । लापश्च देहश्च ईक्षितं च लापदेहे० 'इतरेतरद्वन्द्वः' । वरतमसङ्गमोदारतारोदितानङ्गनार्यावल्या लापदेहेक्षितानि वरतम०

'तत्पुरुषः' । न मोहितानि अमोहितानि 'तत्पुरुषः' । वरतमसङ्गमोदारतारोदितानङ्गनार्यावलीलापदेहेक्षितैरमोहितानि वरतम० 'तत्पुरुषः' । वरतमसङ्गमोदारतारोदितानङ्गनार्यावलीलापदेहेक्षितामोहितान्यक्षाणि यस्य स वरतम० 'बहुव्रीहिः' । निर्वाणस्य शर्माणि निर्वाण० 'तत्पुरुषः' । तानि निर्वाण० । जातोऽवतारो यस्य स जातावतारः 'बहुव्रीहिः' । धराया अधीशो धराधीशः 'तत्पुरुषः' । धराधीशश्चासौ सिद्धार्थश्च धरा० 'कर्मधारयः'। धराधीशसिद्धार्थस्य धाम धरा० 'तत्पुरुषः' । तस्मिन् धरा० । अलङ्कृतिरिवालङ्कृतिः । क्षमाया अलङ्कृतिः क्षमा० 'तत्पुरुषः' । तस्यां क्षमा० । सङ्गश्च मोदश्च सङ्गमोदौ 'इतरेतरद्वन्द्वः' । न विद्येते सङ्गमोदौ यस्य सोऽसङ्ग० 'बहुव्रीहिः' । अथवा सङ्गान्मोदः सङ्गामोदः 'तत्पुरुषः' । न विद्यते सङ्गमोदो यस्य सोऽसङ्ग० 'बहुव्रीहिः' । तत्सम्बो० हेऽसङ्ग० । न रतोऽरतः 'तत्पुरुषः' । तत्सम्बो० हेऽरत ! । न विद्यते रोदितं यस्य सोऽरोदितः 'बहुव्रीहिः' । तत्सम्बो० हेऽरोदित ! । न विद्यतेऽनङ्गो यस्य सोऽनङ्गः 'बहुव्रीहिः' । तत्सम्बो० हेऽनङ्ग ! । आर्यानवतीत्यार्यावः 'तत्पुरुषः' । तत्सम्बो० हे आर्याव ! । लीलायाः पदं लीलापदं 'तत्पुरुषः' । तस्मिन् लीलापदे । क्षित आमो येन स क्षितामः 'बहुव्रीहिः' । क्षोभोऽस्यास्तीति क्षोभवान् । न क्षोभवान् अक्षोभवान् 'तत्पुरुषः' । इति काव्यार्थः ॥९३॥

(२)

सि० वृ०—नमदमरेति । हे वीर ! हे महावीर ! हे ज्ञातनन्दन ! भवान्-त्वं मम-मे निर्वाणशर्माणि-मोक्षसुखानि वितरतु-प्रयच्छत्वित्यर्थः । विशेषेण ईरयति-कम्पयति-प्रेरयति कर्मशत्रूनिति वीरः । विपूर्व 'ईर गतिकम्पनयोः' पचाद्यच् । विशिष्टा ईः-लक्ष्मीः तपोरूपा तीर्थकृन्नामकर्मोदयसमुद्भूता वा तया राजतेऽसौ वीरः । 'राज दीप्तौ', 'अन्येभ्योऽपि–' (पा० अ० ३, पा० २, सू० ७५) इतीड्डित्वाट्टिलोपः । यद्वा ईरणं ईरः 'ईर गतौ' भावे घञ् । ये गत्यर्थास्ते ज्ञानार्थाः प्राप्त्यर्थाश्चेति वचनात् विशिष्ट ईरो - ज्ञानमस्य (स) वीरः । यद्वा विशिष्टा पञ्चत्रिंशद्वाग्गुणोपेता इरा-वाणी यस्येति वा । कर्मशत्रुसेनाजेतृत्वाद् दर्शितपराक्रमो वा वीरः । यद्वा निरुक्तिवशात् कर्मततिविदारणाद् वा वीरस्तस्य सम्बोधनं क्रियते हे वीर ! । 'तृ प्लवनतरणयोः' धातोः 'आशीः प्रेरणयोः' (सा० सू० ७०३) कर्तरि परस्मैपदे मध्यमपुरुषैकवचनं[1] हिः । 'अप् कर्तरि' (सा० सू० ६९१) इत्यप् । 'गुणः' (सा० सू० ६९२) । 'अतः' (सा० सू० ७०५) इति हेर्लुक् । तथा 'वितरतु' इति सिद्धम् । अत्र 'वितरतु' इति क्रियापदम् । कः कर्ता ? । त्वम्[2] । कानि कर्मतापन्नानि ? । 'निर्वाणशर्माणि' निर्वाणस्य-मोक्षस्य शर्माणि-सुखानि तानि निर्वाणशर्माणि । कस्य ? । 'मम' । कथंभूतो भवान् ? । 'वरतमसङ्गमोदारतारोदितानङ्गनार्यावलीलापदेहेक्षितामोहिताक्षः' । वरतमा-प्रधानतमा सङ्गम[क]स्य-सङ्गमकनाम्नो वैमानिकस्य देवस्य अथवा वरतमः सङ्गमो यस्याः सा वरतमसङ्गमा सा चासौ 'उदारतारा' च उदारा-अदीना तारा लोचनकनीनिका

१. भ्रान्तमिदं 'वितरतु' पदस्य तृतीयपुरुषैकवाच्यत्वात् ।
२. अत्र 'भवान्' इत्युचितम्प्रतिभाति ।

यस्याः सा वरतमसङ्गमोदारतारा, सा चासौ 'उदितानङ्गा' उदितः-उदयं प्राप्तः अनङ्गः-कामो यस्याः सा वरतमसङ्गमोदारतारोदितानङ्गा, एवंविधा या नार्यावली-नारीणामावली-श्रेणी-स्त्रीश्रेणी तस्याः [आ]लापो-जल्पनं देहः-शरीरं ईक्षितं-विलोकितं, [आ]लापश्च देहश्च ईक्षितं च [आ]लापदेहेक्षितानि 'इतरेतरद्वन्द्वः', तैः अमोहितानि-अनासक्तानि-न मोहं प्राप्तानि अक्षाणि-इन्द्रियाणि यस्य स तथा । पुनः कथंभूतः ? । 'जातावतारः' जातः अवतारः-अवतरणं यस्य स तथा । कस्मिन् ? । 'धराधीशसिद्धार्थधाम्नि' धरायाः-पृथिव्याः अधीशः-स्वामी यः सिद्धार्थनामा तस्य धाम्नि-गृहे । कथंभूते ? । 'क्षमालङ्कृतौ' क्षमायाः-पृथिव्याः अलङ्कृतौ-अलङ्कारभूते । "क्षितिः क्षोणी क्षमाऽनन्ताः" इति हैमः (का० ४, श्लो० २) । पुनः कथंभूते ? । 'लीलापदे' लीलाया-विलासस्य पदे स्थाने । भवान् कथंभूतः ? । 'क्षितामः' क्षितः-क्षयितः आमः-रोगो यस्मात् सः । पुनः कथंभूतः ? । 'अक्षोभवान्' न क्षोभो विद्यते यस्यासौ अक्षोभवान् । अवशिष्टानि सर्वाणि श्रीवीरस्य सम्बोधनानि । तेषां व्याख्या त्वेवम्-हे 'नमदमरशिरोरुहस्रस्तसामोदनिर्निद्रमन्दारमालारजोरञ्जितांह्रे !' नमन्तः-प्रणमन्तो ये अमराः-देवाः तेषां ये शिरोरुहाः-केशाः तेभ्यः स्रस्ताः-पतिताः ताश्च ताः सामोदाः-सुरभयः एवंविधा या निर्निद्राणां-विकसितानां मन्दाराणां-देवद्रुमकुसुमानां मालाः-स्रजस्तासां यद् रजः-पुष्परेणुस्तेन रञ्जितौ-श्वेतरक्तीकृतौ अंह्री चरणौ यस्य स तथा तस्य संबोधनं हे नम० । हे 'धरित्रीकृतावन !' धरित्र्याः-भुवः, कथञ्चिदभेदात् धरित्रीगतलोकस्येत्यर्थः, कृतं-विहितं अवनं-रक्षणं येन स तथा तस्य संबोधनं हे धरित्रीकृतावन ! । "धात्री धरित्री धरणी" इति हैमः (का० ४, श्लो० १) । हे 'असङ्गमोद !' सङ्गः-स्त्र्यादिसंसर्गः मोदो-धनादिप्राप्त्या प्रीतिः, सङ्गश्च मोदश्च सङ्गमोदौ 'इतरेतरद्वन्द्वः', ताभ्यां रहितो-वर्जितस्तत्संबोधनं हे असङ्गमोद ! । हे 'अनङ्गन !' अङ्गनाः-नार्यस्ताभिः रहितस्तस्य संबोधनं हे अनङ्गन ! । कथम् ? । अनवरतं-निरन्तरम् । हे अरत !-असक्त ! । हे 'अरोदित !' न विद्यते रोदितं यस्य स तथा तस्य (सं० हे अरो०) । हे 'आर्याव !' आर्यान्-आर्यलोकान् अवति-रक्षति तथा तस्य सं० हे आर्याव ! । हे हित !—हितकारिन् ! । 'दधातेर्हिः' (सा० सू० १३०५) ॥९३॥

(३)

सौ० वृ०—श्रीवृषभाद्याः पार्श्वान्ता जिना यथार्थनामानः स्तुताः । एते सर्वेऽपि वर्धमानज्ञानदर्शनादिचरित्राद्यनेकगुणा भवन्ति । अनेन सम्बन्धेनायातस्य चतुर्विंशतितमश्रीवर्धमाननाम्नः देवैः कृतापरनामश्रीमहावीरनामजिनस्य स्तुतेर्व्याख्यानं विधीयते-नमदमरेति । हे 'वीर' ! हे श्रीमहावीर ! विशेषेण स्ववीर्यस्वात्मने (?) स्वभावे ईरयति-प्रेरयति इति वीरः तस्य सं० हे वीर ! । नमन्तः-प्रणमन्तः ये अमरा-देवाः तेषां शिरोरुहाः-केशाः-चिकुराः तेभ्यः स्रस्ताः-पतिताः सामोदाः आमोदः-सुगन्धः-परिमलः तेन सहिताः सामोदाः निर्निद्रा-विकसिता-विकस्वरा मन्दाराणां-देवतरूणां-कल्पवृक्षाणां या

मालाः-स्रजः तासां रजांसि-परागाः तैः रञ्जितौ-पाटलीकृतौ अंह्री-चरणौ यस्य स नमदमरशिरोरुहस्रस्त-सामोदनिर्निद्रमन्दारमालारजोरञ्जितांह्रिः, तस्य सं० हे 'नमदमरशिरोरुहस्रस्त-सामोदनिर्निद्रमन्दार-मालारजोरञ्जितांह्रे' ! । 'धरित्रीकृतावन' ! आधाराधेयोपचाराद् धरित्री-पृथ्वी तस्यां स्थिता ये जन्तवः पदार्था वा तेषां कृतं-विहितं अवनं-रक्षणं येन स धरित्रीकृतावनः, तस्य सं० धरित्रीकृतावन ! । हे 'असङ्गमोद' ! नास्ति (न स्तः) सङ्गः-प्रसङ्गः मोदः-इष्टप्राप्तिलक्षणो हर्षः तौ द्वौ यस्य सः असङ्गमोदः, तस्य सं० हे असङ्गमोद ! । हे 'अरत !' न विद्यते रतं-सुरतं यस्य सः अरतः, तस्य सं० हे अरत ! । हे 'अरोदित' ! हे अरोदन ! । [हे 'अनङ्ग !'[1] हे अदेह ! ।] भवान्-त्वं मे-मम निर्वाणशर्माणि-मोक्षसुखानि अनवरतं-निरन्तरं वितरतु इत्यन्वयः । 'वितरतु' इति क्रियापदम् । क : कर्ता ? । 'भवान्' । 'वितरतु' ददातु । कानि कर्मतापन्नानि ? । 'निर्वाणशर्माणि' । कस्य ? । 'मम' । कथम् ? । 'अनवतरम्' । किंविशिष्टो भवान् ? । वरतमः-प्रधानतरः सङ्गमाख्यो वैमानिको देवः तस्य उदारा-स्फारा तारा-कनीनिका उदितं-शब्दं अनङ्गः-कामः यासां ताः तादृशा नार्यः-स्त्रियः तासां आवली-श्रेणिः तस्या लापः देहः-शरीरं ईक्षितं-कटाक्षावलोकनं तैः कृत्वा अमोहितानि-न व्यामोहं प्राप्तानि अक्षाणि-इन्द्रियाणि यस्य स वरतमसङ्गमोदारतारोदितानङ्गनार्यावलीलापदेहेक्षितामोहिताक्षः । पुनः किंविशिष्टो भवान् ? । 'जातावतारः' कृतावतारः, प्राप्तजन्मा । कस्मिन् ? । धरा-पृथ्वी तस्या अधीशः-स्वामी यः सिद्धार्थनामा तस्य धाम-गृहं तस्मिन् 'धराधीशसिद्धार्थधाम्नि' । किंविशिष्टे धराधीशसिद्धार्थधाम्नि ? । क्षमा-पृथ्वी तस्यां अलङ्कृतौ-अलङ्कारभूते । पुनः किंविशिष्टे धराधीशसिद्धार्थधाम्नि ? । लीला-विलासः तस्याः पदं-स्थानं लीलापदं तस्मिन् लीलापदे । पुनः किंविशिष्टो भवान् ? । 'क्षितामः' क्षिताः-गताः आमाः-रोगा यस्मात् स क्षितामः । हे 'अनङ्गन !' अङ्गना-नार्यः ताभी रहितः (तस्य सं०) अन० । हे 'आर्याव !' आर्यान्-आर्यलोकान् अवति-रक्षति यः स आर्यावः तस्य सं० हे आर्याव ! । हे 'हित !' हितकारिन् ! । पुनः किंविशिष्टो भवान् ? । न विद्यते क्षोभो यस्यासौ अक्षोभवान् । इति पदार्थः ।।

अथ समासः—नमन्तश्च ते अमराश्च नमदमराः, शिरसि रोहन्ति-जायन्ते इति शिरोरुहाः, नमदमराणां शिरोरुहाः नमदमरशिरोरुहाः, नमदमरशिरोरुहेभ्यः स्रस्ताः नमदमरशिरोरुहस्रस्ताः, आमोदेन सहिताः सामोदाः, निर्गता निद्रा यासु ता निर्निद्राः, मन्दाराणां माला (मन्दारमालाः), नमदमर-शिरोरुहस्रस्ताश्च ताः सामोदाश्च निर्निद्राश्च ता मन्दारमालाश्च नमदमरशिरोरुहस्रस्तसामोदनिर्निद्र-मन्दारमालाः, (नमदमरशिरोरुहस्रस्तसामोदनिर्निद्रमन्दारमालानां रजांसि) नमदमरशिरोरुहस्रस्तसामो-दनिर्निद्रमन्दारमालारजांसि, नमदमरशिरोरुहस्रस्तसामोदनिर्निद्रमन्दारमालारजोभिः रञ्जितौ अंह्री यस्य स नमदमरशिरोरुहस्रस्तसामोदनिर्निद्रमन्दारमालारजोरञ्जितांह्रिः, तस्य सं० हे नमदमरशिरोरुहस्रस्त-

१. अयं पाठः प्रामादिकः ।

सामोदानिर्निद्रमन्दारमालारजोरञ्जितांहे ! । धरित्र्यां-धरित्रीस्थितानां जन्तूनां कृतं अवनं-रक्षणं येन स धरित्रीकृतावनः, तस्य सं० हे धरित्रीकृतावन ! । अत्र धरित्रीशब्देन जगद् गृह्यते । "धरित्री धरिणी [धरणी] विश्वं, लोकः क्षेमेषु शाश्वतं" इति व्याडिः । वरतमश्चासौ सङ्गमश्च वरतमसङ्गमः, यद्वा वरः-प्रधानः वैमानिकत्वात् तेषु तम इव तमः तीर्थंकरोपसर्गकारित्वेन वरतमसङ्गमः, ताराश्च उदितानि च अनङ्गश्च तारोदितानङ्गाः, (उदाराश्च तारोदितानङ्गाश्च उदारतारोदितानङ्गाः), [वरतमसङ्गमस्य उदारतारोदितानङ्गाः], उदारतारोदितानङ्गा यासां ता उदारतारोदितानङ्गाः, उदारतारोदितानङ्गाश्च ता नार्यश्च उदारतारोदितानङ्गनार्यः, वरतमसङ्गमस्य उदारतारोदितानङ्गनार्यः वरतमसङ्गमोदारतारोदितानङ्गनार्यः, वरतमसङ्गमोदारतारोदितानङ्गनारीणामावली वरतमसङ्गमोदारतारोदितानङ्गनार्यावली, लापाश्च-आलापाश्च देहाः-शरीराणि ईक्षितानि-विलोकितानि च लापदेहेक्षितानि, वरतमसङ्गमोदारतारोदितानङ्गनार्यावल्याः लापदेहेक्षितानि वरतमसङ्गमोदारतारोदितानङ्गनार्यावलीलापदेहक्षितानि, न मोहितानि अमोहितानि, अमोहितानि च अक्षाणि च अमोहिताक्षाणि, वरतमसङ्गमोदारतारोदितानङ्गनार्यावलीलापदेहेक्षितैः अमोहिताक्षाणि यस्य स वरतमसङ्गमोदारतारोदितानङ्गनार्यावलीलापदेहेक्षितामोहिताक्षः, यद्वा अतिशयेन वराः वरतमाः-प्रधानाः सङ्गमा-लीलविलासालिङ्गनादयः यासां तास्तादृश्यो नार्यः-स्त्रियः इत्यपि समासोऽस्ति अर्थोऽप्यस्ति । निर्वाणस्य शर्माणि (निर्वाणशर्माणि), तानि निर्वाणशर्माणि । जातः अवतारो यस्य स जातावतारः । धराया अधीशः धराधीशः, धराधीशश्चासौ सिद्धार्थश्च धराधीशसिद्धार्थः, धराधीशसिद्धार्थस्य धाम (धराधीशसिद्धार्थधाम), तस्मिन् धराधीशसिद्धार्थधाम्नि । क्षमायाः अलङ्कृतिरिव अलङ्कृतिः क्षमालङ्कृतिः, तस्यां क्षमालङ्कृतौ । सङ्गश्च मोदश्च सङ्गमोदौ, यद्वा सङ्गमात् इष्टप्राप्तेः मोदः सङ्गमोदः, (न विद्येते सङ्गमोदौ) न विद्यते सङ्गमोदो (वा) यस्य सः असङ्गमोदः, तस्य सं० हे असङ्गमोद ! । यद्वा न विद्यते सङ्गो यस्य स असङ्गः, तस्य सं० हे असङ्ग ! । "मास्तु हर्षे विधौ मासे" इत्यनेकार्थवचनात् मासं-हर्षं ददातीति मोदः(?), तस्य सं० हे मोद ! इत्यपि व्याख्यानम् । न रतः अरतः, तस्य सं० हे अरत ! । नास्ति रोदितं यस्य सः अरोदितः, तस्य सं० हे अरोदित !, गतशोक इत्यर्थः । नास्ति अङ्गना यस्य सः अनङ्गनः, तस्य सं० हे अनङ्गन ! । आर्यान्-आर्यलोकान् अवति-रक्षति यः स आर्यावः, तस्य सं० हे आर्याव ! । लीलायाः पदं लीलापदं, तस्मिन् लीलापदे । हे इति सम्बोधनपदं आभिमुख्याभिव्यक्तये सर्वत्र योज्यम् । क्षिता-गता आमा-रोगा यस्मात् स क्षितामः । हे हित !—हे हितकारिन् ! । क्षोभोऽस्यास्तीति क्षोभवान्, न क्षोभवान् अक्षोभवान् । चण्डवृष्टिप्रयातादिदण्डकः । इति प्रथमवृत्तार्थः ॥ ९३ ॥

(४)

दे० व्या०—नमदमरेति । हे वीर !-वर्धमान ! भवान्-त्वं मम निर्वाणशर्माणि अनवरतं-निरन्तरं यथा स्यात् तथा वितरतु-ददातु इत्यन्वयः । 'तॄ प्लवनतरणयोः' इति धातुः । 'वितरतु' इति क्रियापदम् ।

कः कर्ता ? । त्वम् । कानि कर्मतापन्नानि ? । निर्वृतिशर्माणि-मुक्तिसुखानि । निर्वृतेः शर्माणि निर्वृतिशर्माणि इति विग्रहः । "निर्वाणं ब्रह्म निर्वृतिः" इत्यभिधानचिन्तामणिः (का० १, श्लो० ७४) । किंविशिष्टो भवान् ? । 'क्षितामः' क्षितः-क्षपितः आमो-रोगो यस्य स तथा । पुनः किंविशिष्टः ? । 'अक्षोभवान्' नास्ति क्षोभो यस्यासौ तथा । पुनः किंविशिष्टः ? । 'जातावतारः' जातो-गृहीतः अवतारो येन स तथा । कस्मिन् ? । 'धराधीशसिद्धार्थधाम्नि' धरायाः-पृथिव्या अधीशः-स्वामी यः सिद्धार्थः-सिद्धार्थनामा राजा तस्य धाम्नि-गृहे । किंविशिष्टे धाम्नि ? । 'क्षमालङ्कृतौ' क्षमायाः-पृथिव्याः अलङ्कृतौ-अलङ्कारभूते । पुनः किंविशिष्टे ? । 'लीलापदे' लीलाया-विलासस्य पदे-स्थाने । 'नमदमरशिरोरुहस्रस्तसामोदनिर्निद्रमन्दारमालारजोरञ्जितांह्रे !' इति । नमन्तः-प्रणमन्तो ये अमरा-देवाः तेषां शिरोरुहाः-केशाः तेभ्यः स्रस्ताः-पतिताः याः सामोदनिर्निद्रमन्दारमालाः-सुगन्धिविकसितकल्पवृक्षस्रजः, निर्निद्राश्च ता मन्दारमालाश्चेति पूर्वं समासः, ततः सामोदाश्च ता निर्निद्रमन्दारमालाश्चेति पूर्वपदान्वितः 'कर्मधारयः', तासां रजसा-परागेण रञ्जितौ-पञ्जरितौ अंह्री-चरणौ यस्य स तस्यामन्त्रणम् । 'धरित्रीकृतावन' ! (इति) । धरित्र्याः-पृथिव्याः कृतं अवनं-रक्षणं येन स तस्यामन्त्रणम् । 'वरतमसङ्गमोदारतारोदितानङ्गनार्यावलीलापदेहेक्षितामोहिताक्ष !' इति । अतिशयेन वराः वरतमाः सङ्गम[क]स्य-सङ्गमनाम्नो देवस्य सम्बन्धिनी उदारा-स्फारा तारा-मनोहरा सा चासौ उदितानङ्गा या नार्यावली उदितः-उदयं प्राप्तः अनङ्गः-कन्दर्पः यस्यां सा चासौ नारीणां आवली-पङ्क्तिः तस्याः [आ]लापेन-संभाषणेन, "आपृच्छा-ऽऽलापः संभाषः" इत्यभिधानचिन्तामणिः (का० २, श्लो० १८९), देहेन-शरीरेण ईक्षितेन-विलोकितेन न मोहितानि न मोहं प्राप्तानि अक्षाणि-इन्द्रियाणि यस्य स तस्यामन्त्रणम् । "बिभीतकोऽक्षोऽक्षमिन्द्रियम्" इत्यनेकार्थः । 'असङ्गमोद !' इति । नास्ति सङ्गमात्-संसारबन्धात् मोदः-प्रमोदो यस्य स तस्यामन्त्रणम् । 'अरत !' इति । नास्ति रतं-मैथुनाभिलाषो यस्य स तस्यामन्त्रणम् । 'अनङ्गन !' इति । नास्ति अङ्गना-वल्लभा यस्य स तस्यामन्त्रणम् । 'आर्याव' ! इति । आर्यान्-प्रशस्यान् अवति-रक्षतीत्यार्यावः तस्यामन्त्रणम् । हे हित ! हितकारिन् । 'दधातेर्हिः' (सा० सू० १३०५) इत्यनेन हिरादेशः । एतानि सर्वाणि भगवत आमन्त्रणपदानि ।। इति प्रथमवृत्तार्थः ।। ९३ ।।

(५)

ध० टीका—नमदिति । 'नमदमरशिरोरुहस्रस्तसामोदनिर्निद्रमन्दारमालारजोरञ्जितांह्रे !' नमतां अमराणां शिरोरुहेभ्यः-केशेभ्यः स्रस्ताः सामोदा निर्निद्राणां-विकसितानां मन्दाराणां या मालाः-स्रजस्तासां रजसा रञ्जितांह्रे-पाटलितचरण ! । 'धरित्रीकृतावन !' धरित्र्याः-भुवः कृतावन-विहितरक्ष ! । 'वरतमसङ्गमोदारतारोदितानङ्गनार्यावलीलापदेहेक्षितामोहिताक्षः' वरतमा-प्रधानतमा सङ्गमस्य-सङ्गमकनाम्नो

वैमानिकस्य सम्बन्धिनी उदारा च तारा च, अथवा वरतमः सङ्गमः-समागमो यस्याः सा वरतमसङ्गमा उदारतारा-अदीनलोचनकनीनिका उदितानङ्गा-उद्गतस्मरा या नार्यावली-नारीणां आवली-पङ्क्तिस्तस्या लापेन-जल्पितेन देहेन ईक्षितेन च अमोहितानि अक्षाणि-इन्द्रियाणि यस्य सः । 'भवान्' त्वम् । 'मम' मे । 'वितरतु' प्रयच्छतु । 'वीर !' हे वीरजिन ! । 'निर्वाणशर्माणि' मोक्षसुखानि । 'जातावतारः' अवतीर्णः, उत्पन्न इत्यर्थः । 'धराधीशसिद्धार्थधाम्नि' धराधीशः-क्षितिपतिः यः सिद्धार्थाभिधानस्तस्य धाम्नि-गृहे । 'क्षमालङ्कृतौ' क्षमायाः-भुवोऽलङ्कारभूते । 'अनवरतं' अजस्रम् । 'असङ्गमोद !' सङ्गमोदाभ्यां रहित ! । यदिवा सङ्गाद् यो मोदः स नास्ति यस्य असौ असङ्गमोदः-स्वतन्त्रसुखस्तस्यामन्त्रणम् । 'अरत !' असक्त ! । 'अरोदित !' रोदितहीन ! । 'अनङ्गन !' अङ्गनावर्जित ! । 'आर्याव !' आर्यानवति यस्तदामन्त्रणम् । 'लीलापदे' विलासानां स्थाने । 'हे' इत्यामन्त्रणं पदम् । 'क्षिताम !' क्षपितरोग । 'हित !' हितकारिन् ! । 'अक्षोभवान्' न क्षोभवान्, न भयान्वितः । हे वीर ! भवान् मम निर्वाणशर्माणि वितरत्विति सम्बन्धः ।। ९३ ।।

(६)

अवचूरिः

नमताममराणां शिरोरुहेभ्यः-केशेभ्यः स्रस्ताः सामोदानां निर्निद्राणां-विकसितानां मन्दाराणां या मालास्तासां रजसा-परागेण रञ्जितांह्रे !-पाटलितचरण ! । धरित्र्या-भुवः कृतावन !-विहितरक्षण ! । वरतम ! - प्रधानतम ! । संगमनाम्नो देवस्य संबन्धिनी उदारा तारा उदितानङ्गा-उद्गतस्मरा अथवा वरतमः संगमः-समागमो यस्याः सा वरतमसंगमा उदारतारा-अदीनकनीनिका उदितानङ्गा-उद्गतस्मरा या नार्यावली-नारीणां पङ्क्तिस्तस्या लापेन-जल्पितेन देहेन ईक्षितेन च न मोहितानि अक्षाणि-इन्द्रियाणि यस्य स भवान्-त्वं मम वितरतु हे वीरजिन ! निर्वाणशर्माणि-मोक्षसुखानि । जातावतारः-अवतीर्णः, उत्पन्न इत्यर्थः । धराधीशः-क्षितिपतिर्यः सिद्धार्थस्तस्य धाम्नि-गृहे । कथंभूते ? । क्षमालंकृतौ-भुवोऽलंकारभूते । अनवरतम्-अजस्रम् । हे असङ्गमोद !-सङ्गमोदाभ्यां रहित ! । यद्वा सङ्गाद् यो मोदः स नास्ति यस्यासौ असङ्गमोदः । स्वतन्त्रसुख इत्यर्थः । हे अरत !-अनासक्त ! । हे अरोदित !-रोदनहीन !, शोकरहितेत्यर्थः । हे अनङ्गन !-अङ्गनारहित ! । हे आर्याव ! आर्यानवति यस्तदामन्त्रणम् । धाम्नि कथंभूते ? । लीलानां-विलासानां पदे-स्थाने । हे इत्यामन्त्रणे । भवान् कथंभूतः ? । क्षितामः-क्षपितरोगः । हे हित !-हितकारिन् ! । पुनः कथंभूतः ? । अक्षोभवान्-न भयान्वितः । हे वीर ! भवान् मम निर्वाणशर्माणि वितरत्विति संबन्धः ।। ९३ ।।

जिनसमूहस्य स्तुतिः—

समवसरणमत्र यस्याः स्फुरत्केतुचक्रानकानेकपद्मेन्दुरुक्चामरोत्सर्पिसालत्रयी[1]-
सदवनमदशोकपृथ्वीक्षणप्रायशोभातपत्रप्रभागुर्वराराट् परेताहितारोचितम् ।
प्रवितरतु समीहितं साऽर्हतां संहतिर्भक्तिभाजां भवाम्भोधिसम्भ्रान्तभव्यावलीसेविता—
ऽसदवनमदशोकपृथ्वीक्षणप्रा यशोभातपत्रप्रभागुर्वराराट्परेताहितारोचितम् ॥ २ ॥ ९४ ॥

- अर्णव०

(१)

ज० वि०—समवसरणमत्रेति । सा अर्हतां-पारगतानां संहतिः-समूहः भक्तिभाजां-सेवाकारिणां समीहितं-वाञ्छितं प्रवितरत्विति क्रियाकारकसम्बन्धः । अत्र 'प्रवितरतु' इति क्रियापदम् । का कर्त्री ? 'संहतिः' । केषाम् ? 'अर्हताम्' । किं कर्मतापन्नम् ? 'समीहितम्' । केषाम् ? 'भक्तिभाजाम्' । अर्हतां संहतिः कथंभूता ? 'भवाम्भोधिसम्भ्रान्तभव्यावलीसेविता' भवाम्भोधौ-संसारसागरे सम्भ्रान्ता-व्याकुलीभूता एवंविधा या भव्यावली-भव्यजन्तुसन्ततिः तया सेविता-आराधिता । पुनः कथंभूता ? 'असदवनमदशोकपृथ्वी' सह दवनेन-उपतापेन वर्तत इति सदवना, मदो-जात्याद्यभिधानः, शोकः-शोचनं, ताभ्यां पृथ्वी-वितता, सदवना मदशोकपृथ्वी च न भवति या सा तथा । पुनः कथं० ? 'ईक्षणप्रा' ईक्षणानि-लोचनानि प्राति-पूरयति आप्याययतीति ईक्षणप्रा । अथवा ईक्षणानि-ज्ञानानि प्राति-ददातीति ईक्षणप्रा । सेति तच्छब्दसाहचर्याद् यच्छब्दयोजनामाह-यस्या अर्हतां संहतेः समवसरणं-सुरकृतं धर्मदेशनास्थानं अत्र-अस्मिन् जगति अराराड्-अत्यर्थमराजत् । अत्र 'अराराट्' इति क्रियापदम् । किं कर्तृ ? 'समवसरणम्' । कस्याः ? 'यस्याः' । कुत्र ? 'अत्र' । समवसरणं कथंभूतम् ? 'स्फुरत्केतुचक्रानकानेकपद्मेन्दुरुक्चामरोत्सर्पिसालत्रयीसदवनमदशोकपृथ्वीक्षणप्रायशोभातपत्रप्रभागुरु' स्फुरन्तः-चलन्तः केतवः-ध्वजाः चक्रं-धर्मचक्रं आनकाः-देवदुन्दुभयः अनेकपद्मानि-बहूनि सुरनिर्मितकमलानि इन्दुरुक्-चामराणि-चन्द्रोज्ज्वलानि वालव्यजनानि उत्सर्पिसालत्रयी-उत्तुङ्गप्राकारत्रयं सदवनमदशोकः सन्-प्रधानोऽवनमन्-नम्रीभवन् अशोकः-कङ्केल्लिपादपः पृथ्वीक्षणप्रायाणि[2]-भुव उत्सवावहानि आतपत्राणि-छत्राणि, एतेषां स्फुरत्केत्वादीनां याः प्रभाः-कान्तयः ताभिर्गुरु-महार्हम् । पुनः कथं० ? 'परेताहितारोचितं' परेताः-अपगता अहिताः-शत्रवो येषां ते तथा, गतवैरार्था यत्यादयः, तैरारोचितं-उपशोभितम् । आरोचितमिति पृथगेव समवसरणविशेषणम्, परेता हिता इति च विशेषणद्वयमर्हतां संहतेः । तदर्थश्चायम्-परा-प्रधाना इताहिता-गतशत्रुरिति । समवसरणं पुनः कथं० ? 'यशोभातपत्रप्रभागुर्वराराट्परेताहितारोचितम्'

१. **'शालत्रयी' - इत्यपि पाठः ।**
२. **'प्रायशोभानि-भुव उत्सवावहा शोभा-कान्तिर्येषु तानि' इति प्रतिभाति ।**

यशसा-कीर्त्या भातानि-शोभीनि पत्राणि-गजवाजिसुखासनप्रमुखानि वाहनानि प्रभजन्त इति यशोभातपत्रप्रभाजः, एतादृशाः उर्वराराजः-राजानो-भूभुजः परेताः-पिशाचा-व्यन्तरदेवविशेषाः अहयो-नागाख्या-भवनवासिदेवविशेषाः तारा-ज्योतिष्कदेवविशेषाः तेषामुचितं-योग्यम् ॥

अथ समासः—स्फुरन्तश्च ते केतवश्च स्फुर० 'कर्मधारयः' । न एकान्यनेकानि 'तत्पुरुषः' । अनेकानि च तानि पद्मानि च अनेक० 'कर्मधारयः' । इन्दोरिव रुचिर्येषां तानि इन्दुरुचीनि 'बहुव्रीहिः' । इन्दुरुचीनि च तानि चामराणि च इन्दु० 'कर्मधारयः' । सालानां त्रयी सालत्रयी 'तत्पुरुषः' । उत्सर्पिणी चासौ सालत्रयी च उत्सर्पि० 'कर्मधारयः' । अवनमंश्चासावशोकश्च अवन० 'कर्मधारयः' । संश्चासाव-वनमदशोकश्च सदव० 'कर्मधारयः' । पृथ्व्याः क्षणप्राया पृथ्वी० 'तत्पुरुषः' । पृथ्वीक्षणप्राया शोभा येषां तानि पृथ्वी० 'बहुव्रीहिः' । आतपात् त्रायन्त इत्यातपत्राणि 'तत्पुरुषः' । पृथ्वीक्षणप्रायशोभानि च तान्यातपत्राणि (च) पृथ्वी० 'कर्मधारयः' । स्फुरत्केतवश्च चक्रं च आनकाश्च अनेकपद्मानि च इन्दुरुक्चामराणि च उत्सर्पिसालत्रयी च सदवनमदशोकश्च पृथ्वीक्षणप्रायशोभातपत्राणि च स्फुरत्केतु० 'इतरेतरद्वन्द्वः' । स्फुरत्केतुचक्रानकानेकपद्मेन्दुरुक्चामरोत्सर्पिसालत्रयीसदवनमदशोकपृथ्वीक्षणप्राय-शोभातपत्राणां प्रभा स्फुरत्केतु० 'तत्पुरुषः' । स्फुरत्केतुचक्रानकानेकपद्मेन्दुरुक्चामरोत्सर्पिसालत्रयी-सदवनमदशोकपृथ्वीक्षणप्रायशोभातपत्रप्रभाभिर्गुरु स्फुरत्केतु० 'तत्पुरुषः' । परेताः अहिता येषां ते परे० 'बहुव्रीहिः' । परेताहितैरारोचितं परेता० 'तत्पुरुषः' । भक्तिं भजन्त इति भक्तिभाजः 'तत्पुरुषः' । तेषां भक्ति० । अम्भोधिरिवाम्भोधिः । भवश्चासावम्भोधिश्च भवाम्भोधिः 'कर्मधारयः' । भवाम्भोधौ सम्भ्रान्ता भवाम्भोधिसम्भ्रान्ताः 'तत्पुरुषः' । भव्यानामावली भव्यावली 'तत्पुरुषः' । भवाम्भोधि-सम्भ्रान्ता चासौ भव्यावली च भवाम्भो० 'कर्मधारयः' । भवाम्भोधिसम्भ्रान्तभव्यावल्या सेविता भवाम्भो० 'तत्पुरुषः' । सह दवनेन वर्तत इति सदवना 'तत्पुरुषः' । मदश्च शोकश्च मदशोकौ 'इतरेतरद्वन्द्वः' । मदशोकाभ्यां पृथ्वी मदशोक० 'तत्पुरुषः' । सदवना चासौ मदशोकपृथ्वी च सदवन० 'कर्मधारयः' । न सदवनमदशोकपृथ्वी असदवन० 'तत्पुरुषः' । ईक्षणानि प्रातीति ईक्षणप्रा 'तत्पुरुषः' । यशसा भातानि यशो० 'तत्पुरुषः' । यशोभातानि च तानि पत्राणि च यशो० 'कर्मधारयः' । यशोभात-पत्राणि प्रभजन्त इति यशोभा० । उर्वराया राज उर्वरा० 'तत्पुरुषः' । यशोभातपत्रप्रभाजश्च ते उर्वराराजश्च यशोभा० 'कर्मधारयः' । यशोभातपत्रप्रभागुर्वराराजश्च परेताश्च अहयश्च ताराश्च यशोभा० 'समाहार(इतरेतर?)द्वन्द्वः' । यशोभातपत्रप्रभागुर्वराराट्परेताहितारराणामुचितं यशोभा० 'तत्पुरुषः' । इति काव्यार्थः ॥ ९४ ॥

(२)

सि० वृ०—समवसरणमत्रेति । सा अर्हतां-परमेष्ठिनां सन्ततिः-समूहः भक्तिभाजां-सेवाकारिणां श्रद्धावतां समीहितं-वाञ्छितं प्रवितरतु-प्रकर्षेण करोत्वित्यर्थः । प्रविपूर्वक 'तॄ प्लवनतरणयोः' धातोः

'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि परस्मैपदे प्रथमपुरुषैकवचनं तुप् । 'अप्०' (सा० सू० ६९१) । 'गुणः' (सा० सू० ६९२) । 'स्वरहीनं०' (सा० सू० ३६) । तथा च 'प्रवितरतु' इति सिद्धम् । अत्र 'प्रवितरतु' इति क्रियापदम् । का कर्त्री ? । सन्ततिः । केषाम् ? । अर्हताम् । किं कर्मतापन्नम् ? । समीहितम् । केषाम् ? । 'भक्तिभाजां' भक्तिम्-अनुरागं श्रद्धां वा भजन्ति ते भक्तिभाजस्तेषाम् । अर्हतां सन्ततिः कथंभूता ? । 'भवाम्भोधिसम्भ्रान्तभव्यावलीसेविता' भव एव अम्भोधिः भवाम्भोधिः तस्मिन् भवाम्भोधौ-संसारसागरे सम्भ्रान्ता-व्याकुलीभूता या भव्यानामावली-पङ्क्तिस्तया सेविता-आराधिता । पुनः कथंभूता ? । 'असदवनमदशोकपृथ्वी' सह दवनेन-उपतापेन वर्तत इति सदवना, मदो-जात्याद्यभिमानः शोकः-शोचनं ताभ्यां पृथ्वी-वितता सदवना मदशोकपृथ्वी च न भवति या सा तथा । पुनः कथंभूता ? । 'ईक्षणप्रा' ईक्षणानि-लोचनानि प्राति-पूरयति आप्याययतीति ईक्षणप्रा, अथवा ईक्षणानि-ज्ञानानि प्राति-ददातीति ईक्षणप्रा । सेति सा का ? । यस्याः अर्हतां सन्ततेः समवसरणं-देवविनिर्मितधर्मदेशनास्थानमत्र-अस्मिन् जगति अराराड्-अत्यर्थं अराजत् । 'राजृ दीप्तौ' अनद्यतने कर्तरि परस्मैपदे प्रथमपुरुषैकवचनं दिप् । 'दिबादावट्' (सा० सू० ७०७) । 'अप्०' (सा० सू० ६९१) । तथा च 'अराराट्' इति सिद्धम् । अत्र 'अराराट्' इति क्रियापदम् । किं कर्तृ ? । समवसरणम् । कस्याः ? । यस्याः । कुत्र ? । अत्र । कथंभूतं समवसरणम् ? । 'स्फुरत्केतुचक्रानकानेकपद्मेन्दुरुक्चामरोत्सर्पिसाल-त्रयीसदवनमदशोकपृथ्वीक्षणप्रायशोभातपत्रप्रभागुरु' । स्फुरन्तः-चलन्तः केतवः-ध्वजाः चक्रं-धर्मचक्रं आनकाः-देवदुन्दुभयः, अनेकानि च तानि पद्मानि च अनेकपद्मानि-बहूनि सुरनिर्मितकमलानि इन्दोरिव रुक्-रोचिर्येषां तानि चन्द्रोज्ज्वलानि, एवंविधानि चामराणि-वालव्यजनानि उत्सर्पिसालत्रयी-उत्सर्पिणी सा चासौ सालानां-वप्राणां त्रयी सालत्रयी, अवनमंश्चासावशोकश्च अवनमदशोकः (संश्चासौ अव० सद०) पृथ्व्याः क्षणप्राया शोभा येषां तानि [पृथ्वी] क्षणप्रायशोभानि च तानि आतपात् त्रायन्त इत्यातपत्राणि-छत्राणि, तथा च स्फुरत्केतवश्च चक्रं च आनकाश्च अनेकपद्मानि च इन्दुरुक्चामराणि च उत्सर्पिसालत्रयी च सदवनमदशोकश्च पृथ्वीक्षणप्रायशोभातपत्राणि च स्फुरत्केतुचक्रानकानेकपद्मेन्दुरुक्चामरोत्सर्पि-सालत्रयीसदवनमदशोकपृथ्वीक्षणप्रायशोभातपत्राणि 'इतरेतरद्वन्द्वः', एतेषां स्फुरत्केत्वादीनां याः प्रभाः-कान्तयस्ताभिः गुरु-गरिष्ठम् । "सालः पादपमात्रे स्यात् प्राकार" इति विश्वः । पुनः कथंभूतम् । 'परेताहितारोचितं' परेताः-अपगताः अहिताः-शत्रवो येषां ते तथा गतवैरा अर्थान्मुनयस्तैः (आ)रोचितं-शोभितम् । पुनः कथंभूतम् ? । 'यशोभातपत्रप्रभागुर्वराराट्परेताहितारोचितम्' यशसा-कीर्त्या भातानि-शोभितानि पत्राणि-गजवाजिसुखासनप्रमुखाणि वाहनानि प्रभजन्त इति यशोभातपत्रप्रभाजः, "पत्रं स्याद् वाहने पर्णे, पक्षे च क्षरपक्षिणाम् (?)" इति विश्वः, एतादृशा ये उर्वराराजो-भूभुजः परेताः-पिशाचाः व्यन्तराः-देवविशेषाः अहयो-नागकुमाराः-भवनपतिदेवविशेषाः ताराः-ज्योतिषिकास्तेषामुचितं-योग्यं,

यशोभातपत्रप्रभागुर्वराराजश्च परेताश्च अहयश्च ताराश्च यशोभातपत्रप्रभागुर्वराराट्परेताहितारा: 'इतरेतरद्वन्द्वः' ।

"यत्र द्वित्वं बहुत्वं च, स द्वन्द्व इतरेतरः ।
समाहारो भवेदन्यो, यत्रैकत्वं नपुंसके ॥ १ ॥"

इत्युमापतिधरमहोपाध्यायाः ॥ ९४ ॥

(३)

सौ० वृ०—समवसरणमत्रेति । सा अर्हतां-तीर्थकृतां संहतिः-समूहः भक्तिभाजां-भक्तिकराणां जनानां समीहितं-वाञ्छितं प्रवितरतु इत्यन्वयः । 'प्रवितरतु' इति क्रियापदम् । का कर्त्री ? । 'संहतिः' । केषाम् ? । 'अर्हताम्' । किं कर्मतापन्नम् ? । 'समीहितम्' । केषाम् ? । 'भक्तिभाजाम्' । किंविशिष्टा अर्हतां संहतिः ? । भवाम्भोधौ-संसारसमुद्रे सम्भ्रान्ताः-व्याकुलीभूता ये भव्या-मुक्तिगमनयोग्याः तेषां आवली-श्रेणिः तया सेविता-आराधिता 'भवाम्भोधिसम्भ्रान्तभव्यावलीसेविता' । पुनः किंविशिष्टा अर्हतां संहतिः ? । दवनः-तापः मदो-जात्यादिः शोकः-शुक्-शोचनं तेन सहिताः सदवनमदशोकाः तेषां पृथ्वी (सद०, न सद०) 'असदवनमदशोकपृथ्वी' । पुनः कथंभूता अर्हतां संहतिः ? । ईक्षणानि-नयनानि ज्ञानादीनि प्राति-ददातीति 'ईक्षणप्रा' । पुनः किंविशिष्टा अर्हतां संहतिः ? । 'सा' सा-प्रसिद्धा । तच्छब्दो यच्छब्दमपेक्षते । सा का ? । यस्याः । अर्हतां संहत्याः समवसरणं-धर्मदेश(ना)स्थानकं चतुर्विधदेव-निकायनिर्मितं अत्र-जगति अराराडित्यन्वयः । 'अराराट्' इति क्रियापदम् । किं कर्तृ ? । 'समवसरणम्' । 'अराराट्' अतिशयेन वि(व्य)राजत् । कस्याः ? । 'यस्याः' संहत्याः । कुत्र ? । 'अत्र' संसारे । किंविशिष्टं समवसरणम् ? । स्फुरन्तो-दीप्यमानाः चलन्तो वा केतवो-ध्वजाः धर्मध्वजादयः चक्रं-धर्मचक्रं आनका-ध्वनद्दुन्दुभयः पटहाः वा अनेकानि पद्मानि सुरनिर्मितानि इन्दुः-चन्द्रः तद्वद् रुक्-कान्तिः येषां तानि तादृशानि चामराणि-वालव्यजनानि तथा उत्सर्पिणी-प्रोत्तुङ्गा सालत्रयी तथा सन्-शोभनः अवनमन्-पुष्पफलदलप्राग्भारेण नमन् यः अशोकः-कङ्केल्लितरुः तथा पृथिव्यां-जगति क्षणप्रायाणि उत्सवयोग्या शोभा-कान्तिः येषु तानि आतपत्राणि-छत्राणि तेषां प्रभा-कान्तिः तथा गुरु-महत्-महर्घ्यं 'स्फुरत्केतु-चक्रानकानेकपद्मेन्दुरुक्चामरोत्सर्पिसालत्रयीसदवनमदशोकपृथ्वीक्षणप्रायशोभातपत्रप्रभागुरु' । पुनः किंविशिष्टं समवसरणम् ? । परेता-गता अहिताः-शत्रवः येषां ते तादृशाः साधवः तैः आसमन्तात् रोचितं-व्याप्तं (?) 'परेताहितारोचितम्' । यद्वा किंविशिष्टा अर्हतां संहतिः ? । परेता-गता अहिताः-सप्तेतयो यस्यां सा 'परेताहिता' ।

"साग्रे च गव्यूतिशतद्वये रुजा १ वैरी(रे) २ तयो ३ मार्य ४ तिवृष्ट्य ५ वृष्टयः ६ ।
दुर्भिक्ष ७ मन्यस्वकचक्रतो ८ भयं स्यान्नेति (न्नैत एकादश कर्मघातजाः) ॥"

इत्यभिधानचिन्तामणि (का० १, श्लो० ६०) वचनात् । पुनः किंविशिष्टं समवसरणम् ? । आसमन्तात् रोचितं-शोभितं भासितं वा 'आरोचितम्' । तथा ऋषीणां समूहः आरं, यद्वा अरतिं-संसारपारं गच्छन्तीति आरा-मुनयः तेषां उचितं-योग्यं 'आरोचितम्' । पुनः किंविशिष्टं समवसरणम् ? । यशसा-कीर्त्या भातानि यानि पत्राणि-वाहनानि हस्त्यश्वरथशिविकादीनि तानि भजन्ते तादृशा(शी) या उर्वरा-पृथ्वी तस्या राजो-राजानः चक्रवर्त्यादयः परेता-भूतप्रेतपिशाचव्यन्तरादयः अहयः नागाख्या भवनवासिदेवविशेषाः ताराः-ज्योतिष्कदेवविशेषाः तेषां उचितं-योग्यं 'यशोभातपत्रप्रभागुर्वराराट्परे-ताहितारोचितम्' । इति पदार्थः ॥

अथ समासः—स्फुरन्तः केतवो यस्मिन् तत् स्फुरत्केतु, स्फुरत्केतु (च) चक्रं च आनकाश्च स्फुरत्केतुचक्रानकाः, अनेकानि च तानि पद्मानि च अनेकपद्मानि, इन्दुवद् रुग् येषां तानि इन्दुरुञ्चि, इन्दुरुञ्चि च तानि चामराणि च इन्दुरुक्चामराणि, शालानां त्रयी शालत्रयी, उत्सर्पिणी चासौ शालत्रयी च उत्सर्पिशालत्रयी, स्फुरत्केतुचक्रानकाश्च अनेकपद्मानि च इन्दुरुक्चामराणि च उत्सर्पिशालत्रयी च स्फुरत्केतुचक्रानकानेकपद्मेन्दुरुक्चामरोत्सर्पिशालत्रयी, अवनमन् चासौ अशोकश्च अवनमदशोकः, सन् चासौ अवनमदशोकश्च सदवनमदशोकः, स्फुरत्केतुचक्रानकानेकपद्मेन्दुरुक्चामरोत्सर्पिशालत्रयी च सदवनमदशोकश्च स्फुरत्केतुचक्रानकानेकपद्मेन्दुरुक्चामरोत्सर्पिशालत्रयीसदवनमदशोकः, पृथ्व्याः क्षणप्राया-उत्सवतुल्या पृथ्वीक्षणप्राया, (पृथ्वीक्षणप्राया) शोभा येषां तानि पृथ्वीक्षणप्रायशोभानि, आतपात् त्रायन्ते इति आतपत्राणि, पृथ्वीक्षणप्रायशोभानि च तानि आतपत्राणि च पृथ्वीक्षणप्राय-शोभातपत्राणि, स्फुरत्केतुचक्रानकानेकपद्मेन्दुरुक्चामरोत्सर्पिशालत्रयीसदवनमदशोकश्च पृथ्वीक्षणप्राय-शोभातपत्राणि च स्फुरत्केतुचक्रानकानेकपद्मेन्दुरुक्चामरोत्सर्पिशालत्रयीसदवनमदशोकपृथ्वीक्षणप्राय-शोभातपत्राणि, स्फुरत्केतु०प्रायशोभातपत्राणां प्रभा स्फुरत्केतुचक्रानकानेकपद्मेन्दुरुक्चामरोत्सर्पि-शालत्रयीसदवनमदशोकपृथ्वीक्षणप्रायशोभातपत्रप्रभा, स्फुरत्केतुचक्रानकानेकपद्मेन्दुरुक्चामरोत्सर्पि-शालत्रयीसदवनमदशोकपृथ्वीक्षणप्रायशोभातपत्रप्रभाभिर्गुरु [यत्] स्फुरत्केतुचक्रानकानेकपद्मेन्दु-रुक्चामरोत्सर्पिशालत्रयीसदवनमदशोकपृथ्वीक्षणप्रायशोभातपत्रप्रभागुरु । परेता-गताः अहिताः-शत्रवो येषां ते परेताहिताः-साधवः, परेताहितैः आरोचितं परेताहितारोचितम्; यद्वा परेता-गता अहिता-ईतयो यस्यां सा परेताहिता, अर्हतां संहतिपक्षे आ-समन्तात् रोचितं-भासितं आरोचितं, यद्वा अरन्ति-गच्छन्ति भवस्य पारं आराः-मुनयः, आराणां उचितं आरोचितम् । भक्तिं भजन्तीति भक्तिभाजः, तेषां भक्तिभाजाम् । अम्भांसि धीयन्ते इति अम्भोधिः, भव एव अम्भोधिः भवाम्भोधिः, भवाम्भोधौ सम्भ्रान्ता भवाम्भोधिसम्भ्रान्ताः, भवाम्भोधिसम्भ्रान्ताश्च ते भव्याश्च भवाम्भोधिसम्भ्रान्तभव्याः, भवाम्भोधि-सम्भ्रान्तभव्यानां आवली भवाम्भोधिसम्भ्रान्तभव्यावली, भवाम्भोधिसम्भ्रान्तभव्यावल्या सेविता

भवाम्भोधिसम्भ्रान्तभव्यावलीसेविता । दवनं च मदश्च शोकश्च दवनमदशोकाः, दवनमदशोकैः सहिता सदवनमदशोका; न विद्यन्ते सदवनमदशोका येषां ते असदवनमदशोकाः अर्थात् साधवः, असदवन-मदशोकानां-साधूनां पृथ्वीव पृथ्वी आयता-विशाला भूमिरिव असदवनमदशोकपृथ्वी । ईक्षणानि-ज्ञानादीनि नयनानि प्राति-ददातीति ईक्षणप्रा । 'प्रा दाने' धातोरित्यस्य प्रातीति प्रयोगः । यशसा भातानि यशोभातानि, यशोभातानि च तानि पत्राणि च यशोभातपत्राणि, यशोभातपत्राणि प्रकर्षेण भजन्ते ते यशोभातपत्रप्रभाजः, उर्वराया राट् (जः) उर्वराराजः, यशोभातपत्रप्रभाजश्च ते उर्वराराजश्च यशोभातपत्र-प्रभागुर्वराराजः, यशोभातपत्रप्रभागुर्वराराजश्च परेताश्च अहयश्च ताराश्च यशोभातपत्रप्रभागुर्वरा-राट्परेताहितारा:, यशोभातपत्रप्रभागुर्वराराट्परेताहितारैः(राणां) उचितं-पूर्णं शोभायमानं यशोभातपत्र-प्रभागुर्वराराट्परेताहितारोचितम् । इति द्वितीयवृत्तार्थः ।। ९४ ।।

(४)

दे० व्या०—समवसरणमत्रेति । सा अर्हतां-तीर्थङ्कराणां सन्ततिः-श्रेणिः भक्तिभाजां समीहितं-वाञ्छितं प्रवितरतु-ददातु इत्यन्वयः । 'तृ प्लवनतरणयोः' इति धातुः । 'प्रवितरतु' इति क्रियापदम् । का कर्त्री ? । सन्ततिः । केषाम् ? । अर्हताम् । कं कर्मतापन्नम् ? । समीहितम् । केषाम् ? । 'भक्तिभाजां' भक्तिं-सेवां भजन्तीति भक्तिभाजः तेषाम् । यत्तदोर्नित्याभिसम्बन्धाद् यस्याः अर्हत्सन्ततेः समवसरणं-वप्रत्रयं अराराड्-अत्यर्थं यथा स्यात् तथा अत्र-अस्मिन् लोके शुशुभे इत्यध्याहारः (?) । 'शुशुभे (अराराट्)' इति क्रियापदम् । किं कर्तृ ? । समवसरणम् । कस्याः ? । यस्याः । किंविशिष्टं समवसरणम् ? । 'स्फुरत्केतुचक्रानकानेकपद्मेन्दुरुक्चामरोत्सर्पिशालत्रयीसदवनमदशोकपृथ्वीक्षण-प्रायशोभातपत्रप्रभागुरु' । केतुः-धर्मध्वजः, चक्रं-धर्मचक्रं, आनको-देवदुन्दुभिः, "भेरी दुन्दुभिरानकः" इत्यमरः (?), पद्मानि-सुरकृतकमलानि, शालत्रयी-प्राकारत्रयी, अशोकः-(कङ्केल्लि)वृक्षः, आतपत्राणि-छत्राणि एतेषां पूर्वं 'द्वन्द्वः', तथा च स्फुरन्-विराजमानः केतुश्च चक्रं च आनकश्च अनेकानि पद्मानि च इन्दुरुक्चामराणि च उत्सर्पिणी शालत्रयी च सन्-शोभनः अवनमन्-पल्लवादिभारेण खर्वीभवन् अशोकश्च पृथ्व्याः क्षणप्रायशोभा-उत्सवसदृशशोभा च आतपत्राणां प्रभा च ताभिः गुरु-गरिष्ठमित्यर्थः । पुनः किंविशिष्टम् ? । 'परेताहितारोचितं' परेताः-दूरीभूताः अहिता-शत्रवो येषां तैः आ-समन्तात् रोचितं-शोभितम् । यद्वा परा-प्रधाना इताहिता-गतदुर्जना इत्यर्हत्सन्ततेर्विशेषणम् । रोचितं-शोभितं इति समवसृतेर्विशेषणम् । पुनः किंविशिष्टम् ? । 'यशोभातपत्रप्रभागुर्वराराट्परेताहितारोचितम्' उर्वराराजो-राजानः परेताः-पिशाचाः अहयो-नागकुमाराः तारा-ज्योतिष्काः एतेषां पूर्वं 'द्वन्द्वः', ततो यशोभातानि-यशसा शोभितानि पत्राणि-वाहनानि भजन्ते ये उर्वराराट्परेताहितारा: तेषां उचितं-योग्यम् ।। इति द्वितीयवृत्तार्थः ।। ९४ ।।

(५)

ध० टीका—समवसरणमिति । 'समवसरणं' सुरकृतं तीर्थकृतां धर्मदेशनास्थानम् । 'अत्र' अस्मिन् । 'यस्याः' । 'स्फुरत्केतुचक्रानकानेकपद्मेन्दुरुक्चामरोत्सर्पिसालत्रयीसदवनमदशोकपृथ्वीक्षणप्रायशोभातपत्रप्रभागुरु' केतुः-धर्मध्वजः चक्रं-धर्मचक्रं आनको-देवदुन्दुभिः अनेकपद्मानि-सुरकृतकमलानि इन्दुरुक्चामराणि-चन्द्रावदातप्रकीर्णानि उत्सर्पिसालत्रयी-प्रवृद्धप्राकारत्रयी सदवनमदशोकः-प्रधानावनमदशोकद्रुमः पृथ्वीक्षणप्रायशोभा-मेदिन्युत्सवभूतच्छाया आतपत्राणि-छत्रत्रयं प्रभा-कान्तिः स्फुरन्-विराजमानः केतुश्च चक्रं च आनकश्च अनेकानि पद्मानि च इन्दुरुक्चामराणि च उत्सर्पिणी सालत्रयी च सन्-शोभनः अवनमन्-पल्लवादिप्राग्भारेण खर्वीभवन् अशोकश्च पृथ्वीक्षणप्रायशोभा-पृथ्व्या-भुवः क्षणप्रायशोभा-उत्सवकल्पशोभा आतपत्राणि प्रभा च ताभिर्गुरु-महार्हम् । 'अराराट्' अत्यर्थमराजत् । 'परेताहितारोचितं' परेताः-अपगताः अहिताः-शत्रवो येषां तैरारोचितं-उपशोभितम् । अथवा परा-प्रधाना, इताहिता-गतशत्रुरिति । अर्हत्संहतेर्विशेषणे । 'रोचितं' शोभितम् । 'प्रवितरतु' प्रयच्छतु । 'समीहितं' वाञ्छितम् । 'सा' । 'अर्हतां' जिनानाम् । 'संहतिः' सङ्घातः । 'भक्तिभाजां' अनुरागजुषाम् । 'भवाम्भोधि-सम्भ्रान्तभव्यावलीसेविता' भवाम्भोधौ सम्भ्रान्ता-आकुलीभूता या भव्यावली तया सेविता । 'असदवन-मदशोकपृथ्वी' सदवंना च-सोपतापा च मदशोकाभ्यां पृथ्वी च-वितता च या न भवति सा । 'ईक्षणप्रा' ईक्षणानि-चक्षूंषि ज्ञानानि वा प्राति-पूरयति-आप्याययति या सा । 'यशोभातपत्रप्रभागुर्वराराट्परेताहितारोचितं' यशोभातानि-(कीर्त्या) शोभना(भिता)नि पत्राणि-वाहनानि प्रभजन्ते ये उर्वराराजः-पृथ्वीपतयः परेताः-पिशाचाः अहयो-नागाः ताराः-ज्योतिष्काः तेषां उचितं-योग्यम् । यस्याः समवसरणं अत्र अराराट् सा अर्हतां संहतिः समीहितं भक्तिभाजां प्रवितरतु इति सम्बन्धः ॥ ९४ ॥

(६)

अवचूरिः

समवसरणं-धर्मदेशनास्थानं यस्याः अत्र-अस्मिन् अराराड्-भृशमराजत सा अर्हतां ततिर्भक्तिभाजां समीहितं वितरतु । समवसरणं कथंभूतम् ? । स्फुरत्केतुः-धर्मध्वजश्चक्रं-धर्मचक्रं आनको-देवदुन्दुभिः अनेकपद्मानि-सुरकृतकमलानि इन्दुरुक्चामराणि-चन्द्रावदातप्रकीर्णकानि उत्सर्पिणी सालत्रयी-प्राकारत्रयं प्रधानावनमदशोकद्रुमः पृथिव्युत्सवभूतच्छायातपत्रत्रयं तस्य प्रभा-कान्तिस्तया गुरु-महार्हम् । पुनः किंभूतम् ? । परेता-अपगता अहिताः-शत्रवो येषां तैरारोचितं-शोभितम् । अथवा परा-प्रधाना इताहिता-गतशत्रुरित्यर्हतां संहतेर्विशेषणे । आरोचितं-शोभितम् । संहतिः कथंभूता ? । भवाम्भोधौ-संसारसमुद्रे संभ्रान्ता-आकुलीभूता या भव्यावली तया सेविता । पुनः कथंभूता ? । सदवना-सोपतापा

च मदशोकाभ्यां पृथ्वी-वितता च या न भवति । ईक्षणानि-चक्षूंषि ज्ञानानि वा प्राति-पूरयति सा । यशसा भातानि-शोभितानि पत्राणि-वाहनानि प्रभजन्ते ये उर्वराराजः-पृथ्वीपतयः परेताः-पिशाचा अहयो-नागास्तारा-ज्योतिष्कास्तेषामुचितं-योग्यम् । समवसरणविशेषणमिदम् ।। ९४ ।।

❋ ❋ ❋

भारत्यै प्रार्थना–

परमततिमिरोग्रभानुप्रभा भूरिभङ्गैर्गभीरा भृशं विश्ववर्ये निकाय्ये वितीर्यात्तरा–
महतिमतिमते[1] हि ते शस्यमानस्य वासं सदाऽतन्वतीतापदानन्दधानस्य सामानिनः[2] ।
जननमृतितरङ्गनिष्पारसंसारनीराकरान्तर्निमज्जज्जनोत्तारनौर्भारती तीर्थकृत् !
महति मतिमते[3] हितेशस्य मानस्य वा संसदातन्वती तापदानं दधानस्य सामानि नः ।। ३ ।।९५ ।।

–अर्णव०

(१)

ज० वि०–परमतेति । हे तीर्थकृत् !-तीर्थंकर ! ते-तव मते-शासने सा-प्रसिद्धा, अयं तच्छब्दो यदुपादानं नापेक्षते प्रसिद्धार्थेऽभिहितत्वात् । तदुक्तम्–"प्रक्रान्तप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यदुपादानं नापेक्षते" इति । भारती-वाणी नः-अस्माकं विश्ववर्ये-भुवनोत्तमे सर्वोत्तमे वा निकाय्ये-निवासे मोक्ष इत्यर्थः, वासम्-आश्रयं वितीर्यात्तराम्-अतिशयेन वितरत्विति क्रियाकारकप्रयोगः । इयं कर्त्रुक्तिः । अत्र 'वितीर्यात्तराम्' इति क्रियापदम् । का कर्त्री ? 'भारती' । कस्य ? 'ते' । कं कर्मतापन्नम् ? 'वासम्' । कस्मिन् ? 'निकाय्ये' निवासे । कथंभूते ? 'विश्ववर्ये' । केषाम् ? 'नः' । निकाय्ये पुनः कथंभूते ? 'अहतिमति' हतिः-हननं तद्रहिते, अविनाशिनीत्यर्थः । अथवा अहतिमिति द्वितीयान्तं वासविशेषणम् । अतिमते इति सप्तम्यन्तं निकाय्यविशेषणम् । तयोश्चायमर्थः–अहतिं-हतिरहितम् अतिशयेन मतेऽभिप्रेते एतत्पक्षे मते-शासने इत्युक्तं तत्र व्याख्येयम् । हीति स्फुटार्थम् । पुनः कथंभूते निकाय्ये ? 'महति' अतिप्रमाणे, पञ्चचत्वारिंशद्(लक्ष)योजनात्मकत्वात् । तव (ते) कथंभूतस्य ? 'शस्यमानस्य' स्तूयमानस्य । नरामराद्यैरित्यर्थः सामर्थ्याद् गम्यते । पुनः कथं० ? 'आनन्दधानस्य' प्रमोदस्थानस्य । पुनः कथं० ? 'अमानिनः' निरहङ्कारस्य । अथवा 'सामानिनः' सह अमानिभिः-निरभिमानिभिः अर्थात् साध्व्यादिभिर्यः स तथा तस्य । अस्मिन् व्याख्यानपक्षे सा तव भारतीति तच्छब्दसापेक्षं न व्याख्येयम् ।

---

१. '०मति मते' इत्यपि पदच्छेदः ।

२. 'साऽमानिनः' इत्यपि पाठः समीचीनः ।

३. 'मतिमतेहिते०' इत्यपि पाठः ।

पुनः कथं० ? 'ईशस्य' स्वामिनः । जगतामिति गम्यते । पुनः किं कुर्वाणस्य ? 'दधानस्य' पुष्णतः । कानि कर्मतापन्नानि ? 'सामानि' प्रियाणि । भारती कथंभूता ? 'परमततिमिरोग्रभानुप्रभा' परेषां-शाक्यादीनां मतानि तद्रूपाणि यानि तिमिराणि-तमांसि तत्र भानुप्रभा-तरणिकिरणकल्पा, तदुच्छेदकत्वात् । पुनः कथं० ? 'गभीरा' अलब्धमध्या । कैः कृत्वा ? 'भूरिभङ्गैः' भूरिभिः-प्रचुरैः भङ्गैः-अर्थविकल्पैः । कथम् ? 'भृशम्' अत्यर्थम् । पुनः कथं० ? जननमृतितरङ्गनिष्पारसंसारनीराकरान्त-र्निमज्जज्जनोत्तारनौः' जननानि-जन्मानि मृतयः-मरणानि तद्रूपा ये तरङ्गाः-वीचयः यत्र स तथा निष्पारः-पाररहितः, एवंविधो यः संसारनीराकरः-भवपाथोधिः तस्यान्तः-मध्यं तत्र निमज्जन्तः-बुडन्तः ये जना-लोकाः तेषामुत्तारणं-पारप्रापणं तत्र नौरिव-अनाविकेव नौः । पुनः कथंभूता ? 'मानस्य वा संसत्' वाशब्द इवार्थे भिन्नक्रमश्च, तत एवं योज्यते-मानस्य-पूजायाः संसदिव-सभेव । भारती किं कुर्वती ? 'आतन्वती' विस्तारयन्ती । किं कर्मतापन्नम् ? 'तापदानं' तापस्य-सन्तापस्य दानं-खण्डनम् । अवशिष्टे च द्वे तीर्थकृतः सम्बोधने, तयोश्चायमर्थः-हे 'अतन्वतीतापत्' अतनवः-महत्यः अतीताः नाशं गताः आपदः-विपदो यस्मात् स तथा तत्सम्बो० हे अतन्व० । कथम् ? 'सदा' नित्यम् । हे 'हित !' हितकारिन् ! कस्मै ? 'मतिमते' मनीषिणे । एते द्वे भारत्या विशेषणे अपि घटेते । तथा चैवं व्याख्या-अतनवोऽतीता आपदो यस्याः सा तथा । मतिमता-मनीषिणा ईहिता-समीहिता, उपादेयतयाऽभिप्रेतेत्यर्थः ॥

अथ समासः—परेषां मतानि पर० 'तत्पुरुषः' । तिमिराणीव तिमिराणि । परमतानि च तानि तिमिराणि (च) पर० 'कर्मधारयः' । भानोः प्रभा भानुप्रभा 'तत्पुरुषः' । उग्रा चासौ भानुप्रभा च उग्र० 'कर्मधारयः' । (परमततिमिरेषु) उग्रभानुप्रभेव उग्रभानुप्रभा परमततिमिरोग्रभानुप्रभा 'तत्पुरुषः' । भूरयश्च ते भङ्गाश्च भूरिभङ्गाः 'कर्मधारयः' । तैः भूरि० । विश्वे विश्वस्मिन् वा वर्यो विश्ववर्यः 'तत्पुरुषः' । तस्मिन् विश्व० । हतिरस्यास्तीति हतिमान् । न हतिमान् अहतिमान् 'तत्पुरुषः' । तस्मिन्नह० । अथवा न विद्यते हतिर्यस्य सोऽहतिः 'बहुव्रीहिः' । तमहतिम् । अतिशयेन मतः अतिमतः 'तत्पुरुषः' । तस्मिन्नतिमते । न तनवोऽतनवः । अतनवश्च ता अतीताश्च अतन्वतीताः 'कर्मधारयः' । अतन्वतीता आपदो यस्मात् सोऽतन्व० 'बहुव्रीहिः' । तत्सम्बो० हे अतन्व० । अथवा अतन्वतीता आपदो यस्याः साऽतन्व० 'बहुव्रीहिः' । आनन्दस्य धानमानन्दधानं 'तत्पुरुषः' । तस्यानन्द० । मानोऽस्यास्तीति मानी । न मानी अमानी 'तत्पुरुषः' । तस्यामानिनः । अथवा न मानिनोऽमानिनः 'तत्पुरुषः' । सह अमानिभिर्वर्तते यः स सामानी 'तत्पुरुषः' । तस्य सामा० । जननानि च मृतयश्च जनन० 'इतरेतरद्वन्द्वः' । तरङ्गा इव तरङ्गाः । जननमृतयस्तरङ्गा यस्य स जनन० 'बहुव्रीहिः' । नीराणामाकरो नीराकरः 'तत्पुरुषः' । नीराकर इव नीराकरः । संसारश्चासौ नीराकरश्च संसार० 'कर्मधारयः' । निर्गतः पारो यस्मात् स निष्पारः 'बहुव्रीहिः' । निष्पारश्चासौ संसारनीराकरश्च निष्पार० 'कर्मधारयः' । जननमृतितरङ्ग-

श्चासौ निष्पारसंसारनीराकरश्च जनन० 'कर्मधारयः' । जननमृतितरङ्गनिष्पारसंसारनीराकरस्यान्तः जनन० 'तत्पुरुषः' । जननमृतितरङ्गनिष्पारसंसारनीराकरान्तर्निमज्जन्तो जनन० 'तत्पुरुषः' । जनन-मृतितरङ्गनिष्पारसंसारनीराकरान्तर्निमज्जन्तश्च ते जनाश्च जनन० 'कर्मधारयः' । जननमृतितरङ्गनिष्पार-संसारनीराकरान्तर्निमज्जज्जनानामुत्तारो० जनन० 'तत्पुरुषः' । जननमृतितरङ्गनिष्पारसंसारनीरा-करान्तर्निमज्जज्जनोत्तारे नौर्जनन० 'तत्पुरुषः' । तीर्थं करोतीति तीर्थकृत् 'तत्पुरुषः' । तत्सम्बो० हे तीर्थकृत् ! । तापस्य दानं तापदानं 'तत्पुरुषः' (तत्) । इति काव्यार्थः ।। ९५ ।।

(२)

सि० वृ०—परमतेति । हे तीर्थकृत् !-तीर्थकर ! ते-तव मते-शासने सा-प्रसिद्धा भारती-वाणी नः अस्माकं विश्ववर्ये-भुवनोत्तमे निकाय्ये-निवासे अर्थान्मोक्षे वा ममाश्रयं वितीर्यात्तराम्-अतिशयेन (दद्यात्) इत्यर्थः । विपूर्वक 'तॄप्लवनतरणयोः' धातोराशिषि कर्तरि परस्मैपदे प्रथमपुरुषैकवचनं यात् । 'ऋत इर्' (सा० सू० ८२०) । 'य्वोर्विहसे' (सा० सू० ३१६) इति दीर्घः । तथा च 'वितीर्यात्' इति सिद्धम् । अत्र 'वितीर्यात् (तराम्)' इति क्रियापदम् । का कर्त्री ? । भारती । कं कर्मतापन्नम् ? । वासम् । कस्य ? । ते । कस्मिन् ? । निकाय्ये । "मन्दिरं सदनं सद्म, निकाय्यो भवनं कुटः" इति हैमः (अभि० का० ४, श्लो० ५६) । कथंभूते निकाय्ये ? । 'विश्ववर्ये' विश्वस्मिन् वर्यं-प्रधानं विश्ववर्यं तस्मिन् । केषाम् ? । 'नः' षष्ठीवहुवचने अस्माकं इत्यस्य नसादेशः । पुनः कथंभूते निकाय्ये ? । 'अहतिमति' हतिः-हननं तद्रहिते, अविनाशिनीत्यर्थः । अथवा अहतिमिति द्वितीयान्तं वासविशेषणम् । अतिमते इति सप्तम्यन्तं निकाय्यविशेषणम् । तयोश्चायमर्थः-अहतिं-हतिरहितं, अतिशयेन मते-अभिप्रेते । एतत्पक्षे मते-शासने इत्युक्तं तन्न व्याख्येयम् । हीति स्फुटार्थम् । पुनः कथंभूते ? । महति-अतिप्रमाणे, पञ्चचत्वारिं-शल्लक्षयोजनत्वात् । तव (ते) कथंभूतस्य ? । शस्यमानस्य-स्तूयमानस्य । नरामराद्यैरिति गम्यम् । पुनः कथंभूतस्य ? । 'आनन्दधानस्य' आनन्दस्य धानं आनन्दधानं तस्य, प्रमोदस्थानस्येत्यर्थः । पुनः कथंभूतस्य ? । 'अमानिनः' न विद्यते मानः-अभिमानो यस्य स तस्य । अथवा सामानिनः सह अमानिभिः-निरभिमानिभिरर्थात् साध्वादिभिर्यः स तथा तस्य । पुनः कथंभूतस्य ? । ईशस्य-स्वामिनः । जगतामिति गम्यम् । पुनः किं कुर्वाणस्य ? । दधानस्य-पुष्णतः । कानि ? । सामानि-प्रियवचनानि । भारती कथंभूता ? । सा । अयं तच्छब्दो यच्छब्दं नापेक्षते, प्रशस्ता(सिद्धा ?)र्थेऽभिहितत्वात् । पुनः कथंभूता ? । 'परमततिमिरोग्रभानुप्रभा' परेषां-बौद्धादीनां मतानि-शासनानि तान्येव तिमिराणि-तमांसि तत्र भानोः-सूर्यस्य प्रभेव प्रभा, तन्मततिमिरोच्छेदकत्वात् । पुनः कथं० ? । गभीरा-अलब्धमध्या, गम्भीरेति यावत् । कैः कृत्वा ? । 'भूरिभङ्गैः' भूरयः-प्रचुराः भङ्गाः-अर्थविकल्पाः तैः [भूरिभङ्गैः] । कथम् ? । भृशम्-अत्यर्थम् । पुनः कथंभूता ? । 'जननमृतितरङ्गनिष्पारसंसारनीराकरान्तर्निमज्जज्जनोत्तारनौः' जननानि-

जन्मग्रहणानि मृतयो-मरणानि तल्लक्षणास्तरङ्गाः-कल्लोला यत्र स तथा निष्पारः-पाररहितः एवंविधो यः संसार एव नीराकरः-समुद्रस्तस्यान्तः-मध्यं तत्र निमज्जन्तो-बुडन्तो ये जनाः-लोकास्तेषां उत्तारः-उत्तरणं तटप्रापणं तत्र नौरिव नौः-तरिः । "पारालिन्दी (?)स्तरङ्गे नौः" इति हारावली । पुनः कथंभूते ? । 'मानस्य वा संसत्' वाशब्दोऽत्र इवार्थे भिन्नक्रमश्च, तत एवं व्यज्यते-मानस्य-पूजायाः संसदिव-सभेव । यदाह—

"मन्येशङ्केध्रुवंप्रायो-नूनमित्येवमादिभिः ।

उत्प्रेक्षा व्यज्यते शब्दै-रिवशब्दोऽपि तादृशः ॥"

इति । "वा प्रचेतसि जानीयादिवार्थे च तदव्ययम्" इति मेदिनी । भारती किं कुर्वती ? । आतन्वती-विस्तारयन्ती । किम् ? । 'तापदानं' तापस्य-सन्तापस्य दानं-खण्डनम् । अवशिष्टे च द्वे तीर्थकृत्संबोधने । तयोश्चायमर्थः—हे 'अतन्वतीतापत् !' अतनवो-महत्यो अतीता-विनाशं प्राप्ता आपदो-दुर्दशा यस्मात् स तथा तस्य संबोधनं हे अतन्व० । कथम् ? । सदा-नित्यम् । हे हित !-हितकारिन् । कस्मै ? । मतिमते-मनीषिणे, मतिः-सदसद्विवेकिताबुद्धिः सा विद्यते यस्य स मतिमान् तस्मै ॥ ९५ ॥

(३)

सौ० वृ०—परमतेति । हे 'तीर्थकृत् !' तीर्थं-चातुर्वर्ण्यसङ्घः प्रवचनं प्रथमगणधरो वा "तित्थं[१] चाउवण्णे संघे पवयणे पढमगणहरे वा" इत्यागमपाठात्[२] तीर्थं करोतीति तीर्थकृत् तस्य सं० हे तीर्थकृत् ! । हे 'अतन्वतीतापत् !' अतनुः-महती अतीता-गता आपत्-विपत् यस्मात् सः अतन्वतीतापत्, तस्य सं० हे अतन्वतीतापत् ! । हे 'हित !' हे हितकारिन् ! । [हे 'ईश !' हे स्वामिन् ! ।] सा तव भारती निकाय्ये-आलये निवासं-वासं वितीर्यात्तराम् इत्यन्वयः । 'वितीर्यात्तराम्' इति क्रियापदम् । का कर्त्री ? । 'भारती' वाणी । 'वितीर्यात्तरां' दद्यात्तराम्-अतिशयेन दद्यात् । किं कर्मतापन्नम् ? । 'निवासं' स्थानम् । कस्मिन् ? । 'निकाय्ये' भवने । "निकाय्यो भवनं कुटः" इत्यभिधानचिन्तामणिः (का० ४, श्लो० ५६) । किंविशिष्टे निकाय्ये ? । 'विश्ववर्य्ये' विश्वं-जगत् तस्मिन् वर्यं-प्रधानं विश्ववर्यं तस्मिन् विश्ववर्ये, लोकाग्रस्थाने मोक्षे इत्यर्थः । केषाम् ? । 'नः' अस्माकम् । किंविशिष्टा भारती ? । 'सा' सा-प्रसिद्धा । अयं तच्छब्दो यदुपादानं नापेक्षते प्रसिद्धार्थेऽभिहितत्वात्, [परं] तदुक्तम्—"प्रकान्तप्रसिद्धानुभूतार्थ-विषयस्तच्छब्दो यदुपादानं नापेक्षते" इति । पुनः किंविशिष्टा भारती ? । परेषां-शाक्यादीनां मतानि तानि एव तिमिराणि-अन्धकाराणि तेषु तेषां वा उग्रा-दीप्ता भानोः-सूर्यस्य प्रभा-कान्तिः परमततिमि-रोग्रभानुप्रभा, परपाषण्डमतध्वान्तविनाशकत्वाद् भानुरित्यर्थः । पुनः किंविशिष्टा भारती ? । 'गभीरा' अगाधमध्या । कैः ? । भूरयः-बहवः भङ्गाः-अर्थविकल्पाः, भूरिभङ्गाः तैः 'भूरिभङ्गैः' । कथम् ? । 'भृशं'

१. **तीर्थं चातुर्वर्ण्यः सङ्घः प्रवचनं प्रथमगणधरो वा ।**

२. **भगवती ।**

अत्यर्थम् । किंविशिष्टे निकाय्ये ? । हतिः-हननं तदस्यास्तीति हतिमान्, न हतिमान् अहतिमान्, तस्मिन् 'अहतिमति' । पुनः किंविशिष्टे निकाय्ये ? । 'महति' महत्प्रमाणे, पञ्चचत्वारिंशल्लक्षयोजनप्रमाणत्वात् । [[1]अतिशयेन महत् अतिमहत्, तस्मिन् 'अतिमहति' ।] 'अहतिं' इति भिन्नपदं वासपदस्य विशेषणं, तत्र नास्ति हतिः—विनाशो यस्मिन् सः अहतिः तं 'अहतिम्' । पुनः किंविशिष्टे निकाय्ये ? । ('अतिमते' अतिशयेन अभिप्रेते) [[2]'अतिहिते' अतिशयेन हितकारिणि ।] कस्य ? । 'ते' (तव) । हे इति भिन्नपदम् । ते कथंभूतस्य ? 'शस्यमानस्य' स्तूयमानस्य, नरामरेन्द्रैः इति गम्यम् । कथम् ? । 'सदा' निरन्तरम् । किंविशिष्टस्य ते ? । 'आनन्दधानस्य' परमानन्दस्थानस्य । पुनः किंविशिष्टस्य ते ? । 'अमानिनः' निरहङ्कारस्य, यद्वा अमानिनः(भिः) सहितस्य सामानिनः । (पुनः किंविशिष्टस्य ते ? । 'ईशस्य' स्वामिनः जगतामिति गम्यम् ।) पुनः किंविशिष्टा भारती ? । जननानि-जन्मानि मृतयः-मरणानि ता एव तरङ्गा-ऊर्मयः यस्मिन् स जननमृतितरङ्गः, तादृशः 'निष्पारः' नास्ति पारः-पर्यन्तः (यत्र) तादृशः संसारो-भव एव नीराकरो-जलधिः तस्मिन् अन्तर्-मध्ये निमज्जन्तो-बुडन्तो ये जनाः-लोकाः तेषामुत्तारः-पारप्रापणं तदर्थं तस्मिन् वा नौरिव नौः-द्रोणीव द्रोणी 'जननमृतितरङ्गनिष्पारसंसारनीराकरान्तर्निमज्जज्जनोत्तारनौः' । पुनः किंविशिष्टा भारती ? । 'संसत् (इव)' सभा इव सभा । कस्य ? । 'मानस्य' पूजायाः । पुनः किं कुर्वती भारती ? । 'तन्वती' विस्तारयन्ती । कानि कर्मतापन्नानि ? । सामानि-प्रियाणि । वाशब्द इवार्थे । पुनः किंविशिष्टस्य ते ? । 'दधानस्य' बिभ्रतः पुष्यतो वा । कं कर्मतापन्नम् ? । तापः-संसारोष्मा तस्य दानं (-खण्डनं) 'तापदानम्' । कस्मै ? । 'मतिमते' बुद्धिमज्जनाय प्राज्ञाय । पक्षे हे अतन्वतीतापत् इति तीर्थकृत्संबोधनं कृतं, एतद्विशेषणं भारत्या अपि भवति तत्र अतनवः-महत्यः अतीता-गता आपदः यस्याः सा अतन्वतीतापत् । एतादृशी तव भारती नः-अस्माकं निकाय्ये-मोक्षे वासं वितीर्यात्तराम् । इति पदार्थः ॥

अथ समासः—परेषां मतानि परमतानि, परमतान्येव तिमिराणि परमततिमिराणि, भानोः प्रभा भानुप्रभा, उग्रा चासौ भानुप्रभा च उग्रभानुप्रभा, परमततिमिरेषु उग्रभानुप्रभा परमततिमिरोग्रभानुप्रभा । भूरयश्च ते भङ्गाश्च भूरिभङ्गाः, तैः भूरिभङ्गैः । विश्वेषु वर्यं विश्ववर्यं, तस्मिन् विश्ववर्ये । अतिशयेन वितीर्यात् इति वितीर्यात्तराम् । हननं हतिः, न हतिः अहतिः, अहतिः यस्यासौ अहतिमान्, तस्मिन्नहतिमति । यद्वा नास्ति हतिर्यस्यासौ अहतिः, तं अहतिम् । अतिशयेन मतिमान् अतिमतिमान्, तस्मै अतिमतिमते । शस्यते-प्रशस्यते इति शस्यमानः, तस्य शस्यमानस्य । न तनवः अतनवः, बह्व्यः (महत्यः?) इत्यर्थः, अतनवः-महत्यः अतीताः आपदः यस्मात् सः अतन्वतीतापद्, तस्य सं० हे अतन्वतीतापत् ! । आनन्दस्य धानं आनन्दधानं, तस्य आनन्दधानस्य । मानोऽस्यास्तीति मानी, न मानी अमानी, यद्वा न विद्यते मानो

१-२. [ ] एतच्चिह्नान्तर्गतः पाठः प्रामादिकः ।

येषां ते अमानिनः-साधवः, अमानिभिः सहितः सामानी, तस्य सामानिनः । जननानि च मृतयश्च जननमृतयः, जननमृतय एव तरङ्गा यस्मिन् स जननमृतितरङ्गः, पारान्निर्गत इति निष्पारः, संसरणं संसारः, नीराणां आकरः नीराकरः, संसार एव नीराकरः संसारनीराकरः, निष्पारश्चासौ संसारनीराकरश्च निष्पारसंसारनीराकरः, (जननमृतितरङ्गश्चासौ निष्पारसंसारनीराकरश्च) जननमृतितरङ्गनिष्पारसंसार-नीराकरः, जननमृतितरङ्गनिष्पारसंसारनीराकरस्य अन्तः जननमृतितरङ्गनिष्पारसंसारनीराकरान्तः, जननमृतितरङ्गनिष्पारसंसारनीराकरान्तर्निमज्जन्तः (जनन०), जननमृतितरङ्गनिष्पारसंसारनीराकरान्त-र्निमज्जन्तश्च ते जनाश्च जननमृतितरङ्गनिष्पारसंसारनीराकरान्तर्निमज्जज्जनाः, जननमृतितरङ्गनिष्पार-संसारनीराकरान्तर्निमज्जज्जनानां उत्तारः जनन०निमज्जज्जनोत्तारः, जननमृतितरङ्ग०निमज्जज्ज-नोत्तारे नौरिव नौः जननमृतितरङ्गनिष्पारसंसारनीराकरान्तर्निमज्जज्जनोत्तारनौः । तीर्थं करोतीति तीर्थकृत्, तस्य सं० हे तीर्थकृत् ! । मतिर्विद्यते यस्यासौ मतिमान् तस्मै मतिमते । तापस्य दानं तापदानं, तत् तापदानम् । इति तृतीयवृत्तार्थः ॥ ९५ ॥

(४)

दे० व्या०—परमतेति । हे तीर्थकृत् ! तीर्थं-चतुर्विधः सङ्घः प्रथमगणधरो वेति बोध्यम् । ते-तव भारती-वाणी निकाय्ये-गृहे अर्थात् मोक्षे वासं-निवासं वितीर्यात्(तरां) (अतिशयेन) दद्याद् इत्यन्वयः । 'तॄ प्लवनतरणयोः' धातुः । 'वितीर्यात्(तरां)' इति क्रियापदम् । का कर्त्री ? । भारती । कस्य ? । ते-तव । किं कर्मतापन्नम् ? । वासम् । कस्मिन् ? । निकाय्ये । "निकाय्यो भवनं कुटः" इत्यभिधानचिन्तामणिः (का० ४, श्लो० ५६) । किंविशिष्टे निकाय्ये ? । 'विश्ववर्ये' विश्वस्मिन् वर्ये-समीचीने । पुनः किंविशिष्टे ? । अहतिमति-अविद्यमानहनने । पुनः किंविशिष्टे ? । 'अतिमते' अतिशयेन मते-वाञ्छिते । हि स्फुटम् । पुनः किंविशिष्टे ? । महति-विस्तीर्णे । किंविशिष्टा भारती ? । 'परमततिमिरोग्रभानुप्रभा' परमतमेव तिमिरं-अन्धकारं तस्मिन् उग्रभानोः-सूर्यस्य प्रभा इव प्रभा-कान्तिः । पुनः किंविशिष्टा ? । गभीरा-अलब्धमध्या । कैः ? । भूरिभङ्गैः । भूरयो-भूयिष्ठा ये भङ्गा-विकल्पाः तैः । कथम् ? । भृशम्-अत्यर्थं यथा स्यात् तथा । पुनः किंविशिष्टा ? । 'जननमृतितरङ्गनिष्पारसंसारनीराकरान्तर्निमज्जज्जनो-त्तारनौः' जननं च मृतिश्चेति 'द्वन्द्वः' । त एव तरङ्गाः-कल्लोला यस्य स चासौ निष्पारः-अलब्धप्रान्तो यः संसारनीराकरः संसार एव समुद्रः तस्यान्तर्-मध्ये निमज्जन्तो-बुडन्तो ये जना-लोकाः तेषां उत्तारे-तीरप्रापणे नौरिव नौः-द्रोणी । पुनः किंविशिष्टा ? । 'मानस्य वा संसत्' मानस्य-पूजायाः संसदिव-सभेव। अत्र वाशब्दः इवार्थे भिन्नक्रमश्च । पुनः किंविशिष्टा ? । आतन्वती-विस्तारयन्ती । किम् ? । तापदानं-सन्तापखण्डनम् (दो अवखण्डने) । किंविशिष्टस्य ? । ते-तव ईशस्य-स्वामिनः । पुनः किंविशिष्टस्य ? । शस्यमानस्य-स्तूयमानस्य । कथम् ? । सदा-निरन्तरम् । किंविशिष्टस्य ? । आनन्दधानस्य-

प्रमोदस्थानस्य । सेति भारत्या विशेषणम् । पुनः किंविशिष्टस्य ? । 'अमानिनः' निरभिभूयिष्ठा (?) अतन्वतीतापत् ! इति । अतनवः-महत्यः अतीता-अतिक्रान्ता आपदो येन स तस्यामन्त्रणम् । हे हित ! (कल्याण)कारिन् ! । कस्मै ? । 'मतिमते' मतिर्विद्यते यस्यासौ मतिमान् तस्मै मतिमते, हितेति समग्रमेव वा जिनामन्त्रणम् ।। इति तृतीयदण्डकार्थः ।। ९५ ।।

(५)

ध० टीका—परमतेति । 'परमततिमिरोग्रभानुप्रभा' परमतान्येव तिमिरं तस्य ध्वंसहेतुत्वात् उग्रभानोः-तिग्मांशोः प्रभा या । 'भूरिभङ्गैर्गभीरा' भूरिभिः-प्रचुरैर्भङ्गैः-अर्थविकल्पैर्गभीरा । 'भृशं' अत्यर्थम् । 'विश्ववर्ये' विश्वस्मिन्-जगति वर्यं-प्रधानं यत् तस्मिन् । 'निकाय्ये' निवासे । मोक्षे इत्यर्थः । 'वितीर्यात्तराम्' अतिशयेन वितरतु । 'अहतिमति' अविद्यमानहनने । 'मते' शासने आधारभूते । यद् वा अहतिं-अविद्यमानविघातम्, एतद् वासस्य विशेषणम् । 'अतिमते' अतिशयेन अभिप्रेते । 'हि' स्फुटम् । 'ते' तव । 'शस्यमानस्य' स्तूयमानस्य । 'वासं' आश्रयम् । 'सदा' नित्यम् । 'अतन्वतीतापत्' अतन्व्यः अतीता आपदो यस्य तस्यामन्त्रणम् । 'आनन्दधानस्य' प्रमोदस्थानस्य । 'सा' इत्थंभूता । 'अमानिनः' निरहङ्कारस्य, अथवा सामानिनः सहामानिभिः-दर्परहितैर्वर्तते यस्तस्य । 'जननमृतितरङ्ग-निष्पारसंसारनीराकरान्तर्निमज्जज्जनोत्तारनौः' जननानि मृतयश्च ता एव तरङ्गा यस्य स जननमृतितरङ्गः स चासौ निष्पारसंसारनीराकरश्च-तीररहितभवार्णवश्च तस्यान्तर्निमज्जतां जनानां उत्तारनौ-द्रोणीभूता । 'भारती' वाक् । 'तीर्थकृत् !' । 'महति' विस्तीर्णे । 'मतिमते' मनीषिणे । 'हित !' प्रियकारिन् । अथवा मतिमता-प्रज्ञावता ईहिता-समीहिता । 'ईशस्य' स्वामिनः । 'मानस्य वा' पूजाया इव । 'संसत्' सभा । वाशब्द इवार्थे भिन्नक्रमस्तेन मानस्य संसदिवेति सम्बन्धनीया । 'आतन्वती' विस्तारयन्ती । 'तापदानं' सन्तापखण्डनम् । 'दधानस्य' पुष्णतः । 'सामानि' प्रियाणि । 'नः' अस्मभ्यम् । हे तीर्थकृत् ! ईशस्य ते मते भारती विश्ववर्ये निकाय्ये नो वासं वितीर्यात्तरामिति योगः ।। ९५ ।।

(६)

अवचूरिः

हे तीर्थकृत् ! ते-तव मते-शासने भारती विश्ववर्ये-निकाय्ये वासमाश्रयं मोक्षमित्यर्थः वितीर्यात्तरामति संबन्धः । भारती कथंभूता ? । परशासनध्वान्तसूर्यसमा । भूरिभङ्गैः-अर्थविकल्पैर्गभीरा । निकाय्ये कथंभूते ? । अहतिमति-अविद्यमानहनने । मते-शासने आधारभूते । यद्वा अहतिं-अविद्यमानघातम् । एतद् वासस्य विशेषणम् । अतिमते-अतिशयेनाभिप्रेते । हि-स्फुटम् । ते-तव । शस्यमानस्य-स्तूयमानस्य । सदा-नित्यम् । अतनवो-बहुतरा अतीता आपदो यस्य तस्यामन्त्रणं

अतन्वतीतापत् ! । आनन्दधानस्य-प्रमोदस्थानस्य । सा इत्थंभूता । अमानिनो-निरहंकारस्य । नौः-तरणिः । महति-विस्तीर्णे । हे हित !-प्रियकारिन् ! । यद्वा मतिमता-मनीषिणा ईहिता । ईशस्य-स्वामिनः । वा इवार्थे भिन्नक्रमश्च । मानस्य-पूजायाः संसद् वा-सभेव । तापदानं-संतापखण्डनमातन्वती । सामानि-प्रियाणि दधानस्य । नः-अस्माकम् ।। ९५ ।।

श्रीअम्बिकायाः स्तुतिः—

सरभसनतनाकिनारीजनोरोजपीठीलुठत्तारहारस्फुरद्रश्मिसारक्रमाम्भोरुहे !
परमवसुतराङ्गजाऽऽरावसन्नाशितारातिभाराऽ[1]जिते भासिनी हारतारा बलक्षेमदा ।
क्षणरुचिरुचिरोरुचञ्चत्सटासङ्कटोत्कृष्टकण्ठोद्भटे संस्थिते ! भव्यलोकं त्वमम्बाम्बिके !'
परमव सुतरां गजारावसन्ना शितारातिभा रा[2]जिते भा[3]सि नीहारतारावलक्षेऽमदा ।। ४ ।। ९६ ।।

- अर्णव०

(१)

ज० वि०—सरभसेति । हे अम्बिके !-अम्बिकानाम्नि देवि ! त्वं-भवती भव्यलोकं-भव्यजनं, भव्यलोकानां बहुत्वेऽपि जात्यपेक्षयैकवचननिर्देशः, परं-उत्कृष्टं यथा स्यात् तथा सुतरां-अत्यर्थं यथा स्यात् तथा अव-रक्ष त्रायस्वेति यावत् इति क्रियाकारकप्रयोगः । इयं कर्त्रुक्तिः । अत्र 'अव' इति क्रियापदम् । का कर्त्री ? 'त्वम्' । कं कर्मतापन्नम् ? 'भव्यलोकम्' । कथम् ? 'परम्' । पुनः कथम् ? 'सुतराम्' । त्वं कथंभूता ? 'परमवसुतराङ्गजा' अतिशयेन परमवसू-उत्कृष्टतेजसौ अङ्गजौ-पुत्रौ यस्याः सा तथा । पुनः कथं० ? 'आरावसन्नाशितारातिभारा' आरावः-ध्वनिस्तेन सन्नाशितः-सम्यगदर्शनं नीतः अरातिभारः-शत्रुसमूहो यया सा तथा । पुनः कथं० ? 'भासिनी' भासनशीला । पुनः कथं० ? 'हारतारा' हारेणोज्ज्वला । पुनः कथं० ? 'वलक्षेमदा' बलं-सामर्थ्यं क्षेमं-कल्याणं ते ददातीति वलक्षेमदा । पुनः कथं० ? 'असन्ना' अखिन्ना । पुनः कथं० ? 'शितारातिभा' शितं-तनूकृतं यद् आरं तस्येव अतिभा-अतिशयेन प्रभा यस्याः सा तथा । पुनः कथं० ? 'अमदा' मदरहिता । कस्याम् ? 'भासि' दीप्तिविषये । अवशिष्टानि सर्वाण्यप्यम्बिकाया देव्याः सम्बोधनानि, तद्व्याख्या यथा-हे 'सरभसनतनाकिनारीजनोरोजपीठीलुठत्तारहारस्फुरद्रश्मिसारक्रमाम्भोरुहे !' सरभसं-सवेगं नतः-प्रणतः यो नाकिनारीजनः-देवाङ्गनाजनः तस्योरोजपीठीषु-स्तनपर्यन्तिकासु लुठन्तः-इतस्ततश्चलन्तः तारा उज्ज्वला ये हाराः-

१-२. सम्बोधनार्थे वा ।

३. 'भासिनीहार०' इत्यपि सम्भवति ।

कण्ठाभरणानि तेषां स्फुरन्तः-प्रसरन्तः ये रश्मयः-किरणाः तैः सारे-कर्बुरीभूते क्रमाम्भोरुहे-चरणारविन्दे यस्याः सा तथा तत्सम्बो० हे सरभ० । हे 'संस्थिते !' अधिरूढे ! । कस्मिन् ? 'गजारौ' मतङ्गजरिपौ, केसरिणीत्यर्थः । गजारौ कथंभूते ? 'अजिते' केनाप्यनभिभूते । पुनः कथं० ? 'क्षणरुचिरुचिरोरुचञ्चत्सटासङ्कटोत्कृष्टकण्ठोद्भटे' क्षणरुचिः-विद्युत् तद्वद् रुचिराः-चार्व्यः उरवः-विशालाः चञ्चन्त्यो-दीप्यमाना एवंविधा याः सटाः-केसराः ताभिः सङ्कटः-व्याप्तः उत्कृष्टः-अतिशायी यः कण्ठः-निगरणं तेनोद्भटः-करालस्तस्मिन् । पुनः कथं० ? 'राजिते' शोभिते । पुनः कथं० ? 'नीहारतारावलक्षे' नीहारः-हिमं तारा-नक्षत्राणि तद्वद् वलक्षः-उज्ज्वलस्तस्मिन् । हे 'अम्ब !' मातः ! । अजिते राजिते इति विशेषणे द्वे गजारेः सप्तम्यन्तत्वेन व्याख्याते ते अम्बिकायाः सम्बोधने घटेते च ।।

अथ समासः—सह रभसेन वर्तते यत् तत् सरभसं 'तत्पुरुषः' । सरभसं नतं सरभ० 'तत्पुरुषः' । नाकिनां नार्यो नाकिनार्यः 'तत्पुरुषः' । नाकिनार्यश्चासौ[1] जनश्च नाकि० 'कर्मधारयः' । सरभसनतश्चासौ नाकिनारीजनश्च सरभ० 'कर्मधारयः' । उरसि जायन्त इत्युरोजाः 'तत्पुरुषः' । पीठा इव पीठ्यः । उरोजाश्च ताः पीठ्यश्च उरोजपीठ्यः 'कर्मधारयः' । सरभसनतनाकिनारीजनस्योरोजपीठ्यः सरभ० 'तत्पुरुषः' । सरभसनतनाकिनारीजनोरोजपीठीषु लुठन्तः सरभ० 'तत्पुरुषः' । ताराश्च ते हाराश्च तारहाराः 'कर्मधारयः' । सरभसनतनाकिनारीजनोरोजपीठीलुठन्तश्च ते तारहाराश्च सरभ० 'कर्मधारयः' । स्फुरन्तश्च ते रश्मयश्च स्फुर० 'कर्मधारयः' । सरभसनतनाकिनारीजनोरोजपीठीलुठत्तारहाराणां स्फुरद्रश्मयः सरभ० 'तत्पुरुषः' । सरभसनतनाकिनारीजनोरोजपीठीलुठत्तारहारस्फुरद्रश्मिभिः सारे सरभ० 'तत्पुरुषः' । अम्भसि रोहन्तीत्यम्भोरुहाणि 'तत्पुरुषः' । अम्भोरुहे इवाम्भोरुहे । क्रमौ च ते अम्भोरुहे च क्रमाम्भोरुहे 'कर्मधारयः' । सरभसनतनाकिनारीजनोरोजपीठीलुठत्तारहारस्फुरद्रश्मिसारक्रमाम्भोरुहे यस्याः सा सरभ० 'बहुव्रीहिः' । तत्सम्बो० हे सरभ० । परमं वसु ययोस्तौ परमवसू । अतिशयेन परमवसू परमवसुतरौ । अङ्गाज्जायेते इत्यङ्गजौ 'तत्पुरुषः' । परमवसुतरौ अङ्गजौ यस्याः सा परम० 'बहुव्रीहिः' । सम्यग् नाशितः सन्नाशितः 'तत्पुरुषः' । आरावेण सन्नाशितः आराव० 'तत्पुरुषः' । अरातीनां भारोऽरातिभारः 'तत्पुरुषः' । आरावसन्नाशितोऽरातिभारो यया सा आरा० 'बहुव्रीहिः' । न जितोऽजितः 'तत्पुरुषः' । तस्मिन्नजिते । अम्बिकासम्बोधनपक्षे तु न जिता अजिता 'तत्पुरुषः' । तत्सम्बो० हे अजिते ! । हारेण हारवद् वा तारा हारतारा 'तत्पुरुषः' । बलं च क्षेमं च बलक्षेमे 'इतरेतरद्वन्द्वः' । बलक्षेमे ददातीति बलक्षेमदा 'तत्पुरुषः' । क्षणं रुचिर्यस्याः सा क्षणरुचिः 'बहुव्रीहिः' । क्षणरुचिवद् रुचिराः क्षणरुचि० 'तत्पुरुषः' । चञ्चन्त्यश्च ताः सटाश्च चञ्चत्सटाः 'कर्मधारयः' । उरवश्च ताः चञ्चत्सटाश्च उरुचञ्चत्सटाः 'कर्मधारयः' । क्षणरुचिरुचिराश्च ता उरुचञ्चत्सटाश्च क्षणरुचि०

१. 'नार्य एव जनः नाकि–' इति प्रतिभाति ।

'कर्मधारयः' । क्षणरुचिरुचिरोरुचञ्चत्सटाभिः सङ्कटः क्षणरुचि० 'तत्पुरुषः' । उत्कृष्टश्चासौ कण्ठश्च उत्कृष्टकण्ठः 'कर्मधारयः' । (क्षणरुचिरुचिरोरुचञ्चत्सटासङ्कटश्चासौ उत्कृष्टकण्ठश्च क्षणरुचि० 'कर्मधारयः' ।) क्षणरुचिरुचिरोरुचञ्चत्सटासङ्कटोत्कृष्टकण्ठेन उद्भटः क्षणरुचि० 'तत्पुरुषः' । तस्मिन् क्षणरुचि० । भव्यश्चासौ लोकश्च भव्यलोकः 'कर्मधारयः' । तं भव्य० । गजानामरिर्गजारिः 'तत्पुरुषः' तस्मिन् गजारौ । न सन्ना असन्ना 'तत्पुरुषः' । शितं च तदारं च शितारं 'कर्मधारयः' । अतिशयेन भाऽतिभा 'तत्पुरुषः । शितारवदतिभा यस्याः सा शिता० 'बहुव्रीहिः' । नीहाराश्च ताराश्च नीहा० 'इतरेतरद्वन्द्वः' । नीहारतारावद् वलक्षो नीहार० 'तत्पुरुषः' । तस्मिन्नीहा० । न विद्यते मदो यस्याः साऽमदा 'बहुव्रीहिः' । इति काव्यार्थः ॥ ४ । २४ । ९६ ॥

॥ इति श्रीमद्वृद्धपण्डितश्री५श्रीदेवविजयगणिशिष्यपं०जयविजयगणिविरचितायां श्रीशोभनस्तुतिवृत्तौ श्रीवर्धमानस्वामिनः स्तुतेर्व्याख्या ॥ इति श्रीशोभनस्तुतिवृत्तिः सम्पूर्णा ॥

अथ प्रशस्तिः—

श्रीविजयसेनसूरीश्वरस्य राज्ये सुयौवराज्ये तु ।
श्रीविजयदेवसूरेरिन्दुरसाब्धीन्दुमितवर्षे ॥ १ ॥ - आर्या

समधीत्य वाचकेन्द्र-श्रीमत्कल्याणविजयगणिशिष्यात् ।
श्रीधर्मविजयवाचक-शिरोमणेः श्रुतनिधेः किञ्चित् ॥ २ ॥ - आर्या

श्रीदेवविजयविदुषां, शिष्योऽकृत शोभनस्तुतेर्वृत्तिम् ।
जयविजयः सुखबोधा-मल्पमतीनुपचिकीर्षुरिमाम् ॥ ३ ॥ - आर्या

श्रीशोभनस्तुतेर्वृत्तेर्ग्रन्थाग्रं प्रतिपाद्यते ।
पञ्चाशत्त्रिशतीयुक्तं, सहस्रद्वितयं मया ॥ ४ ॥ - अनुष्टुप्

ग्रन्थाग्रं २३५० ।

(२)

सि० वृ०—सरभसनतेति । हे अम्बिके !-अम्बिकानाम्नि देवि ! त्वं-भवती भव्यलोकं-भविकजनं परम्-उत्कृष्टं यथा स्यात् तथा सुतरां अव-रक्षेत्यर्थः । 'अव रक्षणे' धातोः 'आशीःप्रेरणयोः' (सा० सू० ७०३) कर्तरि परस्मैपदे मध्यमपुरुषैकवचनम् । अत्र 'अव' इति क्रियापदम् । का कर्त्री ? । त्वम् । कं कर्मतापन्नम् ? । भव्यलोकम् । भव्यलोकानां बहुत्वेऽपि जात्यपेक्षयैकवचननिर्देशः । कथम् ? । परम् । कथम् ? । सुतराम् । त्वं कथंभूता ? । 'परमवसुताङ्गजा' अतिशयेन परमवसू-उत्कृष्टतेजसौ अङ्गजौ-पुत्रौ यस्याः सा तथा । पूर्वभवापेक्षया एतद् विशेषणम् । पुनः कथंभूता ? । 'आरावसन्नाशितारातिभारा'

आरावो-ध्वनिविशेषः तेन सन्नाशितः-सम्यगदर्शनं नीतः अरातिभारः-शत्रुसमूहो यया सा । पुनः कथंभूता ? । 'भासिनी-भासनशीला । पुनः कथंभूता ? । 'हारतारा' हारेण-मौक्तिकस्रजा तारा-उज्ज्वला । पुनः कथंभूता ? । 'बलक्षेमदा' बलं-सामर्थ्यं क्षेमं-कल्याणं अनयोः 'इतरेतरद्वन्द्वः', ते ददातीति तथा । पुनः कथंभूता ? । 'असन्ना' न सन्ना असन्ना, अखिन्नेत्यर्थः । पुनः कथंभूता ? । 'शितारातिभा' शितं-तनूकृतं यदारं-पित्तलं तस्येव अतिभा-अतिशयेन प्रभा यस्याः सा तथा । "रीरिः (तिः) स्त्रियामारकूटो न स्त्रियामथ ताम्रकं" इत्यमरः (श्लो० १९००) । पुनः कथंभूता ? । 'अमदा' न विद्यते मदो-दर्पो यस्याः सा, मदरहितेत्यर्थः । कस्याम् ? । भासि-दीप्तिविषये । अवशिष्टानि सर्वाणि अम्बिकायाः सम्बोधनानि । तेषां व्याख्या त्वेम्-हे 'सरभसनतनाकिनारीजनोरोजपीठीलुठत्तारहारस्फुरद्रश्मिसारक्रमाम्भोरुहे !' सरभसं-सवेगं नतः-प्रणतो यो नाकिनारीजनः-देवाङ्गनालोकः तस्य उरोजपीठीपु-स्तनपीठिकासु लुठन्तः-इतस्ततः परिस्खलन्तस्ताराः-उज्ज्वला ये हाराः-कण्ठाभरणानि तेषां स्फुरन्तः-प्रसरन्तो ये रश्मयः-मयूखास्तैः सारे-कर्बुरीभूते क्रमाम्भोरुहे-चरणारविन्दे यस्याः सा तस्याः सम्बोधनं हे सरभस० । "सारः शबलवातयोः" इति विश्वः । हे संस्थिते !-अधिरूढे ! । कस्मिन् ? । 'गजारौ' गजानामरिः गजारिः तस्मिन्, केसरिणीत्यर्थः । कथंभूते गजारौ ? । अजिते-केनाऽप्यनभिभूते । पुनः कथंभूते ? । 'क्षणरुचिरुचिरोरुचञ्चत्सटासङ्कटोत्कृष्टकण्ठोद्भटे' क्षणरुचिः-तडित् तद्वत् रुचिरा-मनोज्ञा उरवो-विशालास्ताश्च ताश्चञ्चन्त्यः-दीप्यमाना याः सटाः-केसरास्ताभिः सङ्कटो-व्याप्तः स चासावुत्कृष्टः-अतिशायी यः कण्ठो-निगरणं तेनोद्भटः-करालस्तस्मिन् । पुनः कथंभूते ? । राजिते-शोभिते । पुनः कथंभूते ? । 'नीहारतारावलक्षे' नीहारो-हिमं तारा-नक्षत्राणि अनयोः 'द्वन्द्वः', तद्वद् वलक्षः-धवलस्तस्मिन् । "अवदातगौरशुभ्रवलक्षधवलार्जुनाः" इति हैमः (का० ६, श्लो० २९) । हे अम्ब !-मातः ! । 'अम्बादीनां धौ ह्रस्वः' (सा० सू० २०१) इत्यनेन ह्रस्वत्वम् । दण्डकच्छन्दोऽदः । 'तदूर्ध्वं चण्डवृष्ट्यादि-दण्डकाः परिकीर्तिताः' इति च तल्लक्षणम् ॥ ४ । २४ । ९६ ॥

इति श्रीमहाराजाधिराजपादसाहश्रीअकब्बरसूर्यसहस्रनामाध्यापकश्रीशत्रुञ्जयतीर्थकरमोचनाद्यनेकसुकृतविधापक-महोपाध्यायश्रीभानुचन्द्रगणिशिष्याष्टोत्तरशतावधानसाधनप्रमुदितपातिसाहश्रीअकब्बरजल्लालदीनप्रदत्तषुस्फहमा-पराभिधानमहोपाध्यायश्रीसिद्ध(द्धि)चन्द्रगणिविरचिताया शोभनाचार्यनाम्ना विहितायाः शोभनस्तुतेः टीकाया श्रीमहावीरतीर्थकरस्येयं स्तुतिवृत्तिः । तत्समाप्तौ च समाप्ता श्रीशोभनस्तुतिवृत्तिः ॥

(३)

सौ० वृ०—सरभसेति । हे 'अम्ब !' हे मातः ! । 'अम्बादीनां धौ ह्रस्वः' (सा० सू० २०१) इति वचनात् हे अम्ब ! । हे अम्बिके ! सिद्धायिकापरनाम्नि ! देवि ! । पुनः (?) सरभसं-सहर्षं सवेगं यथा स्यात् तथा नतः-प्रणतो यो नाकिनां-देवानां नारीजनः-स्त्रीगणः तस्य उरोजाः-स्तनाः तेषां पीठी-स्थली

तस्यां लुठन्तः-इतस्ततः चलन्तो ये ताराः-निर्मला हाराः-मौक्तिकमालाः तेषां स्फुरन्तः-देदीप्यमानाः रश्मयः-किरणाः तैः कृत्वा सारं-प्रधानं कर्बुरं वा क्रमाम्भोरुहं-चरणपद्मं यस्याः सा सरभसनतनाकिनारीजनोरोजपीठीलुठत्तारहारस्फुरद्रश्मिसारक्रमाम्भोरुहा, तस्याः सं० हे 'सरभसनतनाकिनारीजनोरोजपीठीलुठत्तारहारस्फुरद्रश्मिसारक्रमाम्भोरुहे ! त्वं-भवती भव्यलोकं सुतरां परं-प्रकर्षेण अव इत्यन्वयः । 'अव' इति क्रियापदम् । का कर्त्री ? । 'त्वम्' । 'अव' रक्ष । कं कर्मतापन्नम् ? । 'भव्यलोकम्' । भव्यलोकानां बहुत्वेऽपि जात्यपेक्षयैकवचननिर्देशः । कथम् ? । 'सुत' अतिशयेन शोभनतरं भवति यथा स्यात् तथा । किंविशिष्टा त्वम् ? । परमं-प्रकृष्टं अतिशयेन वसु-तेजो यस्य स तादृशः अङ्गजः-पुत्रो यस्याः सा 'परमवसुतराङ्गजा' यद्वा परमवसुतरौ द्वौ अङ्गजौ यस्याः सा 'परमवसुतराङ्गजा' । पुनः किंविशिष्टा त्वम् ? । आरावेण-शब्देन हुंकारेण सन्तः-विद्यमाना नाशिताः-त्रासिताः अरातीनां-शत्रूणां भाराः-समुदाया यया सा 'आरावसन्नाशितारातिभारा' । पुनः किंविशिष्टा त्वम् ? । हारवत् तारा-उज्ज्वला निर्मला 'हारतारा' । पुनः किंविशिष्टा त्वम् ? । बलं-शरीरसामर्थ्यं क्षेमं-कल्याणं तद्द्वयं ददातीति 'बलक्षेमदा' । पुनः किंविशिष्टा त्वम् ? । 'भासिनी' तेजोभरैर्दीप्ता-भासनशीला । हे 'अजित' ! । (अनभिभूते !) । हे 'संस्थिते !' अध्यासिते ! । कस्मिन् ? । 'गजारौ' गजस्य अरिः-शत्रुः गजारिः तस्मिन् गजारौ, सिंहाधिरूढा इत्यर्थः । पुनः किंविशिष्टा त्वम् ? । 'अमदा' मदरहिता, निरहङ्कारिणीत्यर्थः । कस्याम् ? । 'भासि' स्वप्रभायाम् । पुनः किंविशिष्टा त्वम् ? 'असन्ना' अखिन्ना-श्रमरहिता । पुनः किंविशिष्टा त्वं ? । शितः-तीक्ष्णीकृतः य आरः-निर्धूमाङ्गारः स्वर्णस्याङ्कुशाग्रं वा तद्वदतिशयेन भा-प्रभा यस्याः सा 'शितारातिभा' । किंविशिष्टे गजारौ ? । क्षणरुचिः-विद्युत् तद्वद् रुचिरा-मनोहरा उरवः-महत्यः चञ्चन्त्यो-दीप्यमानाः तादृश्यो याः सटाः ताभिः सङ्कटः-सङ्कीर्णः तादृशः उत्कृष्टो यः कण्ठः-निगरणः तेन उद्भटः-प्रधानः क्षणरुचिरुचिरोरुचञ्चत्सटासङ्कटोत्कृष्टकण्ठोद्भटः तस्मिन् क्षणरुचिरुचिरोरुचञ्चत्सटासङ्कटो-त्कृष्टकण्ठोद्भटे । पुनः किंविशिष्टे गजारौ ? नीहारो-हिमं तारा-नक्षत्राणि तद्वल्लक्षणो[1] मलः (?) नीहारतारावलक्षः तस्मिन् 'नीहारतारावलक्षे' । राजिते अजिते नीहारतारावलक्षे एतद्विशेषणत्रयं गजारौ इत्यस्य कृतं, एतद्विशेषणत्रयं अम्बिकायाः सम्बोधनेऽपि भवति । एतादृशा अम्बिका त्वं भव्यलोकान् अव-त्रायस्व । इति पदार्थः ।

अथ समासः—"रभसं (सो?) वेगहर्षयोः" इति (विश्व०) वचनात् रभसेन सहितं सरभसं, सरभसं यथा स्यात् तथा नतः सरभसनतः, नाकं अस्यास्तीति नाकी, नाकिनो नार्यः नाकिनार्यः, नाकिनार्य एव जनः (नाकिनारीजनः), सरभसनतश्चासौ नाकिनारीजनश्च सरभसनतनाकिनारीजनः, उरसि जायन्ते इति उरोजाः, सरभसनतनाकिनारीजनस्य उरोजाः सरभसनतनाकिनारीजनोरोजाः, सरभसनतनाकि-

१. 'तद्वद् वलक्षो-धवलः' इति प्रतिभाति ।

नारीजनोरोजानां पीठी सरभसनतनाकिनारीजनोरोजपीठी, सरभसनतनाकिनारीजनोरोजपीठ्यां लुठन्तः सरभसनतनाकिनारीजनोरोजपीठीलुठन्तः, ताराश्च ते हाराश्च तारहाराः, सरभसनतनाकिनारीजनोरोज-पीठीलुठन्तश्च ते तारहाराश्च सरभसनतनाकिनारीजनोरोजपीठीलुठत्तारहाराः, स्फुरन्तश्च ते रश्मयश्च स्फुरद्रश्मयः, सरभसनतनाकिनारीजनोरोजपीठीलुठत्तारहाराणां स्फुरद्रश्मयः सरभसनतनाकिनारीजनो-रोजपीठीलुठत्तारहारस्फुरद्रश्मयः, क्रमावेव अम्भोरुहं क्रमाम्भोरुहं, सरभसनतनाकिनारीजनोरोजपीठी-लुठत्तारहारस्फुरद्रश्मिभिः सारं-प्रधानं कर्बुरितं वा क्रमाम्भोरुहं यस्याः सा सरभसनतनाकिनारीजनोरोज-पीठीलुठत्तारहारस्फुरद्रश्मिसारक्रमाम्भोरुहा, तस्याः सं० हे सरभसनतनाकिनारीजनोरोजपीठीलुठत्ता-रहारस्फुरद्रश्मिसारक्रमाम्भोरुहे ! । [२]परमं च तद् वसु च परमवसु, अतिशयेन परमवसु इति परमवसुतरः, परमवसुतरः अङ्गजो यस्याः सा परमवसुतराङ्गजा, यद्वा परमश्च वसुतरश्च परमवसुतरौ परमवसुतरौ नामानौ (?) अङ्गजौ यस्याः सा परमवसुतराङ्गजा । अरातीनां भारः अरातिभारः, नाशितश्चासौ अराति-भारश्च नाशितारातिभारः, आरवेण-हुंकारेण सन्-विद्यमानः नाशितारातिभारो यया सा आरावसन्नाशि-तारातिभारा । हारवत् तारा हारतारा । बलं च क्षेमं च बलक्षेमे, बलक्षेमे ददातीति बलक्षेमदा । क्षणं रुचिः यस्याः सा क्षणरुचिः, क्षणरुचिवद् रुचिराः क्षणरुचिरुचिराः, क्षणरुचिरुचिराश्च ता उरवश्च क्षणरुचि-रुचिरोरवः, क्षणरुचिरुचिरोरवश्च ताः चञ्चन्त्यश्च क्षणरुचिरुचिरोरुचञ्चन्त्यः, क्षणरुचिरुचिरोरु-चञ्चन्त्यश्च ताः सटाश्च क्षणरुचिरुचिरोरुचञ्चत्सटाः, क्षणरुचिरुचिरोरुचञ्चत्सटाभिः सङ्कटः क्षणरुचि-रुचिरोरुचञ्चत्सटासङ्कटः, उत्कृष्टश्चासौ कण्ठश्च उत्कृष्टकण्ठः, क्षणरुचिरुचिरोरुचञ्चत्सटासङ्कटश्चासौ उत्कृष्टकण्ठश्च क्षणरुचिरुचिरोरुचञ्चत्सटासङ्कटोत्कृष्टकण्ठः, क्षणरुचिरुचिरोरुचञ्चत्सटासङ्कटोत्कृष्ट-कण्ठेन उद्भटः क्षणरुचिरुचिरोरुचञ्चत्सटासङ्कटोत्कृष्टकण्ठोद्भटः, तस्मिन् क्षणरुचिरुचिरोरुचञ्चत्सटा-सङ्कटोत्कृष्टकण्ठोद्भटे । सम्यक् स्थिता संस्थिता, तस्याः सं० हे संस्थिते ! । भव्यश्चासौ लोकश्च भव्यलोकः, तं भव्यलोकम् । गजानां अरिः गजारिः, तस्मिन् गजारौ । न सन्ना असन्ना, अक्षीणा इत्यर्थः । शितं च

पृ. ४१६ सम्बन्धि टीप्पणमिदम्प्रथमम् -

१. श्रीभाण्डारकरओरियेन्टलइन्स्टिटयुट्संज्ञकसंस्थायाः प्रत्यां तु अयं पाठः– इति

निरतीचारचारित्राः, सौजन्यगुणशालिनः ।
भ्रातरो भावचन्द्राह्वा, आद्यादर्शमलीलिखन् ॥

भद्रं भूयाल्लेखकपाठकयोः ।

याद्दशं पुस्तके द्दष्टे, ताद्दशं लिषि(खि)तं मया ।
यदि शुद्धमशुद्धं वा, मम दोषो न दीयते ॥

संवत् १७५८ वर्षे फाल्गुनासितद्वितीयायां लिपीकृतं पं० सुमतिविजयगणिशिष्यमुनिरामविजयेन स्ववाचनार्थं श्रीबरहानपुरवरे ।

श्रीः ॥ कल्याणमस्तु ॥ श्रीः । छः ॥

२. 'परमं वसु यस्य स परमवसुः' इति प्रतिभाति ।

तद् आरं च शितारं, शितारवद् अतिशयेन भा-कान्तिः यस्याः सा शितारातिभा । भासते इति भासिनी । नीहाराश्च ताराश्च नीहारताराः, नीहारतारावत् वलक्षो नीहारतारावलक्षः, तस्मिन्नीहारतारावलक्षे । नास्ति मदो यस्याः सा अमदा । इति तुर्यवृत्तार्थः ॥ ९६ ॥

श्रीमद्वीरजिनेन्द्रस्य, स्तुतेरर्थो लिपीकृतः ।

सौभाग्यसागराख्येन, सूरिणा ज्ञानसेविना ॥ १ ॥

॥ इति श्रीचतुर्विंशतितमवीरजिनस्तुतिः समाप्ता । तत्समाप्तौ च समाप्ता श्रीशोभनदेवाचार्यकृता शोभनस्तुतिः ॥४।२४।९६॥

(अथ प्रशस्तिः–)

श्रीमत्तपागच्छसुधीर्वितन्द्रः
श्रीहीरविजयाभिधसूरिचन्द्रः ।
यदुक्तिमाकर्ण्य दयार्द्रचेता
बभूव साहिश्रीअकब्बराख्यः ॥ १ ॥ - उपजातिः

जेजीयाख्यकरोव्यमोचनयतं स्वाज्ञां चिरं ग्राहिता–
नैके निर्धृतयोऽक्षतं च गुरु संशत्रुञ्जयाख्यं परम् ।
येन द्वादश वासराश्च विहिताः सत्त्वाभयोत्सर्जनात्
शुद्धाः शुद्धगुणैरनेकविहितं धर्मादिकृत्यं मुदा ॥ २ ॥ - शार्दूल०

तत्पट्टे विजयादिसेनसुगुरुर्जातः सुधादीधिति–
स्तत्पट्टोदयभानुभानुरभवद् देवेशवन्द्यक्रमः ।
श्रीमच्छ्रीविजयादिदेवसुगुरुः सूरीश्वरः शङ्कर–
स्तत्पट्टे विजयप्रभाख्यसुगुरुः सूरीशसेन(शीत?)द्युतिः ॥ ३ ॥ - शार्दूल०

तत्पट्टेऽजनि शीतरश्मिसदृशः संविज्ञचूडामणिः
श्रीज्ञानाद्विमलाभिधानसुगुरुः सूरीशवास्तोष्पतिः ।
तत्पट्टाम्बरभास्वदर्कसदृशोऽनूचानवर्योपमः
सौभाग्यादिमसागराख्यसुगुरुस्तेनेयमाविष्कृता ॥ ४ ॥ - शार्दूल०

रम्या शोभनपण्डितेन विहिता श्रीमज्जिनानां स्तुति–
स्तद्वृत्तिर्विहिता सुबोधकलिता प्रेक्षावतां ज्ञप्तये ।
श्रीमानादिमसागराः समभवन् पूर्वे बुधा विश्रुता
एकैकस्य पठ(द)स्य युक्तिशतशो व्याख्या कृताऽनेकशः ॥ ५ ॥ - शार्दूल०

सौभाग्यसूरिणा चेयं, कृता वृत्तिर्मनोरमा ।
बन्दिरे स्तम्भतीर्थेऽस्मिन्, श्रीमत्पार्श्वप्रसादतः ॥ ६ ॥ - अनु०

श्रीज्ञानविमलसूरीश्वरेण संशोधिता चेयम् ।
वसुमुनिमुनिविधु(१७७८)वर्षे माघोज्ज्वलसप्तमीदिवसे ॥ ७ ॥ - आर्या

इति श्रीप्रशस्तिः स्वस्तिकारिणी भूयाद् भूरिभक्तिभृतां जनानाम् । लेखकपाठकयोर्मङ्गलमालिका बालिकावदालिङ्गतुतराम् ॥ इति श्रेयःश्रेणयः सन्तु । स्तुतिः समाप्तिमगात् ।

अङ्केन्दुगजभूवर्ष(१८१९)-मिते मास इषे सिते ।
कर्मवाग्र्यष्टमीयुक्ते[1], श्रीमत्सूरतबन्दिरे ॥ १ ॥ अनु०

प्रौढाह्वयेन प्रालेखि, साधुना पुस्तकं शुभम् ।
आयादिविजयप्रान्त-स्तस्य हेतोर्मया मुदा ॥ २ ॥ युग्मम्

लेखनं पेषणं तुल्यं, बुधा मुधा वदन्त्यपि ।
लेखने गात्रसंरोधः पेषणे गात्रचेष्टितम् ॥ ३ ॥ - अनु०

यादृशं लेख्यपत्रसङ्घाते दृष्टं तादृशमलेखि ।

(४)

दे० व्या०--सरभसमिति । हे अम्बिके ! सुतराम्-अत्यर्थं यथा स्यात् तथा भव्यलोकं त्वं अवरक्षेत्यन्वयः । 'अव रक्षणे' धातुः । 'अव' इति क्रियापदम् । का कर्त्री ? । त्वम् । कं कर्मतापन्नम् ? । भव्यलोकम् । किंविशिष्टं भव्यलोकम् ? । परम्-उत्कृष्टं, संप्राप्तसम्यक्त्वात् । किंविशिष्टा त्वम् ? । 'परमवसुतराङ्गजा' परमवसुतरौ-अतिशयेन प्रकृष्टतेजसौ अङ्गजौ-पुत्रौ यस्याः सा । यद्यपि देव्याः उरसः पुत्राभावः, तथापि प्राग्भवीयावेतावसेयौ । पुनः किंविशिष्टाः । 'आरावसन्नाशितारातिभारा' आरावेणशब्देन सन्नाशितो-नाशं प्रापितः अरातिभारः-शत्रुसमूहः यया सा तथा । पुनः किंविशिष्टा ? । भासिनीभासनशीला । (पुनः किंविशिष्टा?) 'हारतारा' हारवत् तारा-उज्ज्वला । पुनः किंविशिष्टा ? ।'वलक्षेमदा' वलं च क्षेमं च ददातीति वलक्षेमदा। पुनः किंविशिष्टा ? । असन्ना-अखिन्ना । न सन्ना असन्नेति विग्रहः । पुनः किंविशिष्टा? । 'शितारातिभा शितारस्येव-तप्तीकृतपित्तलस्येव भा-कान्तिः यस्याः सा तथा । आरस्य-पित्तलस्य अतिक्रान्ता भा-दीप्तिर्यया सा तथा । पुनः किंविशिष्टा ? । अमदा-मदरहिता । नास्ति मदो यस्याः सा तथेति विग्रहः । पुनः किंविशिष्टा ? । आसिता[2]-उपविष्टा । कस्मिन् ? । गजारौ-सिंहे ।

---

१. **कर्मसाक्ष्यष्टमीयोगे इति प्रतिभाति ।**

२. **मूलकाव्ये तु 'संस्थिते !' इति पाठः ।**

किंविशिष्टे गजारौ ? । 'नीहारतारावलक्षे' नीहारो-हिमं तारा-नक्षत्राणि तद्वद् वलक्षे-धवले । "वलक्ष-धवलार्जुनाः" इत्यभिधानचिन्तामणिः (का० ६, श्लो० २९) । पुनः किंविशिष्टे ? । 'क्षणरुचिरुचिरो-रुचञ्चत्सटासङ्कटोत्कृष्टकण्ठोद्भटे' क्षणरुचिरुचिराभिः-विद्युद्दीप्तिभिः उरुभिः चञ्चन्तीभिः सटाभिः सङ्कटः-उत्कृष्टो यः कण्ठो-गलकन्दलस्तेन उद्भटे-कराले । हे 'सरभसनतनाकिनारीजनोरोजपीठीलुठत्तार-हारस्फुरद्रश्मिसारक्रमाम्भोरुहे !' सरभसं-वेगेन नतः-प्रणतो यो नाकिनारीजनः-अमरवधूवर्गः तस्य उरोजपीठीषु-स्तनपर्यङ्किकासु लुठतां-इतस्ततश्चलतां हाराणां स्फुरद्रश्मिभिः सारे-कर्बुरे क्रमाम्भोरुहे-चरणकमले यस्याः सा तस्या आमन्त्रणम् । हे अजिते !—अतिरस्कृते ! । हे राजिते !-शोभिते ! । कस्याम् ? । भासि-दीप्तिविषये । हे अम्ब !-हे मातः ! । अम्बादीनां धौ ह्रस्वः (सा० सू० २०१) इति सूत्रेणात्वह्रस्वः । एतानि सर्वाणि देव्याः सम्बोधनपदानि ।। इति चतुर्थदण्डकार्थः ।।

इति श्रीशत्रुञ्जयकरमोचनाद्यनेकसुकृतकारिमहोपाध्यश्री ५ श्रीभानुचन्द्रगणिशिष्येण पण्डितप्रकाण्डमण्डलाखण्डलेन पण्डितश्रीश्री१०८श्रीदेवचन्द्रेण कृतायां शोभनस्तुतिशिशुबोधिनीटीकायां समाप्तिमागाच्चतुर्विंशतितमजिनस्तुतिः।।

।। शुभं भवतु ।। श्रीरस्तु ।। श्री ।। श्री ।। छ ।। श्री ।। श्री ।। ४ । २४ । ९६ ।।

(५)

ध० टीका—सरभसेति । 'सरभसनतनाकिनारीजनोरोजपीठीलुठत्तारहारस्फुरद्रश्मिसारक्रमाम्भो-रुहे !' सरभसं नतः-प्रणतो यो नाकिनारीजनः तस्योरोजपीठीषु-स्तनपर्यङ्किकासु लुठतां तारहाराणां स्फुरद्भी रश्मिभिः सारे-कर्बुरे क्रमाम्भोरुहे यस्याः सा संबोध्यते । 'परमवसुतराङ्गजा' अतिशयेन परमवसू-परमतेजसौ अङ्गजौ-पुत्रौ यस्याः सा । 'आरावसन्नाशितारातिभारा' आरावेण-ध्वनिना सन्नाशितः-सम्यग् अदर्शनं नीतः अरातिभारः-शत्रुसन्दोहो यया सा । 'अजिते !' अनभिभूते ! । 'भासिनी' भासनशीला । 'हारतारा' मौक्तिकमालोज्ज्वला । 'वलक्षेमदा' बलं-सामर्थ्यं क्षेमं-कल्याणं ते ददाति या सा । 'क्षणरुचि-रुचिरोरुचञ्चत्सटासङ्कटोत्कृष्टकण्ठोद्भटे' क्षणरुचिरुचिराभिः-विद्युद्दीप्तिभिः उरुभिश्चञ्चन्तीभिः सटाभिः सङ्कट-उत्कृष्टो यः कण्ठः तेनोद्भटे-कराले । सिंहस्य विशेषणमेतत् । 'संस्थिते !' निषण्णे ! । 'भव्यलोकं' भव्यजनम् । 'त्वं' भवन्ती । 'अम्ब !' मातर् ! । 'अम्बिके !' अम्बादेवि ! । 'परम्' उत्कृष्टम् । 'अव' रक्ष । 'सुतरां' अत्यर्थम् । 'गजारौ' केसरिणि । 'असन्ना' अखिन्ना । 'सितारातिभा' आरशब्देन रीति-कांगारकश्चोच्यते सितस्य-तनूकृतस्यारस्य वा अतिशयेन भा-दीप्तिर्यस्याः सा । 'राजिते' भ्राजिते । 'भासि' दीप्तिविषये । 'नीहारतारावलक्षे' नीहारं-हिमं तारा-नक्षत्राणि तद्वद् वलक्षे-धवले । 'अमदा' मदरहिता । हे अम्बिके ! गजारौ नीहारतारावलक्षे संस्थिते सुतरां त्वं भव्यलोकं अवेति सम्बन्धः ।

इति श्रीमहाकविधनपालेन कृता शोभनचतुर्विंशतिकाया वृत्तिः समाप्ता ।। ४ । २४ । ९६ ।।

आसनाम्भोरुहभ्राज-दक्षाक्षिप्राऽऽशु भासिता ।
शान्तिदेवी मुदे स्ताद् वो, दक्षा क्षिप्राशुभा सिता ॥ १ ॥

(६)

अवचूरिः

हे सवेगनतदेववधूजनस्तनपीठीषु लुठतां तारहाराणां स्फुरद्रश्मिभिः सारे-कर्बुरे क्रमाम्भोरुहे-चरणकमले यस्यास्तस्याः संबोधनम् । 'परमवसुतराङ्गजा' अतिशयेन परमवसू-परमतेजसौ अङ्गजौ-पुत्रौ यस्याः सा । रावेण-ध्वनिना सम्यग् नाशितः-अदर्शनं नीतः अरातिभारः-शत्रुवर्गो यया सा । अजिते । - अपराभूते ! । भासिनी-भासनशीला । हारतारा-हारोज्ज्वला । बलं क्षेमं च ददाति या । सिंहे कथंभूते ? ! क्षणरुचिरुचिराभिः-विद्युद्दीप्तिभिरिव रुचिराभिः उर्वीभिः चञ्चन्तीभिः सटाभिः संकट उत्कृष्टो यः कण्ठस्तेनोद्भटे । हे अम्ब !-मातः ! । हे अम्बिके ! देवि! । परं-उत्कृष्टमव-रक्ष। सुतराम् अत्यर्थम् । गजारौ-सिंहे असन्ना-अखिन्ना संस्थिता । शितस्य-तनूप्रकृतस्य आरस्येव-पित्तलस्येव अतिशयेन भा यस्याः सा । राजिते-भ्राजिते । भासमानहिमनक्षत्रधवले । अमदा-मदरहिता । हे अम्बिके ! सिंहे संस्थिते ! सुतरां त्वं भव्यलोकमवेति संबन्धः ॥ ४ । २४ । ९६ ॥

इति श्रीमहाकविशोभनमुनिप्रणीता सावचूरिश्चतुर्विंशतिजिनस्तुतिः ।



પૂ. મુનિરાજશ્રી
દ્વારા સર્જિત સાહિત્ય

* **લિખિત :**
  - સિદ્ધાંતોના ધનુર્ધારી .... અપ્રાપ્ય
  - નહિ જોઇએ, ૨૬૦૦ની રાષ્ટ્રીય ઉજવણી .... અપ્રાપ્ય
  - ૬ માસથી અધિક ઉપવાસ જૈન શાસનને માન્ય ખરાં ? .... અપ્રાપ્ય
  - ૨૬૦૦નું ઝેરીલું આક્રમણ .... અપ્રાપ્ય
  - મારી બાર પ્રતિજ્ઞાઓ (ત્રણ આવૃત્તિ) .... રૂ. ૧૦/-
    (શ્રાવકના ૧૨ વ્રતની ટૂંકી અને સરળ સમજ)
  - હાંકી કાઢો, ગિરનાર રોપ-વેને .... અપ્રાપ્ય
  - સીમંધર સ્વામીની ભાવયાત્રા (ત્રણ આવૃત્તિ) .... રૂ. ૧૦/-
  - ભાવાચાર્ય વંદના (બે આવૃત્તિ) .... રૂ. ૫/-
  - જપો નામ, સૂરિરામ .... રૂ. ૬૦/-
  - શ્રદ્ધાંજલિ .... સાદર...
  - સમેતશિખરની ભાવયાત્રા .... રૂ. ૧૫/-
  - નૂતન અરિહંત વંદનાવલી .... રૂ. ૫/-
  - પૂર્વ પુરુષોની અંતિમ આરાધના .... સાદર...
  - કેટલાંક પૂર્વજન્મો .... સાદર...
  - અષ્ટાપદતીર્થની ભાવયાત્રા .... રૂ. ૧૦/-
  - કેટલાંક પૂર્વજન્મો-૨ .... રૂ. ૨૫/-
  - કેટલાંક પૂર્વજન્મો-૩ .... સાદર...
* **પ્રાચીન ગ્રંથ + નૂતન ટીકા :**
  - **आत्मनिंदाद्वात्रिंशिका + तत्त्वरुचि टीका** + અન્વય + શબ્દાર્થ + ભાવાર્થ
  - **रत्नाकरपञ्चविंशतिका + मङ्गलमाला टीका** + અન્વય + શબ્દાર્થ + ભાવાર્થ
* **અનુવાદિત :**
  - તપા-ખરતર ભેદ .... રૂ. ૫૦/-
* **સંપાદિત :**
  - સ્તુતિનંદિની .... રૂ. ૬૫/-
  - ગાયું, માનતુંગ સૂરિએ... .... અપ્રાપ્ય
  - **धन्यचरित्रम्** (ગદ્ય) પ્રત .... રૂ. ૧૦૦/-
  - **कादम्बरी** - ૧ અને ૨ (સંસ્કૃત વોલ્યુમ) .... રૂ. ૩૬૫/-
  - શોભન સ્તુતિ (અન્વય-અનુવાદ સાથે) .... રૂ. ૨૦૦/-
  - **शोभनस्तुति-वृत्तिमाला** (૫ ટીકા + ૧ અવચૂરિ સહિત) .... રૂ. ૪૦૦/-
* **સૂચના :**

પ્રાપ્ય પુસ્તકો / ગ્રંથો પૂ. સાધુ-સાધ્વીજી ભગવંતોને તેમજ જ્ઞાનભંડારને ભેટ આપવામાં આવે છે. જેમને ખપ હોય તેમણે એક P.C. કુસુમ-અમૃત ટ્રસ્ટ, વાપીના સરનામે લખી પુસ્તક મંગાવી લેવા.





Tejas Printers
AHMEDABAD M. 98253 47620